Authoritative, a. प्रामाणिक: -की -कं, प्रमाणधारी -रिणी -रि (न्), वैधिक: -की -कं, आज्ञारिक: -की -कं, शासनानुरूप: -पा -पं.

Authoritatively, adv. प्रमाणतस् ind., प्रमाणानुसारेण, विधिवत्, आज्ञानुरूपं, शासनात्.

Authority, s. (Weight of testimony, credit) प्रमाणं, प्रामाण्यं.—(Power, influence, control) शक्ति: f., प्रभाव:, वशं.—(Dominion) ऐश्वर्यं, राज्यं, प्रभुत्वं.—(Weight) गुरुत्वं, गौरवं.—(Credibility) श्रद्धेयता.—(Legal power, title) अधिकारित्वं, अधिकार: आधिपत्यं, नियोग:, कर्तृत्वं, प्रभुत्वं.—(A received text) शास्त्रवचनं निदर्शनं.—(Testimony) साक्ष्यं.—(A person invested with legal powers) अधिकारी m. (न्), नियोगी m. (न्), प्रभु: m.—(An authority, a guide) निर्देष्टा m. (ष्टृ); 'of little authority,' अल्पप्रमाण: -णा -णं, अल्पप्रभाव: -वा -वं; 'by his authority,' तस्य आज्ञया.

Authorship, s. निबन्धृत्वं, ग्रन्थकर्तृत्वं, कर्तृत्वं.

Auto-biography, s. स्ववृत्तान्तरचनं, आत्मचरित्ररचनं.

Autocrasy, s. साम्राज्यं, आधिराज्यं, राजाधिराज्यं, स्वाधिपत्यं, स्वाधीनता.

Autocrat, a. सम्राट् m. (ज्), अधिराज:, राजाधिराज:.

Autocratical, a. साम्राज्ययोग्य: -ग्या -ग्यं, स्वाधीन: -ना -नं.

Autograph, s. स्वहस्तलिखितं, स्वहस्ताक्षरं, स्वहस्तलेख:, स्वहस्तलिपि: f.

Automaton, s. स्वयं चलति यद् यन्त्रं, स्वयञ्चलन्ती मूर्त्ति:.

Autumn, s. शरद् f., शरदा, शरत्कालं, आश्वयुजावधि: m., वर्षावसान:.

Autumnal, a. शरत्कालीन: -ना -नं, शारदीय: -या -यं, शारद: -दी -दं, शारदी -दिनी -दि (न्).—(Produced in autumn) शरदिज: -जा -जं, शरदुद्भव: -वा -वं.

Auxiliary, s. सहाय:, सहकारी m. (न्), उपकारक:, उपकारी m. (न्), उत्तरसाधक:.

Auxiliary, a. उपकारक: -का -कं or -री -रिणी -रि (न्), सहकारी -रिणी -रि (न्), उत्तरसाधक: -का -कं.—(Auxiliary verb) गौणक्रिया.

To avail, v. a. (To assist) उपकृ (c. 8. -करोति -कर्त्तुं), हितं कृ, साहाय्यं कृ, अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).—(To avail one's self of) प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), उपयुज्.

To avail, v. n. (To be of use) सोपकार: -रा -रं or सफल: -ला -लं भू or अस्, हिताय or फलाय or लाभाय भू.

Avail, s. (Use) प्रयोजनं, उपयोग:.—(Profit) फलं, हितं, लाभ:, साफल्यं, अर्थ:.—(Aid) उपकार:.

Available, a. (To be used) प्रयोज्य: -ज्या -ज्यं, उपयोजनीय: -या -यं, प्रयोगी -गिनी -गि (न्).—(Profitable) सफल: -ला -लं, अर्थकर: -री -रं.

Avant-guard, s. सेनामुखं, ध्वजिनीमुखं, रणमूर्द्धा m. (न्), कासीर, अग्रव्यूह:, प्रथमपङ्क्ति: f.

Avarice, s. लोभ: अतिकाङ्क्षा, लालसा, लिप्सा.—(Desire of wealth) अर्थकाम:, वित्तेहा, धनतृष्णा, धनलोभ:.

Avaricious, a. लोभी -भिनी -भि (न्), लुब्ध: -ब्धा -ब्धं, लोभवान् -वती -वत् (त्), कृपण: -णा -णं, अर्थपर: -रा -रं, अर्थलुब्ध: -ब्धा -ब्धं, धनलुब्ध: -ब्धा -ब्धं, धनार्थी -र्थिनी -र्थि (न्), लिप्सु: -प्सु: -प्सु, मितम्पच: -चा -चं.

Avariciousness, s. कृपणत्वं, कार्पण्यं, लुब्धता, धनलुब्धता, अतिलोभ:.

Avariciously, adv. लोभेन-लोभात्, सलोभं, कार्पण्येन, कृपणं, अतिकाङ्क्षया.

Avaunt, interj. अपैहि, अपसर, दूरम् अपसर.

To avenge, v. a. प्रतिकृ (c. 8. -करोति -कुरुते -कर्त्तुं), परिष्कृ, प्रतिहिंस् (c. 1. -हिंसति, c. 7. हिनस्ति -हिंसितुं), प्रतीकारं or प्रतिहिंसां कृ.—(To punish) दण्ड् (c. 10. दण्डयति -यितुं).—(To wipe out a grudge) वैरं शुध् in caus. (शोधयति -यितुं).

Avenged, p. p. प्रतिकृत: -ता -तं, प्रतिहिंसित: -ता -तं, प्रतिहत: -ता -तं, निर्यातित: -ता -तं.—(Wiped out as a grudge) शोधित: -ता -तं.—(Punished) दण्डित: -ता -तं.

Avengement, s. प्रतीकार:, प्रतिक्रिया, प्रतिहिंसा, निर्यातनं, वैरशुद्धि: f.

Avenger, s. प्रतिहिंसक:, प्रतिहन्ता m. (न्तृ), प्रतीकारकर्त्ता m. (र्तृ), वैरशोधक.

Avenue, s. (An approach) पथ: आगम: द्वारं.—(An alley) [illegible]

तदृष्टिः f., मार्गे उभयतो रोपिता वृक्षश्रेणी.

To AVER, *v. a.* शपथेन or दिव्येन or दार्ढ्येन वद् (c. 1. वदति, वदितुं).

AVERAGE, *s.* (*Mean proportion*) मध्यस्थता, मध्यत्वं, मध्यं, मध्यमावस्था, समं.

AVERMENT, *s.* दृढवाक्यं, दृढवचनं, दृढोक्तिः *f.*, स्थिरवचनं.

AVERSE, *a.* विरक्तः -क्ता -क्तं, प्रतिकूलः -ला -लं, विपरीतः -ता -तं, विमतः -ता -तं, विमनीभूतः -ता -तं, द्वेषी -षिणी -षि (न्), वैरी -रिणी -रि (न्).—(*To be averse*) विरञ्ज् in pass. (-रज्यते), अपावृत् (c. 1. -वर्त्तते -वर्त्तितुं), प्रतीप (*nom.* प्रतीपायते).—(*Averting the face*) पराङ्मुखः -खी -खं, विमुखः -खी -खं.

AVERSELY, *adv.* निष्कामं, प्रतिकूलं, विपरीतं, विरक्तं, विरक्त्या.

AVERSENESS, AVERSION, *s.* वैरक्त्यं, विरक्तिः *f.*, निग्रहः, प्रतिकूलता, विमतिः *f.*, पराङ्मुखता, वैमुख्यं, वैपरीत्यं, अप्रियता, अप्रीतिः *f.*, द्वेष्यता. 'aversion to business,' कार्यप्रद्वेषः.

To AVERT, *v. a.* अपवृत् in caus. (-वर्त्तयति -यितुं), व्यावृत्, निवृत्, विनिवृत्, निवृ in caus. (-वारयति -यितुं), प्रतिवृ, अपनुद् (c. 6. -नुदति -नोत्तुं), व्यपानुद्, विमुखीकृ.

AVERTED, *p. p.* (*Having the face averted*) पराङ्मुखः -खी -खं, विमुखः -खी -खं, विमुखीकृतः -ता -तं, विमुखी -खिनी -खि (न्), पराचीनः -ना -नं.—(*Kept off*) निवारितः -ता -तं, व्यावृत्तः -त्ता -त्तं.

AVIARY, *s.* विहङ्गः, पञ्जरं, पिञ्जरं, वीतंसः, कपोतपालिका, पक्षिशाला, कुलायिका.

AVIDITY, *s.* अतिक्षुधा, गृध्नुता, गर्द्धः, अतिस्पृहा, कौतूहलं, लालसा, अतिलोभः.

AVOCATION, *s.* (*Calling aside, withdrawing*) अपकर्षणं, आकर्षः, अपहरणं.—(*Business that calls aside*) कार्यं, कर्म्म *n.* (न्), विकर्म्म *n.* (न्), व्यापारः, व्यवसायः.

To AVOID, *v. a.* वृज् in caus. (वर्जयति -यितुं), परिवृज्, विवृज्; परिहृ (c. 1. -हरति -ते -हर्त्तुं); प्रोज्झ् (c. 6. -उज्झति -उज्झितुं), हा (c. 3. जहाति, हातुं); त्यज् (c. 1. त्यजति, त्यक्तुं).

AVOIDABLE, *a.* (*To be avoided*) परिहरणीयः -या -यं, परिहर्त्तव्यः -व्या -व्यं, परित्याज्यः -ज्या -ज्यं, हेयः -या -यं, हातव्यः -व्या -व्यं, त्याज्यः -ज्या -ज्यं.

AVOIDANCE, *s.* त्यागः, परित्यागः, परिहारः, परिहरणं, प्रतिहरणं, वर्ज्जनं, प्रोज्झनं.

AVOIDED, *p. p.* परिहृतः -ता -तं, त्यक्तः -क्ता -क्तं, परित्यक्तः -क्ता -क्तं, विवर्ज्जितः -ता -तं, प्रोज्झितः -ता -तं.

To AVOUCH, *v. a.* (*To affirm*) दार्ढ्येन or स्थैर्येण or शपथेन वद् (c. 1. वदति, वदितुं).—(*To vindicate, assert any thing in favour of another*) परार्थं प्रतिवद्.

To AVOW, *v. a.* (*To confess*) स्वीकृ, अङ्गीकृ, उररीकृ, अनुभाष् (c. 1. -भाषते -भाषितुं).—(*To declare openly*) प्रकाशं or व्यक्तं वद् (c. 1. वदति, वदितुं).

AVOWED, *p. p.* स्वीकृतः -ता -तं, अङ्गीकृतः -ता -तं, व्यक्तोदितः -ता -तं.

AVOWEDLY, *adv.* प्रकाशं, व्यक्तं, प्रकटं, असगूढं.

To AWAIT, *v. a.* अपेक्ष् (c. 1. -ईक्षते -ईक्षितुं), उदीक्ष्, प्रतीक्ष्; प्रतिपाल् (c. 10. -पालयति -यितुं), वद्दृश् (c. 1. -पश्यति -द्रष्टुं), अपेक्षां कृ.

To AWAKE, AWAKEN, *v. a.* जागृ in caus. (जागरयति -यितुं), बुध् in caus. (बोधयति -यितुं), प्रबुध्, प्रतिबुध्, विबुध्, निद्रां भञ्ज् (c. 7. भनक्ति, भंक्तुं), निद्राभङ्गं कृ.—(*To incite*) उत्था in caus. (-थापयति -यितुं), उत्सह् in caus. (-साहयति -यितुं), प्रोत्सह्, उत्तिज् (c. 10. -तेजयति -यितुं).

To AWAKE, *v. n.* जागृ (c. 2. जागर्त्ति, जागरितुं), प्रजागृ; बुध् (c. 4. बुध्यते, बोद्धुं), अनुबुध्, प्रबुध्, प्रतिबुध्, विबुध्, प्रतिसंबुध्.

AWAKE, *a.* जागरः -रा -रं, प्रबुद्धः -द्धा -द्धं, प्रतिबुद्धः -द्धा -द्धं, विनिद्रः -द्रा -द्रं, प्रजागरः -रा -रं, उन्निद्रः -द्रा -द्रं; 'that which keeps one awake at night,' रात्रिजागरदः.

AWAKENED, *p. p.* जागरितः -ता -तं, प्रबोधितः -ता -तं, निद्राभङ्गः -ङ्गा -ङ्गं.

AWAKENING, *s.* प्रबोधनं, प्रबोधः, निद्राभञ्जनं.

To AWARD, *v. a.* दा in caus. (दापयति -यितुं), तीर् (c. 10. तीरयति -यितुं).

AWARD, *s.* (*Judgment, sentence*) विचारः, निर्णयः, निष्पत्तिः *f.*, तीरणं, समाधानं, दण्डः, आज्ञा.

AWARDED, *p. p.* दापितः -ता -तं, तीरितः -ता -तं.

AWARDER, *s.* विचारकः, निर्णेता *m.* (तृ), दापकः.

AWARE, *a.* (*Excited to consciousness*) विज्ञापितः -ता -तं, बोधितः -ता -तं.—(*Knowing*) वेदी -दिनी -दि (न्), ज्ञः -ज्ञा -ज्ञं in comp.—(*Vigilant, attentive*) सावधानः -ना -नं, जागरः -रा -रं, -री -रिणी -रि (न्); 'he is aware,' वेत्ति, जानाति.

AWAY, *a.* and *adv.*, expressed by the *preposition* अप.—(*Absent*) परोक्षः -क्षा -क्षं, स्थानान्तरगतः -ता -तं, अनुपस्थितः -ता -तं, अविद्यमानः -ना -नं.—(*Far away*) दूरस्थः -स्था -स्थं, दूरस्थायी -यिनी -यि (न्).—(*Come along*) यातु.—(*Begone!*) अपेहि, अपसर, दूरम्; 'away with this fear,' अलम् अनया शङ्कया.

AWE, *s.* सादरः, सम्भ्रमः, विस्मयः, त्रासः, आतङ्कः, आदरप्रयुक्तं भयं.—(*To stand in awe of*) भी (c. 3. बिभेति, भेतुं), त्रस् (c. 4. त्रस्यति, त्रसितुं) with abl., आदृ (c. 6. -द्रियते) with acc.

To AWE, *v. a.* (*To strike terror into*) भी in caus. (भापयति or भीषयति -यितुं), त्रस् in caus. (त्रासयति -यितुं), व्याकुलीकृ, आकुलीकृ, सम्भ्रमेण उपहन् (c. 2. -हन्ति -हन्तुं).

AWE-STRUCK, *a.* सम्भ्रान्तः -न्ता -न्तं, विस्मयाकुलः -ला -लं, भयविह्वलः -ला -लं.

AWFUL, *a.* घोरः -रा -रं, दारुणः -णा -णं, भैरवः -वा -वं, भीषणः -णा -णं, भयङ्करः -रा -रं, भयानकः -का -कं.—(*Worshipful*) आदरणीयः -या -यं, आदृत्यः -त्या -त्यं, पूज्यः -ज्या -ज्यं.

AWFULLY, *adv.* दारुणं, घोरं, यथा सम्भ्रम उत्पद्यते तथा.

AWFULNESS, *s.* घोरता, दारुणता, भीषणं, भैरवं, भीष्मं.

AWHILE, *adv.* कियत्कालं, किञ्चित्कालं, अल्पकालं, इयत्कालं, मुहूर्त्तं, क्षणं, यत्किञ्चित्समयं.

AWKWARD, *a.* (*Clumsy, unskilful*) अदक्षः -क्षा -क्षं, अनाप्तः -प्ता -प्तं, अपटुः -टुः -टु, अक्षिप्रः -प्रा -प्रं, अविज्ञः -ज्ञा -ज्ञं, अकृती -तिनी -ति (न्).—(*Inelegant*) विरूपः -पी -पं, स्थूलः -ला -लं.

AWKWARDLY, *adv.* अपटु, अदक्षं, अक्षिप्रं, अनाप्तं.

AWKWARDNESS, *s.* (*Unskilfulness*) अपाटवं, अपटुता, अदक्षत्वं, अक्षिप्रत्वं.—(*Inelegance*) स्थूलता, वैरूप्यं.

AWL, *s.* आरा, चर्म्मप्रभेदिका, आविधः, वेधनिका.

AWN, *s.* (*A beard of corn*) शूकः -कं, धान्यशूकं, किंशारुः *m.*

AWNING, *s.* वितानं, वितानकं, आच्छादनं, उल्लोचः.

AWRY, *adv.* तिरस्, साचि, तिर्य्यक्, कुटिलं, जिह्मं, अनृजु.—(*Perversely*) विपरीतं, प्रतिकूलं, विलोमं.

AXE, *s.* टङ्कः, कुठारः, परशुः *m.*, परश्वधः, छिदिः *f.*, वृक्षभिद् *f.*, वृक्षभेदी *m.* (न्), स्वधितिः *m.*

AXIOM, *s.* तत्त्वं, सूत्रं, सिद्धान्तः, आदेशः, वचनं.

AXIOMATIC, *a.* सौत्रः -त्री -त्रं, सिद्धान्ती -न्तिनी -न्ति (न्).

AXIS, *s.* अक्षः, ध्रुवः, मेरुः *m.*

AXLE, AXLE-TREE, *s.* अक्षाग्रं, अक्षदण्डः.

AY, *adv.* तथेति, एवं, द्रूप- आम्.

AYE, *adv.* सर्वदा, सदा, नित्यं, नित्यदा, शश्वत्, सततं, शाश्वती समा

Azure, a. नील -ला -लं, नीलवर्णः -र्णा -र्णं, आकाशवर्णः -र्णा -र्णं.

B.

To Baa, v. n. उ (c. 1. अवते, ओतुं), मेषवत् or छागवत् शब्दं कृ.

To Babble, v. n. (*To prattle like a child*) बालवत् जल्प् (c. 1. जल्पति, जल्पितुं).—(To talk idly) जल्प्.—(To tell secrets) रहस्यं प्रकाश् in caus. (-काशयति -यितुं) or विख्या, in caus. (-ख्यापयति -यितुं), रहस्यभेदं कृ.

Babble or babbling, s. जल्पः, जल्पनं, वावदूकता, बालभाषणं, वाचालता.

Babbler, s. वाचालः, जल्पकः, उपजल्पी m. (न्), वाचाटः, जल्पाकः, वावदूकः.

Babe, baby, s. बालः -ला, बालकः, शिशुः m., शावकः.—(At the breast) स्तनन्धयः, स्तनपः m. (पा), क्षीरपः.

Babel, s. (Confusion) सङ्करः, साङ्कर्य्यं, तुमुलं, कोलाहलः, कालकीलः.

Baboon, s. वानरः, कपिः, मर्कटः, प्लवङ्गः, प्लवगः, शाखामृगः, वलीमुखः.

Babyhood, s. बाल्यं, बालत्वं, बालभावः, शैशवं.

Babyish, a. बालकीयः -या -यं, बालिशः -शा -शं, बालेयः -यी -यं.

Bacchanalian, s. पानरतः, पानप्रसक्तः, मद्यपीतः, मद्यप्रियः, मत्तः.

Bachelor, s. (A man unmarried) अविवाहितः, अकृतदारः, अकृतदारसङ्ग्रहः, अकृतविवाहः.—(One who takes his first degree) विद्यालये पूर्व्वपदप्राप्तः.

Back, s. पृष्ठं, विग्रहशरं; 'to turn the back, avert the face,' पराङ्मुखः -खी -खं or पराचीनः -ना -नं भू. 'to turn back, away from,' अपवृत् (c. 1. -वर्त्तते -वर्त्तितुं), विनिवृत्, अपावृत्, निवृत्, 'turned back,' विपरिवर्त्तितः -ता -तं, 'at one's back, behind the back,' पृष्ठतस्; 'behind one's back, in one's absence,' परोक्षे.—(The hinder part) पृष्ठदेशः, पश्चाद्देशः, पश्चाद्भागः, पृष्ठं, नितम्बः, 'the back of the hand,' करपृष्ठं.

Back, adv. (To the place whence one came) commonly expressed by प्रति prefixed; as, 'to go back,' प्रतिगम्, 'come back,' प्रत्यावृत्तः -त्ता -त्तं, पुनरागतः -ता -तं; 'brought back,' प्रत्यानीतः -ता -तं.—(Backward from the present station) expressed by परा, प्रति, or पश्चात् prefixed; as, 'to beat back,' पराहन्, प्रत्याहन्.—(Again) expressed by पुनर्, प्रति, or अनु prefixed, as, 'to give back,' प्रतिदा.—(Kept back) निगृहीतः -ता -तं, निवारितः -ता -तं; 'in the back-ground,' दूरस्थः -स्था -स्थं, निभृते.

To Back, v. a. (To mount a horse) आरुह् (c. 1. -रोहति -रोढुं), अधिरुह्, समारुह्.—(To support, justify) रक्ष् (c. 1. रक्षति, रक्षितुं), अभिरक्ष्, संरक्ष्, पक्षपातं कृ, उपकृ, सङ्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).—(To impel backwards) पराणुद् (c. 6. -णुदति -णोत्तुं), विपरीतं प्रणुद्.

To Back, v. n. (To go backwards) अपक्रम् (c. 1. -क्रामति, c. 4. -क्राम्यति, -क्रमितुं), अपक्रम्, परावृत् (c. 1. -वर्त्तते -वर्त्तितुं).

To Backbite, v. a. पृष्ठमांसं खाद् (c. 1. खादति, खादितुं).—(To slander) परिवद् (c. 1. -वदति -ते -वदितुं), अपवद्.

Backbiter, s. पृष्ठमांसादः, परोक्षे अपवादकः, परिवादकः, पिशुनः.

Backbiting, s. परिवादः, अपवादः, पिशुनवाक्यं.

Backbone, s. कशेरुका, पृष्ठवंशः, पृष्ठास्थि n., रीढकः.

Backdoor, s. पक्षद्वारं, अन्तर्द्वारं, उपद्वारं, प्रच्छन्नं, पक्षकः, खडक्किका.

Backgammon, s. चर्म्मपट्टिकाक्रीडा.—(Backgammon-board) चर्म्मपट्टिका, अष्टापदं, चक्रः.

Backroom, s. अन्तर्गृहं, अन्तःशाला, उपरोधकं, उपशाला.

Backside, s. (The hinder part of any thing) पृष्ठदेशः, पश्चाद्देशः, पश्चाद्भागः, अधोदेशः.—(The hinder part of any animal) नितम्बः, पृष्ठं.

To Backslide, v. n. स्वधर्म्मात् परिभ्रंश् (c. 4. -भ्रश्यति -भ्रंशितुं) or च्यु (c. 1. च्यवते, च्योतुं), स्वधर्म्मं त्यज् (c. 1. त्यजति, त्यक्तुं).

Backslider, s. धर्म्मच्युतः, धर्म्मभ्रष्टः, स्वधर्म्मत्यागी m. (न्), उन्मार्गगामी m. (न्), धर्म्मशासकः.

Backstairs, s. उपसोपानं, अन्तःसोपानं, पक्षसोपानं, प्रच्छन्नसोपानं.

Backward or backwards, adv. Expressed by परा or प्रति prefixed; पश्चात्, प्रतीपं, विपरीतं, अपवर्ट, 'to walk backwards and forwards,' गतागतानि or प्रतिगतागतं or गमनागमने or यातायाते कृ.

Backward, a. (Unwilling) प्रतीपः -पा -पं, अनिच्छः -च्छा -च्छं, असम्मतः -ता -तं, अनिच्छकः -का -कं.—(Sluggish) मन्दः -न्दा -न्दं, अलस -सा -सं, विलम्बी -म्बिनी -म्बि (न्).—(Dull of apprehension) मन्दमतिः -तिः -ति.—(Late, after its time) अतीतकालः -ला -लं, अतिक्रान्तकालः -ला -लं, दीर्घकालीनः -ना -नं, दीर्घपाकः -का -कं, दीर्घपाकशीलः -ला -लं.

Backwardness, s. (Unwillingness) अनिच्छा, अस्वीकारः, असम्मतिः f.—(Sluggishness) आलस्यं, मान्द्यं, विलम्बत्वं.—(Dulness) मन्दमतिता.—(Lateness) दीर्घकालीनता, अतीतकालत्वं, दीर्घता, दीर्घपाकता.

Bacon, s. वल्लूरं, शूकरस्य शुष्कमांसं.

Bad, a. (Vicious, corrupt) पापः -पा -पं, दुष्टः -ष्टा -ष्टं, अधमः -मा -मं, नीचः -चा -चं, खलः -ला -लं, कुत्सितः -ता -तं, कदर्य्यः -र्य्या -र्य्यं.—(Not good) अभद्रः -द्रा -द्रं, असाधुः -धुः -धु, अप्रशस्तः -स्ता -स्तं, अभद्रः -द्रा -द्रं, असत् -सती -सत् (त्).—(Worthless) निर्गुणः -णा -णं.—(Hurtful, unwholesome) हिंस्रः -स्रा -स्रं, अहितः -ता -तं, अपथ्यः -थ्या -थ्यं, रुजाकरः -रा -रं.—(Sick) रोगी -गिणी -गि (न्), व्याधितः -ता -तं.—(Sick of) आतुरः -रा -रं, आर्त्तः -र्त्ता -र्त्तं in comp.—(Unfortunate) विपन्नः -न्ना -न्नं, दुर्गतः -ता -तं. 'Bad,' as a general word, is often expressed by दुर्, कु, का, or sometimes by वि or अप prefixed; as, 'a bad road,' दुरध्वः, कुपथं, कदध्वा m. (न्), विमार्गः; 'a bad man,' दुर्जनः, दुराचारः, 'bad weather,' दुर्दिनं; 'bad food,' कदन्नं; 'bad thing,' अपद्रव्यं; 'bad conduct,' दुर्णयः, कुकर्म्म n. (न्), अपकर्म्म n. (न्); 'bad policy,' अपनीतिः f.

Badge, s. चिह्नं, लिङ्गं, व्यञ्जनं, लक्षणं.—(Badge of rank) पदचिह्नं, पदसूचकं चिह्नं.

Badger, s. गर्त्तवासी जन्तुविशेषः.

Badinage, s. लघुवाक्यं, लघूक्तिः f., हास्यवाक्यं, नर्म्म n. (न्), ठट्ठरी.

Badly, adv. दुष्टु, दुष्टं, अभद्रं. Often expressed by दुर्, कु, अप prefixed; as, 'badly managed,' दुर्णीतः -ता -तं; 'badly shaped,' कुरूपः -पी -पं; 'badly-behaved,' दुःशीलः, कुशीलः, 'badly done,' दुष्कृतः -ता -तं, अपकृतः -ता -तं.

Badness, s. दुष्टता, दौष्ट्यं, निर्गुणत्वं, नीचता, अभद्रता, कदर्य्यत्वं.—(Of character) दुरात्मता, दुराचारत्वं.

To Baffle, v. a. (To make ineffectual) मोघीकृ, निष्फलय् (nom. निष्फलयति -यितुं), खण्ड् (c. 10. खण्डयति -यितुं), व्यर्थीकृ, प्रतिहन् (c. 2. -हन्ति -हन्तुं), मुधा कृ, वृथा कृ.—(To defeat) पराभू (c. 1. -भवति -भवितुं), पराजि (c. 1. -जयति -ते -जेतुं).

Baffled, p. p. प्रतिहतः -ता -तं, मोघीकृतः -ता -तं, भग्नोद्यमः -मा -मं, प्रति-

बद्ध: -द्धा -द्धं, भग्नोद्यम: -मा -मं, खण्डित: -ता -तं, मग्नाशः -शा -शं, पराजित: -ता -तं

BAG, *s.* शाकपुट: -टं, स्यूत:, स्योन:, कोष:, आधार:.

To BAG, *v. a.* (To put into a bag) शाकपुटे or स्यूते or कोषे निधा (c. 3. -दधाति -धातुं) or निविश् in caus (-वेशयति -यितुं).—(To make tumid) श्वि in caus. (श्वाययति -यितुं).

To BAG, *v. n.* (To swell out like a bag) स्यूतवत् लम्ब् (c. 1. लम्बते, लम्बितुं), प्रलम्ब्, or पृ in pass. (पूर्यते), or श्वि (c. 1. श्वयति, श्वयितुं).

BAGATELLE, *s.* स्वल्पविषय:, स्वल्पमूल्यद्रव्यं, क्षुद्रद्रव्यं, क्षुद्रविषय:.

BAGGAGE, *s.* (The furniture of an army) सामग्री -ग्र्यं, भार:, उपकरणं, परिच्छद:.—(A worthless woman) पुंश्चली *f.*, वेश्या, बन्धकी.

BAGNIO, *s.* (A house for bathing) स्नानागारं, गात्रमार्जनशाला.—(A brothel) वेश्यालय:.

BAIL, *s.* (Security for one's appearance) दर्शनप्रतिभू: *m.*, दर्शनप्रातिभाव्यं, प्रतिनिधि: *m.*, प्रतिभू: *m.*, प्रातिभाव्यं, पारिभाव्यं, लग्नकः, न्यास:, सन्नाधि: *m.*, बन्धक:, नृपालम्बुक:.—(The person who gives the security) प्रतिनिधि: *m.*, प्रतिभू: *m.*, लग्नकदायी *m.* (न्)

To BAIL, *v. a.* (To give bail for another) प्रतिनिधि: or प्रतिभू: भू, लग्नकं दा (c. 3. ददाति, दातुं).

BAILABLE, *a.* यो लग्नकं दत्त्वा मोक्तुं शक्यते or शक्य:.

BAILIFF, *s.* (An officer who arrests) आसेद्धा *m.* (द्धृ), आसेधकर्त्ता *m.* (र्तृ), ग्राहक:, पाशिक:, दण्डनायक:.—(A steward) कार्याधीश:.

BAILMENT, *s.* न्यासार्पणं.

BAIRN, *s.* बालः, बालक:, शिशु: *m.*

To BAIT, *v. a.* (To put meat on a hook to tempt animals) मत्स्यादिग्रहणार्थं बडिशे आमिषादि निधा (c. 3. -दधाति -धातुं), or निविश् in caus. (-वेशयति -यितुं).—(To give food to horses on the road) मध्यमार्गे यवादिना वाहनानि भुज् in caus. (भोजयति -यितुं), यानश्रान्तानि वाहनानि विश्रम् in caus. (-श्रमयति -यितुं)—(To incite dogs to attack a bull) वृषभम् आक्रमितुं कुक्कुरान् प्रचुद् in caus. (-चोदयति -यितुं)

To BAIT, *v. n.* (To stop on the road for refreshment) मध्यमार्गे भोजनार्थं विश्रम् (c. 4. -श्राम्यति -श्रमितुं).

BAIT, *s.* मत्स्यग्रहणार्थं यद् आमिषं बडिशे निवेश्यते.—(Temptation) प्रलोभनं.

BAIZE, *s.* ऊर्णा, कम्बल:, ऊर्णामयो वस्त्रविशेष:

To BAKE, *v. a.* आपाके or कन्दौ or चुल्ल्यां पच् (c. 1. पचति, पक्तुं) or तप् (c. 1. तपति, तप्तुं, c. 10. तापयति -यितुं) or भ्रस्ज् (c. 6. भृज्जति, भ्रष्टुं), कान्दवीकृ.

To BAKE, *v. n.* (To be heated) तप् in pass. (तप्यते), पच् in pass. (पच्यते).

BAKED, *p. p.* कान्दव: -वा -वं, पक्व: -क्वा -क्वं, कन्दुपक्व: -क्वा -क्वं.

BAKEHOUSE, *s.* आपाक:, कन्दु: *m. f.* पूपागारं, पूपशाला.

BAKE-MEATS, *s.* कान्दवं, कान्दवानं, दर्शं, पक्वान्नं, आपूपिकं, शाष्कुलिकं.

BAKER, *s.* आपूपिक:, कान्दविक:, भेदक्कृत्, भक्ष्यकार:.

BAKING, *s.* कन्दुपचनं, चुल्लिपचनं, पचनं, तपनं, तापनं.

BALANCE, *s.* (Scales) तुला, मापन:, मापनदण्डं, तौलं, तौलदण्डं.—(The act of comparing two things in the mind) विवेचनं, विकल्पनं, विमर्शनं, उपमानं.—(That which is wanting to make two parts of an account even) अवशेष:, शेषं, शेषभाग:, अधिकांश:, मूलांश:.—(Equipoise) तुल्यता, भारतुल्यता.

To BALANCE, *v. a.* (To weigh in a balance) तुल् (nom. तुलयति -यितुं), तुल् (c. 10. तुलयति).—(In the mind) विकॢप् in caus (-कल्पयति -यितुं), विमृश् (c. 10. -मर्शयति -यितुं)—(To equipoise) समीकृ, तुल्यभारं -रां -रं कृ.—(To regulate an account) शुध् in caus. (शोधयति -यितुं), समीकृ, अपलयनं कृ, विगणनं कृ.

To BALANCE, *v. n.* (To hesitate, fluctuate) दोल (nom. दोलायते -यितुं), विकॢप् (c. 1. -कल्पते -कल्पितुं)—(To be equipollent) समीभू, तुल्यीभू.

BALANCED, *p. p.* तुलित: -ता -तं, समीकृत: -ता -तं, तुल्यभार: -रा -रं.—(As an account) शोधित: -ता -तं, अपनीत: -ता -तं, विगणित: -ता -तं

BALARÁMA, *s.* (A celebrated demigod, half-brother to Krishńa and the third of the Rámas; and considered to be the eighth avatár of Vishńu) बलराम:, बलदेव:, राम:.—As elder brother of Krishńa) अच्युताग्रज:.—(As armed with a plough-share) हलायुध:, हलभृत् *m.*, हली *m.* (न्), संकर्षण: सङ्कर्षण:.—(As carrying a pestle-like club) मुषली *m.* (न्)—(As having the palm for a banner) तालध्वज:, तालाङ्क:.—(As diverting the stream of the Yamuná) कालिन्दीभेदन:.—(As dressed in blue) नीलाम्बर:.—(As husband of Revatí) रेवतीरमण:.—(As killer of a certain demon) प्रलम्बघ्न:.—(As guardian of Káma) कामपाल:

BALCONY, *s.* वरण्ड:, इन्द्रकोष:, प्रघाण: -णं, निष्काश:, वितर्द्धि: *f.* or -र्द्धी.

BALD, *a.* (Without hair) मुण्ड: -ण्डा -ण्डं, मुण्डित: -ता -तं, खल्वाट: -टा -टं, विकेश: -शी -शं, केशहीन: -ना -नं.—(Without natural covering) अनावृत: -ता -तं, विवृत: -ता -तं, नग्न: -ग्ना -ग्नं.—(Unadorned, inelegant) असंस्कृत: -ता -तं, अपरिष्कृत: -ता -तं, असभ्य: -भ्या -भ्यं.—(As style) अलङ्कारहीन: -ना -नं, अपभ्रंश: -शा -शं.

BALDERDASH, *s.* (Any thing jumbled together) प्रकीर्णकं.—(Nonsense) अनर्थकवाक्यं, आलस्यवचनं, वृथाकथा.

BALDNESS, *s.* मौण्ड्यं, मुण्डता, अकेशत्वं.—(Inelegance) असभ्यता.

BALD-PATED, *a.* मुण्डितशिरा: -रा: -र: (स्), मुण्डमस्तक: -का -कं, नग्नमस्तक: -का -कं.

BALDRICK, *s.* (A girdle) मेखला, काञ्ची.—(The zodiac) राशिचक्रं, राशिमण्डलं, लग्नमण्डलं, ज्योतिश्चक्रं.

BALE, *s.* भाण्डं, भाण्डं, द्रव्यकूर्चं, पोटलिका, द्रव्यपोटली, भार:.

To BALE, *v. a.* (To make up into a bale) भाण्डं कृ, द्रव्याणि कूर्चीकृ.(To bale out water) अञ्जलिना or द्रोण्या जलम् उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or उत्तुल् (c. 10. -तोलयति -यितुं).

BALEFUL, *a.* (Full of misery) क्लेशी -शिनी -शि (न्), दु:खी -खिनी -खि (न्), सशोक: -का -कं, शोकान्वित: -ता -तं.—(Destructive) नाशी -शिनी -शि (न्), नाशक: -का -कं, प्राणहर: -रा -रं, घातक: -का -कं, हिंस्र: -स्रा -स्रं.

BALEFULLY, *adv.* सशोकं, सक्लेशं, दु:खेन, यथा हिंसा जायते तथा.

BALING-VESSEL, *s.* सेकपात्रं, सेचनं, सेक्तुं, अब्धि *n.*, अब्धि: *f.*, अम्बुसेचनी, द्रोणि: *f.* -णी, काष्ठाम्बु:, काष्ठकुद्दाल:, काष्ठाम्बुवाहिनी *f.*

BALK, *s.* (A ridge of land left unploughed) सेतु: *m.*

To BALK *v. a.* (To frustrate, disappoint) वञ्च् (c. 10. वञ्चयति -यितुं), प्रतिहन् (c. 2. -हन्ति -हन्तुं), वृथा कृ, मुधा कृ, भग्नाश: -शा -शं कृ, मोघाश: -शा -शं कृ, व्यर्थीकृ, मोघीकृ, पच् in caus. (वञ्चयति -यितुं).

BALKED, *p. p.* प्रतिहत: -ता -तं, भग्नोद्यम: -मा -मं, खण्डित: -ता -तं, वञ्चित: -ता -तं, परिभ्रामित: -ता -तं, विफलीकृत: -ता -तं

B n ry वाह्लीक

B A गोलः -लं. मण्डलं, परिमण्डलं, गोलकः, वर्तुलः, पिण्डः, पिण्डं —(The ball of the earth) भूगोलः, भूमण्डलं. —(For playing) कन्दुकः, गुडः, गेन्दुः m., गेन्दुकः, गिरिः m.—(A dancing party) नृत्यकीर्त्तनं, नृत्यक्रीडा.—(A ball of thread) सूत्रकोषं.—(Ball of the eye) अक्षिगोलः —(Ball-room) नृत्यस्थानं, रङ्गशाला, वासकक्षी f.

To BALL, *v. a.* (To make into a ball) वर्तुलीकृ, गोलीकृ.

BALLAD, *s.* (A song) गीतं, गानं, गीतिः f., सङ्गीतं.

BALLAD-SINGER, *s.* गायकः, गाथाकारः, गाथकः, गाता m. (तृ).

BALLAST, *s.* नावः अधोभागे स्थापितो भारः, पोतस्थिरीकरणाय तदधोभागे यत् प्रस्तरवालुकादि द्रव्यं निक्षिप्यते, स्थैर्यद्रव्यं.

To BALLAST, *v. a.* नौकायाः स्थिरीकरणाय तदधोभागे भारं स्था in caus. (स्थापयति -यितुं), स्थिरीकृ.

BALLOON, *s.* आकाशयानं, व्योमयानं, आकाशवर्त्मना गमनार्थं विमानं.

BALLOT, *s.* (A ball or ticket used in voting) गुटिका, गुलिका, काकिणी f., अपर्दकः, स्वीकृतास्वीकृतचिह्नं —(The act of voting by ballot) गुटिकां निभृतं पातयित्वा स्वीकृतास्वीकृतज्ञापनं or मतामतसूचनं.

To BALLOT, *v. n.* स्वीकृतास्वीकृतज्ञापनाय गुटिकां निभृतं पत् in caus. (पातयति -यितुं).

BALM, *s.* (The juice of a shrub) गुग्गुलुः m.—(That which alleviates) प्रशमनं, शान्तिः f., उपशान्तिः f., वेदनाशान्तिः f.

BALMY, *a.* (Having the qualities of balm) गुग्गुलुगुणोपेतः -ता -तं. —(Soothing) उपशमकः -का -कं, उपशमी -मिनी -मि (न्). —(Fragrant) सौगन्धिकः -की -कं, सुरभिः -भिः -भि.

BALSAM, *s.* (Ointment, unguent) विलेपः, विलेपनं, उपदेहः, अभ्यञ्जनं.

BALSAMIC, *a.* (Unctuous) स्निग्धः -ग्धा -ग्धं, मेदुरः -रा -रं, प्रमेदितः -ता -तं, चिक्कणः -णा -णं, स्नेही -हिनी -हि (न्), मृदुः -द्वी -दु.

BALUSTRADE, *s.* पङ्क्तिक्रमेण रचितः क्षुद्रस्तम्भसमूहः, क्षुद्रस्तम्भश्रेणी.

BAMBOO, *s.* वेणुः, वंशः, वेतसः, त्वक्सारः, शतपर्वा m. (न्), मस्करः, तृणध्वजः, यवफलः, तेजनः, कर्मारः —(When rattling) कीचकः.

To BAMBOOZLE, *v. a.* (To cheat) वञ्च् in caus. (वञ्चयते -यितुं), परिवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, छल् (c. 10. छलयति -यितुं).

BAMBOOZLED, *p. p.* वञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, विप्रलब्धः -ब्धा -ब्धं.

BAMBOOZLER, *s.* वञ्चकः, छली m. (न्), धूर्त्तः, कूटकः, कितवः, प्रतारकः.

BAN, *s.* (Public notice of any thing) घोषणं -णा, घोषणापत्रं, उत्कीर्त्तनं, समाचारः. —(A curse) शापः, अभिशापः, आक्रोशः; 'under a ban,' शापग्रस्तः -स्ता -स्तं —(Interdiction) निषेधः, प्रतिषेधः, वारणं, विरोधः.

To BAN, *v. a.* (To curse) शप् (c. 1. शपति -ते, c. 4. शप्यति, शप्तुं), अभिशप्, परिशप्.

BANANA, *s.* कदली, तृणसारा, गुच्छफला, वारणबुसा, रम्भा, मोचा, काष्ठीला.

BAND, *s.* (That which binds) बन्धनं or -नी or -नः.—(Bond) पाशः, शृङ्खलं.—(Union or connection) सम्बन्धः, संयोगः.—(A company of persons) पङ्क्तिः f., समूहः, श्रेणी, समागमः.—(Of musical instruments) वाद्यभाण्डं, वादित्रगणः, तूर्यौघः.—(A company of soldiers) गुल्मः, सैनिकः.

To BAND, *v. a.* संयुज् (c. 10. -योजयति -यितुं), एकत्र कृ.

To BAND, *v. n.* एकत्र मिल् (c. 6. मिलति, मेलितुं), सम्मिल्.

BANDAGE, *s.* पट्टः, बन्धनं, पट्टकः, आवेष्टनं, कवलिका.—(Securing with bandages in surgery) अनुवेल्लितं.

BANDBOX, *s.* यत् किञ्चित्सुपर्णं स्त्रीलोकेन भृतं तदाधानयोग्यः सम्पुटकः or आधारः.

BANDIT, *s.* परिपन्थी m. (न्), दस्युः, प्रसह्यचौरः, चौरः, विप्रलम्भकारी m. (न्), सार्थघातकः.

To BANDY, *v. a.* (To toss to and fro) इतस्ततः or इतश्चेतः क्षिप् (c. 6. क्षिपति, क्षेप्तुं).—(To give and take reciprocally) निमे (c. 1. -मयते -मातुं), विनिमे, परिवृत् in caus. (-वर्त्तयति -यितुं).

BANDY-LEGGED, *a.* प्रज्ञुः -ज्ञुः -ज्ञु, प्रगतजानुः -नुः -नु, विरलजानुः -नुः -नु.

BANE, *s.* (Poison) विषं, गरः -रं, हलाहलः.—(Ruin) नाशः, विनाशः, अत्ययः, दूषणं.—(Causing ruin) दूषकः.

BANEFUL, *a.* (Poisonous) विषधरः -रा -रं, गरली -लिनी -लि (न्), विषान्वितः -ता -तं, विषतुल्यः -ल्या -ल्यं —(Destructive) नाशी -शिनी -शि (न्), विनाशकः -का -कं, आत्ययिकः -की -कं, दूषकः -का -कं, हिंस्रः -स्रा -स्रं.

BANEFULNESS, *s.* विषालुता, नाशित्वं, हिंस्रता, गरलता.

To BANG, *v. a.* (To beat, thump) तड् (c. 10. ताडयति -यितुं), प्रहृ (c. 1. -हरति -हर्त्तुं), तुद् (c. 6. तुदति -तोत्तुं), आतुद्.

BANG, *s.* आघातः, अभिघातः, प्रहारः, मुष्टिपातः, करपातः.

To BANISH, *v. a.* (To another country) विवस् in caus. (-वासयति -यितुं), निर्वस्, प्रवस्, विप्रवस्, प्रव्रज् in caus. (-व्राजयति -यितुं), देशान्तरीकृ.—(To drive away) निराकृ (c. 8. -करोति -कर्त्तुं), बहिष्कृ or बहिः कृ, निःसृ in caus. (-सारयति -यितुं), उत्सृ, अपानुद् (c. 6. -नुदति -नोत्तुं), निरस् (c. 4. -अस्यति -असितुं).

BANISHED, *p. p.* प्रवासितः -ता -तं, विवासितः -ता -तं, निःसारितः -ता -तं, बहिष्कृतः -ता -तं, निरस्तः -स्ता -स्तं, निराकृतः -ता -तं, निःकासितः -ता -तं, अवकृष्टः -ष्टा -ष्टं.

BANISHMENT, *s.* (The act) प्रवासनं, विवासनं, निर्वासनं, प्रव्राजनं, निःसारणं, निरसनं, अपनोदनं, निराकरणं —(The state) प्रवासः, विवासः.

BANISTER, *s.* सोपाने उभयतः स्थापिता क्षुद्रस्तम्भपङ्क्तिः.

BANK, *s.* (Of a river) तीरं, तटं -टः, कूलं, प्रतीरं, कच्छः, रोधः n. (स्), 'the opposite bank,' पारं, तीरान्तरं; 'the near bank,' अवारं —(Any heap) चयः, कूटं, पिण्डनः, वप्रः, 'sand-bank,' सैकतं. —(A place where money is laid up) धनागारं, मुद्रागारं, निक्षिप्तधनागारं, टङ्कागारं.

To BANK, *v. a.* (To inclose with a bank) कूलेन or वप्रेण परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं).—(To lay up money in a bank) धनागारे धनं निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or न्यस् (c. 4. -अस्यति -असितुं), कुसीदिकं निकटे धनं स्था in caus. (स्थापयति -यितुं).

BANK-BILL, BANK-NOTE, *s.* आनृण्यप्रतिज्ञापत्रं or ऋणशोधनप्रतिज्ञापत्रं यद्दर्शनात् मुद्रागारे निक्षिप्तधनं प्रतिदीयते, निक्षिप्तधनविनिमयेन यत् प्रतिज्ञापत्रं प्रचलीक्रियते.

BANKER, *s.* (Keeper of a bank) धनागारपतिः m., मुद्रागारपतिः.—(Trader in money) कुसीदिकः, कलोपजीवी m. (न्).

BANKRUPT, *s.* परिक्षीणः, ऋणशोधनाय अक्षम ऋणी (न्) or अधमर्णः or ऋणवान् (त्), असमर्थशोधनः, भग्नकानुषः, गतविभवः, सर्वस्वच्युतः, निर्धनः, हृतसम्पदः.

BANKRUPTCY, *s.* परिक्षीणता, ऋणशोधनाशक्तिः f., ऋणमोक्षासामर्थ्यं, निर्धनता.

BANNER, *s.* पताका, ध्वजः or -जं, केतनं, वैजयन्ती f., ध्वजपटः.

BANNS, *s.* (Of marriage) विवाहघोषणा, विवाहघोषणापत्रं.

BANQUET, *s.* उत्सवः, सम्भोजनं, स्वाद्वन्नभोजनं.

To BANQUET, *v. a.* स्वाद्वन्नैः or मिष्टान्नैः or भोजनविशेषैः or सविशेषान्नैः भुज् in caus. (भोजयति -यितुं) — सन्तुष् in caus. (-तोषयति -यितुं).

or संवृप in caus. (-वृद्धयति -यितुं) or तृप् in caus (तर्पयति -यितुं).

To BANQUET, v. n. उत्सवं कृ, विशिष्टान्नं or स्वाद्वन्नं or भोजनविशेषान् or अविशेषान्नं भुज् (c. 7 भुंक्ते, भोक्तुं). विशिष्टरूपेण आहारं कृ, सात्म्यभिः -दि: -रि सम्.

BANQUETER, s. उत्सवकर्त्ता m. (र्तृ), विशिष्टान्नभोक्ता m. (क्तृ), स्वाद्वन्नसमाधितः, स्वाद्वन्नभक्षकः

BANQUETING, s. उत्सवकरणं, विशिष्टान्नभोजनं, स्वाद्वन्नखादनं.

To BANTER, v. a. अवहस् (c. 1. -हसति -हसितुं), अपहस्, विहस् with acc.: अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), भर्त्स् (c. 10. भर्त्सयते -ति -यितुं), निन्द् (c. 1. निन्दति, निन्दितुं)

BANTERER, s. अवक्षेपकः, क्षेपकः, निन्दकः, परिहासवेदी m. (न्).

BANTLING, s बालः, -ला, बालकः, शिशुः m.

BANYAN-TREE, s. वटः, न्यग्रोधः, पर्कटी.

BAPTISM, s. मज्जनं, जलसंस्कारः, अवगाहनं.

BAPTISMAL, a. मज्जनसम्बन्धी -न्धिनी -न्धि (न्), जलसंस्कारविषयः -या -यं.

BAPTIST, s. मज्जयिता m. (तृ), अवगाहकः, जलसंस्कारकर्त्ता m. (र्तृ).

BAPTISTERY, s मज्जनस्थानं, अवगाहनस्थानं, जलसंस्कारकरणस्थानं

To BAPTIZE, v. a. मस्ज् in caus. (मज्जयति -यितुं), निमज्ज्, अवगाह् in caus. (-गाहयति -यितुं), जलसंस्कारं कृ.

BAR, s. (Of a door) अर्गलं.—(Of a cage) शलाका.—(Any obstacle) विघ्नः, अवरोधः -धकं, व्याघातः, प्रतिष्टम्भः, बाधकः, प्रतिबन्धः, प्रत्यूहः.—(A sand-bank) सैकतं.—(The place where criminals are tried) धर्म्मसभा, विचारस्थानं —(A solid mass of metal) लोहपिण्डः -ण्डं, कुशी.—(In music) तालनियामका रेखा.—(In a tavern) शुण्डापाने मद्यक्रेतृविक्रेत्रोरन्तरे स्थापितम् अवरोधकं तत्र च तन्मध्ये विगणनं क्रियते.

To BAR, v. a. (To fasten with a bar) अर्गलेन बन्ध् (c. 9. बध्नाति, बद्धुं)—(To hinder) वृ in caus. (वारयति -यितुं), निवृ, प्रतिवृ; प्रतिरुध् (c 7 -रुणद्धि -रोद्धुं), निरुध्, विरुध्, प्रतिबन्ध्.—(To shut out from) निराकृ, निरस् (c. 4. -अस्यति -असितुं).—(To exclude) बहिष्कृ, निराकृ.—(To prohibit) प्रतिषिध् (c. 1. -षेधति -षेद्धुं), निषिध्; प्रत्याख्या (c. 2. -ख्याति -ख्यातुं)

BARB s. (A species of horse brought from Barbary) विदेशजातीयः सुतनुकायविशिष्टम् तुरगप्रभेदः —(A crooked-point) फलं, कर्णः, शूलाग्रं, शरफलं.—(Armour for horses) प्रखरः, प्रक्षरः, अश्वतनुत्रं, अश्वसज्जा

BARBACAN, s. प्राकारोपनगरोपान्ते निर्म्मितं दुर्गं.

BARBARIAN, s. म्लेच्छः, म्लेच्छजातिः m., शबरः, किरातः, खुंधनः, पुलिन्दः. —(An uncivilized man) असभ्यलोकः, पुरुषपशुः.—(A foreigner) विदेशी m. (न्).—(A cruel tyrant) निर्दयः.—(The country of barbarians) प्रत्यन्तः.

BARBARIAN, BARBARIC, a. (Belonging to barbarians) म्लेच्छी -च्छिनी -च्छि (न्). विदेशी -शिनी -शि (न्), वैदेशिकः -की -कं.—(Uncivilized) असभ्यः -भ्या -भ्यं, असंस्कृतः -ता -तं, अशिष्टः -ष्टा -ष्टं.

BARBARISM, s (In grammar) म्लेच्छितं.—(Savageness of manners) क्रूरता, क्रूराचारता, म्लेच्छत्वं, पशुता, दुराचारत्वं.

BARBARITY, s. (Cruelty) निष्ठुरता, निर्दयत्वं, क्रूरता.—(Of manners) असभ्यता, क्रूराचारता.

BARBAROUS, a. (Foreign) म्लेच्छीयः -या -यं, वैदेशिकः -की -कं.—(Savage in manners) क्रूराचारः -रा -रं, कुशीलः -ला -लं, दुराचारः -रा -रं, [illegible] —(Cruel) निष्ठुरः -रा -रं, निर्दयः -या -यं, क्रूरः -रा -रं.

BARBAROUSLY, adv. म्लेच्छवत्, असभ्यलोकवत्, पशुवत्, म्लागदवत —(Cruelly) निर्दयं, निष्ठुरं, अतिक्रूरतया.

BARBED, a. कर्णी -र्णिनी -र्णि (न्), फलयुक्तः -क्ता -क्तं, लौहाग्रयुक्तः -क्ता -क्तं —(Mailed) वर्म्मितः -ता -तं, कवची -चिनी -चि (न्), परिदंशितः -ता -तं

BARBEL, s. नादेयमत्स्यविशेषः.

BARBER, s. नापितः, क्षुरी m. (न्), क्षुरकी m. (न्), क्षौरिकः, कल्पव्यवसायी m. (न्), दिवाकीर्त्तिः m., 'a barber's business,' नापित्यं.

BARBES, s. pl. (A disease of horses) अश्वीयरोगविशेषः.

BARD, s. मागधः, बन्दी m. (न्), मधुकः.—(Poet) कविः m., काव्यशास्त्रज्ञः

BARDIC, a. मागधसम्बन्धी -न्धिनी -न्धि (न्), काव्यशास्त्रसम्बन्धीयः -या -यं

BARE, a. (Naked) नग्नः -ग्ना -ग्नं.—(Without ornament) अभूषितः -ता -तं, अनलङ्कृतः -ता -तं, असंस्कृतः -ता -तं —(Unclothed) विवस्त्रः -स्त्रा -स्त्रं.—(Uncovered) अनावृतः -ता -तं, विवृतः -ता -तं, अपावृतः -ता -तं.—(Mere) केवलः -ला -लं, मात्रकः -का -कं, मात्रं.—(Thread bare, worn) जीर्णः -र्णा -र्णं, 'the bare ground,' केवला भूमिः भूपिधीतलं, भूतलं

To BARE, v. a. (To strip, uncover) नग्नीकृ, व्यक्तीकृ, उच्छद् (c. 10 -छादयति -यितुं), विवृ (c. 5. -वृणोति -वरितुं -वरीतुं).

BARED, p. p. नग्नीकृतः -ता -तं, व्यक्तीकृतः -ता -तं, विवृतः -ता -तं

BAREFACED, a. (Shameless) निर्लज्जः -ज्जा -ज्जं, लज्जाहीनः -ना -नं धृष्टः -ष्टा -ष्टं.

BAREFACEDNESS, s. निर्लज्जत्वं, धृष्टता, धार्ष्ट्यं, प्रगल्भता, प्रागल्भ्यं, वैयात्यं

BAREFOOT, a. नग्नपादः -दा -दं, शून्यपादः -दा -दं, पादुकाहीनः -ना -नं

BAREHEADED, a. नग्नशिराः -राः -रः (स्), शून्यमस्तकः -का -कं, अनावृतशिराः -राः -रः (स्)

BARELY, adv. (Merely) मात्रं, केवलं.—(Hardly) कष्टं, कष्टेन, कृच्छ्रेण —(Nakedly)—नग्नं, शून्यं, आच्छादनव्यतिरेकेण.—(Without ornament) अलङ्कारव्यतिरेकेण, भूषणं विना.

BARENESS, s. (Nakedness) नग्नत्वं, शून्यता, रिक्तता.—(Leanness poverty) क्षीणता, दरिद्रता, दैन्यं.

BARGAIN, s. (A contract, agreement) समयः, नियमः, संविद् f उपगमः, अभ्युपगमः, संश्रवः, आश्रवः, समाधिः m., उद्देशः.—(Contract concerning the price of a thing sold) पणः, नियमः क्रयनियमः, क्रयविक्रयनियमः, क्रयपत्रं.

To BARGAIN, v. n. पण् (c. 1. पणते, पणितुं or पणायति -यितुं), पणं कृ सङ्कृ (c. 1. -चट्टते -चट्टितुं), समयाकृ, नियमीकृ, क्रयविक्रयनियमं कृ

BARGAINED, p. p. पणितः -ता -तं, पणायितः -ता -तं, सङ्कट्टितः -ता -तं

BARGE, s. तरालुः m., तराम्बुः m., वहित्रं.—(Pleasure-boat) केलिनौका

BARGEMAN, s. नाविकः, पोतवाहः, पूर्व्वोक्तनौकाकर्णधारः, तरिकः

BARK, s. वल्कलः -लं, वल्कं, त्वक् f. (च्), त्वचं, छल्ली f., शल्कं, शल्कल 'bark of a tree.' तरुत्वक् f. (च्).—(Made of bark) त्वङ्मयः -यी -यं, तरुत्वङ्निर्म्मितः -ता -तं, वाल्कलः -ली -लं.—(Garment of) वल्कलः —(A small ship) पोतः, क्षुद्रनौका.

To BARK, v. a. (To strip trees of their bark) त्वच् (nom. त्वचयति -यितुं), वल्क् (nom. वल्कयति -यितुं), त्वक्ष् (c. 1. त्वक्षति, त्वक्षितुं) वल्कम् उत्कृष् (c. 1. -कर्षति -क्रष्टुं) or निष्कृष्.—(To enclose as bark) वल्कलवत् परिवेष्ट् (c. 1 -वेष्टते -वेष्टितुं).

To BARK, v. n. भष् (c. 1. भषति, भषितुं), बुक्क् (c. 1. बुक्कति, बुक्कितुं c 10. बुक्कयति -यितुं), रै (c. 1. रायति रातुं).—(To [illegible]) [illegible] c. 1 [illegible] [illegible], बुक्कारीकृ

B R भवक् —(R पाद्रोमक

B RK NG, Of os समसं यकृने रायर्ण हत

BARKY, *a.* वाल्कः -ल्की -ल्कं, वाल्कलः -ली -लं, त्वङ्मयः -यी -यं.

BARLERIA, *s.* (A flower) बाणः, आर्त्तगलः, कुरण्टकः, सहचरी, झुरः.

BARLEY, *s.* यवः, यवकः, तीक्ष्णशूकः, मेधेदः, शितशूकः ; 'unripe barley,' तोक्मः, मधकः, कुल्माषं ; 'barley-meal,' यवक्षोदः. 'barley-water,' उदमन्थः ; 'made of barley,' यवमयः -यी -यं ; 'sown with barley,' यव्यः -व्या -व्यं.

BARLEY-BROTH *s* यवसुरं, यवनिर्मितं पानीयं, यवरसः

BARLEY-CORN, *s* यवः, तिर्य्यग्यवोदरं.

BARLEY-MOW, *s* लूनयवसञ्चयस्थानं, यवे लूने सति तत्सञ्चयनस्थानं.

BARLEY-SUGAR, *s.* यवरसक्वथित इक्षुसारः, आक्षिकशर्करा, शुक्लोपला.

BARM, *s* सुरामण्डः, मद्यमण्डः, कारोत्तरः, कारोत्तमः, अभिषवः.

BARN, *s.* कुशूलः, धान्यभाण्डं, भाण्डागारः, धान्यागारः, धान्यकोष्ठं, धान्यसङ्ग्रहस्थानं

BARNACLE, *s.* (A kind of shell-fish) नौकाकाष्ठजः शम्बूकविशेषः.—(An instrument to hold a horse by the nose) पाशविशेषो येन तुरङ्गो मुखदेशे ध्रियमाणो ऽश्वचिकित्सकेन चिकित्सितुं शक्यते.—(A kind of bird) हंसजातीयः पक्षिप्रभेदः.

BAROMETER, *s* आकाशतोलनयन्त्रं, आकाशपरिमाणार्थं पारदपूरिता काचनाली.

BARON, *s.* अस्मद्देशीयानां कुलीनपदानां मध्ये पदप्रभेदः, अधिपतिः *m.*, स्वामी *m.* (न्)—(*Baron of beef*) गोपृष्ठं, उभयपार्श्वीयपञ्जरयुक्तं गोमांसं.

BARONESS, *s.* पूर्व्वोक्तकुलीनपदस्थितस्य पुरुषस्य पत्नी *or* भार्य्या

BARONET, *s.* अस्मद्देशीयानां कुलीनपदानां मध्ये अवरपदं यस्य सः

BARONIAL, *a.* पूर्व्वोक्तकुलीनपदसम्बन्धी -न्धिनी -न्धि (न्).

BARONY, *s.* पूर्व्वोक्तकुलीनपदसम्बन्धीयम् आधिपत्यं or स्वाम्यं.

BARRACK, *s* सैन्यागारं, सैन्यालयः, सङ्ग्रामसमये सैन्यनिवासस्थानं, सैन्यावासः.

To BARRACK, *v. a.* सैन्यान् सैन्यागारे पृथक् पृथक् स्था in caus. (स्थापयति -यितुं), or वस् in caus. (वासयति -यितुं).

BARRED, *p.p* विरुद्धः -द्धा -द्धं, प्रतिषिद्धः -द्धा -द्धं, निषिद्धः -द्धा -द्धं, बाधितः -ता -तं.

BARREL, *s* (A small cask) दीर्घगोलाकारं काष्ठनिर्मितं पात्रं or भाण्डं.—(A cylinder, as of a gun) नाडिः -डी *f.*, नाली or -ला.

To BARREL, *v. a.* (To put in a barrel) पूर्व्वोक्तपात्रे निविश् in caus (-वेशयति -यितुं).

BARREN, *a.* (*Not prolific*) वन्ध्यः -न्ध्या -न्ध्यं, असुती -तिनी -ति (न्), अप्रसवी -विनी -वि (न्), प्रजारहितः -ता -तं.—(Unfruitful) निष्फलः -ला -लं, अफलः -ला -लं, अवकेशी -शिनी -शि (न्), शुष्कः -ष्का -ष्कं, —(Useless) व्यर्थः -र्था -र्थं, अनर्थकः -का -कं, मोघः -घा -घं.—(Empty) शून्यः -न्या -न्यं, रिक्तः -क्ता -क्तं ; 'a barren woman,' वन्ध्या, अप्रसूता, 'a barren soil,' मरुस्थलं or -ली.

BARRENNESS, *s.* वन्ध्यता, निष्फलता, वैयर्थ्यं, शुष्कता, शून्यता.—(In a female) वन्ध्यात्वं.

BARRICADE OF BARRICADO, *s.* प्राचीरं, प्राकारः, वप्रः -प्रं, अवरोधकं, पथावरोधः.

To BARRICADE OF BARRICADO, *v. a.* and *n.* रुध् (c. 7. रुणद्धि, रोद्धुं), प्रतिरुध्, संरुध् ; प्रतिबन्ध् (c. 9. -बध्नाति -बद्धुं), प्राचीरेण पथम् अवरुध्.

BARRIER *s.* (A barricade) प्राकारः, प्राचीरं, परिकूटं, वप्रः.—(An obstacle) विघ्नः, प्रतिष्टम्भः, अवरोधकं, प्रतिरोधः, प्रतिबन्धः, संबाधनं. प्रत्यूहः —(A boundary) सीमा, मर्य्यादा, परिसीमा.

BARRISTER, *s.* उत्तरवादी *m.* (न्), परार्थे वादी *m.* (न्), प्रतिवादी *m.*

न परार्थं वादानुवादकर्त्ता *m.* र्ता मन्त्री *m.* न् मल्लकाम् व्यवस्थानिरूपकः, व्यवहारपण्डितः, स्मृतिशास्त्रज्ञः, धीसचिवः.

BARROW, *s.* (A kind of vehicle) हस्तप्रचालितं वाहनं or यानं.—(A hog) शूकरः.—(A mound) मृत्तिकाराशिः *f.*, उन्नतभूभागः.

To BARTER, *v. n.* (To trade) भाण्डविनिमयेन वाणिज्यं कृ.

To BARTER, *v. a.* (To exchange one article for another) निमे (c. 1 -मयते -मातुं), विमे, विनिमे, भाण्डविनिमयं कृ, परिवृत् in caus (-वर्त्तयति -यितुं), भाण्डात् प्रतिभाण्डं दा (c. 3. ददाति, दातुं); 'capable of being bartered,' परिवर्त्तनीयः -या -यं.

BARTER, *s.* भाण्डविनिमयः, निमेयः, नैमेयः, निमयः, विनिमयः, वैमेयः, प्रतिदानं, परिदानं, परिवृत्तिः *f.*, परीवर्त्तः, परिवर्त्तः, निमया, व्यतिहारः 'any thing obtained by barter,' आपमित्यकं.—(Rule of barter in arithmetic) भाण्डप्रतिभाण्डकं.

BARTON, *s.* (A poultry-yard) ग्रामकुक्कुटादिरक्षणार्थं वृतिः.

BASALT, *s.* लौहसदृशः अतिदृढः कृष्णवर्णः प्रस्तरविशेषः.

BASALTIC, पूर्व्वोक्तप्रस्तरसम्बन्धी -न्धिनी -न्धि (न्).

BASE, *a.* (Mean, vile) नीचः -चा -चं, अधमः -मा -मं, निकृष्टः -ष्टा -ष्टं अपकृष्टः -ष्टा -ष्टं, खलः -ला -लं, अनार्य्यः -र्य्या -र्य्यं, निर्गुणः -णा -णं, दुष्टः -ष्टा -ष्टं, तुच्छः -च्छा -च्छं, जघन्यः -न्या -न्यं, कदर्य्यः -र्य्या -र्य्यं, हीनः -ना -नं, कुत्सितः -ता -तं ; 'a base man,' कापुरुषः.—(Of mean parentage) अकुलः -ला -लं, अकुलीनः -ना -नं.—(*Of mean spirit*) कृपणः -णा -णं, दुर्भावः -वा -वं ; 'base metal,' कुधातुः.

BASE OR BASS, *a.* (As sound) गम्भीरः -रा -रं, धीरः -रा -रं.—(A base sound) मन्द्रः.

BASE, *s.* (The bottom of any thing) अधोभागः, मूलं, तलं, उपस्तम्भः, उपानं.—(In geometry) भूमी *m.* (न्), भूमिः *f.*—(Base of a pillar) उपस्तम्भः, स्तम्भस्य अधोभागः.—(Base of a tree) तरुतलं —(Foundation of a house) भित्तिमूलं, पोटः.

BASE-BORN, *a.* विहीनयोनिः -निः -नि, विजातः -ता -तं, कलुषयोनिजः -जा -जं, हीनजातिः -तिः -ति.—(Bastard) जारजः, कुण्डः.

BASE-MINDED, *a.* दुष्टमतिः -तिः -ति, दुष्टचेताः -ताः -तः (स्).

BASED, *p. p.* (Founded) मूलः -ला -लं in comp. ; 'based on knowledge,' ज्ञानमूलः -ला -लं.

BASELESS, *a.* निर्मूलः -ला -लं, अमूलः -ला -लं.

BASELY, *adv.* अपकृष्टं, निकृष्टं, नीचतया, अदैन्यं, दुष्टजनवत्, अधमप्रकारेण कार्पण्येन.

BASEMENT, *s.* (Foundation of a house) गृहस्य भित्तिमूलं, वास्तु *n.*, पोटः

BASENESS, *s.* (Meanness) नीचता, दुष्टता, निकृष्टता, दैन्यं, कदर्य्यत्वं अनार्य्यता, खलता.—(Of birth) हीनजातिता, वैजात्यं —(Of Sound) गाम्भीर्य्यं.—(Of metal) मलं, कुधातुत्वं.

BASHAW, *s.* तर्क्कीयदेशे ख्यातिविशेषः, सेनानीः *m.*, सेनापतिः *m.*, अधिपतिः *m*

BASHFUL, *a* ह्रीमान् -मती -मत् (त्), लज्जावान् -वती -वत् (त्), अपत्रपिष्णुः -ष्णुः -ष्णु, त्रपितः -ता -तं, त्रपायुक्तः -क्ता -क्तं, व्रीडितः -ता -तं, शालीनः -ना -नं.—(Timorous) भीरुः -रुः -रु

BASHFULLY, *adv.* लज्जया, सत्रपं सव्रीडनं.—(Timorously) सचकितं, सभयं

BASHFULNESS, *s* ह्रीः *f.*, लज्जा, त्रपः -पा, अपत्रपा, व्रीडा, व्रीडनं, शालीनत्वं मन्दाक्षं —(Timidity) भीरुता.

BASIL, *s.* (A plant) तुलसी, मरुवकः, समीरणः, प्रस्थपुष्पः, फणिज्झकः, पर्णासः, जम्भीरः, कठिञ्जरः, कुठेरकः, अर्ज्जकः.

BASILICA, *s.* (The middle vein of the arm) बाहुमध्यस्था बृहन्नाडिः *f*

BASILICK, *s.* बृहत्पूजाशाला.

B A k nd se pen चूडापदः सर्पभेद

BASIN, s. तडागः, जलाशयः, जलाधारः, खातं. See BASON.

BASIS, s. (Foundation of any thing) मूलं, अधोभागः, उपष्टम्भः, तलं.—(Basis of a pillar) स्तम्भस्य अधोभागः.—(The groundwork of any thing) मूलं, वस्तु n., योनिः m.; 'prosperity has virtue for its basis,' धर्ममूला सम्पत्तिः: 'the basis or material of cloth,' वस्त्रयोनिः.

TO BASK, v. n. सूर्य्यातप or सूर्य्यतेजः सेव् (c. 1. सेवते, सेवितुं), प्रतिसूर्य्यं शी (c. 2. शेते, शयितुं) or संविश् (c. 6. -विशति -वेष्टुं).

BASKET, s. पिटकः, पेटकः, पेटा, उलुकं, उल्लुकः, करण्डः, सम्पुटा, कण्डोलः, 'basket-maker,' वैणवः, वैदलकारः: 'basket-work,' वैदलं.

BASON or BASIN, s. (Reservoir) तडागः, जलाशयः, वेशन्तः, पल्वलः -लं, अब्भ्रसरः n. (स्), खातं, क्रीडासरः n. (स्).—(Round the foot of a tree) आलवालं, आवालं, आवापः.—(Vessel to hold water) द्रोणी, पात्रं, भाण्डं, जलाधारः, काष्ठाम्बुवाहिनी.—(Harbour) खातं पोतबन्धनस्थानं.—(Scale of a balance) तुलाघटः.

BASS, a. (In music.) See BASE.

BASS, s. (Mat) कटः, तृणपूली, तलाची, पादपाशी.

BASSO-RELIEVO or BASS-RELIEF, s. प्रतिछाया, प्रतिच्छन्दः, उच्चैःप्रकारेण तक्षिता चित्रलेखा.

BASSOON, s. शुषिरविशेषः, शुषिरवाद्यप्रभेदः.

BASTARD, s. जारजः, अमतोसुतः, कुण्डः -गोलकः m. (न्), उपस्त्रीजातः, दासीपुत्रः, कौलटेरः, कौलटेयः, बन्धुलः, बान्धकिनेयः.—(Born after the death of a husband) गोलकः.

BASTARD, a. (Illegitimate) विजनितः -ता -तं, विजातः -ता -तं.—(Spurious) कृत्रिमः -मा -मं, कल्पितः -ता -तं.

BASTARDY, s. जारजातता, जारजात्वं, कुण्डावस्था, उपस्त्रीजातदशा.

TO BASTE, v. a. (To beat with a stick) लगुडेन or गदया तड् (c. 10. ताडयति -यितुं), or प्रहृ (c. 1. -हरति -हर्तुं), or अभिहन् (c. 2. -हन्ति -हन्तुं), or तुद् (c. 6. तुदति, तोत्तुं).—(To sprinkle meat that is roasting) पच्यमानं or शूलाकृतं मांसं घृतेन सिच् (c. 6. सिञ्चति, सेक्तुं).—(To sew) सीव् (c. 4. सीव्यति, सेवितुं).

BASTILE, s. प्राकारयुक्तं कारागारं, दुर्गं, दुर्गपरिगतं परिखाप्राचीरादि.

BASTINADE or BASTINADO, s. लगुडेन ताडनं, दण्डाघातः, गदाप्रहारः.

BASTING, s. दण्डाघातनं, लगुडपातनं, गदाप्रहरणं, अभिघातः, ताडनं.

BASTION, s. वप्रः -प्रं, दुर्गबहिःपार्श्वे राशीकृता मृत्तिका or अपचितो वप्रः.

BAT, s. जतुका, जतूका, अजिनपत्रा, चर्मचटका, चर्मचटी, भङ्गारी.—(A club) गुलिकाक्रीडायां गुलिकाप्रणोदार्थं यष्टिः m. or गदा or लगुडः.

BAT-FOWLER, s. रात्रिकाले जतुकादिव्याधः or पक्षिग्राहकः.

BAT-FOWLING, s. प्रदोषकाले or रात्रिसमये पक्षिग्रहणं.

BATCH, s. (A number of things) गणः, सङ्घः, सङ्घातः.—(A single baking) आपूपिकं, पैष्टिकं, शाष्कुलिकं, यत्पिष्टकपूपादि एककाले पच्यते.

BATCHELOR, s. अविवाहितः, अकृतदारः, अकृतविवाहः.

TO BATE, v. a. न्यूनीकृ, अल्पीकृ, ह्रस् in caus. (ह्रासयति -यितुं), कन् (nom. कनयति -यितुं), लघ् (nom. लघयति -यितुं), शम् in caus. (शमयति -यितुं), उद्धारं कृ.

TO BATE, v. n. क्षि in pass. (क्षीयते), न्यूनीभू, अल्पीभू, ह्रस् (c. 1. ह्रसति, ह्रसितुं), शम् (c. 4. शाम्यति, शमितुं).

BATEFUL, a. कलहकारी -रिणी -रि (न्), विवादशीलः -ला -लं.

BATEMENT, s. न्यूनीकरणं, अल्पीकरणं, न्यूनता, उद्धारः, उद्धरणं.

BATH, s. स्नानकुण्डं, स्नानागारं, स्नानशाला, अवगाहः, अवगाहनस्थानं.

TO BATHE, v. a. स्ना in caus. (स्नापयति -यितुं), धाव् (c. 1. धावति धावितुं or caus. धावयति -यितुं), प्रधाव् in caus., क्षल् (c. 10. क्षालयति -यितुं), प्रक्षल्, निमज्ज् in caus. (-मज्जयति -यितुं), आप्लु in caus. (-प्लावयति -यितुं).

TO BATHE, v. n. स्ना (c. 2. स्नाति, स्नातुं), निमज्ज् (c. 6. -मज्जति -मज्जितुं), अवगाह् (c. 1. -गाहते -गाहितुं -गाढुं), आप्लु (c. 1. -प्लवते -प्लोतुं), अभिषेकं कृ.—(With one's clothes on) सचेलः स्ना.

BATHED, p. p. स्नातः -ता -तं, कृतस्नानः -ना -नं, अवगाहितः -ता -तं, अवगाढः -ढा -ढं, आप्लुतः -ता -तं, निमग्नः -ग्ना -ग्नं, धौतः -ता -तं, जलशुचि -चिः -चि.

BATHER, s. स्नायी m. (न्), कृतस्नानः, स्नाता m. (तृ), आप्लवकः, निमज्जनकृत्.

BATHING, s. (Act of) स्नानं, मज्जनं, निमज्जनं, आप्लवः, आप्लावः, अवगाहनं, अभिषेकः.—(Religious bathing) सवनं, अभिषवः, सुत्या.—(Relating to bathing) स्नानीयः -या -यं.—(Bathing-gown) स्नानवस्त्रं.

BATHOS, s. वाक्यालङ्कारविशेषः, गम्भीरता, गाम्भीर्यं, नीचता.

BATING, prep. वर्जयित्वा, वर्जं, ऋते, अपास्य, व्यतिरिक्तं, व्यतिरेकेण.

BATLET, s. वस्त्रधावने रजकैः प्रयुक्तश् चतुष्कोणः काष्ठमुद्गरः.

BATOON, s. दण्डः, गदा, लगुडः, यष्टिः m., वेत्रं.

BATTALION, s. वाहिनी, सैन्यदलं, गुल्मः, व्यूहः, सेनामुखं.

BATTEL, s. यः कश्चिद् व्ययो राजविद्यालये छात्रेण आसनेन क्रियते तद्गणनापत्रं.

TO BATTEN, v. a. (To make fat) प्यै in caus. (प्याययति -यितुं), स्फाय् in caus. (स्फावयति -यितुं), संवृध् in caus. (-वर्धयति -यितुं), तृप् in caus. (तर्पयति -यितुं), पीनं -नां -नं कृ.—(To fertilize) सफल (nom. सफलयति -यितुं).

TO BATTEN, v. n. (To grow fat) प्यै (c. 1. प्यायते, प्यातुं), स्फाय् (c. 1. स्फायते, स्फायितुं), संवृध् (c. 1. -वर्धते -वर्धितुं), आत्मम्भरिः -रिः -रि or उदरम्भरिः -रिः -रि अस्.

TO BATTER, v. a. (To shatter) मृद् (c. 9. मृद्नाति, मर्दितुं), अवमृद्, प्रमृद्; चूर्ण् (c. 10. चूर्णयति -यितुं), प्रचूर्ण्, मथ् (c. 9. मथ्नाति, मथितुं or मथितुं), विमथ्, पिष् (c. 7. पिनष्टि, पेष्टुं), निष्पिष्, प्रतिपिष्; चूर्णीकृ, भञ्ज् (c. 7. भनक्ति, भंक्तुं), प्रभञ्ज्; तड् (c. 10. ताडयति -यितुं), तुद् (c. 6. तुदति, तोत्तुं).

BATTERED, p. p. मृदितः -ता -तं, मर्द्दितः -ता -तं, विमथितः -ता -तं, चूर्णितः -ता -तं, भग्नः -ग्ना -ग्नं, ताडितः -ता -तं, निष्पिष्टः -ष्टा -ष्टं.

BATTERING-RAM, s. दुर्गभित्तिमर्द्दने or नगरप्राचीरभञ्जने पूर्व्वकालीनयोधैः प्रयुक्तो मेषमस्तकाकारायो वृहद्दारुः.

BATTERY, s. (The act of battering) मर्द्दनं, पेषणं, भञ्जनं, आघातनं.—(In law) दण्डपारुष्यं.—(A line of cannon) युद्धयन्त्रश्रेणी.

BATTLE, s. युद्धं, रणः, रणं, सङ्ग्रामः, समरः -रं, विग्रहः, संयुगः, आहवः, आयोधनं, प्रयुद्धं, प्रधनं, संख्यं, सङ्गरः, कलहः, प्रघातः, आघातः, समाघातः, मृधं, सम्परायः -यकं, साम्परायिकं, युत् f. (ध्), कलिः m., सम्प्रहारः, प्रविदारणं, समुदायः, समित् f., समितिः, समीकं, अनीकं, संयत् f., संस्फोटः, अभिसम्पातः, अभ्यामर्द्दः, अभ्यागमः, आजिः f.—(Close fight) नियुद्धं, बाहुयुद्धं.—(Mingled fight) तुमुलं, रणसङ्कुलं.—(Battle-cry) सिंहनादः, क्ष्वेडितं. 'field of battle,' रणभूमिः f.

TO BATTLE, v. n. युध् (c. 4. युध्यते, योद्धुं), कलह् (nom. कलहायते); 'to desire battle,' युध् in des. (युयुत्सते), रणकाम्य् (nom. रणकाम्यति).

BATTLE-ARRAY, s. सैन्यव्यूहः, सैन्यविन्यासः, बलविन्यासः, व्यूढिः f., योद्धृश्रेणी.

BATTLE-AXE, s. परश्वधः, परशुः m.—(Armed with) पारश्वधिकः.

BATTLEDOOR, s. गुलिकाक्रीडायां तक्षणीकृतः गुलिका प्रयुज्यते काष्ठफलकं

यँ यष्टि·

BATTLE-FIELD, *s.* रणभूमिः *f.*, आयोधनं, रणः, रणाङ्गणं, रणाजिरं, संग्रामभूः *f.*, मल्लभूमिः *f.*, रङ्गः, रङ्गभूमिः *f.*

BATTLEMENT, *s.* भित्तिः *f.*, छिद्रयुक्तः प्राकारः, बाणादिप्रक्षेपार्थं प्राकारच्छिद्रं.

BATTOLOGIST, *s.* येन निरर्थिका पुनरुक्तिः क्रियते सः, निरर्थकवक्ता *m.* (क्तृ).

BATTOLOGY, *s.* निरर्थिका पुनरुक्तिः or मुहुर्भाषा, निरर्थकवाक्यं.

BAVIN, *s.* इन्धनयोग्यं शुष्ककाष्ठखण्डं, शुष्ककाष्ठं.

BAWBLE, *s.* अल्पमूल्यकम् आभरणं or कङ्कणं, अल्पार्घं क्रीडाद्रव्यं, कङ्कणं, किङ्किणी, क्षुद्रद्रव्यं.

BAWD, *s.* कुट्टनी, कुट्टिनी, दूती, सुन्दरी, शम्भली, पटदासी, वेश्याचार्यः *m.*

BAWDILY, *adv.* अशुद्धं, लम्पटवत्, वैयात्येन, गर्हितं, गर्ह्यप्रकारेण.

BAWDINESS, *s.* अवाच्यता, गर्ह्यता, अश्लीलं, वैयात्यं, लम्पटता.

BAWDRY, *s.* कुट्टनीकर्म्म *n.* (न्), वेश्याकर्म्म *n.* (न्), दूतीकार्यं.

BAWDY, *a.* अवाच्यः -च्या -च्यं, अवक्तव्यः -व्या -व्यं, अकथ्यः -थ्या -थ्यं, गर्हितः -ता -तं, गर्ह्यः -र्ह्या -र्ह्यं, नीचः -चा -चं, अधमः -मा -मं, अशुद्धः -द्धा -द्धं, अविनीतः -ता -तं.

BAWDY-HOUSE, *s.* वेश्याजनसमाश्रयः, वेश्यागृहं, वेश्याश्रयः, गणिकागृहं, वेशः.

To BAWL, *v. n.* उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), प्रक्रुश्, विक्रुश्, नद् (c. 1. नदति, नदितुं), प्रणद्, विनद्; उद्घुष् (c. 10. -घोषयति -यितुं), चीत्कारं कृ; उच्चैः शब्दं कृ, रस् (c. 1. रसति, रसितुं).

BAWLER, *s.* उत्क्रोष्टा *m.* (-ष्टृ), विक्रोष्टा *m.* (-ष्टृ), घोषकः, उद्घोषकः.

BAWLING, *s.* विक्रोशनं, उत्क्रोशनं, घोषणं, चीत्कारशब्दः, रवः.

BAY, *s.* (An opening of the sea into the land) खातं, समुद्रवङ्कः, वङ्कः, वक्रं.—(An honorary garland) श्यामवृक्षपत्रनिर्मिता मानसूचका माला.—(An opening in a wall) गृहाक्षः; 'to stand at bay,' शत्रुं प्रति or प्रत्युमितमुखं or अभिमुखं or मुखामुखि स्था (c. 1. तिष्ठति, स्थातुं).

BAY, *a.* (Colour) पिङ्गलः -ला -लं, पिङ्गः -ङ्गा -ङ्गं.—(A bay horse) उकनाहः, कियाहः.

To BAY, *v. n.* रै (c. 1. रायति, रातुं), भष् (c. 1. भषति, भषितुं).

BAY-SALT, *s.* समुद्रलवणं, सिन्धुलवणं, सामुद्रं, सैन्धवं, वशिरं, अक्षीवं.

BAY-TREE, *s.* श्यामवृक्षो यस्य पत्राणि मानसूचकहाररचने प्रयुज्यन्ते.

BAY-WINDOW, *s.* धनुराकारो गवाक्षः, भित्तिबहिर्लम्बो गृहाक्षः, पुटरूपवातायनं.

BAYONET, *s.* या लोहगुलिकाप्रक्षेपणी अग्न्यस्त्रनलिकायाः अग्रभागे बद्धा तदग्रे बद्धा कृपाणी or छुरिका.

BAZAR, *s.* पण्यवीथी, पण्यशाला, आपणः, हट्टः, क्रयारोहः.

BDELLIUM, *s.* गुग्गुलुः *m.*, कुम्भं, उलूखलकं, सर्वसहः, कौशिकः, पुरः, महिषाक्षः, कालकं, कोशफलं.

To BE, *v. n.* (To be in some state) अस् (c. 2. अस्ति), आस् (c. 2. आस्ते).—(To enter into some state) भू (c. 1. भवति, भवितुं).—(To exist) अस्, वृत् (c. 1. वर्त्तते, वर्त्तितुं), विद् in pass. (विद्यते), जन् in pass (जायते).—(To be in or at) वृत्, स्था (c. 1. तिष्ठति, स्थातुं); 'be it so,' एवम् अस्तु. The verb 'to be' is often expressed by the use of the passive form of the Sanskrit verb, and is not unfrequently omitted altogether.

BEACH, *s.* समुद्रतीरं, समुद्रकूलं, समुद्रतटं, वेला.

BEACHED, *a.* समुद्रतीरस्थः -स्था -स्थं, उपकूलः -ला -लं.

BEACHY, *a.* तीरविशिष्टः -ष्टा -ष्टं, तटयुक्तः -क्ता -क्तं, कूलमयः -यी -यं.

BEACON, *s.* आकाशदीपः, उच्चभूभागे स्थापिता शत्रोर् आगमनसमये ज्वाल्यमाना महोल्का, समुद्रगामिनां पथदर्शनार्थम् उच्चीकृतं चिह्नं.

BEAD, *s.* (Little globular body) गुलिका, गुटिका, गली, वर्त्तुलकं.—(A string of beads) माला, हारः.—(A rosary of beads) जपमाला.

BEADLE, *s.* गड्डोड़ः, यष्टिधरः, राजदूतः, दण्डधरः, दण्डी *m.* (न्), दण्डहस्तः.

BEADROLL, *s.* ये लोका जपे कथयितव्यास् तत्परिसंख्या.

BEADSMAN, *s.* परार्थं or अन्यनिमित्ते जपकरणे नियुक्तो जनः.

BEAGLE, *s.* शशाखेटकः कुक्कुरभेदः, शशाखेटे शिक्षितो मृगव्यधा *m.* (न्) कुक्कुरः.

BEAK, *s.* (Of a bird) चञ्चुः *f.*, चञ्चूः *f.*, त्रोटी -टिः *f.*, मुखः, तुण्डः *m.*—(Of a ship) पित्तलमयं चञ्चुरूपेण नद्धितं नौकाग्रं.

BEAKED, *a.* चञ्चुमान् -मती -मत् (त्), चञ्चुरूपः -पी -पं, चञ्चुविशिष्टः -ष्टा -ष्टं.

BEAM, *s.* (Piece of timber) स्थूणा, दीर्घकाष्ठं, काष्ठं, वृहत्काष्ठं, यष्टिः *m.*—(Main support of a house) वेश्मस्थूणा.—(Ray of light) रश्मिः *m.*, मरीचिः *m. f.*, किरणः, अंशुः *m.*—(Part of a balance) तुलाधारः, तुलादण्डं.—(Pole of a carriage) धूः *f.* (धुर्) कूबरः.—(Part of a weaver's loom) वायदण्डः, वापदण्डः.

CER (a Sure) ध्रुव वा च अवश्यका का वं सनिश्चित ता तं —(No admitting doubt) असंदिग्ध -ग्धा -ग्धं, असंशय -या -यं, निःसन्दिग्धः -ग्धा -ग्धं, निःसन्देहः -हा -हं, निःसंशयः -या -यं; 'it is certain,' अत्र न संशयः.—(Settled, determined, resolved) निश्चितः -ता -तं, कृतनिश्चयः -या -यं, निबद्धः -द्धा -द्धं, नियतः -ता -तं; as to time, कृतकालः -ला -लं.—(Regular) नियतः -ता -तं.—(Infallible) अमोघः -घा -घं.—(Particular) सविशेषः -षा -षं.—(Some) कश्चित् काचित् किञ्चित्, कोऽपि कापि किमपि, कश्चन काचन किञ्चन, 'some few,' कतिचित् *ind.*, कतिपयः -या -यं, कियान् -यती -यत् (त्); 'a certain person,' कश्चित्; 'a certain lion,' कश्चित् सिंहः, or in more modern Sanscrit एकः सिंहः; 'certain people,' कतिपयलोकाः; 'certain teachers,' कियन्तो ऽध्यापकाः; 'on a certain time,' एकदा, कदाचित्, विशेषकाले.

CERTAINLY, *adv.* अवश्यं, निश्चितं, सुनिश्चितं, असंशयं, ध्रुवं, नूनं, खलु, किल, नाम, तथ्यतस्, संशयं विना, अत्र न संशयः, कः सन्देहः, कोऽत्र सन्देहः.

CERTAINNESS, OR CERTAINTY, OR CERTITUDE, *s.* निश्चयः, निर्णयः, नैश्चित्यं, अवश्यकता, दृढप्रमाणं, ध्रुवत्वं, असन्दिग्धता; 'certainties,' ध्रुवाणि.

CERTIFICATE, *s.* प्रमाणपत्रं, अभिज्ञानपत्रं, निर्णयपत्रं, निश्चयपत्रं, सत्यापनपत्रं, निदर्शनपत्रं, आगमपत्रं, निर्णेता *m.* (तृ).

To CERTIFY, *v. a.* (To inform) ज्ञा in caus. (ज्ञापयति -यितुं), विज्ञा.—(To bear testimony, give proof) प्रमाणीकृ, सप्रमाणं -णां -णं कृ, दृढीकृ, स्थिरीकृ, साक्षात्कृ, प्रमाणपत्रेण or अभिज्ञानपत्रेण निर्णयं कृ.

CERVICAL, *a.* ग्रैवः -वी -वं, ग्रैवेयः -यी -यं, कण्ठ्यः -ण्ठ्या -ण्ठ्यं.

CERULEAN, *a.* नीलः -ला -लं, नीलवर्णः -र्णा -र्णं, आकाशवर्णः -र्णा -र्णं.

CERUMEN, *s.* (Ear-wax) कर्णमलः -लं, तोक्मं, कर्णगूथः, कर्णविट् (ष्).

CERUSE, *s.* (White lead) श्वेताञ्जनं, शुक्लवर्णः सीसकविशेषः.

CESARIAN, *a.* (Operation) गर्भोच्छेदनं, भ्रूणोत्कर्त्तनं.

CESS, *s.* (A sum levied) करः, शुल्कः -ल्कं, राजस्वं.—(The act of assessing) करग्रहणं, शुल्कग्रहणं.

To CESS, *v. a.* (To assess) करं or शुल्कं or राजस्वं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or दा in caus. (दापयति -यितुं).

CESSATION, *s.* विरतिः *f.*, विरामः, उपरतिः *f.*, उपरतिः *f.*, निवृत्तिः *f.*, विनिवृत्तिः *f.*, निर्वृतिः *f.*, निवर्त्तनं, निर्वर्त्तनं, विच्छेदः, उपशमः, प्रशमः, क्षयः, 'cessation of arms,' अवहारः.—(Without cessation) अविरतं, अनवरतं, निरन्तरं; 'cessation of affection,' स्नेहच्छेदः.

CESSAVIT, *s.* अमुकजनो वर्षद्वयप्रभृति अद्य यावत करं न दत्तवान् इति ज्ञापनार्थं लेख्यं.

CESSIBLE, *a.* त्याज्यः -ज्या -ज्यं, प्रदेयः -या -यं, विसर्ज्जनीयः -या -यं.

CESSION, *s.* त्यागः, परित्यागः, प्रदानं, वितरणं, विसर्ज्जनं, समर्पणं.

CESSMENT, *s.* करग्रहणं, शुल्कग्रहणं, राजस्वग्रहणं, करदापनं.

CESSOR, *s.* नियतधर्म्मनिरपेक्षत्वात् or करदानमन्दादरत्वात् पूर्व्वोक्तलेख्यद्वारेण अभियोक्तव्यः.

CESTUS, *s.* रतिमेखला, रतिरसना, रतिकलापः.

CETACEOUS, *a.* तिमिजातीयः -या -यं, मीनराजजातीयः -या -यं.

CEYLON, *s.* (The island) सिंहलद्वीपः, सिंहलं, लङ्का.

CHAD, *s.* पाठीनः, मद्गुरः, शृङ्गी *f.*

To CHAFE, *v. a.* (To rub, make hot by rubbing) घृष् (c. 1. घर्षति, घर्षितुं), आघृष्, निर्घृष्, संवाहं कृ, घर्षणेन तप् in caus. (तापयति -यितुं).—(To irritate) तप् in caus., परितप्, बाध् (c. 1. बाधते, बाधितुं).—(To make angry) कुप् in caus. (कोपयति -यितुं), प्रकुप्, रुष् in caus. (रोषयति -यितुं).

To CHAFE, *v. n.* तप् *n. p.* (तप्यते), परितप्, सन्तप्, दुर्मनस् *nom.* (दुर्मनायते), क्लिश् (c. 4. क्लिश्यते, क्लेशितुं), कुप् (c. 4. कुप्यति -ते, कोपितुं), प्रकुप्, रुष् (c. 4. रुष्यति, रोषितुं), क्रुध् (c. 4. क्रुध्यति, क्रोद्धुं), मन्तु (nom. मन्तूयति); 'chafing,' आतप्यमानः -ना -नं.

CHAFE, *s.* प्रकोपः, उत्तापः, परितापः, सन्तापः, क्रोधः, रोषः, मन्युः *m.*, अमर्षः.

CHAFER, *s.* पिङ्गशरीरो वनगोदी भ्रमरप्रभेदः.

CHAFF, *s.* बुसं, बुषं, तुषः -षा, तुच्छं, तुच्छधान्यकं, धान्यकल्कं, कडङ्गर, निष्पावः.—(Freed from the chaff) निस्तुषः -षा -षं.

To CHAFFER, *v. a.* पण् (c. 1. पणते, पणितुं or पणायति -यितुं), पणं कृ, पणीकृ, विपणीकृ, कुत्सितप्रकारेण पणायां कृ or क्रयविक्रयं कृ.

CHAFFERN, *s.* उदस्थाली, स्थाली, पिठरः, उखा.

CHAFFINCH, *s.* बुसप्रियः क्षुद्रपक्षिप्रभेदः.

CHAFFLESS, *a.* निस्तुषः -षा -षं, बुसहीनः -ना -नं, तुषरहितः -ता -तं.

CHAFFY, *a.* तुषमयः -यी -यं, तुषोपमः -मा -मं, लघुः -घुः -घु.

CHAFING-DISH, *s.* अङ्गारधानिका, अङ्गारशकटी *f.*, अङ्गारिः *f.* -रिणी, कटाह.

CHAGRIN, *s.* क्लेशः, मन्युः *m.*, शोकः, विडम्बना, व्यथा, असन्तोषः.

To CHAGRIN, *v. a.* दुःख् (c. 10. दुःखयति -यितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), व्यथ् in caus. (व्यथयति -यितुं), तप् in caus. (तापयति -यितुं), सन्तप्, परितप्, शुच् in caus. (शोचयति -यितुं).

CHAGRINED, *p. p.* आगतमन्युः -युः -यु, व्यथितः -ता -तं, दुःखितः -ता -तं, उद्विग्नः -ग्ना -ग्नं.

CHAIN, *s.* शृङ्खलः -ला -लं, दामः.—(Fetter) लोहबन्धनं, लौहबन्धं, निगडः -डं, बन्धनं, पाशः; 'a gold chain,' कनकसूत्रं.—(A series) श्रेणी, पर्य्यायः, पंक्तिः *f.*, अनुक्रमः, माला; 'a chain of causes,' कारणमाला.

To CHAIN, *v. a.* शृङ्खलया or निगडेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), शृङ्खल (nom. शृङ्खलयति -यितुं), निगड (nom. निगडयति -यितुं).

CHAINED, *p. p.* शृङ्खलितः -ता -तं, निगडितः -ता -तं, शृङ्खलाबद्धः -द्धा -द्धं.

CHAIN-PUMP, *s.* शृङ्खलासञ्चारितं जलोत्तोलनयन्त्रं or घटीयन्त्रं.

CHAIN-SHOT, *s.* शृङ्खलाबद्धं युद्धयन्त्रात् प्रक्षेपणीयं लोहगोलद्वयं.

CHAIN-WORK, *s.* शृङ्खलकर्म्म *n.* (न्), शृङ्खलारूपेण निर्म्मितं यत् किञ्चित् विरलकर्म्म.

CHAIR, *s.* पीठं, आसनं, विष्टरः, विस्तरः, संवेशः.—(Wheel-chair) पर्यं.

CHAIRMAN, *s.* सभापतिः *m.*, सभाधिकृतः, गोष्ठीपतिः, श्रेष्ठी *m.* (न्), प्रामाणिकः.—(One whose profession it is to carry a chair) प्रवहणिकः.

CHAISE, *s.* यानविशेषः, रथः, क्रीडारथः, पुष्परथः, वाहनं.

CHALCOGRAPHY, *s.* ताम्रफलके or पित्तलफलके लिखनविद्या.

CHALDRON, *s.* पिठरः, उखा, स्थाली, उदस्थाली, पिष्टपचनं.

CHALICE, *s.* कंसः, पात्रं, भाजनं, शरावः, यज्ञपात्रं, यज्ञभाजनं.

CHALK, *s.* कठिनी, खटिनी, कठिका, खटिका, खडिका, चूर्णः -र्णं, श्वेतधातुः *m.*, शुक्लधातुः, धवलेखा, पाण्डुमृत् *f.*, शिलाधातुः, सितोपलः, पाकशुक्ला, धवलमृत्तिका.—(Red chalk) गैरेयं, धातुः, गिरिजं, अश्मजं, शिलाजतु *n.*

To CHALK, *v. a.* (To mark with chalk) कठिन्या चिह्न् (c. 10. चिह्नयति -यितुं) or लिख् (c. 6. लिखति, लेखितुं).

CHALK-CUTTER, *s.* कठिनीखनकः, कठिनीखनिता *m.* (तृ), शुक्लधातुखनकः.

CHALKY, *a.* कठिनीमयः -यी -यं, श्वेतधातुपूर्णः -र्णा -र्णं, कठिनीमिश्रः -श्रा -श्रं.

To CHALLENGE, *v. a.* आह्वे (c. 1. -ह्वयति -ते, -ह्वातुं), उपाह्वे, समाह्वे, द्वन्द्वयुद्धार्थं or नियुद्धार्थम् आह्वे; स्पर्ध् (c. 1. स्पर्धते, स्पर्धितुं), आक्रन्द् (c. 1. -क्रन्दति, -क्रन्दितुं), प्रत्यर्थ् (c. 10. -अर्थयति -यितुं).—(To accuse) अभियुज्.—(To claim as one's own due) ...

स्वीकृ अम दर्पे मर्त्तुं दातव्यमिति आपधित्वा ग्रह 9 गृह्णाति, ग्रहीतुं) or in des (जिघृक्षति -क्षितुं).

CHALLENGE, *s.* आह्वानं, समाह्वय -ह्वानं, योधसंरावः, क्रन्दितं, अभिग्रहः.—(A writing containing a challenge) युद्धाह्वानपत्रं, द्वन्द्वयुद्धार्थम् आह्वानपत्रं.

CHALLENGED, *p. p.* आहूतः -ता -तं, समाहूतः -ता -तं, कृताह्वानः -ना -नं.

CHALLENGER, *s.* आह्वानकर्त्ता *m.* (र्तृ), समाह्वानकृत्, समाह्वाता *m.* (तृ), अभियोक्ता *m.* (क्तृ)

CHALLENGING, *s.* (Act of) आह्वानं, हूतिः *f.*, ह्वयः, क्रन्दनं, स्पर्द्धा.

CHALYBEATE, *a.* अयःसंसृष्टः -ष्टा -ष्टं, लोहव्याप्तः -प्ता -प्तं, लोहगुणविशिष्टः -ष्टा -ष्टं, लोहघटितः -ता -तं; 'a chalybeate pill,' अयोगुडः.

CHAMADE, *s.* युद्धे पराजयसूचकं or सन्धिदानसूचकं पटहताडनं.

CHAMBER, *s.* कोष्ठः, प्रकोष्ठः, शाला, शालिका, आगारः -रं, गृहं, स्थलं, आवासः, वासभवनं, कक्षः, कुटी, कुटिः *f.*; 'bed-chamber,' शयनागारः, शयननिकेतनं, शयनशाला, शय्यावेश्म *n.* (न्); 'an inner chamber,' अपवरकं, कक्षान्तरं; 'an upper chamber,' उपरिस्थः प्रकोष्ठः; चन्द्रशालिका, शिरोगृहं.—(A cavity) कोष्ठः, गर्त्तः, बिलं, कुहरं.

To CHAMBER, *v. n.* लम्पटवत् स्त्रियो गम् (c. 1. गच्छति, गन्तुं) or अभिगम्, लम्पटाचारः -रा -रं अस्.

CHAMBERING, *s.* स्त्रीगमनं, नार्य्यभिगमनं, स्त्रीसेवा, नारीप्रसङ्गः, लम्पटता.

CHAMBERLAIN, *s.* शयनाधिकृतः, अन्तःपुरवर्त्ती *m.* (न्), आन्तर्वेशिकः, कञ्चुकी *m.* (न्), स्थापत्यः, वस्त्रगृहाधीशः, द्वाःस्थितदर्शकः, कञ्चुलः.

CHAMBERMAID, *s.* शयनशालायां शय्यादिपरिकल्पिका परिचारिका or दासी.

CHAMELEON, *s.* सरटः, सरटुः, प्रतिसूर्य्यः, कुलाहकः. *See* CAMELEON.

To CHAMFER, *v. a.* स्तम्भस्य परितः सीताकारा रेखा लिख् (c. 6. लिखति, लेखितुं).

CHAMFER or CHAMFRET, *s.* स्तम्भस्य परितो लिखिता सीताकारा रेखाः, स्तम्भरेखा, स्तम्भसीता.

CHAMOIS, *s.* पार्वतीयः, वनछागजातीयो गिरिप्रियो महावेगो पशुभेदः.

CHAMOMILE, *s.* अतितिक्तरसविशिष्टः सुगन्ध ओषधिभेदः.

To CHAMP, *v. a.* चर्व् (c. 1. चर्वति, चर्वितुं), दंश् (c. 1. दशति, दंष्टुं), परिदंश्, दन्तचर्वं कृ; 'to champ the bit,' खलीनं परिदंश्.

CHAMPAIGN, *s.* समभूमिः *f.*, समभूभागः, समस्थलं -ली, समप्रदेशः, निम्नोन्नतभूमिः *f.*

CHAMPAKA, *s.* (A plant) चम्पकः, चाम्पेयः, हेमपुष्पकः, स्थिरगन्धः, स्थिरपुष्पः.—(*Its flower*) गन्धफली.

CHAMPIGNON, *s.* छत्राकभेदः, छत्राकं, उच्छिलीन्ध्रं, शिलीन्ध्रं.

CHAMPION, *s.* (A warrior) भटः, सुभटः, वीरः, प्रवीरः, योद्धा *m.* (द्धृ), प्रयुयुत्सुः *m.*, विक्रान्तः, गरुडीरः, नासीरः.—(A defender) रक्षकः, रक्षिता *m.* (तृ), परिरक्षी *m.* (न्).

CHANCE, *s.* दैवं, दैवयोगः, दैवगतिः *f.*, घटना, दैवघटना, सङ्गतिः *f.*, अकस्मात्कृतं, आगन्तुः *m.*, अतिवर्त्तनं.—(Unfortunate chance) विपद्, आपद्; 'a game of chance,' अक्षादिक्रीडा, द्यूतं; 'trusting too much to chance,' दैवपरः, दैवायत्तः, दैवचिन्तकः; 'by chance,' अकस्मात्, दैवात्, दैववशात्, घटनया, अनपेक्षं, प्रमादेन.—(State of doubt) संशयः; 'committed to chance,' संशयस्थः -स्था -स्थं.

To CHANCE, *v. n.* अकस्मात् सम्भू (c. 1. -भवति -भवितुं) or सम्पद् (c. 4. -पद्यते -पत्तुं) or समापद् or उपस्था (c. 1. -तिष्ठति -स्थातुं) or समुपस्था, or आपत् (c. 1. -पतति -पतितुं).

CHANCEL, *s.* पूजाशालायाः पूर्वदिक्स्थो महापवित्रत्वात् व्यवधानेन अवरुद्धो भागः, मन्दिरस्य प्राचीनभागः.

H E OR महाविचारकः महा शासनकर्त्ता *m.* (र्तृ).—(Cha..ce o of h Ex h qu कोषाधीशः —(Of the University) राजविद्यालयाधिपतिः *m.*

CHANCELLORSHIP, *s.* महाप्राड्विवाकत्वं, प्रधानधर्म्माध्यक्षस्य पदं or अधिकारः.

CHANCE-MEDLEY, *s.* विवादवशे अनिच्छातो वृत्ता or मनुष्यमारणं.

CHANCER, *s.* विद्रधिः *m.*, उपदंशः, गलितक्षतं. *See* CANCER.

CHANCERY, *s.* दण्डनैपुण्यशमका महाविचारसभा, महाविचारस्थानं, धर्म्मानुसारविचारिका सभाविशेषः.

CHÁNDÁLA, *s.* (An outcaste or man of a degraded tribe) चाण्डालः, चण्डालः, मातङ्गः, निषादः, दिवाकीर्त्तिः, श्वपचः, जनङ्गमः, अन्तेवासी, पुक्कसः, प्लवः.

CHANDELIER, *s.* दीपवृक्षः, दीपपादपः, शिखातरुः, शिखावृक्षः, दीपाधारः.

CHANDLER, *s.* (A huckster) वार्त्तावहः, वैवधिकः, विवधिकः; 'a corn-chandler,' धान्यमायः.—(One who makes or sells candles) दीपिकाकृत्, दीपविक्रेता *m.* (तृ).

To CHANGE, *v. a.* विकृ (c. 8. -करोति -कर्त्तुं), अन्यरूपं -पीं -पं कृ, भिन्नरूपं -पीं -पं कृ, विपर्य्यस् (c. 4. -अस्यति, असितुं).—(To barter) निमे (c. 1. -मयते -मातुं), विमे, विनिमे, परिवृत् in caus. (-वर्त्तयति -यितुं); 'he changes beans for sesamum-seed,' तिलेभ्यः प्रति माषान् ददाति.—(To change the mind) अन्यमानसीभू, विपरीतं विज्ञा (c. 9. -जानाति -ज्ञातुं).—(To change a note) मुद्रिकापत्रं सुवर्णरूप्यादिभिः परिवृत्.—(To change gold for coin of less value) सुवर्णरूप्यादिकं कुप्यनाणकपणकपर्दादिभिः परिवृत्.—(To change one's clothes) वासांसि अवतार्य or विहाय or अपमुच्य अपराणि परिधा (c. 3. -दधाति -धातुं).

To CHANGE, *v. n.* विकृ (c. 8. -कुरुते), विकृतीभू, अन्यथा भू, अन्यरूप -पी -पं भू, भिन्नरूपः -पी -पं भू, विकृताकारः -रा -रं भू; 'the mouse was changed into a cat,' मूषिको बिडालः कृतः.—(To change in mind) विमनीभू.—(To change one's evil course) पापात् विनिवृत् (c. 1. -वर्त्तते -वर्त्तितुं) or निवृत्.

CHANGE, *s.* विकारः, विकृतिः *f.*, विक्रिया, वैकृत्यं, परिणामः, विपरिणामः, विपर्य्ययः, परिवर्त्तः, अन्यथाभावः.—(Vicissitude) आवृत्तिः *f.*, परिवृत्तिः *f.*; 'of the seasons,' ऋतुपर्य्यायः.—(Variety) वैचित्र्यं, विभेदः.—(Reformation) निवर्त्तनं.—(Small money) अल्पसारं धनं यथा कुप्यनाणकपणकपर्दकादि, अल्पार्घमुद्रा, क्षुद्रमुद्रा.—(Place where merchants meet) वणिक्समागमस्थानं, श्रेष्ठिचत्वरं.—(Of the moon) अमावस्या, प्रतिपत्, चन्द्रपरिवर्त्तः, पक्षसन्धिः *m.*, 'of mind,' बुद्धिभेदः.

CHANGEABLE, *a.* (Possible to be changed) विकार्य्यः -र्य्या -र्य्यं.—(Fickle) अस्थायी -यिनी -यि (न्), अस्थिरः -रा -रं, अधीरः -रा -रं, चलः -ला -लं, चलचित्तः -त्ता -त्तं, चपलः -ला -लं, सङ्कसुकः -का -कं, नैकभावाश्रयः -या -यं, प्रकृतितरलः -ला -लं, अन्यमनाः -नाः -नः (स्), अन्यमानसः -सी -सं.—(Inconstant) अनियतः -ता -तं.

CHANGEABLENESS, *s.* अस्थिरता, अस्थैर्य्यं, चलचित्तता, चञ्चलत्वं, चापल्यं.

CHANGED, *p. p.* विकारितः -ता -तं, विकृतः -ता -तं, वैकृतः -ता -तं, कृतविक्रियः -या -यं, अन्यरूपः -पी -पं, परिणतरूपः -पी -पं, विपर्य्यस्तः -स्ता -स्तं, विकृताकारः -रा -रं.—(In feelings) विमनीकृतः -ता -तं, विमनीभूतः -ता -तं.

CHANGELING, *s.* कुलीनपुत्रेण परिवर्त्तितो धात्रीपुत्रः; वेतालेन सुरूपबालकम् अपहृत्य तस्य स्थाने उपसर्जितः कुरूपबालक इति कोचिन् मन्यन्ते; उपसर्जितपुत्रः, उपकल्पितपुत्रः, कृत्रिमपुत्रः, पुत्रप्रतिनिधिः *m.*

CHANGER, *s.* [illegible]

CHANNEL, *s.* (A strait) सङ्कटं.—(The bed of a river) नदीमातृकं, नदीपात्रं, गर्भः, नदीगर्भः.—(A long excavation, a canal) कुल्या, उदकुल्या, खातं, नालः, प्रणालः.—(A narrow passage) सङ्कटपथः.—(Furrow of a pillar) स्तम्भरेखा, स्तम्भसीता.—(A stream) स्रोतः *n.* (स्).

To CHANNEL, *v. a.* खन् (c. 1. खनति, खनितुं, खातुं), उत्खन्, कुल्याः कृ, स्रोतः कृ.

To CHANT, *v. n.* गै (c. 1. गायति, गातुं), प्रगै, उद्गै, गुण (nom. गुणयते), पठ् (c. 1. पठति, पठितुं).

CHANT, *s.* गीतं, गेयं, गानं, गाथा, स्तुतिः *f.*, स्तोत्रं.

CHANTED, *p. p.* गीतः -ता -तं, परिगीतः -ता -तं, पठितः -ता -तं.

CHANTER, *s.* उद्गाता *m.* (तृ) गायकः, गेष्णुः, गाथकः, पुरुषः *m.*

CHANTICLEER, *s.* उषाकलः, कुक्कुटः, कृकवाकुः, ताम्रचूडः.

CHAOS, *s.* महाभूतादिसाङ्कर्यं, प्राग्जगत्सृष्टेः पञ्चभूतानां सङ्करः, एकार्णवः.—(Confusion) सङ्करः, साङ्कर्यं, संक्षोभः, व्यस्तता, अव्यवस्था.

CHAOTIC, *a.* सङ्करीभूतः -ता -तं, अव्यवस्थः -स्था -स्थं, अव्यवस्थितः -ता -तं, सङ्कीर्णः -र्णा -र्णं, सङ्कुलः -ला -लं, एकार्णवीभूतः -ता -तं, अव्यक्तः -क्ता -क्तं, अप्रकृतः -ता -तं.

To CHAP, *v. n.* (To break into gapings from the effect of cold) शीतोपहतत्वात् स्फुट् (c. 6. स्फुटति, स्फुटितुं) or विदल् (c. 1. -दलति -दलितुं) or विभिद् in pass. (-भिद्यते) or विद् in pass. (-दीर्यते) or छिद् in pass. (छिद्यते) or स्फुट् (c. 6, स्फुटति, स्फुटितुं).

CHAP, *s.* (Cleft, chink) स्फुटितं, स्फुटिः *f.* -टी, छिद्रं, रन्ध्रं, गर्त्तः, विवरः *f.*; 'in the feet,' पाददारी, स्फुटकः.—(A person, a fellow, contemptuously) मानवः -वकः, मनुष्यकः, नागरः.

CHAPE, *s.* (The catch of any thing by which it is held) ग्रन्थनी, ग्रन्थनकीलकः, खड्गस्थापनं कुलकः, ग्रहणी, रक्षणी, आलानं.

CHAPEL, *s.* (Shrine) देवागारः, देवतागारः, देवायतनं, देवालयः.—(A small place of worship subject to a church) महामन्दिराधीना क्षुद्रपूजाशाला, अप्रधानमन्दिरं.—(Of ease) दूरस्थैः सेवितं क्षुद्रभजनभवनं.

CHAPELRY, *s.* क्षुद्रमन्दिराधिकारः, पूजोपयुक्तशालाधीनो भूमिभागः.

CHAPERON, *s.* नृत्यगीतादिसभायां अनूढाम् तरुणीम् अनुगच्छन्ती वा अभ्यर्णवर्तिनी भाविनी or कुलीना स्त्री.

To CHAPERON, *v. a.* नृत्यगीतादिसभायां अनूढां तरुणीं युवतिमनु वा उपास् (c. 2. -आस्ते -आसितुं) or उपस्था (c. 1. -तिष्ठति -स्थातुं), or अनुचर् (c. 1. -चरति -चरितुं).

CHAPFALLEN, *a.* म्लानवदनः -नी -नं, मलिनमुखः -खी -खं, हताशः -शा -शं.

CHAPITER, *s.* स्तम्भशीर्षं, स्तम्भमस्तकः, स्तम्भशृङ्गं, स्तम्भाग्रं, स्तम्भस्य चूडाभागः.

CHAPLAIN, *s.* पुरोहितः, कुलाचार्यः, ऋत्विक् *m.* (ज्), कुलगुरुः *m.*, कुलोचितः.

CHAPLAINSHIP, *s.* पौरोहित्यं, पुरोहितपदं, कुलाचार्यपदं, आर्त्विज्यं.

CHAPLET, *s.* माला, माल्यं, स्रक् *f.* (ज्), दाम *n.* (न्), कुसुमावतंसकं, निर्व्यूहः, आपीडः, पीडः; 'chaplet-maker,' मालाकारः, मालिकः; 'chaplets worn in different positions,' गर्भकः, प्रभ्रष्टकं, ललामकं, मालकं, वैकक्ष्यकं, आपीडः, शेखरः.

CHAPMAN, *s.* व्यापारिकः, विपणी *m.* (न्), क्रायिकः, विक्रयिकः.

CHAPPED, *p. p.* स्फुटितः -ता -तं, स्फुटितवान् -वती -वत् (त्), विदलितः -ता -तं, विभिन्नः -न्ना -न्नं, विदीर्णः -र्णा -र्णं, छिन्नः -न्ना -न्नं.

CHAPS, *s. pl.* (The mouth of a beast of prey) आस्यं, मुखं, वदनं, हनुः *m.*—(Entrance of a channel) सङ्कटमुखं, सङ्कटप्रवेशः.

CHAPTER, *s.* (Division) अध्यायः, अध्ययः, सर्गः, पर्व *n.* (न्), परिच्छेदः, विच्छेदः, काण्डः -ण्डं, स्कन्धः -न्धं, खण्डः, उच्छ्वासः, आश्वासः, प्रकरणं, स्तबकः.—(An assembly of canons) महामन्दिरे प्रधानपुरोहितानां सभा.

To CHAR, *v. a.* (To burn wood to a cinder) अङ्गारसात्कृ, अङ्गारीकृ, अङ्गार (nom. अङ्गारयति -यितुं); ईषद्दह् (c. 1. -दहति -दग्धुं).

To CHAR, *v. n.* (To work at other's houses by the day) गृहस्वामिनो वेतनग्रहणे इत्यादि कुत्सितकर्म्मणि एकदिवसार्थं भाटक् आपूत् or नियुज् in pass. (-युज्यते).

CHAR-WOMAN, *s.* गृहस्वामिनो वेतनग्रहणे इत्यादि कुत्सितकर्म्मणि एकदिवसार्थं नियुक्ता or आपूता चेटी, प्रत्यहं भृतिं गृहीत्वा या कर्म्मकारी, दिनिका चेटी, दिनिकायोषा, चेटा, किङ्करी.

CHARACTER, *s.* (Disposition) शीलः -लं, शीलत्वं -ता, स्वभावः, वृत्तिः *f.*, स्वरूपं, स्वाभिप्रायः, चारित्रं.—(Property, peculiarity) स्वगुणः, विशेषः.—(Natural character) स्वभावः, निसर्गः, प्रकृतिः *f.*—(Mark) लक्षणं, चिह्नं, अभिज्ञानं.—(Letter) अक्षरं, वर्णः -र्णं.—(Handwriting) स्वहस्ताक्षरं.—(Personage in a drama) भूमिका.—(Reputation, honour) मर्य्यादा, कीर्त्तिः *f.*, यशः *n.* (स्).—(Dignity) गौरवं.

CHARACTERISTIC, *a.* लाक्षणिकः -की -कं, लक्षणकः -का -कं, विशेषकः -का -कं, विशेषकः -का -कं, स्वाभाविकः -की -कं, गुणवाचकः -का -कं.

CHARACTERISTIC, *s.* लक्षणं, विशेषलक्षणं, केवललक्षणं, लिङ्गं, चिह्नं, विशेषः -षणं, अभिज्ञानं, संज्ञा, गुणः, धर्मः *m.*, स्वधर्मः, स्वभावः; 'generic property,' सामान्यधर्मः; 'specific property,' जातिः.

CHARACTERISTICALLY, *adv.* विशेषतस्, सविशेषं, लक्षणतस्.

To CHARACTERIZE, *v. a.* लक्ष् (c. 10. लक्षयति -यितुं), संलक्ष्, उपलक्ष्; विशिष् in caus. (-शेषयति -यितुं), चिह्न् (c. 10. चिह्नयति -यितुं).—(To give an account of the personal qualities) गुणदोषान् आख्या (c. 2. -ख्याति -ख्यातुं).

CHARACTERIZED, *p. p.* विशिष्टः -ष्टा -ष्टं, विशेषितः -ता -तं, सविशेषः -षा -षं -षणः -णा -णं, लक्षितः -ता -तं, संलक्षितः -ता -तं, उपलक्षितः -ता -तं, कृतलक्षणः -णा -णं, लिङ्गी -ङ्गिनी -ङ्गि (न्).

CHARADE, *s.* प्रहेलिका, प्रह्लादः, प्रवह्लिका, पदार्थवर्णिता प्रश्नदूती यथा किंस्विदाभरणं पायोः किंस्विद्धरणं नृपात् स्मः शोभनं वाताधिक्या चतुरस्य कृपानिधि.

CHARCOAL, *s.* अङ्गारः -रं, निर्वापकः, दग्धकाष्ठं, दग्धेन्धनं.

To CHARGE, *v. a.* (Accuse) अभियुज् (c. 7. -युनक्ति -योक्तुं), अभिशप् (c. 1. -शपति -शप्तुं), अभिशंस् (c. 1. -शंसति -शंसितुं), अधिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).—(Impute a crime to any one) दोषं कस्मिंश्चिद् आरुह् in caus. (-रोपयति -यितुं).—(Enjoin, exhort) आदिश् (c. 6. -दिशति -देष्टुं), समादिश्, प्रत्यादिश्, निर्दिश्, उपदिश्; आज्ञा in caus. (-ज्ञापयति -यितुं).—(Intrust) निक्षिप्, न्यस् (c. 4. -अस्यति -असितुं), अर्प् in caus. (-अर्पयति -यितुं).—(Impose as a task) नियुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं, c. 10. -योजयति -यितुं).—(Attack) अभिद्रु (c. 1. -द्रवति -द्रोतुं), आक्रन्द् (c. 1. -क्रन्दति -क्रन्तुं), आक्रम् (c. 1. -क्रामति -क्रमितुं), अभिधाव् (c. 1. -धावति -ते -धावितुं).—(Burden, load) भारं न्यस्, or निविश् in caus. (-वेशयति -यितुं) or आरुह् in caus. (-रोपयति -यितुं), पृ (c. 10. पूरयति -यितुं) with inst. c.—(Ask a price) मूल्यं प्रार्थ् (c. 10. -अर्थयते -ति -यितुं).

CHARGE, *s.* (Care, custody) गुप्तिः *f.*, रक्षा, रक्षणं; 'to take charge of,' रक्ष् (c. 1. रक्षति, रक्षितुं), अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं).—(Trust) निक्षेपः, उपनिक्षेपः, न्यासः, उपन्यासः, उपनिधिः *m.*; 'to give in charge,' निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), न्यस् (c. 4. -अस्यति -असितुं), नियुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं).—(Commission, office, task,

duty, नियोगः, अधिकारः, भारः, धुरं, धर्म्मः.—(Mandate, command) आदेशः, आज्ञा, शासनं.—(Exhortation) प्रत्यादेशः, उपदेशः.—(Accusation) अभियोगः, अभिशापः, अभिशंसनं, अपवादः.—(Imputation) दोषारोपः, दोषकल्पनं; 'to lay a crime to any one's charge,' दोषं कस्मिंश्चिद् आरुह् in caus (-रोपयति-यितुं).—(Onset, attack) संप्रहारः, आक्रन्दः, सम्प्रस्कन्दः, उपघातः, अभिद्रवः, आक्रमः, 'charge sounded by musical instruments,' आस्फालः.—(Burden) भारः, धुरा.—(Charge of a gun) यन्त्रगोलिकादिकम् एकवारे युद्धभाण्डे निक्षेप्तव्यं.—(Expense) व्ययः.—(Price) मूल्यं, अर्घः.

CHARGEABLE, a. (Liable to be accused) अभियोक्तव्यः -व्या -व्यं, अभियोज्यः -ज्या -ज्यं.—(Imputable) आरोपणीयः -या -यं.—(Causing expense) व्ययकारी -रिणी -रि (न्).

CHARGED, p. p. (Loaded) धुर्य्यः -र्य्या -र्य्यं, धुरीणः -णा -णं, धुरीयः -या -यं, भारवान् -वती -वत् (त्), भाराक्रान्तः -न्ता -न्तं, अभिपूर्णः -र्णा -र्णं, गर्भः -र्भा -र्भं in comp.; as, 'a cloud charged with water,' जलगर्भो जलदः.—(Accused) अभियुक्तः -क्ता -क्तं, अभिशस्तः -स्ता -स्तं.—(Injoined) समादिष्टः -ष्टा -ष्टं, प्रत्यादिष्टः -ष्टा -ष्टं.—(Made to pay) दापितः -ता -तं.—(Imputed) आरोपितः -ता -तं.

CHARGER, s. (Large dish) बृहत्पात्रं, पात्रं, भाजनं.—(War-horse) सांग्रामिकः, योधहयः, युद्धाश्वः, युद्धगामी m. (न्).

CHARILY, adv. परिमितप्रकारेण, मितप्रकारेण, परिमितं, अमुक्तहस्तेन सावधानं.

CHARIOT, s. रथः, चक्रयानं, यानं, स्यन्दनः; 'of war,' स्यन्दनः, शताङ्गः; 'of the gods,' विमानः -नं; 'covered chariot,' कर्णीरथः, प्रवहणं; 'pleasure-chariot,' क्रीडारथः; 'chariot-race,' रथचर्य्या; 'chariot-horse,' रथ्यः; 'warrior mounted on a chariot,' स्यन्दनारोहः, रथारूढः, रथी m. (न्).

CHARIOTEER, s. सूतः, यन्ता m. (न्), नियन्ता (न्), अधिरथः, रथवाहकः, सादिः m., सारथिः m., प्राजिता m. (तृ), क्षत्ता m. (तृ), सव्येष्ठा m. (तृ), दक्षिणस्थः, प्रवेता m. (तृ).

CHARITABLE, a. (Kind in giving alms and assisting the poor) कृपणवत्सलः -ला -लं, दरिद्रवत्सलः -ला -लं, दीनवत्सलः -ला -लं, अकृपणः -णा -णं, दानशीलः -ला -लं, दरिद्रोपकारी -रिणी -रि (न्) or परोपकारी, वदान्यः -न्या -न्यं (तृ) or भिक्षादाता, दयालुः -लुः -लु, दरिद्रपोषी -षिणी -षि (न्), दरिद्रपालकः -का -कं, सर्व्वभूतानुकम्पकः -का -कं, धर्म्मात्मा -त्मा -त्म (न्).—(Kind in judging of others) परदोषसहनः -ना -नं, अनसूयकः -का -कं, अमत्सरः -रा -रं.

CHARITABLY, adv. दरिद्रोपकारशीलत्वात्, दयया, सदयं, दयालुवत्, दीनवत्सलवत्, दरिद्रपोषिवत्, सानुकम्पं.—(Without malignity) अनसूयया, अमत्सरं, परदोषसहनवत्.

CHARITY, s. (Kindness to the poor, liberality) दरिद्रोपकारः, दरिद्रपालनं, दरिद्रपोषणं, दया, कारुण्यं, दयालुत्वं, दानशीलता, कृपा, सुकृतं, पूर्त्तं.—(Almsgiving) भिक्षादानं, दानं, दानधर्म्मः.—(Alms) भिक्षा, भैक्षं, भिक्षार्थं, पुण्यं, पुण्यकं; 'for charity,' पुण्यार्थं.—(Christian charity, love) प्रेम n. (न्), सर्व्वभूतानुकम्पा, सर्व्वप्राणिनः प्रति प्रेम.

CHARLATAN, s. मिथ्याचिकित्सकः, दुश्चिकित्सकः, कुवैद्यः, आयुर्वेदाभिज्ञः.—(Deceiver) छली m. (न्), मायी m. (न्), कपटी m. (न्).

CHARLATANICAL, a. आयुर्वेदविरुद्धः -द्धा -द्धं, मिथ्याचिकित्सासम्बन्धीयः -या -यं, अवादिकः -की -कं, मायिकः -की -कं, दाम्भिकः -की -कं.

CHARLATANRY, s. मिथ्याचिकित्सा, दुश्चिकित्सा, आयुर्वेदानभिज्ञता, छलं, कपटः -टं, छद्म n. (न्), दम्भः, प्रतारणं, वञ्चनं, वाक्छलं.

CHARLES'S WAIN, s. सप्तर्षयः m. pl., चित्रशिखण्डिनः m. pl., शकटाकृति नक्षत्र.

CHARLOCK, s. क्षेत्रजातः पीतपुष्पविशिष्ट ओषधिभेदः.

CHARM, s. (Words having mystic power) मन्त्रः, अभिचारमन्त्रः.—(Charm, amulet) कवचः -चं, मंत्रपूतं -ता, मादकः; 'subduing by charms, &c.' वशक्रिया, अभिचारः, मंत्रपूतं -ता; 'under the influence of a charm,' मन्त्रवशितः -ता -तं, अभिमन्त्रितः -ता -तं.—(Something of power to charm or allure) प्रलोभनं, विलोभन.—(Beauty) सुन्दरता, शोभा, कान्तिः f., श्रीः, सौन्दर्य्यं.

To CHARM, v. a. (To enchant) मन्त्रद्वारेण वशीकृ or मुह् in caus (मोहयति -यितुं), अभिमन्त्र् (c. 10. -मन्त्रयते -यितुं), अनुमन्त्र्, अभिचर् (c. 10. -चारयति -यितुं).—(To rejoice the mind) मनो हृ (c. 1 हरति, हर्त्तुं) or रम् in caus. (रमयति -यितुं), हृष् in caus. (हर्षयति -यितुं).—(To allure) प्रलुभ् in caus. (-लोभयति -यितुं).

CHARMED, p. p. (With joy) हृतमानसः -सा -सं, हृष्टमानसः -सा -सं, प्रह्लादितः -ता -तं, उल्लासितः -ता -तं.—(By incantations, &c.) अभिमन्त्रितः -ता -तं, अनुमन्त्रितः -ता -तं, अभिचारितः -ता -तं, वशः -शा -शं, वशीभूतः -ता -तं, वशीकृतः -ता -तं, वशतापन्नः -न्ना -न्नं, मोहितः -ता -तं, आकृष्टः -ष्टा -ष्टं.

CHARMER, s. (A dealer in charms) मान्त्रिकः, जाङ्गुलिकः.—(An enchanter) अभिचारी m. (न्), -रिणी f., मायी m. (न्), -यिनी f., मायाकारः, मोही m. (न्), -हिनी f.—(Word of endearment applied to a woman) प्रिया, दयिता, मुग्धा.

CHARMING, a. मनोहरः -रा -रं, मनोरमः -मा -मं, रम्यः -म्या -म्यं, रमणीयः -या -यं, कमनीयः -या -यं, सुभगः -गा -गं, कान्तः -न्ता -न्तं, मोदकः -का -कं, हृदयङ्गमः -मा -मं, चित्तहारी -रिणी -रि, चित्रितः -ता -तं, मनोज्ञः -ज्ञा -ज्ञं, आकर्षकः -का -कं, आकृष्टवान् -वती -वत् (त्), प्रलोभकः -का -कं; 'a charming woman,' मुग्धा, सुन्दरी.

CHARMINGLY, adv. मनोरमं, रमणीयप्रकारेण, रम्यं, रमणीयतया, चित्तिकं, सुभगं, यथा मनो ह्रियते तथा, मनोहरप्रकारेण.

CHARMINGNESS, s. रम्यत्वं, रमणीयता, कमनीयता, मनोहरत्वं, सश्रीकता.

CHARNEL-HOUSE, s. शवास्थिस्थानं, अस्थिसञ्चयस्थानं, श्मशानं, शवास्थिगृहं.

CHARRED, p. p. अङ्गारितः -ता -तं, अङ्गारसात्कृतः -ता -तं, अर्द्धदग्धः -ग्धा -ग्धं.

CHART, s. वेलालेख्यं, वेलापटः, समुद्रयायिनां पथदर्शनार्थं नदीसमुद्रवेला-सैकतादिभिर् अङ्कितं पत्रं, समुद्रद्वीपादीनाम् आलेख्यं, नौकारूढानां पथदर्शकं पत्रं.

CHARTER, s शासनं, शासनपत्रं, राजाज्ञापत्रं, प्रामाणिकपत्रं, धर्म्मकीलः, पट्टः.—(Privilege) अधिकारः.

CHARTERED, p. p. राजादिदत्ताज्ञात् शासनपत्रेण अधिकारयुक्तः -क्ता -क्तं.

CHARY, a. परिमितः -ता -तं, मितः -ता -तं, अमुक्तहस्तः -स्ता -स्तं, सावधानः -ना -नं, अवहितः -ता -तं, विचक्षणः -णा -णं.

To CHASE, v. a. (To hunt) मृग् (c. 10. मृगयते -यितुं), मृगयां कृ, आखिट् (c. 1. -खेटति -खेटितुं), परिकल् (c. 10. -कालयति -यितुं).—(To pursue) अनुधाव् (c. 1. -धावति -धावितुं), पश्चाद्धाव्, अभिधाव्, अनुसृ (c. 1. -सरति -सर्त्तुं), अन्विष् (c. 4. -इष्यति -एषितुं), अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अनुवृत् (c. 1. -वर्त्तते -वर्त्तितुं), पश्चाद्वृत्.—(To drive away) निरस् (c. 4. -अस्यति -असितुं), अपास्; निराकृ; अपानुद् (c. 6. -नुदति -नोत्तुं), द्रु in caus. (द्रावयति -यितुं).—(To chase gold and silver vessels) राजतानि भाण्डानि रेखादिना अलङ्कृ or उपस्कृ.

CHASE, s. (Hunting) मृगव्यं, मृगया f., खेटः -टं, आखेटः, आच्छोदनं, पापर्द्धिः f., आच्छोदनं, पराधिः f.; 'he went to the chase,' मृगयार्थे गतः or मृगयां कर्त्तुं गतः.—(The game hunted) आखुरुं.—(Pur

and room g after. अनुधावनं, अभियावनं, पश्चाद्धावनं, अनुसरणं, अन्वेषणं, मृगव्यं.—(Open ground fit for hunting) मृगव्ययोग्यो निर्जनभूमिभागः, आखुलभूमिः

CHASED, *p. p.* अनुधावितः -ता -तं, मृगितः -ता -तं, द्रावितः -ता -तं.

CHASER, *s.* मृगयुः *m.*, आखेटकः, अनुधावकः, अनुसारी *m.* (न्), द्रावकः, पश्चाद्धावकः.

CHASM, *s.* छिद्रं, कपाटः -टिः *m.*, विवरं, बिलं, गर्त्तं, दरी, गर्त्तः, कुहरं, शुषिरं, रोकं, विरोकं, विद्रं, दरः, भङ्गः, अवटः, रोपं, हद्भकं.

CHASTE, *a.* अलम्पटः -टा -टं, मतमैथुनः -ना -नं, ब्रह्मचारी -रिणी -रि, अकामः -मा -मं, अपांशुलः -ला -लं, यतेन्द्रियः -या -यं, जितेन्द्रियः -या -यं, निष्कामः -मा -मं, ऊर्द्ध्वरेताः -ताः -तः (स्), अव्यभिचारी -रिणी -रि (न्), धर्मचारी -रिणी -रि (न्), संयतात्मा -त्मा -त्म, अव्यभिचारी -रिणी -रि (न्); 'a chaste wife,' पतिव्रता, साध्वी, सती *f.* अव्यभिचारिणी, कुलवधूः, 'most chaste,' महासती; 'a chaste woman,' कुलस्त्री, कुलपालिका.—(Pure, correct, as language, &c.) शुद्धः -द्धा -द्धं, विशुद्धः -द्धा -द्धं, शुचिः -चिः -चि, निर्मलः -ला -लं.

CHASTELY, *adv.* निष्कामं, अपथ्यनिग्रहेण, इन्द्रियसंयमेन, शुद्धं, शुचि.

To CHASTEN or CHASTISE, *v. a.* शास् (c. 2. शास्ति, शासितुं), अनुशास्, दण्ड् (c. 10. दण्डयति -यितुं), विनयस् (c. 10. -यासयति -यितुं), दण्डं प्रणी (c. 1. -णयति -णेतुं).

CHASTISED, *p. p.* शिष्टः -ष्टा -ष्टं, शासितः -ता -तं, दण्डितः -ता -तं, ताडितः -ता -तं, दुःखितः -ता -तं.

CHASTISEMENT, *s.* शिष्टिः *f.*, शास्तिः *f.*, दण्डः, साहसं, अनुशासनं, निग्रहः. —(Of a pupil) शिष्यशिष्टिः *f.*

CHASTISER, *s.* शासिता *m.* (तृ), शास्ता *m.* (स्तृ), दण्डप्रणेता *m.* (तृ), साहसकृत्.

CHASTITY, *s.* अपथ्यनिग्रहः, अपथ्यसंयमः, इन्द्रियनिग्रहः, जितेन्द्रियत्वं, यतेन्द्रियत्वं, निष्कामता, ब्रह्मचर्यं.—(In a woman) सतीत्वं, साध्वीत्वं, पातिव्रत्यं, कुलवधूत्वं; 'a sage of perfect chastity,' ऊर्द्ध्वमन्थी *m.* (न्).

To CHAT, *v. n.* संलप् (c. 1. -लपति -लपितुं), कथोपकथनं कृ, वृथाकथां कृ, आलस्यवचनं कृ, सम्भाष् (c. 1. -भाषते -भाषितुं).

CHAT, *s.* कथोपकथनं, संलापः, वृथाकथा, अनर्थककथा, सम्भाषः, सङ्कथा, कथायोगः, सम्भवदनं, आलस्यवचनं.

CHATELLANY, *s.* दुर्गाधिकाराधीनं भूमिमण्डलं, दुर्गाधीनो भूमिप्रदेशः.

CHATTELS, *s. pl.* अस्थावरधनं, द्रव्यं, विभवः, सामग्री -ग्र्यं.

To CHATTER, *v. n.* (To talk idly) जल्प् (c. 1. जल्पति, जल्पितुं), प्रलप् (c. 1. -लपति -लपितुं, c. 10. -लापयति -यितुं), विलप्, कथोपकथनं कृ, वृथाकथां कृ.—(To make a noise as a jay, &c.) किकि or चटचट or चित् शब्दं कृ, चटचट (nom. चटचटायते), कै c. 1. (कायति, कातुं), कूज् (c. 1. कूजति, कूजितुं).—(To make a noise by colliding the teeth) कटकट (nom. कटकटायति -यितुं), दन्तैर् दन्तान् निष्पिष् (c. 7. -पिनष्टि -पेष्टुं).

CHATTER or CHATTERING, *s.* (Idle prate) वृथाकथा, प्रलापः, विप्रलापः, विलपनं, जल्पनं, प्रजल्पः, वाक्चापल्यं, अतिकथा, इतिकथा, निरर्थककथा, कलना.—(Noise of a jay, &c.) चटचट *ind.*, रुक् *f.* (च्), किकि शब्दः, चित् शब्दः

CHATTERER, *s.* जल्पकः, जल्पाकः, उपजल्पी *m.* (न्), वाचालः, गायनः, रावटूकः.

CHATTY, *a.* संलापी -पिनी -पि (न्) or प्रलापी, कथोपकथनकृत् *m.f.n.*

CHAUNT, *s.* See CHANT.

To CHAW, *v. a.* चर्व् (c. 1. चर्वति, चर्वितुं, c. 10. चर्वयति -यितुं).

CHAWDRON, *s.* अन्त्रं, पुरीतत् *m. n.*, नाडिः *f.*, -डी, धमनी

CHEAP, *a.* अल्पमूल्यः -ल्या -ल्यं, अल्पार्घः -र्घा -र्घं, सुमूल्यः -ल्या -ल्यं, सुलभः -भा -भं, अल्पमूल्येन क्रेयः -या -यं or लभ्यः -भ्या -भ्यं, तुच्छः -च्छा -च्छं.

To CHEAPEN, *v. a.* (To bid for, attempt to purchase) अल्पमूल्यं दित्सामीति वद् (c. 1. वदति -दितुं); न्यूनमूल्यं दा in des. (दित्सति -त्सितुं).—(To lessen value) मूल्यं न्यूनीकृ or अल्पीकृ.

CHEAPLY, *adv.* अल्पमूल्येन, अल्पार्घेण, सुमूल्येन, सुलभं.

CHEAPNESS, *s.* सुमूल्यं, अल्पमूल्यता, अल्पार्घत्वं, मूल्यन्यूनता, सुलभता.

To CHEAT, *v. a.* वञ्च् in caus. (वञ्चयते -ति -यितुं), परिवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, छल् (c. 10. छलयति -यितुं).

CHEAT, *s.* (Fraud) छलं, वञ्चनं, कपटः.—(Cheater) वञ्चकः, छली *m.* (न्), धूर्त्तः, प्रतारकः, कूटकः, कापटिकः, कपटी *m.* (न्), कितवः, कूटकारः, दाम्भिकः, कुहकः, उपधिकः.

CHEATED, *p. p.* वञ्चितः -ता -तं, परिवञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, विप्रलब्धः -ब्धा -ब्धं, मुषितः -ता -तं, अतिसंहितः -ता -तं.

CHEATING, *s.* वञ्चनं, छलनं, प्रतारणा -णं, कपटः -टं, व्याजः, कैतवं, अतिसन्धिः *m.*, अतिसन्धानं, कूटः -टं.

To CHECK, *v. a.* यम् (c. 1. यच्छति, यन्तुं), संयम्, नियम्, विनियम्, निग्रह् (c. 9. -गृह्णाति -गृह्णीते -ग्रहीतुं), विनिग्रह्, प्रतिग्रह्, वृ in caus. (-वारयति -यितुं), निवृ, निरुध् (c. 7. -रुणद्धि -रोद्धुं), अवरुध्, प्रतिरुध्, प्रतिषिध् (c. 1. -षेधति -षेद्धुं), विधृ in caus. (-धारयति -यितुं), स्तम्भ् in caus. (स्तम्भयति -यितुं), विष्टम्भ्.

CHECK, *s.* संयमः, निग्रहः, नियमः -मनं, दमथः, निरोधः, विरोधः, संरोधः, प्रतिषेधः, यन्ता -न्त्री -न्तृ (न्तृ).—(As of the perspiration) विष्टम्भः

CHECKED, *p. p.* संयमितः -ता -तं, संयतः -ता -तं, नियमितः -ता -तं, रुद्धः -द्धा -द्धं, निरुद्धः -द्धा -द्धं, संरुद्धः -द्धा -द्धं, निवारितः -ता -तं, नियन्त्रितः -ता -तं

To CHECKER or CHEQUER, *v. a.* अष्टापदप्रकारेण व्यत्यस्तरेखा लिखित्वा चित्रविचित्रीकृ or चित्र् (c. 10. चित्रयति -यितुं) or छिद्रखण्डीकृ or नानारङ्गीकृ or कर्बुरीकृ.

CHECKERED, *p. p.* चित्रविचित्रः -त्रा -त्रं, अष्टापदप्रकारेण चित्रितः -ता -तं, कर्बुरितः -ता -तं, छिद्रखण्डीकृतः -ता -तं, नानावर्णः -र्णा -र्णं.

CHECKERWORK, *s.* अष्टापदप्रकारेण चित्रविचित्रकर्म्म *n.* (न्), चित्रविचित्रकार्यं.

CHECKMATE, *s.* जयकारी शारिपरीणायः, शारिपरीणायो येन परः सशारीन् परिणेतुम् अक्षमः सन् पराजितो भवति

CHEEK, *s.* गण्डः -ण्डं, कपोलः, गल्लः, गण्डस्थलं -ली गण्डः; 'the two cheeks,' गण्डौ; 'colour in the cheek,' कपोलरागः.

CHEEKBONE, *s.* कपोलफलकः, गण्डफलकः -कं.

CHEER, *s.* (Provisions, entertainment) आहारः, भोजनं, भोज्यं, सत्कारः.—(Heart, courage) वीर्यं, धैर्यं, शौर्यं, स्थिरता, तेजः *n.* (स्), 'be of good cheer,' समाश्वसिहि.—(Air of countenance) वदनं, मुखं, आकारः.—(Shout of joy) प्रणादः, जयशब्दः, जयध्वनिः *m.*, जयकोलाहलः, धन्यवादः.

To CHEER, *v. a.* (Incite) प्रोत्सह् in caus. (-साहयति -यितुं), प्रचुद् (c. 10. -चोदयति -यितुं).—(Gladden) हृष् in caus. (हर्षयति -यितुं), परिहृष्, प्रहृष्, ह्लाद् in caus. (ह्लादयति -यितुं), आह्लाद्, प्रह्लाद्, नन्द् in caus (नन्दयति -यितुं), उल्लस् in caus. (-लासयति -यितुं).—(Comfort) आश्वस् in caus. (-श्वासयति -यितुं), समाश्वस्, विश्वस्, सान्त्व् (c. 10. सान्त्वयति -यितुं).

To CHEER-UP, *v. n.* प्रत्याश्वस् (c. 2. -श्वसिति -श्वसितुं), आश्वस्, समुत्था (c. 1. -तिष्ठति -थातुं), हृष् (c. 4. हृष्यति, हर्षितुं), प्रतिसंहृष्, आनन्द् (c. 1. -नन्दति -नन्दितुं), ह्लाद् (c. 1. ह्लादते, ह्लादितुं); 'cheer up!' समाश्वसिहि, आश्वसं कुरु धृतिमान् भव

CHEERED, *p. p.* प्रहर्षितः -ता -तं, समाश्वासितः -ता -तं, आश्वासितः -ता -तं.

CHEERER, *s.* आश्वासकः, हर्षकः, आनन्ददः, प्रह्लादकः, प्रहर्षकः.

CHEERFUL, *a.* आनन्दी -न्दिनी -न्दि (न्), सानन्दः -न्दा -न्दं, हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, हर्षयुक्तः -क्ता -क्तं, हृष्टहृदयः -या -यं, हृष्टमानसः -सी -सं, हर्षमाणः -णा -णं, प्रफुल्लः -ल्ला -ल्लं, प्रमनाः -नाः -नः (स्), उल्लासः -सा -सं -षितः -ता -तं, उल्लासितः -ता -तं, विकुञ्चितः -ता -तं.—(Having a cheerful countenance) प्रफुल्लवदनः -ना -नं or फुल्लवदनः, सुहसाननः -ना -नं, प्रसन्नवदनः -ना -नं, सदैव प्रहसितवदनः -ना -नं.

CHEERFULLY, *adv.* सहर्षं, सानन्दं, हृष्टमनसा, हृष्टवत्, प्रसन्नचेतसा.

CHEERFULNESS, *s.* हर्षः, हृष्टिः *f.*, आनन्दः, आह्लादः, प्रफुल्लता, चित्तप्रसन्नता, उल्लासः.

CHEERLESS, *a.* निरानन्दः -न्दा -न्दं, अहर्षः -र्षा -र्षं, हर्षरहितः -ता -तं.

CHEERLESSLY, *adv.* अहर्षं -र्षितं, निरानन्दं, आनन्दं विना.

CHEESE, *s.* किलाटः -टी, दधिजं, मस्तु, क्षीरविकृतिः *f.*

CHEESECAKE, *s.* किलाटपिष्टकः, दधिनवनीतादिमयो मोदकविशेषः.

CHEESE-CURDS, *s.* दधि *n.* किलाटः, घमस्तं, क्षीरजं, आमिक्षा.

CHEESE-MONGER, *s.* किलाटविक्रेता *m.* (तृ), दधिजविक्रयी *m.* (न्), किलाटविक्रयोपजीवी *m.* (न्).

CHEESE-PRESS, *s.* दधिसम्पीडनयन्त्रं येन किलाटः सम्पद्यते.

CHEESY, *adv.* किलाटमयः -यी -यं, किलाटगुणोपेतः -ता -तं.

CHELY, *s.* कर्कटनखः, कुलीरादिनखः, कुलीराङ्घ्रिः *m.*, कर्कटपादिः *m.*

CHEMISE, *s.* स्त्रीलोकभृतम् अन्तरीयं or अधोवस्त्रं.

CHEMISTRY, *s.* रसायनं *See* CHYMISTRY.

To CHERISH, *v. a.* पुष् (c. 1. पोषति, c. 9. पुष्णाति, पोषितुं, c. 10. पोषयति -यितुं), परिपुष्, पाल् (c. 10. पालयति -यितुं), संवृध् in caus. (वर्धयति -यितुं), भृ (c. 1. भरति -ते, भर्तुं), भज् (c. 1. भजति -ते, भक्तुं), उपास् (c. 2. -आस्ते -आसितुं), दय् (c. 1. दयते, दयितुं), लल् (c. 10. लालयति -यितुं)

CHERISHED, *p. p.* पालितः -ता -तं, पोषितः -ता -तं, पुष्टः -ष्टा -ष्टं, संवर्द्धितः -ता -तं, भर्त्तितः -ता -तं, अभीष्टः -ष्टा -ष्टं, हृद्यः -द्या -द्यं, दुग्धः -ग्धा -ग्धं, दयितः -ता -तं, हृदिस्पृक् (श्), लालितः -ता -तं

CHERISHER, *s.* पोष्टा *m.* (ष्टृ), पोषकः, पालकः, पालयिता *m.* (तृ), भर्ता *m.* (र्तृ).

CHERISHING, *s.* पोषः -षणं, पालनं, भरणं, भरिमा *m.* (न्).

CHERRY, *s.* फलविशेषः, क्षुद्रफलविशेषः.

CHERRY-ORCHARD, *s.* उक्तफलवृक्षवाटिका or -वाटी.

CHERRY-TREE, *s.* पूर्वोक्तफलविशिष्टो वृक्षभेदः

CHERSONESE, *s.* द्वीपः, अन्तरीपः -पं.

CHERUB, *s.* स्वर्गी *m.* (न्), स्वर्गदूतः, स्वर्गीयजनः, दिव्यदूतः, देवदूतः. Modern scholars coin the word किरूबः.

CHERUBIC, *a.* स्वर्गीयः -या -यं, दिव्यः -व्या -व्यं, स्वर्ग्यः -र्ग्या -र्ग्यं.

To CHERUP, *v. n.* चिक्क or चिक्कं शब्दं कृ. *See* To CHIRP.

CHERVIL, *s.* ओषधिभेदो यस्मिन् एककाण्डात् अनेककाण्डस्य आतपत्रवद्रूपेण प्ररोहणं.

CHESS, *s.* चतुरङ्गं; 'moving a piece at chess,' नयविचारः.

CHESS-BOARD, *s.* अष्टापदं, शारिफलकं, पञ्जनी, पद्मनी, पञ्चारी, नयपीठी

CHESSMAN, *s.* नतुरङ्गकः, शारः, शारिः, शारिः *m.*, शारिः *m.* -री *f.*, सारिका, खेलिनी, खेलनी.

CHEST, *s.* (The breast) उरः *n.* (स्), वक्षः *n.* (स्), भुजान्तरं, क्रोडं -डा; 'broad-chested,' उरस्वान् -स्वती -स्वत् (त्), उरस्कः -स्का -स्कं, उरसिलः.—(A box) भाण्डं, सम्पुटः -टकः, समुद्गः, भाण्डं

C[illegible] [illegible] horse, [illegible]

[illegible]. [illegible]

CHEVALIER, *s.* सादी *m.* (न्), अश्वारोही *m.* (न्), रथी *m.* (न्), महारथः, महावीरः, राजर्षिः *m.*, मान्यमुख्यको व्यक्तिः

CHEVAUX DE FRISE, *s.* आयसशूलयुक्तं प्राचीरं, युद्धसमये पारवाक्यादेवनार्थं स्थितशल्ययुक्तम् अवरोधकं

CHEVERIL, *s.* (A kid) छागशावकः, अजशावकः.—(Kid leather) अजचर्म *n.* (न्).

To CHEW, *v. a.* चर्व् (c. 1. चर्वति, चर्वितुं, c. 10. चर्वयति -यितुं) दन्तैः पिष् (c. 7. पिनष्टि, पेष्टुं), विदंश् (c. 1. -दशति -दंष्टुं), 'to chew the cud,' रोमन्थ (nom. रोमन्थायते)

CHEWED, *p. p.* चर्वितः -ता -तं अवलीढः -ढा -ढं, दन्तैः पिष्टः -ष्टा -ष्टं

CHEWING, *s.* चर्वणं, दन्तपेषणं, रोमन्थः.

CHICANE, *s.* (Prolonging a judicial contest) विवादविधिर् मिथ्योत्तरद्वारा or असत्प्रयोगाहारेण अर्थनिर्णयविलम्बनं, मिथ्याप्रोक्तिः *f.*, मिथ्यायुक्तिः *f.*—(Artifice in general) छद्म *n.* (न्), छलं, अपदेशः, व्यपदेशः, कपटः.

To CHICANE, *v. n.* विवादसमये मिथ्योत्तरद्वारा or असत्प्रयोगाहारेण अर्थनिर्णयविलम्बनं कृ.

CHICANER, *s.* मिथ्याविवादी *m.* (न्), मिथ्यातार्किकः, वाङ्क्षुलकः, मिथ्योत्तरवादी *m.* (न्), असत्प्रयोगहृत्, वञ्चकः.

CHICANERY, *s.* मिथ्याविवादः, हेत्वाभासः, पक्षाभासः, मिथ्यावादः, मिथ्यातर्कः, मिथ्याहेतुः, वाक्छलं, मिथ्याप्रोक्तिः *f.*, छलः, कपटः.

CHICK or CHICKEN, *s.* कुक्कुटशावकः, पक्षिशावकः.

CHICKEN-HEARTED, *a.* भीरुहृदयः -या -यं, दुर्बलहृदयः -या -यं.

CHICKEN-POX, *s.* रक्तवटीविशिष्टो बालानां रोगः.

CHICK-PEAS, *s.* चणकः, हरिमन्थः -न्थकः.

CHICK-WEED, *s.* पक्षिभक्ष्यः क्षुद्रौषधिभेदः.

CHIDDEN, *p. p.* निन्दितः -ता -तं, निर्भर्त्सितः -ता -तं, धिक्कृतः -ता -तं

To CHIDE, *v. a.* निन्द् (c. 1. निन्दति, निन्दितुं), प्रतिनिन्द्, विनिन्द्, भर्त्स् (c. 10. भर्त्सयते -ति -यितुं), गुप् in des. (जुगुप्सते -प्सितुं), गर्ह् (c. 1. गर्हते, गर्हितुं), धिक्कृ, आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं).

To CHIDE, *v. n.* (Clamour) उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), प्रक्रुश्, विक्रुश्.—(Quarrel) विवद् (c. 1. -वदते -वदितुं), विप्रवद्, वाक्कलहं कृ.

CHIDER, *s.* निन्दकः, धिक्कर्त्ता *m.* (र्तृ), परिवादकः, आक्रोशकः.

CHIDING, *s.* निन्दा, परिभाषणं, परीवादः, जुगुप्सा, उपक्रोशः, तिरस्कारः उपालम्भः, निर्भर्त्सनं, धिक्कारः, धिक्क्रिया, विप्रलापः, वाग्युद्धं.

CHIEF, *a.* परमः -मा -मं, परः -रा -रं, उत्तमः -मा -मं, मुख्यः -ख्या -ख्यं प्रमुखः -खा -खं, अग्र्यः -ग्र्या -ग्र्यं, अग्र्यः -ग्र्या -ग्र्यं, प्राग्र्यः -ग्र्या -ग्र्यं, अग्रीयः -या -यं, अग्रियः -या -यं, प्रधानः -ना -नं, श्रेष्ठः -ष्ठा -ष्ठं, विशिष्टः -ष्टा -ष्टं उत्कृष्टः -ष्टा -ष्टं, अनुत्तमः -मा -मं, पारमिकः -की -कं, वर्यः -र्या -र्यं प्रवरः -रा -रं, वरेण्यः -ण्या -ण्यं, पुरोगमः -मा -मं, प्रवर्हः -र्हा -र्हं, परार्द्ध्यः -र्द्ध्या -र्द्ध्यं, अनवरार्द्ध्यः -र्द्ध्या -र्द्ध्यं, वृन्दारकः -का -कं, प्रष्ठः -ष्ठा -ष्ठं, इन्द्रः -न्द्रा -न्द्रं in comp., पुङ्गवः -वा -वं in comp., ऋषभः -भा -भं in comp.; 'chief minister,' प्रधानमन्त्री *m.* (न्); 'chief priest, प्रधानयाजकः; 'chief justice,' धर्माधिकारी *m.* (न्), धर्माध्यक्षः 'chief seat,' सदासनं; 'chief of sages,' देवर्षिः *m.*; 'chief person,' आदिपुरुषः.

CHIEF, *s.* पतिः *m.*, ईश्वरः, ईशः, नायकः, मुख्यः, पुरोगः, अग्रगः, अधिपः अधिपतिः *m.*, अधिष्ठाता *m.* (तृ), अध्यक्षः, श्रेष्ठी *m.* (न्), शिष्टः [illegible] किरीटी *m.* (न्), वृन्दारकः.—(Military chief) सेनापतिः, सेनानायकः, सेनानीः *m.*

CH[illegible]LESS [illegible] अनायक: -का -कं, अनीश्वर: -रा -रं, अराजक: -का -कं.

CHIEFLY, *adv.* प्रधानतस्, प्राधान्यतस्, मुख्यशस्, विशेषतस्, परमं.

CHIEFTAIN, *s.* (Leader) मुखर:, पुरोग:, अग्रग:, नायक:, पति: *m.*, ईश्वर:.—(Commander) सेनापति:, सेनानी: *m.*—(Head of a clan) गणपति:, ज्ञातिमुख्य:

CHIEFTAINSHIP, *s.* मुख्यता, गाणपत्यं, सैनापत्यं, ऐश्वर्यं.

CHILBLAIN, *s.* पादस्फोट:, पाददारी *f.*, शिशिरजातं क्षतं.

CHILD, *s.* बाल: -ला, बालक:, शिशु: *m.*, वत्स: -त्सा -त्सक:, सुत:, पुत्र:, शावक:, सन्तान:, सन्तति: *f.*, अपत्यं, बालापत्यं, दारक:, तोकं, अर्भ:, अर्भक:, माणवक:.—(The compellation of an old to a young man) वत्स.—(To be with child) गर्भवती or सञ्जातगर्भा भू.

CHILDBEARING, *s.* प्रसव:, सवनं, सू: *f.*: 'past childbearing,' विगतार्त्तवा, निष्कला; 'capable of childbearing,' सरजस्का.

CHILDBED, *s.* प्रसवावस्था, प्रसवकाल:, प्रसववेदना, गर्भवेदनावस्था.

CHILDBIRTH, *s.* प्रसव:, प्रसूति: *f.*, सूति: *f.*, जननं: 'the pains of childbirth,' प्रसववेदना, गर्भवेदना; 'to suffer the pains of childbirth,' प्राप्तप्रसववेदना भू.

CHILDERMAS-DAY, *s.* हेरोद्नाम्नो यिहुदीयराज्ञ आज्ञया अपापशिशूनां वधमुद्दिश्य पर्व्व *n.* (न्)

CHILDHOOD, *s.* बाल्यं, शैशवं, शिशुत्वं, बालकत्वं, बालभाव:, कौमारं, शैशवकाल:, बाल्यकाल:, बाल्यावस्था, अपत्यता, अर्भत्वं

CHILDISH, *a.* बालिश: -शा -शं, बालेय: -या -यं, बालकीय: -या -यं, बालयोग्य: -ग्या -ग्यं; 'childish prattle,' बालवचनं; 'childish understanding,' बालबुद्धि:

CHILDISHLY, *adv.* बालवत्, शिशुवत्, बालकवत्, बालरूपेण

CHILDISHNESS, *s.* बालिश्यं, बालेयत्वं, बालकीयता, बालरूपत्वं.

CHILDLESS, *a.* अपुत्र: -त्रा -त्रं -त्रक: -का -कं, निष्पुत्र: -त्रा -त्रं, असुत: -ता -तं, अप्रसुत: -ता -तं, पुत्ररहित: -ता -तं, पुत्रशून्य: -न्या -न्यं, अनपत्य: -त्या -त्यं, असन्तान: -ना -नं, नि:सन्तान: -ना -नं, अप्रज: -जा -जं, निरन्वय: -या -यं, निर्वंश: -शा -शं; 'a childless woman,' वन्ध्या, अशिश्वी, 'the state of being childless,' आनपत्यं.

CHILDLIKE, *a.* बालोपम: -मा -मं, बालसदृश: -शी -शं, बालेय: -या -यं.

CHILIALDRON, *s.* सहस्रभुज:, सहस्रकोण:, सहस्रास्रं.

CHILIFACTORY, *a.* रक्तजनक: -का -कं. *See* CHYLIFACTORY.

To CHILL, *v. a.* शीतीकृ, शीतलीकृ.—(Check the perspiration) स्वेदं विष्टम्भ् in caus. (-ष्टम्भयति -यितुं).—(Discourage) निर्वीर्यं -र्या -र्यं कृ, तेजोहीनं -नां -नं कृ.

CHILL, *a.* शीतल: -ला -लं, शिशिर: -रा -रं, शीत: -ता -तं.

CHILL, *s.* शीतं, शीतता, हिमं, 'a check to the perspiration,' स्वेदविष्टम्भ:.

CHILLED, *p. p.* शीतीकृत: -ता -तं, हिमार्त्त: -र्त्ता -र्त्तं, हततापः -पा -पं.

CHILLINESS, *s.* शीतता, शीतलता, शैत्यं, शीतीभाव:, शिशिरत्वं.

CHILLY, *a.* शिशिर: -रा -रं, ईषच्छीत: -ता -तं, आशीतल: -ला -लं.

CHIME, *s.* नानावादित्राणाम् एकताल: or एकतान: or तालैक्यं, अनेकघण्टानाम् तानैक्यं or तौर्य्यैक्यं, शब्दैक्यं.—(Of bells) अनेकघण्टानां तालैक्यं, ताड्यमानानाम् अनेकघण्टानां मुखरशब्द:, घण्टाशिञ्जितं.

To CHIME, *v. a.* यथा स्वरैक्यं or तालैक्यं जायते तथा नानावादित्राणि वद् in caus. (वादयति -यितुं) or तड् (c. 10. ताडयति -यितुं); घण्टां तड्.

To CHIME, *v. n.* (To agree) संवद् (c. 1. -वदति -वदितुं), अनुवद्, एकीभू, अनुरूप: -पा -पं भू, अनुरूप: [illegible]

CHIMERA, *s.* [illegible]

[illegible]न्यामना अनर्थकल्पना, [illegible] मनोरथसृष्टि: *f.*, आभास: मृषार्थक, शशविषाणं, कूर्म्मलोमतनुत्राणं

CHIMERICAL, *a.* काल्पनिक: -की -कं, मानसिक: -की -कं, मनोरथसृष्ट: -ष्टा -ष्टं, वासनाकल्पित: -ता -तं, अमूलक: -का -कं.

CHIMNEY, *s.* धूमरन्ध्रं, धूमपथ:, धूमनिर्गम:.—(Fire-place) चुल्लि: *f.* [illegible] ज्वाति: *f.*, तेमनी, अग्निकुण्डं.

CHIMNEY-CORNER, *s.* चुल्लिपार्श्व:, चुल्लेरुपान्तं, चुल्लिपार्श्वे आसनं.

CHIMNEY-PIECE, *s.* चुल्लिशीर्षं, चुल्लिशिला, चुल्लेरुपरि प्रस्तर:.

CHIMNEY-SWEEPER, *s.* धूमरन्ध्रसम्मार्जक:, चुल्लिसम्मार्जक:.

CHIN, *s.* चिबुकं, चिबु: *m.*, हनु: *m. f.*, चिबि: *m.*, पीचं, जम्भ:.

CHIN-COUGH, *s.* बालानाम् आक्षेपक: कास:, महाकास:.

CHINA, *s.* (Porcelain) कौलालकं, मृन्मयं भाण्डं, मार्त्तिकं भाण्डं.—(The country) चीन:, 'China-cloth,' चीनांशुकं; 'China-rose ओड्रपुष्पं, जवा

CHINE, *s.* सपृष्ठास्थि पृष्ठमांसं, कशेरु: पृष्ठभाग:, पृष्ठं, कशेरुका.

To CHINE, *v. a.* पृष्ठास्थिरूपेण छिद् (c. 7. छिनत्ति, छेत्तुं), पृष्ठवंशानुलोमं छिद्

CHINK, *s.* (Aperture) छिद्रं, रन्ध्रं, सन्धि: *m.*—(Sound) शिञ्जितं, क्वणित

To CHINK, *v. n.* (To open in gaps) स्फुट् (c. 6. स्फुटति, स्फुटितुं), विदॄ in pass. (-दीर्य्यते), फल् (c. 1. फलति, फलितुं).—(To ring as metal) क्वण् (c. 1. क्वणति, क्वणितुं), शिञ्ज् (c. 2. शिंक्ते, शिञ्जितुं)

CHINKY, *a.* छिद्रपूर्ण: -र्णा -र्णं, छिद्रित: -ता -तं, बहुरन्ध्रवान् -वती -वत् (त्)

CHINTZ, *s.* चित्रितपटं, चित्रकार्पासं, पटी, पटोलं, चीनांशुकं.

CHIP, *s.* विदलं, तष्टं, भित्तं, भित्ति: *f.*, भिन्नं, खण्डं, शकलं: 'a chip of wood,' काष्ठखण्डं

To CHIP, *v. a.* तक्ष् (c. 1. तक्षति, तक्षितुं), विदलीकृ, खण्डीकृ.

CHIP-AXE, *s.* तक्षणी, छिदि: *f.*, टङ्क:, वृक्षभिद्.

CHIPPINGS, *s. pl.* विदलानि, भिन्नानि, खण्डानि, तष्टानि.

CHIRAGRA, *s.* वातरोगविशेषो यत्र करमात्रम् उपहतं, हस्तशोफ:.

CHIROGRAPHER, *s.* हस्तलेखक:, लिपिकर:, कायस्थ:, अक्षरजीवक:

CHIROGRAPHY, *s.* हस्तलेखनं, लेखनविद्या, लिपि: *f.*, लिखनं.

CHIROMANCER, *s.* हस्तरेखालक्षणात् शुभाशुभदर्शक:, हस्तरेखाविद्याज्ञ:

CHIROMANCY, *s.* हस्तरेखालक्षणात् शुभाशुभदर्शनं, हस्तरेखाविद्या, अङ्गविद्या

To CHIRP, *v. n.* पक्षिवत् कूज् (c. 1. कूजति, कूजितुं), अनुकूज्, विकूज्, किल्ल or चिल्ल शब्दं कृ, मुरारिं कृ.

CHIRPING, *s.* कूजितं, राव:, मुरारि: *m.*, वाशितं, रुतं, काकली [illegible]

CHIRURGEON, *s.* कायशल्यादिभिषक् *m.* (ज्). *See* SURGEON.

CHISEL, *s.* व्रश्चन:, तक्षणी, टङ्क:, वृक्षभेदी *m.* (न्), पृष्ठादन:, शिलाभेद:, शिलाकुट्टक:, शैलभित्ति: *f.*

To CHISEL, *v. a.* तक्ष् (c. 1. तक्षति, तक्षितुं), व्रश्च् (c. 6. वृश्चति, व्रश्चितुं)

CHIT, *s.* (A child) बाल: -ला, बालक:, शिशु: *m.*, शावक:.—(A freckle) तिल: -लक:, जडुल:.

CHIT-CHAT, *s.* विश्रम्भालाप:, विश्रम्भकथितं, वृथाकथा, सङ्कथा, जल्प

CHITTERLINGS, *s. pl.* पश्वन्त्राणि *n. pl.*, पशुनाड्य: *f. pl.*, पुरीतत् *m. n.*

CHILDY, *a.* बालकीय: -या -यं, बालेय: -यी -यं, बालिश: -शा -शं.

CHIVALROUS, *a.* सुविक्रान्त: -न्ता -न्तं, महावीर्य्य: -र्य्या -र्य्यं, धामवान् -वती -वत् (त्)

CHIVALRY, *s.* (Knighthood) सादिपदं, रथिपदं, महारथत्वं.—(Prowess) सुविक्रम:, सुवीर्य्यं, धाम *n.* (न्), पौरुषं, कर्म्मोदारं, रणोत्साह

CHIVES, *s.* पुष्पकेशराग्रं, पुष्पपत्रासाग्राणि *n. pl.*

C[illegible] [illegible] शल्कलिप्ती पर्णी

CHOICE, *s.* (The act) वरणं, वृति: [illegible].—(The power of choice

between two things) विकल्पः -ल्पकः; 'choice of a husband by a bride,' स्वयंवरः, 'the best of any thing,' उत्तमभागः, परमांशः, श्रेष्ठांशः. रत्नं in comp.; 'of one's own choice,' कामतस्, इच्छातस्, यथेप्सितं, यथेष्टं, यथाकामं.

Choice, *a.* उत्तमः -मा -मं, सर्वोत्तमः -मा -मं, विशिष्टः -ष्टा -ष्टं, शिष्टः -ष्टा -ष्टं, अनुत्तमः -मा -मं, मनोनीतः -ता -तं, विशेषः -षा -षं, सारः -रा -रं, सारवान् -वती -वत् (त्), उत्कृष्टः -ष्टा -ष्टं, अभीष्टः -ष्टा -ष्टं, प्रशस्तः -स्ता -स्तं, भद्रतमः -मा -मं, सर्वश्रेष्ठः -ष्ठा -ष्ठं; 'choice food,' भोजनविशेषः, विशिष्टान्नं.

Choiceless, *a.* अविकल्पः -ल्पा -ल्पं, अवैकल्पिकः -की -कं.

Choicely, adv. विशिष्टप्रकारेण, सविशेषं, उत्तमप्रकारेण, प्रशस्तं.

Choiceness, *s.* उत्कृष्टता, प्रकृष्टत्वं, वैशिष्ट्यं, विशिष्टता, श्रेष्ठता, प्राशस्त्यं, सौत्कर्ष्यं.

Choir, *s.* गायकवर्गः, गायकचक्रं, गायकसमूहः, वादित्रकगणः.—(Part of a church) पूजाशालायाः सङ्कीर्त्तनयोग्यं मध्यमस्थलं.

To choke, v. a. (To suffocate) कण्ठं सम्पीड् (c. 10. -पीडयति -यितुं) or ग्रस् (c. 1. ग्रसति, ग्रसितुं), गलहस्त (nom. गलहस्तयति -यितुं), गलग्रहं कृ, श्वासावरोधं कृ, श्वासधारणं कृ.—(To obstruct) रुध् (c. 7. रुणद्धि, रोद्धुं), निरुध्, अवरुध्, संरुध्; प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं).

Choked, p. p. अवरुद्धश्वासः -सा -सं, सन्नकण्ठः -ण्ठा -ण्ठं, निरुद्धः -द्धा -द्धं.

Choker, *s.* (Argument that stops the mouth) गलहस्तः

Cholagogues, *s.* पित्तद्रावनं, पित्तद्रावकः, पित्तघ्नं, पित्तनाशनं.

Choler, *s.* (Bile) पित्तं.—(Rage) क्रोधः, कोपः, रोषः, अमर्षः.

Cholera, *s.* विसूचिका, विषूचिका, महामारी.

Choleric, *a.* पित्तवेगी -गिनी -गि (न्), क्रोधी -धिनी -धि (न्), कोपी -पिनी -पि (न्), चण्डः -ण्डा -ण्डं. 'choleric constitution,' पित्तप्रकृतिः

Cholic, *s.* शूलः -लं, पक्तिशूलं. See Colic.

To choose, v. a. (Select) वृ (c. 5. वृणोति -णुते, c. 9. वृणाति -णीते, c. 1 वरति, वरितुं, वरीतुं), आवृ, प्रवृ; or in caus. (वरयति -यितुं), अनुरुच् in caus (-रोचयति -यितुं), आवृत् (c. 4. आवृत्यते).—(Take) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).—(Appoint) नियुज् (c. 10. -योजयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं).

To choose, v. n. (To be willing) इष् (c. 6. इच्छति, एषितुं), रुच् (c. 1. रोचते) used impersonally. न प्रत्याख्या (c. 2. -ख्याति -ख्यातुं), अभिरुच् in caus. (-रोचयते -यितुं).

To chop, v. a. (To cut into pieces) खण्डं खण्डं कृ or खण्डशः कृ or छिद् (c. 7. छिनत्ति, छेत्तुं), शकलीकृ, विदलीकृ.

Chop, *s.* खण्डं, शकलं, भिन्नं, भित्तिः, विदलं.—(Of meat) मांसखण्डं.—(A mutton chop) औरभ्रखण्डं.

Chop-house, *s.* पक्वमांसविक्रयस्थानं, पाकशाला.

Chopping, *a.* हृष्टपुष्टः -ष्टा -ष्टं, मांसलः -ला -लं, स्थूलः -ला -लं.

Chopping-knife, *s.* मांसछेदनार्थं छुरिका, मांसखण्डनी छुरिका.

Chops, *s.* (Mouth) मुखं, आननं, आस्यं.—(Of a river) सम्भेदः.

Choral, *a.* साङ्गीतिकः -की -कं, गानीयः -या -यं, वादित्रिकः -की -कं.

Chord, *s.* (A string) गुणः. See Cord.—(Of an instrument) तन्त्री *f.*—(Of arc) ज्या, ज्या, ज्यका, जीवा.

Chorded, *p. p.* तन्त्री -न्त्रिणी -न्त्रि (न्).

Choriambus, *s.* (In prosody) विप्रः.

Chorion, *s.* गर्भकोशः, गर्भवेष्टनं, गर्भाशयः, गर्भावरणं चर्म्म.

Chorister, *s.* प्रधानमन्दिरस्य गायकः or गायकः, वादित्रिकः, तालावचरः, किन्नरः, किंपुरुषः.

Chorus, *s.* (Number of singers) गायकगणः, गायकसमूहः.—(Dramatic) पार्श्वस्थः, पारिपार्श्विकः.—(Of a song) ध्रुवकः, ध्रुवः, अनुपदं

Chosen, *p. p.* मनोनीतः -ता -तं, वृतः -ता -तं, वृत्तः -त्ता -त्तं, आवृत्तः -त्ता -त्तं

Chough, *s.* काकजातीयः समुद्रवेलावासी पक्षिभेदः.

To chouse, v. a. वञ्च् (c. 10. वञ्चयते -ति -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), छल् (c. 10 छलयति -यितुं)

Chouse, *s.* (Trick) छलं, कूटः -टं, व्याजः.—(A cheater) वञ्चकः.

Chowrie, *s.* (Tail used to drive away flies) चामरं, चमरपुच्छं रोमगुच्छः, रोमकेशरं.

Chrism, *s.* अभ्यञ्जनं, अञ्जनं, अभिषेकः -षेचनं.

Christ, *s.* (The anointed) अभिषिक्तः.—(The anointed Saviour) अभिषिक्तत्राता *m.* (तृ). Modern scholars coin the word ख्रीष्ट

To christen, v. a (To baptize) जलसंस्कारेण ख्रीष्टीयं -यां -यं कृ जलसंस्कारेण ख्रीष्टीयमतधारिणां or ख्रीष्टीयानां मध्ये प्रविश् in caus. (-वेशयति -यितुं).—(To name) नाम कृ, नाम दा (c. 3. ददाति, दातुं)

Christendom, *s.* ख्रीष्टीयमतधारिणां कृत्स्नसमूहः, ख्रीष्टीयदेशसामग्र्यं, ये केचिद् देशाः ख्रीष्टीयमतं धारयन्ति तत्सकलं.

Christening, *s.* जलसंस्कारः, जलसंस्कारेण ख्रीष्टीयानां मध्ये प्रवेशनं.—(Naming) नामकरणं.

Christian, *s.* ख्रीष्टीयः, ख्रीष्टीयमतधारी *m.* (न्), ख्रीष्टीयमतावलम्बी *m.* (न्)

Christian-name, *s.* जलसंस्कारकाले दत्तं नाम *n.* (न्), नाम, शुभनाम, राशिनाम.

Christianity, *s.* ख्रीष्टीयमतं, ख्रीष्टीयानां मतं, ख्रीष्टीयधर्म्मः.

Christianly, *adv.* ख्रीष्टीयवत्, ख्रीष्टीयधर्म्मानुसारेण.

Christmas-box, *s.* ख्रीष्टजन्मोत्सवकाले दत्तं (or देयं) पारितोषिकं.

Christmas-day, *s.* ख्रीष्टजन्मदिवसमुद्दिश्य महोत्सवः, ख्रीष्टजन्मपर्व्व *n.* (न्)

Chromatic, *a.* (Relating to colour) वर्णसम्बन्धी -न्धिनी -न्धि (न्), रङ्गी -ङ्गिणी -ङ्गि (न्).—(In music) ग्रामीणः -णा -णं, ग्रामिकः -की -कं

Chronic or chronical, *a.* कालिकः -की -कं, दीर्घकालीनः -ना -नं अधिकारी -रिणी -रि (न्); 'chronical distemper,' दीर्घरोगः दीर्घव्याधिः *m.*

Chronicle, *s.* इतिहासः, पुरावृत्तविवरणं, वृत्तविवरणं or -रणपुस्तकं, पुरावृत्ताख्यानं, पुरावृत्तग्रन्थः, समाचारग्रन्थः, शिष्टसमाचारः

To chronicle, v. a. इतिहासपुस्तकेषु समारुह् in caus. (-रोपयति -यितुं) or अभिलिख् (c. 6. -लिखति -लेखितुं), यथाक्रमं वृत्तविवरणं कृ or वृत्तानि रच् (c. 10. रचयति -यितुं).

Chronicler, *s.* ऐतिहासिकः, इतिहासलेखकः, पुरावृत्तरचकः, वृत्तविवरणकृत्, शिष्टसमाचाररचकः.

Chronogram, *s.* यथा अक्षरविन्यासात् संवत्सरादिकालो निर्णेतुं शक्यते तथा प्रस्तरादौ लिखितम् अमुकप्रसिद्धवृत्तविवरणं.

Chronologist, *s.* कालगणकः, कालगणनाविद्याज्ञः, कालज्ञः, यथाकालं or कालक्रमेण पुरावृत्तरचकः, वृत्तकालनिरूपकः, गतकालनिर्णेता *m.* (तृ)

Chronological, *a.* कालगणनाविषयकः -का -कं, कालिकः -की -कं

Chronologically, *adv.* यथाकालं, कालक्रमेण, कालक्रमानुसारेण

Chronology, *s.* कालगणनाविद्या, कालनिरूपणविद्या, कालनिर्णयविद्या कालक्रमेण पुरावृत्तरचना.

Chronometer, *s.* कालपरिमाणार्थं यन्त्रं, घटी, यामनाली.

Chrysalis, *s.* कोशस्थः, कोशवासी *m.* (न्), कोषकारः, पिवः, गुटिका

Chrysolite, *s.* चन्द्रकान्तः, हरिताश्म *n.* (न्), पीतमणिः *m*

Chub, *s.* स्थूलशिरस्को मत्स्यभेदः

C a. स्थूलशिरस्कः -स्का -स्कं -का -कं

दैर्घ्यपरमाणुक हैस्वमणुक

CHUBBY-FACED, *a.* स्थूलास्यः -स्या -स्यं, स्थूलाननः -ना -नं.

CHUCK, *s.* (The cry of a hen) कुक्कुटीरावः, कुक्कुटीनादः.—(A term of endearment) प्रिये voc. c. *f.*, वत्स voc. c. *m.*, वत्से voc. c. *f.*

To CHUCK, *v. n.* (To call as a hen) कुक्कुटीवद् रु (c. 2. रौति, रवितुं).—(To give a gentle blow under the chin) वात्सल्यात् परचिबुकम् ईषत्प्रहारेण उन्नम् in caus. (-नमयति -यितुं).

CHUFF, *s.* (A loutish clown) ग्राम्यजनः, ग्रामिकः, ग्रामबुद्धिः, स्थूलबुद्धिः, असभ्यः, जडः.

CHUFFY, *a.* ग्राम्यः -म्या -म्यं, मन्दमतिः -तिः -ति, स्थूलः -ला -लं.

CHUM, *s.* वयस्यः, सहवासी *m.* (न्), सङ्गी *m.* (न्), प्रियमित्रं, संसर्गी *m.* (न्).

CHUMP, *s.* स्थूलकाष्ठं, स्थूलदारुः *m.*, बृहत्काष्ठखण्डं.

CHURCH, *s.* (Place of worship) मन्दिरं, पूजाशाला, भजनभवनं, भजनगृहं, प्रासादः, मण्डपः.—(The body of Christians) ख्रीष्टमतधारिणां कृत्स्नसमूहः, मण्डली -लं, समाजः

To CHURCH, *v. a.* प्रसवसमुत्थितां स्त्रीं परमेश्वरस्य धन्यवादं कृ in caus. (कारयति -यितुं).

CHURCHMAN, *s.* पुरोहितः, याजकः, धर्म्माध्यापकः.

CHURCHWARDEN, *s.* मन्दिररक्षकः, भजनगृहपालकः, पूजाशालाध्यक्षः.

CHURCHYARD, *s.* श्मशानं, प्रेतवनं, पितृवनं, शवनिखननस्थानं, 'churchyard flowers,' पितृवनसुमनः *n.* (स्).

CHURL, *s.* (A rustic) ग्राम्यजनः, ग्रामजः, ग्रामी *m.* (न्), असभ्यः.—(A rude man) कुशीलः, दुःशीलः, वामशीलः.—(A miser) कृपणः, कदर्यः, मुष्टिकः.

CHURLISH, *a.* दुराचारः -रा -रं, दुष्प्रकृतिः -तिः -ति, अविनयः -या -यं, अशिष्टः -ष्टा -ष्टं, अश्लीलः -ला -लं, क्रूराचारः -रा -रं, खलः -ला -लं, कदर्यः -र्या -र्यं.

CHURLISHLY, *adv.* असभ्यवत्, कदर्यवत्, कृपणं, अश्लीलं.

CHURLISHNESS, *s.* कुशीलता, अश्लीलता, अशिष्टता, अविनयः, असभ्यता.

CHURN, *s.* मन्थनी, मन्थिनी, गर्गरी, मन्थनघटी, आलगर्णिका

To CHURN, *v. a.* मथ् (c. 1. मथति, मथितुं) or मन्थ् (c. 1. मन्थति, c. 9. मथ्नाति, मन्थितुं), उन्मन्थ्, निर्मन्थ्, खज् (c. 1. खजति, खजितुं), समालुड् (c. 1. -लोडति -लोडितुं, c. 10. -लोडयति -यितुं).

CHURNED, *p. p.* मथितः -ता -तं, प्रमथितः -ता -तं, आलोडितः -ता -तं, दण्डाहतः -ता -तं, व्याघट्टितः -ता -तं, क्षोभः -भा -भं.

CHURNING, *s.* मन्थः, मन्थनं, मथनं, आलोडनं, समालोडः, खजा, क्षोभः.

CHURN-STAFF, *s.* मन्थः, मन्था *m.* (मथिन्), मन्थदण्डकः, मन्थानः, दधिचारः, वैशाखः, खजकः.

CHYLE, *s.* अन्नरसः, धातुपः, रसः, भोज्यसम्भवः, अन्नमातृका, अन्नसारः.

CHYLIFACTORY, *a.* धातुपकारी -रिणी -रि (न्), अन्नरसोत्पादकः -का -कं.

CHYLOUS, *a.* अन्नरसमयः -यी -यं, धातुपरूपः -पा -पं.

CHYMIC or CHYMICAL, *a.* रसायनविद्यासम्बन्धी -न्धिनी -न्धि (न्), रसायनजः -जा -जं.

CHYMICALLY, *adv.* रसायनविद्यानुसारात्, रसायनविद्यानुरूपेण.

CHYMIST, *s.* रसायनविद्याज्ञः, रसज्ञः, रसायनः.

CHYMISTRY, *s.* रसायनं, रसायनविद्या, रसविद्या, रसज्ञता.

CIBARIOUS, *a.* अन्नमयः -यी -यं, भोज्यः -ज्या -ज्यं, खाद्यः -द्या -द्यं.

CICATRICE, *s.* किण *n.* (न्), किणं, शुष्कव्रणः, रूढक्षतचिह्नं, रूढक्षतं.

CICATRIZATION, *s.* व्रणविशोषणं, व्रणशोधनं, रोपणं, व्रणरोपणं, समुत्थानं, प्रतिसारणं, प्रतिसरः.

T[illegible] *v. a.* व्रणं रुह् in caus. (रोपयति -यितुं) or शुष् in [illegible] (शोषयति -यितुं) or शुष्कीकृ [illegible] (कारयति -यितुं).

CICATRIZED, *p. p.* रूढः -ढा -ढं, रोपितः -ता -तं, शुष्कः -ष्का -ष्कं, समुत्थितः -ता -तं, प्रतिसारितः -ता -तं

To CICURATE, *v. a.* दम् in caus. (दमयति -यितुं), वशीकृ, निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).

CIDER, *s.* आम्ररसः पानीयविशेषः, आम्रफलनिर्मितो मद्यविशेषः.

CILIARY, *a.* नेत्रच्छदसम्बन्धी -न्धिनी -न्धि (न्), पक्ष्मसम्बन्धी &c.

CILICIOUS, *a.* लोममयः -यी -यं, लोमशः -शा -शं.

CIMETER, *s.* चक्रखड्गः, चन्द्रहासः, मण्डलाग्रः, खड्गः, निस्त्रिंशः, कृपाणः -णकः, असिरिष्टिः *m.*

CINCTURE, *s.* मेखला, कटिसूत्रं, रशना, काञ्ची, वस्त्रनं.

CINDER, *s.* अग्नेरुच्छिष्टं, दग्धाङ्गारोच्छिष्टं, अङ्गारः -रं, भस्म *n.* (न्).

CINERATION, *s.* भस्मीकरणं, भस्मसात्करणं.

CINERITIOUS, *a.* भास्मनः -नी -नं, भस्मरूपः -पा -पं.

CINNABAR, *s.* रससिन्दूरं, रसस्थानं, रक्तपारदं.

CINNAMON, *s.* दारुगन्धः, तिक्तवल्कलं, सुगन्धत्वक् *f.* (च्), गन्धवल्कलं

CINNAMON-TREE, *s.* पूर्व्वोक्ततिक्तवल्कलविशिष्टः सिंहलद्वीपप्ररोही क्षुद्रवृक्षः

CINQUE, *s.* (A five) पञ्चकः, पञ्चत्वं.

CINQUEFOIL, *s.* पञ्चपर्णी, पञ्चपत्री, पञ्चदली.

CINQUE-SPOTTED, *a.* पञ्चचिह्नविशिष्टः -ष्टा -ष्टं, पञ्चतिलवान् -वती -वत् (त्)

CION, *s.* पल्लवं, नवपल्लवं, किसलः -लं, किसलयः -यं.

CIPHER, *s.* (An arithmetical character) अङ्कः, गुणनिका.—(Character in general) अक्षरं, वर्णः.—(Mark standing for nothing) शून्यं, बिन्दुः *m.*, वटः, रुः, दः, खं.—(Occult character in writing) बीजाक्षरं, बीजं.

To CIPHER, *v. a.* (To practise arithmetic) अङ्कविद्याम् अभ्यस् (c. 4. -अस्यति -असितुं) or शिक्ष् (c. 1. शिक्षते, शिक्षितुं).—(To write in occult characters) बीजाक्षरैर् अङ्क् (c. 10. अङ्कयति -यितुं) or लिख् (c. 6. लिखति, लेखितुं).

CIPHERING, *s.* अङ्कनं, गणितं, अङ्कविद्या, गणनविद्या, पाटीगणितं.

CIRCLE, *s.* (A round line) मण्डलं, परिमण्डलं, चक्रं, चक्रवालं, वृत्तं गोलः -लं, निघः, चन्द्रकः, वटः, वर्त्तकः, वलयः -यं.—(Circuit, circumference) परिणाहः, परिधिः *m.*, परिवेष्टनं, वृत्तिः *f.*, परिवेशः 'the circle of the earth,' भूपरिधिः *m.*, भूमण्डलं.—(A circle of people, assembly) मण्डलं, परिषद् *f.*, पंक्तिः *f.*—(Circle on the forehead) तिलकः -कं, तमालपत्रं, चित्रकं, विशेषकं; 'segment of a circle,' वृत्तखण्डं, खण्डमण्डलं, 'area of a circle,' फलं

To CIRCLE, *v. a.* (To surround) परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं), परिवृ (c. 5. -वृणोति -वरितुं -वरीतुं), परिष्ठा (c. 1. -तिष्ठति, -ष्ठातुं), मण्डल (nom. मण्डलयति -यितुं)

To CIRCLE, *v. n.* (To move circularly) चक्रवत् परिवृत् (c. 1. -वर्त्तते -वर्त्तितुं), or आवृत् or परिभ्रम् (c. 1. -भ्रमति, c. 4. -भ्राम्यति -भ्रमितुं), मण्डल (nom. मण्डलायते).

CIRCLED, *p. p.* मण्डलितः -ता -तं, परिमण्डलितः -ता -तं, वलयितः -ता -तं—(Having the form of a circle) मण्डली -लिनी -लि (न्) मण्डलाकारः -रा -रं, चक्राकारः -रा -रं.

CIRCUIT, *s.* (Compass, circumference) मण्डलं, परिमण्डलं, परिधिः *m.*, परिमाणं, परिणाहः, परीणाहः, परिवेष्टनं.—(Act of moving round) परिवर्त्तनं, आवर्त्तः, आवृत्तिः *f.*, आवर्त्तनं, विवर्त्तः, भ्रमणं परिभ्रमः, घूर्णिः *f.*—(Visitation of a judge) धर्म्माध्यक्षाभ्यागमनं, प्राड्विवाकभ्रमणं.

v. n. परिभ्रम् (c. 4. -भ्राम्यति -भ्रमितुं), परिवृत् (c. 1. -वर्त्तते -वर्त्तितुं).

CIRCUITOUS, *a.* वक्रः -क्रा -क्रं. कुटिलगामी -मिनी -मि (न्), सुदीर्घः -र्घा -र्घं.

CIRCULAR, *a.* वर्त्तुलः -ला -लं. मण्डली -लिनी -लि (न्), चाक्रिकः -की -कं, चक्राकारः -रा -रं, चक्राकृतिः -तिः -ति, चक्री -क्रिणी -क्रि (न्), चक्रवान् -वती -वत् (त्), चाक्रेयः -यी -यं, वटी -टिनी -टि (न्), निभः -भा -भं, विष्वक्समः -मा -मं.

CIRCULARITY, *s.* मण्डलता, परिमण्डलता, वर्त्तुलत्वं, चक्राकारता, गोलाकारत्वं.

CIRCULARLY, *adv.* चक्रवत्, चक्ररूपेण, गोलवत्, मण्डलवत्, मण्डलशस्.

To CIRCULATE, *v. n.* प्रचल् (c. 1. -चलति -चलितुं), प्रचर् (c. 1. -चरति -चरितुं), परिवृत् (c. 1. -वर्त्तते -वर्त्तितुं), सम्परिवृत्, विपरिवृत्, विवृत्.

To CIRCULATE, *v. a.* परिवृत् in caus. (-वर्त्तयति -यितुं). प्रचल् in caus. (-चलयति -यितुं).

CIRCULATED, *p. p.* प्रचलितः -ता -तं, परिवर्त्तितः -ता -तं, प्रचारितः -ता -तं, व्यावर्त्तकः -का -कं.

CIRCULATING, *a.* प्रचलः -ला -लं, परिवर्त्ती -र्त्तिनी -र्त्ति (न्), व्यावर्त्तकः -का -कं.

CIRCULATION, *s.* परिवर्त्तनं, व्यावर्त्तः, प्रचारः, प्रचलनं, प्रचरः, भ्रमणं, परिभ्रमणं, चलनं, आवर्त्तः.—(Of the blood) रक्तचलनं, रक्तवहनं.

CIRCULATORY, *a.* वर्त्तुलः -ला -लं, चाक्रिकः -की -कं, मण्डली -लिनी -लि (न्).

CIRCUMAMBIENCY, *s.* परिवेष्टनं, व्याप्तिः *f.*, व्यापनं, व्यापकत्वं, परिगमनं.

CIRCUMAMBIENT, *a.* परिवेष्टकः -का -कं, व्यापकः -का -कं, परिगतः -ता -तं.

To CIRCUMAMBULATE, *v. n.* परिक्रम् (c. 1. -क्रामति -क्रमितुं), परिभ्रम् (c. 4. -भ्राम्यति -भ्रमितुं).

CIRCUMAMBULATION, *s.* परिक्रमः, परिभ्रमणं, परिसर्य्या, परीसारः, पर्य्यटनं.—(Reverential) प्रदक्षिणः -णा -णं.

To CIRCUMCISE, *v. a.* त्वचं छिद् (c. 7. छिनत्ति, छेत्तुं), लिङ्गाग्रचर्म्म छिद्, परिच्छिद्, परिकृत् (c. 6. -कृन्तति -कर्त्तितुं).—(A circumcised man) दुश्चर्म्मा *m.* (न्), वराहः, वराटः, दुश्चेलः, छिन्नलकः.

CIRCUMCISION, *s.* त्वक्छेदनं, लिङ्गाग्रचर्म्मछेदनं, दौश्चर्म्म्यं, परिकर्त्तनं.

To CIRCUMDUCT, *v. a.* लुप् (c. 6. लुम्पति, लोप्तुं), व्यर्थीकृ, मोघीकृ, निष्फलीकृ.

CIRCUMDUCTION, *s.* लोपः, अनिष्पादनं, मोघीकरणं, व्यर्थीकरणं.

CIRCUMFERENCE, *s.* परिधिः *m.*, मण्डलं, परीणाहः, परिणाहः, परिमाणं, वृत्तिः *f.*, चक्रवालं, पालिः *f.*, परिवेशः -षः, परिवेष्टनं.—(Of a wheel) चक्रपरिधिः *m.*, नेमिः *f.*, प्रधिः *m.*, प्रधिमण्डलं, नीमं, नीव्रः.—(Of the earth) भूपरिधिः *m.*

CIRCUMFLEX, *s.* (Accent) स्वरितः, तृतीयम् उच्चारणचिह्नं.

CIRCUMFLUENCE, *s.* परिस्रवः, परिप्लवः, परिवाहः, परिस्यन्दनं, परिगलनं.

CIRCUMFLUENT or CIRCUMFLUOUS, *a.* परिस्रुतः -ता -तं, परिस्रावी -विणी -वि (न्), परिस्यन्दी -न्दिनी -न्दि (न्), परिस्रवः -वा -वं, परिगलितः -ता -तं.

CIRCUMFORANEOUS, *a.* गृहाद्गृहम् अटमानः -ना -नं, अटाट्यमानः -ना -नं.

To CIRCUMFUSE, *v. a.* परिस्रु in caus. (-स्रावयति -यितुं), समाप्लु.

CIRCUMFUSED, *p. p.* परिस्रुतः -ता -तं, समाप्लुतः -ता -तं, परिगलितः -ता -तं, परिगतः -ता -तं, व्याप्तः -प्ता -प्तं, समाक्रान्तः -न्ता -न्तं.

CIRCUMFUSILE, *a.* परिस्रावी -विणी -वि (न्), व्यापकः -का -कं, अभ्युदायः -ता -तं.

CIRCUMFUSION, *s.* परिस्रावः, परिस्रवः, व्याप्तिः *f.*, व्यापकत्वं, परिगलनं.

To CIRCUMGYRATE, *v. n.* परिवृत् (c. 1. -वर्त्तते -वर्त्तितुं), व्यावृत्, घूर्ण् (c. 1. घूर्णते, घूर्णितुं), परिघूर्ण्, व्याघूर्ण्.

CIRCUMGYRATION, *s.* चक्रावर्त्तः, आवर्त्तः, परिवर्त्तः, आवृत्तिः *f.*, घूर्णिः *f.*

CIRCUMJACENT, *a.* पर्य्यन्तस्थः -स्था -स्थं, सामन्तस्थः -स्था -स्थं, उपान्तिकः -की -कं.

CIRCUMITION, *s.* परिगमः, परिक्रमः, परिसर्य्या, परिभ्रमः.

CIRCUMLOCUTION, *s.* वाग्विस्तारः, वाक्यविस्तरः, वक्रोक्तिः *f.*, वक्रभणितं, व्याजोक्तिः *f.*, सतुक्तिः, अतिशयोक्तिः, बहुवाक्यं, बहूक्तिः, वाक्यबाहुल्यं.

CIRCUMNAVIGABLE, *a.* समन्तात् or परितो नावा तार्य्यः -र्य्या -र्य्यं.

To CIRCUMNAVIGATE, *v. a.* समन्तात् नावा तॄ (c. 1. तरति, तरितुं, तरीतुं) or प्लु (c. 1. प्लवते, प्लोतुं).

CIRCUMNAVIGATION, *s.* नौकया समन्तात् तरणं.

CIRCUMROTATION, *s.* चक्रावर्त्तः, परिवर्त्तः, आवर्त्तः, आवृत्तिः *f.*, घूर्णिः *f.*

CIRCUMROTATORY, *a.* चक्रवत् परिवर्त्ती -र्त्तिनी -र्त्ति (न्), आवर्त्तमानः -ना -नं, घूर्णायमानः -ना -नं.

To CIRCUMSCRIBE, *v. a.* परिमा (c. 2. -माति, c. 3. -मिमीते -मातुं), संहृ (c. 1. -हरति -हर्त्तुं), संयम् (c. 1. -यच्छति -यन्तुं), नियम्, ममत्त (nom. ममत्तयति -यितुं).

CIRCUMSCRIBED, *p. p.* परिमितः -ता -तं, संहृतः -ता -तं, संयतः -ता -तं, सबाधः -धा -धं, सङ्कुचितः -ता -तं, संधृतः -ता -तं, समर्य्यादः -दा -दं, साऽवधिकः -की -कं, सुसंस्थितः -ता -तं, सुसङ्गृहीतः -ता -तं.

CIRCUMSCRIPTION, *s.* परिमाणं, संयमनं, संहरणं, सङ्कोचः, संवारः, संवृतिः *f.*

CIRCUMSPECT, *a.* अवहितः -ता -तं, सावहितः -ता -तं, सावधानः -ना -नं, समीक्ष्यकारी -रिणी -रि (न्) or विमृश्यकारी, अप्रमत्तः -त्ता -त्तं, पारिणामदर्शी -र्शिनी -र्शि (न्).

CIRCUMSPECTION, *s.* अवधानं -नता, सावधानता, अप्रमादः, समीक्ष्यकारिता.

CIRCUMSPECTLY, *adv.* अवेक्षया, सावधानं, सुसमीक्ष्य, सुविमृश्य.

CIRCUMSTANCE, *s.* (Something adjunct to a fact) सम्बन्धः, अनुबन्धः.—(A thing, fact) विषयः, वस्तु *n.*, भूतं, विषयकार्य्यं.—(Incident event) वृत्तं, वृत्तान्तः, सम्भवः.—(Condition, state) अवस्था, दशा, स्थितिः *f.*, संस्थितिः *f.*, भावः, वृत्तिः *f.*, गतिः *f.*; 'he related all the circumstances as they occurred,' सकलवृत्तान्तं यथावृत्तं न्यवेदयत्. 'according to circumstances,' यथासम्भवं, यथास्थितं. 'in good circumstances,' सुस्थितः -ता -तं, सुस्थः -स्था -स्थं; 'in bad circumstances,' दुःस्थः -स्था -स्थं, दुर्गतः -ता -तं.

CIRCUMSTANCED, *p. p.* स्थितः -ता -तं, अवस्थितः -ता -तं, स्थः -स्था -स्थं in comp., भूतः -ता -तं, वर्त्ती -र्त्तिनी -र्त्ति (न्); 'so circumstanced,' एवम्भूतः -ता -तं, इत्थम्भूतः -ता -तं, एवंविधः -धा -धं, तथाविधः -धा -धं.

CIRCUMSTANT, *a.* समन्तात् स्थायी -यिनी -यि (न्) or वर्त्ती -र्त्तिनी -र्त्ति (न्).

CIRCUMSTANTIAL, *a.* (In detail) सविस्तरः -रा -रं, विस्तीर्णः -र्णा -र्णं, सविशेषः -षा -षं, सोपवर्णः -र्णा -र्णं, सविवरणः -णा -णं.—(Not essential) अप्रकृतः -ता -तं.—(Incidental) आगन्तुकः -का -कं.

CIRCUMSTANTIALLY, *adv.* यथावृत्तं, यथास्थितं, सुविस्तरं, विस्तरेण, उपवर्णनं, सुविवरणपूर्व्वकं, निरवशेषतस्.

CIRCUMSTANTIATED, *p. p.* विशेषभाववर्त्ती -र्त्तिनी -र्त्ति (न्). *See* CIRCUMSTANCED.

To CIRCUMVALLATE, *v. a.* परिखाप्राचीरादिना परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं) समन्तात् उपरुध् (c. 7. -रुणद्धि -रोद्धुं).

CIRCUMVALLATION, *s.* (The act) परिखाप्राचीरादिना नगरपरिवेष्टन समन्तादुपरोधनं.—(The trenches, &c., round a besieged town) रुद्धनगरपरिगतं परिखाप्राचीरादि.

To CIRCUMVENT, *v. a.* वञ्च् in caus. (वञ्चयते -ति -यितुं), परिवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, छल् (c. 10. छलयति -यितुं).

CIRCUMVENTED, *p. p.* वञ्चितः -ता -तं, परिवञ्चितः -ता -तं, विप्रलब्धः -ब्धा -ब्धं.

CIRCUMVENTION, *s.* प्रवञ्चना, वञ्चनं, छलं -लना, अतिसन्धानं, कपटः, कापट्यं, स्खलितं, प्रपञ्चः, प्रलम्भः.

To CIRCUMVEST, *v. a.* परिव्ये (c. 1. -व्ययति -व्यातुं), परिधा (c. 3. -दधाति -धातुं), परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं).

[illegible] -TION, *s.* Flying round परिडीनं -नकं

T R M O E. v. a परिवृत् in caus (वर्त्तयति वि लद् in caus लोटयति यितुं संभ्रम् in caus (भ्रामयति यितुं).

To CIRCUMVOLVE, *v. n.* चक्रवत् परिवृत् (c. 1. -वर्त्तते -वर्त्तितुं), लुट् (c. 1. लोटति -ते -लोटितुं), प्रलुट्, परिघूर्ण् (c. 6 घूर्णति -ते -र्णितुं).

CIRCUMVOLUTION, *s.* परिवर्त्तनं, परिवृत्तिः *f*, आवर्त्तनं, आवृत्तिः *f*., विवर्त्तः, व्यावर्त्तनं, प्रलोठनं, घूर्णिः *f*.; 'of a wheel,' चक्रावर्त्तः.

CIRCUS or CIRQUE, *s.* दीर्घमण्डलाकारो रथचर्य्यादिक्रीडायोग्यो भूमिभागः, क्रीडारङ्गः, क्रीडाङ्गनं, केलिरङ्गः.

CISSUS, *s.* (Plant) गोधापदी -दिका, सुवहा.

CIST, *s.* कोशः, पुटः, पटलं, आवेष्टनं.—(Excavation) खातं.

CISTERN, *s.* उदकाधारः, जलाशयः, जलकुण्डं, कुण्डं, पानीयस्थानं, वरासनं, धारासनं, जलस्थानगृहं.

CIT *s* नागरजनः, नागरकः, पौरजनः, पृथग्जनः, अवरवर्णः.

CITADEL, *s* दुर्गं, कोटिः *f*., अलर्कं.—(Commander of) कोटिपालः.

CITAL, *s.* (Impeachment, summons) अभियोगः, आह्वानं, अपवादः.

CITATION, *s.* (Summons) आह्वानं, अभियोगः —(Quotation) उद्धारः, अवतरणं, -तारणं; 'of the Vedas,' श्रुतादानं.—(Passage quoted) उपनीतवचनं, उद्धृतवाक्यं, अवतारितवाक्यं.

CITATORY, *a.* आह्वायकः -का -कं, अपवादकः -का -कं.

To CITE, *v. a* (To summon before a judge) प्राड्विवाकसमीपम् आह्वे (c. 1. -ह्वयति -ह्वातुं), अभियुज् (c. 7. -युनक्ति -योक्तुं).—(To adduce, quote) उपनी (c. 1. -नयति -नेतुं), उद्धृ (c. 1. -हरति -हर्त्तुं), अवतॄ in caus. (-तारयति -यितुं): 'to cite the Vedas,' श्रुतादानं कृ.

CITED, *p. p.* (Quoted) उपनीतः -ता -तं, उद्धृतः -ता -तं, अवतारितः -ता -तं, उपन्यस्तः -स्ता -स्तं.—(Before a court of justice) निबद्धः -द्धा -द्धं, आहूतः -ता -तं, अभियुक्तः -क्ता -क्तं, व्यवहाराभिशस्तः -स्ता -स्तं

CITER, *s* (Impeacher) अभियोगी *m*. (न्), अभियोक्ता *m*. (क्तृ).—(Quoter) उपनेता *m*. (तृ).

CITHERN, *s.* (A harp) वीणाविशेषः, वल्लकी, विपञ्ची, तन्त्रीः.

CITIZEN, *s.* पौरः, पौरजनः, नगरजनः, नागरजनः, नगरस्थः, पुरवासी *m*. (न्), नैगमः *m*. (स्), पौरलोकः; 'a fellow-citizen,' एकपौरः

CITIZENLIKE, *adv.* नगरजनवत्, पौरवत्, सभ्यरूपेण, आर्य्यवत्.

CITIZENSHIP, *s.* नगरजनाधिकारः, पौराधिकारः, पौरत्वं; 'fellow-citizenship,' पौरसख्यं.

CITRINE, *s.* जम्बीरवर्णः -र्णा -र्णं, ईषत्पीतः -ता -तं.

CITRON, *s.* (The tree) जम्बीरः, जम्भः -म्भकः -म्भलः -म्भरः, अम्लकेशरः, केशराम्लः, फलपूरः -रकः, बीजपूरः, मिलः, दन्तशठः, रुचकः, रुचकः, पूतिश्चिंताः, मातुलुङ्गकः, पूर्णबीजः, छोलङ्गः, बीजकः -जपूर्णः.—(The fruit) जम्बीरफलं.

CITY, *s.* पुरं -री, नगरं -री, पूः *f*. (पुर्), पत्तनं, पुटभेदनं, पट्टनं, पट्टं, पुरिः *f*, कर्वटं, दङ्गः, पल्ली, पुटभेदनं, स्थानीयं, निगमः; 'city-gate,' नगरद्वारं, पुरद्वारं; 'city-police,' नगररक्षिपुरुषः.

CITY, *a.* पौरः -री -रं, नागरः -री -रं, नैगमकः -की -कं, नगरस्थः -स्था -स्थं.

CIVET, CIVET-CAT, *s.* गन्धमार्जारः, गन्धोतुः *m*., खट्टाशः -शी, पूतिशारिका, कस्तूरीमृगः.

CIVIC, *a.* पौराचारसम्बन्धी -न्धिनी -न्धि (न्) पौरः -री -रं.

CIVIL, *a.* (Relating to the usages of citizens) पुरव्यवहारसम्बन्धी -न्धिनी -न्धि (न्), नगराचारसम्बन्धीयः -या -यं, नीतिसम्बन्धीयः -या -यं, पौरः -री -रं; 'civil war, popular disturbance,' प्रकृतिक्षोभः, विप्लवः.—(Complaisant, gentle) अनुग्राही -हिणी -हि (न्), अनुनयी -यिनी -यि (न्), सानुनयः -या -यं अनुकूलः -ला -लं अनुरोधी -धिनी -धि (न्) चाटुकारः -री -रं अनुनयवादः -दा -दं दाक्षिण्यः -ण्या -ण्यं C[illegible] in speech) प्रियवदः -दा -दं, अभिवादकः -का -कं, वन्दारुः -रुः -रु शक्तः -क्ता -क्तं.—(Civilized) सभ्यः -भ्या -भ्यं.

CIVILIAN, *s.* स्मार्त्तः, स्मृतिज्ञः, धर्म्मशास्त्रज्ञः, व्यवहारविधिज्ञः, नीतिज्ञः नयविद्, व्यवस्थाकुशलः, राजकार्य्यव्यवसायी *m*. (न्), राजव्यापारी *m* (न्)

CIVILISATION, *s.* सभ्यता, शिष्टता, शिष्टाचारत्वं, आर्य्यवृत्तत्वं, सुशीलत्वं

CIVILITY, *s.* (Politeness) सानन्दत्वं, अनुग्रहः, अनुरोधः, अनुनयः अभिप्रीतिः *f*., अनुकूलता, अनुवृत्तिः *f*. -वर्त्तनं, सभाजनं, सौजन्यं, प्रश्रयः सभ्यता, सुशीलता, शिष्टता.

To CIVILIZE, *v. a* शिष्टाचारान् or आर्य्यव्यवहारान् शिक्ष् in caus (शिक्षयति -यितुं) or शास् (c. 2. शास्ति, शासितुं).

CIVILIZED, *p. p.* शिष्टः -ष्टा -ष्टं, सभ्यः -भ्या -भ्यं, विनीतः -ता -तं, शिष्टाचारसेवी -विनी -वि (न्), सग्राम्यः -म्या -म्यं, आर्य्यवृत्तः -त्ता -त्तं 'civilized and rude,' आर्य्या म्लेच्छाश्च.

CIVILLY, *adv* (Politely) सानुनयेन, सानन्दपूर्व्वकं, सानुनयं, सुशीलवत् सानुरोधं.—(In a manner relating to civil government) नीतिविज्ञानुसारात्, पौरव्यवहारानुसारेण.

CLACK, *s.* (Incessant chattering) जल्पः -ल्पनं, वावदूकता, अतिशयजल्पः, वाक्चापल्यं, खटखटशब्दः, खट्खटं.—(Bell of a mill) पेषणीघण्टा.

To CLACK, *v. n.* अतिशयेन जल्प् (c. 1. जल्पति -ल्पितुं), पेषणीघण्टाशब्दवत् शब्दं कृ, खटखटशब्दं कृ.

CLAD, *a.* आच्छादितः -ता -तं, प्रच्छादितः -ता -तं, वस्त्रवेष्टितः -ता -तं वस्त्रान्वितः -ता -तं, परिहितः -ता -तं, प्रावृतः -ता -तं, आवृतः -ता -तं परिच्छदः -दा -दं, पिनद्धः -द्धा -द्धं, संवीतः -ता -तं, समाच्छन्नः -न्ना -न्नं सवासाः -साः -सः (स्), सचेलः -ला -लं; 'lightly clad,' लघुवासाः -साः -सः (स्).

To CLAIM, *v. a.* स्वीकृ, अङ्गीकृ: याच् (c. 1. याचति -चितुं), प्रार्थ् (c 10 प्रार्थयति -ते -यितुं), ममेति उक्त्वा ग्रह् (c 9. गृह्णाति, ग्रहीतुं) मह्यं दातव्यमिति ज्ञापयित्वा ग्रह्; अभिमानं कृ, as, 'to claim money, धनाभिमानं कृ; ममेति वद् (c. 1. वदति -दितुं), मदीयमिति or स्वीयमिति वद्, स्वाधिकारं or स्वस्वत्वं ज्ञा in caus. (ज्ञापयति -यितुं).—(To set up a claim) स्वीकृ.—(To have a claim to) अर्ह् (c. 1. अर्हति -ते -र्हितुं).

CLAIM, *s.* अधिकारः, अभियोगः, अभिमानं, याच्ञा, अभ्यर्थना, प्रार्थना; 'false claim,' मिथ्याभियोगः; 'claim laid to learning,' विद्याभिमानं

CLAIMABLE, *a.* अभियोक्तव्यः -व्या -व्यं, याचनीयः -या -यं, प्रार्थनीयः -या -यं

CLAIMANT, *s.* अभियोक्ता *m*. (क्तृ), अर्थी *m*. (न्), अधिकारी *m*. (न्) याचिता *m*. (तृ), प्रार्थयिता *m*. (तृ).

CLAIMED, *p. p.* अधिकृतः -ता -तं, याचितः -ता -तं, प्रार्थितः -ता -तं अभियुक्तः -क्ता -क्तं, प्रख्यातः -ता -तं, मार्गितः -ता -तं.

CLAIR-OBSCURE, *s.* चित्रकर्म्मणि नानाच्छायाविन्यासविद्या.

To CLAM, *v. a.* (To clog with glutinous matter) श्यै in caus (श्यापयति -यितुं), श्यानीकृ, सान्द्रीकृ.

To CLAMBER, *v. a.* पाणिपादेन or करचरणाभ्यां दुरारोहस्थानम् आयासेन आरुह् (c. 1. -रोहति -रोढुं) or अध्यारुह्.

CLAMBERING, *s.* पाणिपादेन विषमस्थानारोहणं, आयासेनारोहणं.

CLAMMINESS, *s.* श्यानता, शीनता, सान्द्रता, घनत्वं, अनुलग्नशीलत्वं

CLAMMY, *a.* श्यानः -ना -नं, शीनः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, घनः -ना -नं अनुलग्नशीलः -ला -लं, संलग्नशीलः -ला -लं, आर्द्रः -र्द्रा -र्द्रं.

CLAMOUR, *s.* घोषः -षणं, कलकलः, कोलाहलः, उत्क्रुष्टं, क्रुष्टिः *f*, कलरवः, कलकलः

उच्चैःस्वरः, रावः, बहुभिः कृता संहूतिः, प्रक्ष्वेडनं.

To CLAMOUR, *v. n.* उच्चैर् घुष् (c. 10. घोषयति -यितुं), उद्घुष्, उत्क्रुश् (c. 1. क्रोशति -क्रोष्टुं), प्रक्ष्विड् (c. 1. -क्ष्वेडति -डितुं).

CLAMOUROUS, *a.* घोषकरः -री -रं, घोषणः -णा -णं, उच्चैःस्वरकारी -रिणी -रि (न्), तुमुलकारी &c., मुखरः -रा -रं, महास्वनः -ना -नं, बहुघोषः -षा -षं, अनल्पघोषः -षा -षं, प्रक्ष्वेडितः -ता -तं, प्रक्ष्वेडितवान् -वती -वत् (त्)

CLAMP, *s.* (A piece of iron for joining stones) शिलाद्वयसम्बन्धनार्थं कीलः.—(A quantity of brick) इष्टकाराशिः *f*

To CLAMP, *v. a.* पाषाणद्वयं or काष्ठद्वयं कीलेन आबन्ध् (c. 9 -बध्नाति -बन्धुं)

CLAN *s.* कुलं, वंशः, गोत्रं, सन्तानः, वर्गः, वर्गः, जातिः *f.*, कुटुम्बः, पंक्तिः *f.*, मण्डलं, सङ्घः, संसर्गः, शाखा.

CLANDESTINE, *a.* निभृतः -ता -तं, गुप्तः -प्ता -प्तं, गूढः -ढा -ढं, रहस्यः -स्या -स्यं, छन्नः -न्ना -न्नं, प्रच्छन्नः -न्ना -न्नं, निह्नुतः -ता -तं, अप्रकाशः -शा -शं, छलेन कृतः -ता -तं; 'a clandestine marriage,' चौरिकाविवाहः.

CLANDESTINELY, *adv* निभृतं, रहः (स्), रहसि, रहस्य, गुप्तं, छलेन, प्रच्छन्नं, निह्नवेन, अप्रकाशं.

CLANG OF CLANGOUR, *s.* घुषं, तुमुलं, झञ्झा, झः.—(Of arms) शस्त्रघोषः.

To CLANG, *v. n.* शिञ्ज् (c. 2. शिंक्ते, c. 1. शिञ्जते -ञ्जितुं), विशिञ्ज्, क्वण् (c. 1. क्वणति -णितुं), स्वन् (c. 1. स्वनति -नितुं), प्रक्ष्विड् (c. 1. -क्ष्वेडति -डितुं), झञ्झा (nom. झञ्झायते).

CLANGOUS, *a.* घोषणः -णा -णं, तुमुलकरः -री -रं. शस्त्रघुषकरः -री -रं.

CLANK, *s.* शिञ्जितं, क्वणितं, घुषं, झञ्झनं, झञ्झा, प्रक्ष्वेडनं.

To CLAP, *v. a.* (Strike together suddenly) अकस्मात् संहन् (c. 2. हन्ति -हन्तुं) or सङ्घट्ट् (c. 10. -घट्टयति -यितुं), आस्फल् in caus. (-स्फालयति -यितुं).—(The hands, arms) तालं कृ, करतालं कृ, आस्फुट् (c. 10. -स्फोटयति -यितुं)—(The wings) पक्षौ उत्क्षिप् (c. 6. क्षिपति -क्षेप्तुं).—(To applaud) करतालेन प्रशंस् (c. 1. -शंसति -शंसितुं).—(To apply suddenly) अकस्मात् प्रविश् in caus. (-वेशयति -यितुं) or अृ in caus. (अर्पयति -यितुं) or न्यस् (c. 4. -अस्यति -असितुं).

CLAP, *s.* स्तनितं, आस्फोटनं, ध्वनितं, क्वणितं, सङ्घट्टशब्दः.—(Of thunder) मेघनादः, मेघस्तनितं, वज्रनिर्घोषः, वज्रनिष्पेषः, स्फूर्जथुः *m.*—(Of the hand) तालः.—(Applause) करतालेन प्रशंसा, प्रशंसाशब्दः, अनुरागजः शब्दः.

CLAPPER, *s.* (Of a bell) घण्टालोला, घण्टावादकः, नादनः.—(Applauder) करतालेन प्रवादकारी *m.* (न्).

CLARET, *s.* प्रमत्तमद्यं, प्रसन्नेरा, रक्तवर्णः स्वच्छमद्यविशेषः.

CLARIFICATION, *s.* प्रसादनं, विशोधनं, पावनं, अविशदीकरणं, मलापकर्षणं.

To CLARIFY, *v. a.* शुध् in caus. (शोधयति -यितुं), परिशुध्, विशुध्, संशुध्, पू (c. 9. पुनाति -नीते, पवितुं), परिपू, विपू, अविशदीकृ, विमल (nom. विमलयति -यितुं).

To CLARIFY, *v. n.* प्रसद् (c. 6. -सीदति -सत्तुं), पवित्रीभू, विमलीभू.

CLARINET, *s.* वेणुः *m.*, वंशः, विवरनालिका, महास्वरो वेणुभेदः.

CLARION, *s.* शुषिरवाद्यविशेषः, तूर्यं, शङ्खः.

CLARITY, *s.* प्रसन्नता, स्वच्छता, कान्तिः *f.*, द्युतिः *f.*, दीप्तिः *f.*

To CLASH, *v. n.* सङ्घट्ट् (c. 1 -घट्टते -ट्टितुं), परस्परसमाघातं कृ, परस्परसङ्घट्टभयुक्तं झञ्झाशब्दं कृ or झञ्झा (nom. झञ्झायते).—(To contradict, disagree) विवद् (c. 1. -वदते -दितुं), विप्रवद्, विसंवद्, परस्परात् विरुध् (c. 7. -रुणद्धि -रोद्धुं).

CLASH, *s.* [illegible] -र्षं सङ्घट्टः [illegible] -([illegible]) [illegible]

CLASHING, *a.* (Contradictory) परस्परव्याहतः -ता -तं, परस्परविरोधी -धिनी -धि (न्), विवदमानः -ना -नं, विरुद्धार्थः -र्था -र्थं.

CLASP, *s.* (Embrace) आलिङ्गनं -ङ्गितं, परिष्वङ्गः, आश्लेषः, संश्लेषः, परिरम्भः, उपगूढं, अङ्कः, अङ्कपाली.—(Hook, buckle) कुडुपः.

To CLASP, *v. a.* (Shut with a clasp) कुडुपेन बन्ध् (c. 9. बध्नाति बन्धुं) or पिनह् (c. 4 -नह्यति -नद्धुं).—(Embrace) आलिङ्ग् (c. 1 -लिङ्गति -ङ्गितुं), समालिङ्ग्; आश्लिष् (c. 4. -श्लिष्यति -श्लेष्टुं) संश्लिष्, पीड् (c. 10. पीडयति -यितुं), स्वञ्ज् (c. 1. स्वजते, स्वंक्तुं), परिष्वञ्ज्, सम्परिष्वञ्ज्, उपगुह् (c. 1. -गूहति -गूहितुं), परिरभ् (c. 1 -रभते -रब्धुं), क्रोडीकृ.—(Enclose round) परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं).—(Clasp the hands) हस्तौ बन्ध् or संहन् (c. 2. -हन्ति -हन्तुं), अञ्जलिं बन्ध् or संश्लिष्

CLASPED, *p. p.* आलिङ्गितः -ता -तं, श्लिष्टः -ष्टा -ष्टं, आश्लिष्टः -ष्टा -ष्टं, संश्लिष्टः -ष्टा -ष्टं, परिरब्धः -ब्धा -ब्धं, परिष्वक्तः -क्ता -क्तं, परिमृष्टः -ष्टा -ष्टं, उपगूढः -ढा -ढं, पीडितः -ता -तं, पिष्टः -ष्टा -ष्टं, क्रोडीकृतः -ता -तं; 'with hands clasped,' बद्धाञ्जलिः -लिः -लि, कृताञ्जलिः -लिः -लि —(Clasped in the arms) भुजापीडितः -ता -तं.

CLASPER, *s.* लताभुजः, वृक्षादिपरिवेष्टनशीलः लताविटपः.

CLASP-KNIFE, *s.* वारङ्गमध्ये निवेशयितुं शक्या छुरिका.

CLASS, *s.* (A rank or order of persons) वर्णः, वर्गः, पदं, आश्रमः, जातिः *f.*—(A set of things or beings) गणः, पंक्तिः *f.*, श्रेणी, संसर्गः, समूहः, गोत्रं; 'class of verbs,' गणः.—(A number of scholars) सहाध्यायिनां पंक्तिः, छात्रसमूहः; 'the lower classes अवरवर्णाः *m. pl.*, अधमजातीयाः *m. pl.*

To CLASS OF CLASSIFY, *v. a.* वर्गक्रमेण or यथावर्गं विरच् (c. 10. -रचयति -यितुं), or व्यस् (c. 4. -अस्यति -असितुं) or ग्रन्थ् (c. 1. ग्रन्थति ग्रन्थितुं), गणीकृ, वर्गीकृ.

CLASSED OF CLASSIFIED, *p. p.* गणीभूतः -ता -तं, वर्गीभूतः -ता -तं, वर्गीयः -या -यं, ग्रथितः -ता -तं, वर्गक्रमेण विन्यस्तः -स्ता -स्तं or व्यूढः -ढा -ढं

CLASSICAL, *a.* (Refined) संस्कृतः -ता -तं, साधुः -धुः -ध्वी -धु.—(Of the first rank) प्रथमवर्गीयः -या -यं, श्रेष्ठः -ष्ठा -ष्ठं, प्रथमपदस्थः -स्था -स्थं (Relating to ancient books) पूर्वकालीनग्रन्थसम्बन्धी -न्धिनी -न्धि (न्)

CLASSIFICATION, *s.* गणीकरणं, गणना, वर्गक्रमेण विन्यासः, प्रतिविधानं

CLASSIFIER, *s.* गणकारः, व्यासः; 'of words,' पदसङ्घातः.

CLASSICK, *s.* ग्रन्थकर्तॄणां मध्ये श्रेष्ठः, पूर्वकालीनग्रन्थकारः.

To CLATTER, *v. n.* क्वण् (c. 1. क्वणति -णितुं), स्वन् (c. 1. स्वनति -नितुं) झञ्झनं कृ, झञ्झा (nom. झञ्झायते), चटचट (nom. चटचटायते) —(To talk idly) जल्प् (c. 1. जल्पति -ल्पितुं).

CLATTER, *s.* क्वणितं, स्तनितं, स्वनितं, तुमुलं, झः, झञ्झनं, चटचट *ind.*

CLAVATED, *a.* ग्रन्थिलः -ला -लं, ग्रन्थी -न्थिनी -न्थि (न्), गण्डवान् -वती -वत् (त्).

CLAUDICATION, *s.* (Lameness) खञ्जता, खञ्जत्वं, गतिवैकल्यं.

CLAVICLE, *s* जत्रु *n.*, ग्रीवास्थि *n.*, कण्ठास्थि *n.*

CLAUSE, *s.* (Division of a subject) पदं, स्थानं, भागः, अधिकरणं, अङ्गं, शाखा.—(Sentence) वाक्यं.—(Particular stipulation) नियमपत्राङ्कं, नियमः.

CLAUSTRAL, *a.* मठसम्बन्धी -न्धिनी -न्धि (न्), विहारसम्बन्धी &c.

CLAW, *s.* नखः, नखरः, करजः, कररुहः, पाणिः *m.*, अर्द्धचन्द्रः, अर्द्धेन्दुः

To CLAW, *v. a.* नखेन दृ (c. 10. दारयति -यितुं) or आहन् (c. 2 हन्ति -हन्तुं) or छिद् (c. 6. छिद्यति छेदितुं), नखाघातं कृ.

CLAWED, *a.* नखी -खिनी -खि (न्), नखवान् -वती -वत् (त्).

CLAY, *s.* [illegible] (न्), मृत्तिका [illegible]

निपङ्कर गिलोम्भी

T LA a. पङ्केन लिप् (c. 6 लिम्पति लेप्तुं). c.ay.d suga., शार्करः -र्करः, शुक्ला, सितशर्करः, सिता, श्वेता.

CLAYEY, CLAYISH, *a.* मृद्धी -द्विनी -द्वि (न्), पङ्किलः -ला -लं, समकालः -ला -लं, मार्त्तिकः -की -कं, कर्दमिनः -नी -नं, मृन्मयः -यी -यं.

CLEAN, *a.* (Free from dirt) विमलः -ला -लं, निर्मलः -ला -लं, अमलिनः -ना -नं, पवित्रः -त्रा -त्रं, शुद्धः -द्धा -द्धं, शुचिः -चिः -चि, परिष्कृतः -ता -तं, अकल्कः -ल्का -ल्कं, अकल्मषः -षा -षं, धौतः -ता -तं; 'having a clean face,' शुचिमुखः -खी -खं; 'having clean clothes,' शुद्धवासाः -साः -सः (स्); 'ceremonially clean,' मेध्यः ध्या -ध्यं.—(Guiltless, innocent) शुचिः -चिः -चि, शुद्धमतिः -तिः -ति, अनघः -घा -घं, विमलात्मा -त्मा -त्म (न्).—(Neat, smooth) सुरूपः -पा -पं; 'having a clean figure,' तनुमध्यः -ध्या -ध्यं.

CLEAN, *adv.* अशेषतस्, अखिलेन, साकल्येन, सम्यक्, आमूलं.

To CLEAN, *v. a.* शुध् in caus. (शोधयति -यितुं), परिशुध्, पू (c. 9. पुनाति, पवितुं), पवित्रीकृ, धाव् (c. 10. धावयति -यितुं), प्रक्षल् (c. 10. क्षालयति -यितुं), मृज् (c. 2. मार्ष्टि, मार्ष्टुं), शुचीकृ, परिष्कृ; 'to clean the teeth,' दन्तान् धाव् or शुध्.

CLEANED, *p. p.* शोधितः -ता -तं, पवित्रीकृतः -ता -तं, मृष्टः -ष्टा -ष्टं, क्षालितः ता -तं, प्रक्षालितः -ता -तं, विगतकल्मषः -षा -षं.

CLEANING, *s.* शोधनं, प्रक्षालनं, मार्जनं, पवः, निष्पावः, पावनं, विशोधनं, मार्ष्टिः *f.*, मृजा, मार्जना *f.*—(Cleaning the teeth) दन्तशुद्धिः *f.*, दन्तधावनं.

CLEANLINESS, *s.* शुद्धता, शुद्धिः *f.*, पवित्रत्वं, शुचिता, शौचं, परिष्कृतिः *f.*, मार्ष्टिः *f.*, 'neatness,' विनीतता.

CLEANLY, *a.* पवित्रशरीरः -रा -रं or शुचिशरीरः, शुद्धदेहः -हा -हं, मृष्टकायः या -यं, निर्मलः -ला -लं, विनीतः -ता -तं; 'in dress,' शुद्धवासाः साः -सः (स्).

CLEANLY, *adv.* शुचि, पवित्रं, निर्मलं, विनीतं, शुद्धप्रकारेण.

CLEANNESS, *s.* शुचिता, शौचं, निर्मलत्वं, वैमल्यं, शुद्धत्वं, शुद्धिः *f.*, विशुद्धिः *f.*, परिष्कारः, वैशद्यं, अकल्कता.—(Innocence) शुद्धिः *f.*

To CLEANSE, *v. a.* शुध् in caus. (शोधयति -यितुं), परिशुध्, विशुध्, संशुध्, पू (c. 9. पुनाति -नीते, पवितुं), परिपू, विपू, प्रक्षल् (c. 10. क्षालयति -यितुं), धाव् in caus. (धावयति -यितुं), प्रधाव्, निर्णिज् (c. 3 -नेनेक्ति -नेक्तुं), मृज् (c. 1. मार्जति, c. 2. मार्ष्टि, मार्ष्टुं), सम्मृज्, पवित्रीकृ, शुचीकृ, परिष्कृ.—(From dust) नीरजीकृ.

CLEANSED, *p. p.* पूतः -ता -तं, पवित्रः -त्रा -त्रं, पवित्रितः -ता -तं, शोधितः ता -तं, मार्जितः -ता -तं, प्रक्षालितः -ता -तं, निर्णिक्तः -क्ता -क्तं, मृष्टः -ष्टा -ष्टं, परिष्कृतः -ता -तं, अनवस्करः -रा -रं, धौतः -ता -तं, निर्धौतः ता -तं, शुचीकृतः -ता -तं, पवित्रीकृतः -ता -तं, निःशोध्यः -ध्या -ध्यं.

CLEANSER, *s.* प्रक्षालकः, निर्णेजकः, शोधकः, सम्मार्जकः, पावकः.

CLEANSING, *s.* शोधनं, शुद्धिः *f.*, पावनं, मार्ष्टिः *f.*, मार्जनं, प्रक्षालनं, निर्णेकः, मलापकर्षणं.

CLEAR, *a.* (Bright, transparent) प्रसन्नः -न्ना -न्नं, विशदः -दा -दं, विमलः ला -लं, निर्मलः -ला -लं, अमलः -ला -लं -लिनः -ना -नं, अच्छः च्छा -च्छं, स्वच्छः -च्छा -च्छं, शुद्धः -द्धा -द्धं or विशुद्धः, स्फटिकप्रभः -भा -भं, दीप्तः -प्ता -प्तं.—(Serene, as the sky) वितिमिरः -रा -रं, अनभ्रः -भ्रा -भ्रं, निरभ्रः -भ्रा -भ्रं, व्यभ्रः -भ्रा -भ्रं, गततोयदः -दा -दं; 'as the mind,' प्रसन्नः -न्ना -न्नं.—(Indubitable) निःसन्देहः -हा -हं.—(Evident) व्यक्तः -क्ता -क्तं or प्रव्यक्तः or अभिव्यक्तः, स्पष्टः -ष्टा -ष्टं, स्फुटः -टा -टं, [illegible] -ना -नं सुप्रकाशः -शा -शं.—(Intelligible ——)

स्पष्टार्थः -र्था -र्थं, भिन्नार्थः -र्था -र्थं, सुगम्यः -म्या -म्यं, सुबोधः -धा -धं.—(A clear understanding) विशुद्धबुद्धिः, शुद्धधीः.—(Innocent) शुद्धः -द्धा -द्धं, शुचिः -चिः -चि, अदुष्टदोषः -षा -षं.—(Out of debt) अनृणः -णा -णं.—(Sounding distinctly) पटुस्वरः -रा -रं, उच्चैःस्वरः -रा -रं.—(Open, free from trees, &c.) तरुगुल्मादिविवर्जितः -ता -तं, निष्कण्टकः -का -कं, विविक्तः -क्ता -क्तं; 'a clear space,' विविक्तता.—(Entire, free from deductions) अशेषः -षा -षं, निरवशेषः -षा -षं, अखण्डः -ण्डा -ण्डं, निरुपद्रवः -वा -वं.—(Unobstructed) अबाधः -धा -धं, निर्विघ्नः -घ्ना -घ्नं.

To CLEAR, *v. a.* (Make bright or clean) शुध् in caus. (शोधयति -यितुं), प्रसद् in caus. (-सादयति -यितुं), प्रसन्नीकृ, निर्मलीकृ, विमल (nom. विमलयति -यितुं), मृज् (c. 2. मार्ष्टि, मार्ष्टुं).—(Explain) व्याख्या (c. 2. -ख्याति -ख्यातुं), स्पष्टीकृ, व्यक्तीकृ, प्रत्यक्षीकृ, संशुध् in caus. (-शोधयति -यितुं), परिशुध् in caus.—(Liquidate) शुध् in caus. संशुध्, अपाकृ, विनी (c. 1. -नयते -ति -नेतुं).—(Clear a doubt) संशयम् अपनी.—(Free from incumbrances, &c.) विशुध् in caus., मुच् (c. 6. मुञ्चति, मोक्तुं), विघ्नान् विनी or हृ (c. 1. हरति हर्त्तुं) or नश् in caus. (नाशयति -यितुं), निर्विघ्नं -घ्नां -घ्नं कृ, निष्कण्टकं -कां -कं कृ.—(Gain) निरवशेषं लभ् (c. 1. लभते, लब्धुं) or प्राप् (c. 5. -आप्नोति -आप्तुं).—(Justify) परिशुध् in caus., विशुध् in caus; 'he clears himself,' आत्मानं निर्दोषं करोति.—(Clear the throat) उत्कासनं कृ.—(Purge) रिच् (c. 7. रिणक्ति, रेक्तुं), विरिच्.

To CLEAR, *v. n.* (Grow bright) विमलीभू, शुचीय (nom. शुचीयते), 'as the weather,' निरभ्रीभू, गततोयदीभू.

CLEARANCE OF CLEARING, *s.* शुद्धिः *f.* विशुद्धिः *f.*, शोधनं, विशोधितत्वं; 'clearance of a debt,' ऋणशोधनं, ऋणापाकरणं; 'of a grudge,' वैरशोधनं.—(Certificate from the custom-house) शुल्कशालाधिकारात् शोधनपत्रं.

CLEARED, *p. p.* शोधितः -ता -तं, प्रसादितः -ता -तं, निर्मलीकृतः -ता -तं, रेचितः -ता -तं; 'as the weather,' गततोयदः -दा -दं.

CLEARER, *s.* शोधकः, प्रसादनः; 'of obstacles,' विघ्ननाशकः, विघ्नविनायकः.

CLEARLY, *adv.* (Plainly, evidently) व्यक्तं, सुव्यक्तं, स्पष्टं, प्रत्यक्षतस् प्रत्यक्षेण, स्फुटं, स्पष्टरूपेण.—(Intelligibly) स्पष्टार्थं, भिन्नार्थं —(Brightly) विमलं, प्रसन्नं, विशदं.—(Candidly) सरलं, दाक्षिण्येन

CLEARNESS, *s.* (Brightness, transparency) प्रसादः, प्रसन्नता, निर्मलत्वं निर्मलत्वं, वैमल्यं, नैर्मल्यं, शुद्धत्वं, शुद्धिः *f.*, स्वच्छता, वैशद्यं, दीप्तिः *f.* प्रभा.—(Distinctness, plainness) स्पष्टता, व्यक्तत्वं, प्रत्यक्षत्वं, स्फुटता, भिन्नार्थत्वं.

CLEAR-SIGHTED, *a.* विवेकदृश्वा -श्वा -श्व (न्), शुद्धदृष्टिः -ष्टिः -ष्टि, शुद्धधीः -धीः -धि, तीक्ष्णदृष्टिः -ष्टिः -ष्टि, दूरदर्शी -र्शिनी -र्शि (न्), मर्म्मज्ञः -ज्ञा ज्ञं

CLEAR-SIGHTEDNESS, *s.* शुद्धदृष्टिः *f.*, विवेकदृश्वत्वं, तीक्ष्णदृष्टिः *f.*, दूरदृष्टिः

To CLEAR-STARCH, *v. a.* गोधूमसम्भवादिसान्द्रद्रव्यप्रक्षेपेण वस्त्रादि धावयित्वा स्तब्धीकृ or दृढीकृ.

CLEAR-STARCHER, *s.* गोधूमसम्भवादिसान्द्रद्रव्यप्रक्षेपेण वस्त्रधावकः.

CLEAR-STARCHING, *s.* पूर्व्वोक्तसान्द्रद्रव्यप्रक्षेपेण वस्त्रधावनं.

To CLEAVE, *v. n.* (To adhere) सञ्ज् in pass. (सज्यते or सज्जते) अनुषञ्ज्, आसञ्ज्, संसञ्ज्, अनुबन्ध् (c. 9. -बध्नाति -बन्द्धुं), संयुज् in pass (-युज्यते), संलग्नीभू, अनुलग्नीभू.—(Divide in two parts) स्फुट् (c. 1. स्फोटति, c. 6 स्फुटति -टितुं), दल् (c. 1. दलति -लितुं), विदल् विदॄ in pass. (-दीर्य्यते), भिद् in pass. (भिद्यते), फल् (c. 1. फलति -लितुं)

To ——— *v. a.* (To divide with violence) भिद् (c. 7 भिनत्ति

भिन्ते, भेत्तुं), विभिद्, विनिर्भिद्, or in caus. (भेदयति -यितुं), खद् (c. 10. खादयति -यितुं), विखद्, दॄ (c. 9. दृणाति, दरितुं -रीतुं or in caus. दारयति -यितुं), छिद्, अवदृ, दल् in caus. (दालयति, दलयति -यितुं), विदल्, विदलीकृ.

Cleaver, s. (One who cleaves) भेत्ता m. (त्तृ), भेदकः, दारकः.—(A chopping-knife) मांसच्छेदनार्थं छुरिका, मांसभेदी m. (न्), मांसभिद् f., छिदिः f.

Clef, s. (In music) गान्धर्व्वविद्यायां वाद्यीकृत्यनार्थं चिह्नं.

Cleft, s. दरी -रा, टङ्कः, सन्धिः m., भेदः, विदीर्णं.

Cleft or cloven, a. भिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, विदारितः -ता -तं, विदीर्णः -र्णा -र्णं, विदलितः -ता -तं, विदलः -ला -लं -लीकृतः -ता -तं, दलितः -ता -तं.

Clemency, s. कृपा, दया, क्षमा, कारुण्यं, अनुकम्पा, अनुक्रोशः, घृणा, प्रसादः, दयालुता.

Clement, a. दयालुः -लुः -लु, कृपालुः -लुः -लु, दयाशीलः -ला -लं, वत्सलः -ला -लं, मृदुः -द्वी -दु, कारुणिकः -की -कं, सानुकम्पः -म्पा -म्पं, करुणार्द्रः -र्द्रा -र्द्रं, दयालुः -लुः -लु.

Clench. *See* Clinch.

Clergy, s. पौरोहित्यं, पुरोहितवर्गः, पुरोहितसमूहः, धर्म्माध्यापकानां समवायः.

Clergyman, s. पुरोहितः, धर्म्माध्यापकः, धर्म्मोपदेशकः, धर्म्मप्रचारकः, धर्म्मप्रदर्शकः, धर्म्मप्रवक्ता m. (क्तृ), याजकः.

Clerical, a. पौरोहितः -ती -तं, याजकीयः -या -यं, धर्म्मोपदेशविषयः -या -यं, पौरोहित्यसम्बन्धी -न्धिनी -न्धि (न्).

Clerk, s. (Man employed as a writer) कायस्थः, लेखकः, लिपिकरः, अक्षरचणः.—(Accountant) गणनाध्यक्षः.—(Scholar) विद्वान् m. (स्), पण्डितः, कृतविद्यः, शास्त्री m. (न्).—(Clergyman) पुरोहितः, धर्म्माध्यापकः.—(Assistant of a *clergyman*) उपपुरोहितः, पुरोहितसहायः.

Clerkship, s. कायस्थता, कायस्थ्यं, कायस्थकर्म्म n. (न्).—(Scholarship) पाण्डित्यं.

Clever, a. चतुरः -रा -रं, पटुः -टुः -ट्वी -टु, दक्षः -क्षा -क्षं, अभिज्ञः -ज्ञा -ज्ञं, विचक्षणः -णा -णं, निपुणः -णा -णं, निपुणमतिः -तिः -ति, कुशलः -ला -लं, वैज्ञानिकः -की -कं, सुप्रयोगवान् -वती -वत् (त्), योग्यः -ग्या -ग्यं, दक्षः -क्षा -क्षं, विशारदः -दा -दं, पेशलः -ला -लं, विपश्चित् m. f. n., पण्डितः -ता -तं, कृती -तिनी -ति (न्), विदग्धः -ग्धा -ग्धं, प्रवीणः -णा -णं, कल्याणबुद्धिः -द्धिः -द्धि.

Cleverly, *adv.* चतुरं, चातुर्य्येण, पाटवेन, निपुणं, दाक्ष्येण.

Cleverness, s. चातुर्य्यं, चतुरता, नैपुण्यं, कुशलता, कौशल्यं, पटुत्वं, पाटवं, दाक्ष्यं, दाक्षिण्यं, प्रवीणता, प्रावीण्यं, सुप्रयोगता, वैचक्षण्यं, विदग्धता, वैदग्ध्यं, योग्यता, कौशलत्वं, निर्देष्टा m. (ष्टृ), उद्देशकः.

Clew or clue, s. (A ball of thread) सूत्रकोषः -षं.—(A guide) सूत्रं, गहनमार्गनिर्गमोपायः, दर्शकः.

To clew, v. a. रज्जुद्वारेण नौकावसनम् उन्नम् (c. 1. -नमति -नन्तुं, c. 10. -नामयति -यितुं) यदनन्तरं वसनसंवरणं कर्तुं शक्यते.

To click, v. n. टं टं पट् पट् कट् कट् चित् चित् इत्यादिशब्दान् कृ, पटपट (nom. पटपटायते).

Client, s. (Dependent) आश्रितः, संश्रितः, अधीनः, आयत्तः, उपजीवी m. (न्), भाक्तिकः, अनुगतः, प्रसादी m. (न्).—(One who applies to an advocate for counsel) व्यवहारशास्त्रज्ञहेतोर् व्यवहारसचिवसंश्रितः.

Clientship, s. अधीनता, आयत्तत्वं, व्यवहारसचिवसंश्रितस्य दशा.

Cliff, s. प्रपातः, दरद् f., भृगुः, शिखरं, तटः, भृगुः m., समुद्रवेलायां

भातुकाभूमिः.

Climacter or climacteric, s. शरीरविकारपरिणामो विशेषवत्सरपर्य्याय शरीरविकारवर्षः

Climate or clime, s. (A region) देशः, प्रदेशः, दिश् f. (श्), राष्ट्रं, आशा.—(Temperature) जलवायुः, जलाकाशं, व्योम n. (न्), आकाशः, वायुगुणः.

Climax, s. सारं, क्रमशो वृद्धिः f., उद्गमनं, उत्तरोत्तरवृद्धिः f.

To climb, v. a. आयासेन आरुह् (c. 1. -रोहति -रोढुं), अध्यारुह्, अधिरुह्, अधिक्रम् (c. 1. -क्रामति -क्रमितुं) or अवस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं).

To climb, v. n. ऊर्द्ध्वं or ऊर्ध्वः or उपरि गम् (c. 1. -गच्छति -गन्तुं).

Climber, s. आरोही m. (न्), अधिरोही m. (न्), आरोढा m. (ढृ).—(Plant) वल्लिः f.

Clime, s. (Region) देशः, प्रदेशः.—(Temperature) जलवायुः m. जलाकाशः.

To clinch or clench, v. a. (Grasp) दृढमुष्टिना सङ्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं) or धृ (c. 1. धरति, धर्त्तुं), मुष्टिसङ्ग्राहेण पीड् (c. 10. पीडयति -यितुं): 'to clinch the fist,' मुष्टिं बन्ध् (c. 9. बध्नाति, बन्द्धुं) मुष्टिबन्धं or -सङ्ग्राहं कृ.—(Confirm) दृढीकृ, स्थिरीकृ, दृढप्रमाणं दा (c. 3. ददाति, दातुं).—(Fix the point of a nail on the other side) कीलाग्रं वक्रम् आवर्त्य विपर्य्ययभागे निखन् (c. 1. -खनति -नितुं).

Clinch, s. (A pun) द्व्यर्थवाक्यं, श्लेषवाक्यं, श्लेषः.

Clincher, s. (A hold-fast) बन्धनकीलः, कीलकः, बन्धनी -नः.

To cling, v. n. अवलम्ब् (c. 1. -लम्बते -म्बितुं), समालम्ब्, संलग्नीभू, अनुलग्नीभू, अनुबन्ध् (c. 9. -बध्नाति -बन्द्धुं or in pass. -बध्यते), सञ्ज् in *pass.* (सज्यते or सज्जते), अनुषञ्ज्, आसञ्ज्, प्रसञ्ज्, संसञ्ज्, श्लिष् (c. 4. श्लिष्यते, श्लेष्टुं); '*clinging to the neck,*' कण्ठलग्नः -ग्ना -ग्नं.

Clingy, a. अनुलग्नशीलः -ला -लं, संलग्नशीलः -ला -लं, अनुषञ्जकः -का -कं

Clinic or clinical, a. चिकित्स्यरोगोपहतत्वात् शयनात् समुत्थातुम् अक्षमः, शय्यागतः; 'clinical lecture,' दर्शितचिकित्स्यव्याधिग्रस्तस्य शयनोपान्ते चिकित्साविद्यार्थिनो रोगोपचारोपदेशः.

To clink, v. n. शिञ्ज् (c. 2. शिङ्क्ते, c. 1 शिञ्जते -ञ्जितुं), विशिञ्ज्, क्वण् (c. 1. क्वणति -णितुं), किङ्किण (nom. किङ्किणायते), रिव्(c. 2. -रौति -रवितुं).

Clink, s. शिञ्जितं, आशिञ्जितं, क्वणितं, किङ्किणीशब्दः, घर्घरारवः.

Clinquant, a. हेमदलभूषितः -ता -तं, अलङ्कारिष्णुः -ष्णुः -ष्णु.

To clip, v. a. (Embrace, hug) गाढम् आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), बाहुभ्यां परिष्वञ्ज् (c. 1. -ष्वजते -ष्वंक्तुं) or उपगुह् (c. 1. -गूहति -गूहितुं).—(Shear) वापय् in caus. (-वापयति -यितुं), क्षौरय्, मुण्ड् (c. 1. मुण्डति -ण्डितुं).—(Cut off) छिद् (c. 7. छिनत्ति, छेत्तुं), लू (c. 9. लुनाति, लवितुं), निकृन्त् (c. 6. -कृन्तति -कर्त्तितुं).—(Shorten) ह्रस् in caus. (ह्रासयति -यितुं), संहृ (c. 1. -हरति -हर्त्तुं).

Clipped, *p. p.* छिन्नः -न्ना -न्नं, लूनः -ना -नं, क्षुप्तः -प्ता -प्तं, वप्तः -प्ता -प्तं, परिवापितः -ता -तं, कृतवापः -पा -पं, मण्डितः -ता -तं.

Clipper, s. (Debaser of coin) वञ्चकः.—(Barber) मुण्डी m. (न्).

Clipping, s. छिन्नं, छेदः, भिन्नं, लूनं, खण्डं.

Clitoris, s. योनिलिङ्गं, भगाङ्कुरः, स्मरच्छत्रं.

Cloak, s. प्रावारः -रकः, आवारः, पिधानं, प्रच्छदपटः, नीशारः. *See* Cloke.

To cloak, v. a. प्रावृ (c. 5. -वृणोति -वरितुं -रीतुं), छद् (c. 10. छादयति -यितुं).

Cloak-bag, s. प्रावारादिगात्रोपवस्त्रधारणार्थं कोषः, वस्त्रकोषः.

Clock, s. घटी, हड्डः, यामघोषा, घटिकानाडी.—(Of a stocking) पादाच्छादनपार्श्वयोः सूचिकर्म्म n. (न्).

Clockmaker, s. घटीकारो m. (न्), घटीकारः हड्डकारः घटिकाकार m. (न्)

Clockmaker, s. घटीनिर्म्माण ज्ञानकर्त्ता घटीनिर्म्माणशिल्पी.

Clockwork, s. घटीकर्म्म n. (न्), घटीक्रिया, स्वयंहितकर्म्म, अस्वयंहितकर्म्म.

Clod, s. (A lump of earth) लोष्टं -ष्टः -ष्टु m., मृल्लोष्टं, लेष्टुः m., मृत्तिकाखण्डः, ढेलुली, दलिः m. -ली; 'clod-crusher,' लोष्टभेदी m. (न्).—(A lump of any thing) पिण्डः -ण्डं.

Cloddy, a. लोष्टमयः -यी -यं, लोष्टपूर्णः -र्णा -र्णं, मार्त्तिकः -की -कं.

Clodpate, or clodpoll, or clodhopper, s. जडः, स्थूलबुद्धिः m., मूढः.

To clog, v. a. (To shackle) शृङ्खलया or निगडेन बन्ध् (c. 9. बध्नाति बन्द्धुं), शृङ्खल (nom. शृङ्खलयति -यितुं), पाश (nom. पाशयति -यितुं), पाशीकृ, यन्त्र् (nom. यन्त्रयति -यितुं).—(To hinder) संयम् (c. 1. -यच्छति -यन्तुं), यन्त्र् (c. 10. यन्त्रयति -यितुं), विघ्न (nom. विघ्नयति -यितुं), रुध् (c. 7. रुणद्धि, रोद्धुं), प्रतिरुध्, अवरुध्; प्रतिबन्ध्.

Clog, s. (A shackle) शृङ्खला, पादपाशी, पाशः, निगडः, बन्धनं, अनुबन्धः. —(Any hindrance) विघ्नः, अन्तरायः, व्याघातः, प्रतिबन्धः, विष्टम्भः, बाधा, प्रतिरोधः.—(A wooden shoe) काष्ठपादुका, उत्तरपादुका.

Clogged, p. p. संयमितचरणः -णा -णं, शृङ्खलितः -ता -तं, सशृङ्खलः -ला -लं, निगडितः -ता -तं, शृङ्खलबद्धः -द्धा -द्धं, प्रतिरुद्धः -द्धा -द्धं, विघ्नितः -ता -तं.

Cloggy, a. प्रतिबन्धकः -का -कं, प्रतिरोधी -धिनी -धि (न्), विघ्नकरः -री -रं.

Cloister, s. मठः, विहारः, आश्रमिकाणां मठः, मुनिस्थानं, मुनिशाला, मौनिगृहं. —(Piazza) एकपार्श्वे वायुव्याप्तो विहारयोग्यश् छन्नपथः.

To cloister, v. a. आश्रमिणां मठे or मुनिशालायां प्रविश् in caus. (-वेशयति -यितुं).

Cloisteral, a. मठसम्बन्धी -न्धिनी -न्धि (न्), विविक्तसेवी -विनी -वि (न्).

Cloistered, a. मठप्रवेशितः -ता -तं, पृथ्वीकृतव्रतधारी -रिणी -रि (न्)

Cloisterer, s. मठवासी m. (न्), आश्रमस्थः, मठवासी m. (न्), मुनिः m., मौनी m. (न्).

Cloisteress, s. धर्म्मभगिनी, मठवासिनी, धर्म्मचारिणी, मठवासिनी.

Cloke, s. प्रावारः, उत्तरीयं, गात्रोपवस्त्रं, आच्छादनवस्त्रं. See Cloak.

To close, v. a. (Shut) पिधा (c. 3. -दधाति -धातुं), अपिधा, तिरोधा, संवृ (c. 1. -वरति -वर्त्तुं); 'they closed the doors,' द्वाराणि पिदधुः. —(Shut up) निरुध् (c. 7. -रुणद्धि -रोद्धुं).—(Finish) समाप् in caus. (-आपयति -यितुं), अवसो (c. 4. -स्यति -सातुं), निर्वृत् in caus. (-वर्त्तयति -यितुं), साध् (c. 10. साधयति -यितुं), निष्पद् in caus. (-पादयति -यितुं), सम्पद्.—(Close in) परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं).— (Close the eyes) मील् (c. 1. मीलति -लितुं), निमील्, or in caus. (मीलयति -यितुं), निमिष् (c. 6. -मिषति -मेषितुं).—(Close the mouth) मुखं पिधा.—(Close the hands) हस्तौ बन्ध् (c. 9. बध्नाति, बन्द्धुं) or संहन् (c. 2. -हन्ति -हन्तुं), हस्तपुटितं कृ.—(Close a book) पुस्तकं बन्ध्.

To close, v. n. (Coalesce) मिल् (c. 6. मिलति, मेलितुं), सम्मिल्, संयुज् in pass. (-युज्यते), संश्लिष् in pass. (-श्लिष्यते), सङ्गम् (c. 1. -गच्छति -गन्तुं).—(Close with in fight) बाहूबाहवि or हस्ताहस्ति युध् (c. 4. युध्यते, योद्धुं), बाहुयुद्धे सङ्गम्.—(Close with, come to an agreement) सङ्घट्ट् (c. 1. -घट्टते -ट्टितुं), संविदम् उपगम्, संविदा निश्चयं कृ, सन्धा (c. 3. -धत्ते -धातुं).—(Come to an end) समाप् in pass. (-आप्यते), निवृत् (c. 1. -वर्त्तते -र्त्तितुं), विरम् (c. 1. -रमते -रन्तुं), निष्पद् in pass. (-पद्यते), संगम् (c. 1. -गच्छति -गन्तुं).

Close, s. (Place enclosed) वाटः -टिका, वृतिः f.—(Conclusion) अवसानं, अवसायः, सायः, अन्तः, अन्तं, पर्य्यन्तं, शेषः, निर्वृतिः f., समाप्तिः f., पर्य्यवसानं, निष्पत्तिः f., अत्ययः, निधनं, शान्तिः f., विरामः, उपरमः, उपसंहारः; 'close of day,' दिवसात्ययः, दिवावसानं, सन्ध्याकालः, दिनान्तसमयः, सूर्य्यास्तकालः, सायाह्नः.

Close, a. (Shut fast) संवृतः -ता -तं, बद्धः -द्धा -द्धं, दृढबद्धः -द्धा -द्धं.— (Confined, contracted) सङ्कटः -टा -टं, सम्बाधः -धा -धं, सङ्कुचितः -ता -तं, आविष्कृतः -ता -तं, श्लिष्टः -ष्टा -ष्टं.—(Firm) गाढः -ढा -ढं, दृढः -ढा -ढं.—(Solid, dense, without interstices) घनः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, अविरलः -ला -लं, निरन्तरः -रा -रं -रालः -ला -लं, अनन्तरः -रा -रं, निविडः -डा -डं, दृढसन्धिः -न्धिः -न्धि, निरवकाशः -शा -शं. —(Concise) संक्षिप्तः -प्ता -प्तं, सांक्षेपिकः -की -कं.—(Contiguous) समीपः -पा -पं, निकटः -टा -टं, सन्निकृष्टः -ष्टा -ष्टं, आसन्नः -न्ना -न्नं, सन्निहितः -ता -तं, पार्श्वस्थः -स्था -स्थं, उपस्थः -स्था -स्थं, उपान्तः -न्ता -न्तं; 'close to the ear,' कर्णान्तिकः -का -कं, उपकर्णं.—(Intimate on terms of close friendship) दृढसौहृदः -दा -दं, परिचितः -ता -तं. —(Reserved) संयतः -ता -तं.—(Retired) विविक्तः -क्ता -क्तं.— (Attentive) निविष्टः -ष्टा -ष्टं or अभिनिविष्टः, आसक्तः -क्ता -क्तं, एकाग्रः -ग्रा -ग्रं.—(Without air) निर्वातः -ता -तं.—(Secret) गुप्तः -प्ता -प्तं. —(Niggardly) स्वल्पव्ययी -यिनी -यि (न्), कृपणः -णा -णं; 'close attendance,' सान्निध्यं; 'close proximity,' अनन्तरं; 'close fight,' नियुद्धं, बाहुयुद्धं, रणसङ्कुलं, तुमुलं; 'close study,' निरन्तराभ्यासः, अभिनिवेशः.

Closed, p. p. (Shut) बद्धः -द्धा -द्धं, संवृतः -ता -तं, पिहितः -ता -तं, पिधानवान् -वती -वत् (त्), सन्धितः -ता -तं, मुद्रितः -ता -तं.—(As a bud) मुकुलीकृतः -ता -तं, अविकचः -चा -चं.—(As the eye) निमीलितः -ता -तं; 'with closed eye,' निमीलितनयनः.—(Settled, finished) निष्पन्नः -न्ना -न्नं, समाप्तः -प्ता -प्तं; 'with closed hands,' बद्धाञ्जलिः, संहिताभ्यां पाणिभ्यां.

Close-fisted or close-handed, a. दृढमुष्टिः -ष्टिः -ष्टि, गाढमुष्टिः -ष्टिः -ष्टि, बद्धमुष्टिः -ष्टिः -ष्टि, अमुक्तहस्तः -स्ता -स्तं.

Closely, adv. (Secretly) निभृतं, गुप्तं, सुनिभृतं, सुगुप्तं, रहसि.— (Nearly) निरन्तरं, अनन्तरं, सन्निकृष्टं, उपान्ते.—(Attentively) मनःप्रवेशेन, प्रयत्नात्.—(Firmly) गाढं, दृढं; 'closely attentive,' निविष्टः -ष्टा -ष्टं, आसक्तः -क्ता -क्तं, एकाग्रः -ग्रा -ग्रं, एकायनः -ना -नं, अनन्यवृत्तिः -त्तिः -त्ति, एकतानः -ना -नं.

Closeness, s. (Nearness) समीपता, आनन्तर्य्यं, सान्निध्यं, उपस्थानं, नैकट्यं, सन्निकर्षः, अभ्यासत्वं.—(Secrecy) रहः n. (स्), गुप्तिः f., सुगुप्तिः f., गुप्तता, गूढत्वं.—(Compactness) घनता, सान्द्रता, नैबिड्यं, नैरन्तर्य्यं.—(Parsimony) स्वल्पव्ययः, कार्पण्यं.—(Want of air) निर्वातता.

Close-stool, s. शयनोपान्ते विण्मूत्राधारः, शयनपार्श्वस्थं मूत्रपुरीषभाजनं.

Closet, s. कुटिः, कुटी, सागारं, कोष्ठः, निभृतागारं, गोपनागारं.

To closet, v. a. कुट्यां निविश् in caus. (-वेशयति -यितुं) or गुप् (c. 1. गोपायति, गोप्तुं).

Closure, s. पिधानं, वेष्टनं, आवेष्टनं, आवरणं, प्रावृतिः f.

Clot, s. गुल्मः, पिण्डः -ण्डं, घनता; 'clot of blood,' रक्तगुल्मः, घनलोहितं; 'of hair,' जटा.

To clot, v. n. सान्द्रीभू, घनीभू.—(As hair) जट् (c. 1. जटति -टितुं), श्यै (c. 1. श्यायते, श्यातुं), पिण्डीभू.

Cloth, s. पटः, वस्त्रं, वासः, वासः n. (स्), वसनं, चेलः -लं, चैलं, अंशुकं, मृगरोमजम् आच्छादनं, प्रोतं; 'fine cloth,' सुचेलकः, अंशुकं; 'coarse cloth,' स्थूलशाटकः, पटाशिः m.; 'tattered cloth,' कर्पटः.—(Made of cloth) वास्त्रः -स्त्री -स्त्रं, वस्त्रमयः -यी -यं.—(Table-cloth) भोजनाधारपटः, फलकाच्छादनं.

To clothe, v. a. वेष्ट् (c. 1. वेष्टते -ष्टितुं), परिवेष्ट्, आच्छद् (c. 10.

-छादयति -यितुं), वस् in caus. (वासयति), निवस्, प्रतिवस्, परिधा in caus. (-धापयति -यितुं), प्रवृ (c. 5. -वृणोति -वरितुं -रीतुं), संव्ये (c. 1 -व्ययति -व्यातुं), वस्त्र (nom. वस्त्रयति -यितुं); 'to clothe one's self,' वस् (c. 2. वस्ते वसितुं), प्रवस्, निवस्, परिधा (c. 3. -धत्ते -धातुं); 'in armour,' सन्नह् (c. 4. -नह्यते -नद्धुं).

Clothed, *p. p.* आच्छादितः -ता -तं, प्रच्छादितः -ता -तं, परिच्छन्नः -न्ना -न्नं, प्रावृतः -ता -तं, संवीतः -ता -तं, परिहितः -ता -तं, वेष्टितः -ता -तं, पिनद्धः -द्धा -द्धं, आमुक्तः -क्ता -क्तं, प्रतिमुक्तः -क्ता -क्तं, वासी -सिनी -सि (न्), वेशी -शिनी -शि (न्), वस्त्रान्वितः -ता -तं, सवासाः -साः -सः (स्), सचेलः -ला -लं, सन्नद्धः -द्धा -द्धं.

Clothes, *s. pl.* वस्त्रं, वासः *n.* (स्), वेशः, वसनं, प्रसाधनं, परिधानं, अम्बरं, संव्यानं, आच्छादः -दनं, निवयः; 'a suit of clothes,' वस्त्रयुग्मं; 'old clothes,' जीर्णवस्त्रं, चीरं, प्रोथः; 'relating to clothes,' वास्त्रिकः -की -कं; 'clothes basket,' तरिः *f.*; 'bed-clothes,' शय्यास्तरणं; 'to put on one's clothes,' वस्त्राणि आछद् (c. 10 -छादयति -यितुं) or प्रवृ (c. 5. -वृणोति -वरितुं -रीतुं) or परिधा (c. 3. -धत्ते -धातुं) or प्रसाध् (c. 10. -साधयति -यितुं) or आमुच् (c. 6. -मुञ्चति -मोक्तुं), 'to take off one's clothes,' वस्त्राणि अवतॄ in caus. (-तारयति -यितुं) or अवमुच् or उज्झ् or विहृ (c. 3. -जहाति -हातुं); 'to change one's clothes,' अन्यवस्त्रं परिधा निवस् (c. 2. -वस्ते -वसितुं).

Clothier, *s.* पटकारः, वस्त्रकृत्, पटनिर्म्माणकृत्, पटनिर्म्माणोपजीवी *m.* (न्).

Clothing, *s.* परिधानं, प्रवारः, प्रच्छादनं, आच्छादनं, परिच्छदः; 'under-clothing,' अधोवसनं, अन्तर्वासः *m.* (स्), अन्तरीयं.

Clotpoll, *s.* जडः, मूढः, स्थूलबुद्धिः *m.*, मूर्खः, बर्बरः.

Clotted or clotty, *a.* पिण्डीभूतः -ता -तं, पिण्डितः -ता -तं, गुल्मी -ल्मिनी -ल्मि (न्), घनीभूतः -ता -तं, श्यानः -ना -नं; 'blood,' घनलोहितं, रक्तगुल्मः; 'clotted hair,' जटिः, जुटकं, जूटः.

Cloud, *s.* अभ्रं, मेघः, घनः, पर्जन्यः, बलाहकः, जीमूतः, वृष्टिमान् *m.* (त्), जलधरः, तोयधरः, पयोधरः, धाराधरः, नीरधरः, जलदः, पयोदः, वारिदः, नीरदः, तोयदः, अम्बुदः, जलवाहः, वारिवाहः -हनः, तोयवाहः, अम्बुवाहः, अम्बुभृत्, शक्रवाहनः, वारिमुचः, पयोजन्मा *m.* (न्), जलमुक् *m.* (च्), वारिमुक् *m.* (च्) or अम्बुमुक्, पयोमुक् *m.* (च्), वारिदः, पर्वताश्रयः, तडित्वान् *m.* (त्), स्तनयित्नुः *m.*, धूमयोनिः *m.*, व्योमधूमः, नभोधूमः, जलमसिः *m.*, वारिमसिः *m.*, नीलाभ्रः, खचरः, नभश्चरः, गगणध्वजः, नभोदुहः, नभोगजः, देवः, पारदः, वासवः, मुदिरः, दर्दुरः, घनाघनः, मदः *m.* (द्); 'a black cloud,' नीलाभ्रः *m.*, असिताभ्रं, कालिका; 'a gathering of clouds,' घनजालं, जलदसंहतिः *f.*, घनौघः, 'a succession of clouds,' मेघमाला, कादम्बिनी; 'a cloud of dust,' रजोमेघः, धूलीपटलः.

To cloud, *v. a.* अभ्रं कृ, मेघं कृ, तिमिर (nom. तिमिरयति -यितुं), प्रच्छद् (c. 10. -छादयति -यितुं), तिमिरीकृ, मलिनीकृ.

To cloud, *v. n.* मेघावृतः -ता -तं भू, मेघाच्छन्नः -न्ना -न्नं भू, अभ्र (nom. अभ्रायते), मेघ (nom. मेघायते).

Clouded, *p. p.* अभ्रच्छन्नः -न्ना -न्नं, घनोपरुद्धः -द्धा -द्धं, दुर्दिनग्रस्तः -स्ता -स्तं, सतमसः -सा -सं, तमोवृतः -ता -तं, मलिनः -ना -नं, मलिनप्रभः -भा -भं.

Cloud-capt, *a.* अभ्रशेखरः -रा -रं, असिताभ्रशेखरः -रा -रं, अभ्रंलिहः -हा -हं, अभ्रोल्लिट् (ह्).

Cloudily, *adv.* साभ्रं, समेघं, तिमिरं, सान्धकारं, निगूढार्थं.

Cloudiness, *s.* साभ्रता, मेघाकीर्णता, मेघतिमिरं, जलदसंहतिः *f.*, दुर्दिनं.

Cloudless, *a.* अनभ्रः -भ्रा -भ्रं, व्यभ्रः -भ्रा -भ्रं, निरभ्रः -भ्रा -भ्रं, अमेघः -घा -घं, गततोयदः -दा -दं, वितिमिरः -रा -रं.

Cloudy, *a.* साभ्रः -भ्रा -भ्रं, आभ्रियः -या -यं, मेघाकीर्णः -र्णा -र्णं, नीरदी -दिनी -दि (न्), समेघः -घा -घं, सघनः -ना -नं, दार्दुरः -री -रं; 'cloudy weather,' दुर्दिनं.—(Dark, obscure) तिमिरः -रा -रं, तमस्वी -स्विनी -स्वि (न्), तमोवृतः -ता -तं, तामसः -सी -सं, अन्धकारयुक्तः -क्ता -क्तं.

Clough, *s.* (Cleft of a hill) दरी -रिः *f.*, दरत्, कन्दरः -री -रं.—(An allowance of two in every hundred) शते शते पक्वा श्रमभागदानं.

Clove, *s.* (The spice) लवङ्गं, श्रीसंज्ञपुष्पं, मादनं, देवकुसुमं, दिव्यगन्धं, घातपुष्पं, श्रीः, श्रीसंज्ञं, सुपुष्पं, भृङ्गारं, वरश्वं, शृङ्गारं, चन्दनपुष्पं.—(The clove tree) लवङ्गः, तोयधिप्रियः.—(Of garlic) रसुनमूलं.

Cloven, *a.* भिन्नः -न्ना -न्नं, भेदितः -ता -तं, विभिन्नः -न्ना -न्नं, छिन्नः -न्ना -न्नं, दलितः -ता -तं, विदलितः -ता -तं, द्वैधीकृतः -ता -तं, पृथक्कृतः -ता -तं; 'cloven tongued,' छिन्नजिह्वः -ह्वा -ह्वं, द्विजिह्वः -ह्वा -ह्वं.

Cloven-footed or cloven-hoofed, *a.* द्विशफः -फा -फं, द्विखण्डखुरः -रा -रं.

Clover, *s.* (Trefoil) त्रिपर्णी -र्णी -र्णं, त्रिपत्रः -त्रा -त्रं; 'to live *in* clover,' महता विलासेन जीव् (c. 1. जीवति -वितुं), महासुखेन जीव्.

Clovered, *a.* त्रिपर्णोपचितः -ता -तं, त्रिपत्राकीर्णः -र्णा -र्णं, सत्रिपत्रः -त्रा -त्रं.

Clout, *s.* (A cloth for any mean use) चीरं, कर्पटः, वस्त्रखण्डं.—(A patch) कन्था.—(An iron plate over an axle-tree) अक्षायफलकं.

To clout, *v. a.* (To patch) कन्था (nom. कन्थायति -यितुं), जीर्णवस्त्राणि समाधा (c. 3. -दधाति -धत्ते -धातुं) चीरं चीरेण सन्धा.

Clouted, *a.* श्यानः -ना -नं, संश्यानः -ना -नं, घनीभूतः -ता -तं.

Clouterly, *a.* (Clumsy) अदक्षः -क्षा -क्षं, अकृती -तिनी -ति (न्).

Clown, *s.* ग्राम्यजनः, ग्रामिकः, ग्रामी *m.* (न्), ग्रामवासः, ग्रामवासी *m.* (न्), वृषलः, जानपदः, प्राकृतजनः, असभ्यजनः, पृथग्जनः, मूढः.

Clownish, *a.* ग्राम्यः -म्या -म्यं -मीयः -या -यं -मीणः -णा -णं -मेयः -यी -यं -मिकः -की -कं, असभ्यः -भ्या -भ्यं, अशिष्टः -ष्टा -ष्टं, असङ्गतः -ता -तं, ग्राम्यबुद्धिः -द्धिः -द्धि.

To CRY DOWN, *v a.* (Depreciate) अपवद् (c. 1. -वदति -दितुं), परिवद्, अपकृष् (c. 1. -कर्षति -क्रष्टुं), लघु (nom. लघयति -यितुं).—(Prohibit) निषिध् (c 1. -षेधति -षेद्धुं), प्रतिषिध्.

To CRY UNTO, *v a.* आह्वे (c. 1. -ह्वयति -ह्वातुं), प्रार्थ् (c. 10. प्रार्थयति -यितुं)

To CRY UP, *v. a.* प्रशंस् (c 1. -शंसति -सितुं), कृत् (c. 10. कीर्त्तयति -यितुं)

CRY *s* (Lamentation, weeping) क्रन्दनं, क्रन्दितं, रोदनं, रुदितं, विलपनं, विलापः, परिदेवनं -ना, क्रुष्टं.—(Clamour) उत्क्रोशः, उत्क्रुष्टं, घोषणं -णा, उद्घुष्टं, उच्चैःस्वरः, जनरवः, संहूतिः.—(Confused noise scream) कोलाहलः, शब्दः, रुतं, रावः, चित्कारः, चीत्कारः, नादः, विक्रुष्टं, रासः, स्वरः: 'cry of joy,' हर्षनादः, हर्षस्वनः; 'cry of pain,' आर्त्तनादः.

CRYER, *s* घोषकः, प्रकाशकः, घोषणाकृत्, उच्चैःस्वरेण ख्यापकः.

CRYPT, *s* पूजाशालाया अधोभागे खातं शवनिखननस्थानं, गुहा, गुहागृह

CRYSTAL, *s.* स्फटिकः, स्फटिकाश्मा *m.* (न्), स्फाटिकोपलं, काचमणिः *m* सितमणिः *m.*, विमलमणिः, शुचिमणिः, अच्छः, सितोपलः, कुवलकं केलासः, सिध्मं, शीतशिलं, निस्तुषरत्नं, शालिपिष्टं, रागदः

CRYSTAL, CRYSTALLINE, *a.* स्फटिकः -की -कं, स्फटिकमयः -यी -यं —(Transparent) स्फटिकप्रभः -भा -भं, स्वच्छः -च्छा -च्छं, विमलः -ला -लं

To CRYSTALLIZE, *v. a.* स्फटिकाकारेण घनीकृ or श्यानीकृ, स्फटिकसात्कृ

To CRYSTALLIZE, *v. n.* स्फटिकाकारेण घनीभू or श्यै (c. 1. श्यायते श्यातुं), स्फटिकाकृतिः -तिः -ति भू, स्फटिकं बन्ध् (c. 9. बध्नाति, बन्धुं)

CUB, *s.* (Young of a beast) शावः -वकः, वत्सः, शिशुः *m.*, पोतः, 'bear's cub,' भल्लूकशावकः; 'fox's cub,' लोमशशावकः; 'jackal's cub शृगालशावकः; 'lion's cub,' सिंहशावः, बालमृगेन्द्रः; 'tiger's cub शार्दूलपोतः; 'elephant's cub,' हस्तिशावकः, इभपुवतिः *f.*, इभपोटा

CUBE, *s.* घनः; 'cube-root,' घनमूलं, घनपदं.

CUBIC, CUBICAL, *a.* घनाकारः -रा -रं, घनाकृतिः -तिः -ति 'cubical contents,' घनफलं.

CUBIT, *s.* अरत्निः *m.*, रत्निः *m.*, हस्तः, कारिकायी *f.*, किष्कुः *m. f.*, विघुः.

CUBITAL, *s.* अरत्निपरिमाणः -णा -णं, हस्तपरिमाणः -णा -णं.

CUCKOLD, *s* कुलटापतिः *m.*, असतीपतिः *m.*, बन्धकीभार्य्यः, पुंश्चलीभार्य्यः, व्यभिचारिणीपतिः *m.*, अभिसारिकाभार्य्यः.

To CUCKOLD, *v. a.* भार्य्याभिगमनेन परं तिरस्कारास्पदं कृ.

CUCKOLD-MAKER, *s.* परदारगामी *m.* (न्), परकलत्राभिगामी *m*, पारदारिकः

CUCKOO, *s.* कोकिलः, परभृतः, परपुष्टः, परैधितः, पिकः, वसन्तदूतः, आताम्र मदालापी *m.* (न्), शारङ्गः, वनप्रियः; 'its note,' कोकिलाभिरुतं

CUCUMBER, *s.* कर्कटी, पटोलः -लिका, जाली, कापालः, चेलालः, इर्वारु *m. f.*, सुखाशः, त्रिपुटं, त्रपुषं, मानधानिका, राजफलं, पुत्रभोजनं, ज्योत्स्नी चित्रा, गवाक्षी, गोडुम्बा.

CUCURBITACEOUS, *a.* अलाबुजातीयः -या -यं, तुम्बाकारः -रा -रं.

CUCURBITE, *s.* अलाबुसदृशं सन्धानयन्त्रं.

CUD, *s.* (Food swallowed to be chewed again) पुनश्चर्व्य आहारः, पुनश्चर्वणीयं तृणादिभोजनं; 'chewing the cud,' रोमन्थः -न्थनं 'to chew the cud,' रोमन्थ (nom. रोमन्थायते)

To CUDDLE, *v. n.* निकटे or अङ्के or पार्श्वतः शी (c. 2. शेते, शयितुं), उत्कटुकासनं कृ.

CUDGEL, *s.* यष्टिः *m. f.*, गदा, लगुडः, वेत्रं, दण्डः, काष्ठं, मुद्गरः, इली, ईली, करपालिका, करवालिका.

To [cud]EL ... वेत्रेण गदया or लगुडेन तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -हन्तुं) or प्रहृ (c. 1. -हरति -हर्त्तुं).

C[u]DGEL ... वेत्राघातः, यष्ट्याघातः, दण्डप्रहारः.

CUDGEL-PLAY, *s.* गदायुद्धं, दण्डादण्डि, वेत्रयुद्धं.

CUDGEL-PLAYER, *s.* गदायोधी *m.* (न्), यष्टिप्रहरणः, याष्टीकः, लाठः.

CUE *s.* (Tail or end of any thing) वालः, पुच्छः -च्छं, अञ्चलः.—(Hint) सङ्केतः, इङ्गितं, आकूतं.—(Humour) छन्दः *n.* (स्), छन्दं, मनोभावः.

CUFF *s.* (Blow with the fist) मुष्ट्याघातः, मुष्टिप्रहारः, करायातः, पाणिघातः, आघातः, प्रहारः.—(End of a sleeve) पिप्पलस्य अग्रभागः, पिप्पलाञ्चलः; 'fisticuffs,' मुष्टीमुष्टि.

To CUFF, *v. a.* मुष्टिना or करेण or पाणिना तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -हन्तुं) or प्रहृ (c. 1. -हरति -हर्त्तुं).

To CUFF, *v. n.* मुष्टियुद्धं कृ, मुष्टीमुष्टि युध् (c. 4. युध्यते, योद्धुं).

CUIRASS, *s.* कवचः -चं, उरस्त्राणं, वक्षस्त्राणं, उरश्छदः, उदरत्राणं, कूर्पासः, तनुत्रं, वारवाणः, वारवाणः, नागोदरं, आयसी, निचुलकं, निचोलकः.

CUIRASSIER, *s.* कवची *m.* (न्), वर्म्मवान् *m.* (त्), तनुत्रवान् *m.* (त्), वर्म्मितः.

CUISH, *s.* जङ्घात्राणं, जङ्घाणं, जङ्घत्रं, ऊरुत्राणं, ऊरुवर्म्म *n.* (न्).

CULINARY, *a.* पाकसम्बन्धी -न्धिनी -न्धि (न्), पाचकः -का -कं; 'culinary utensil,' पाकपात्रं, पाकभाण्डं; 'culinary skill,' पाकनिष्पत्तिः *f.*

To CULL, *v. a.* उद्धृ (c. 1. -हरति -हर्त्तुं), समुद्धृ, वृ (c. 5. वृणोति, वरितुं रीतुं), उद्धृ; 'to cull passages from a book,' चूर्णिं कृ.

CULLER, *s.* उद्धर्त्ता *m.* (र्त्तृ), समुद्धर्त्ता, चूर्णिकृत् *m.*

CULLION, *s.* धूर्त्तः, दुरात्मा *m.* (न्), नराधमः, जाल्मः, कृपणः.

CULLY, *s.* कामकूटः, वेश्याजितः, वेश्यावशवर्त्ती *m.* (न्), धूर्त्तवञ्चितः.

CULM, *s.* (Stalk) नालं -ली, नाडिः *f.* -डी, काण्डः, स्तम्बः, मञ्जरिः *f.*

To CULMINATE, *v. n.* ऊर्द्ध्वदेशं or उच्चस्थानं or मस्तकोपरिस्थानं or अग्रस्थानं प्राप् (c. 5. -आप्नोति -आप्तुं) or सङ्क्रम् (c. 1. -क्रामति -क्रमितुं).

CULPABLE, *a.* दोषी -षिणी -षि (न्), अपराधी -धिनी -धि (न्), अपराद्धः -द्धा -द्धं, सापराधः -धा -धं, सदोषः -षा -षं, कृतापराधः -धा -धं, निन्दनीयः -या -यं, निन्द्यः -न्द्या -न्द्यं, निन्दार्हः -र्हा -र्हं, गर्ह्यः -र्ह्या -र्ह्यं, दुष्यः -ष्या -ष्यं, आगाः -गाः -गः (स्), वाच्यः -च्या -च्यं; 'to be culpable,' अपराध (nom. अपराध्यति).

CULPABLENESS, CULPABILITY, *s.* अपराधिता -त्वं, सापराधता, सदोषता, दोषित्वं, निन्दनीयत्वं, निन्द्यता, निन्दार्हत्वं, गर्ह्यता.

CULPABLY, *adv.* सापराधं, सदोषं, अपराधिवत्, निन्दनीयं.

CULPRIT, *s.* दोषी *m.* (न्), अपराधी *m.* (न्), अपराद्धा *m.* (द्धृ), पापी *m.* (न्), दोषग्रस्तः, दृष्टदोषः, निश्चितदोषः, वध्यः.

To CULTIVATE, *v. a.* (Till the land) कृष् (c. 6. कृषति, क्रष्टुं).—(Labour at, promote) सेव् (c. 1. सेवते -वितुं), आसेव्, अनुसेव्, उपसेव्, निषेव्; भज् (c. 1. भजति -ते -भक्तुं); अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं); अनुपाल् (c. 10. -पालयति -यितुं), प्रतिपाल्; संवृध् in caus. (-वर्धयति -यितुं).

CULTIVATED, *p. p.* कर्षितः -ता -तं, कृष्टः -ष्टा -ष्टं, फालकृष्टः -ष्टा -ष्टं, सीत्यः -त्या -त्यं, सेवितः -ता -तं; 'cultivated land,' क्षेत्रभूमिः *f.*, कर्म्मभूः *f.*, कर्म्मान्तः, सीत्यं.

CULTIVATION, CULTURE, *s.* (Of land) कर्षणं, कृषिः *f.*, कृषिकर्म्म *n.* (न्), कृष्टिः *f.*, कार्षिः *f.*—(Labouring at, promoting) सेवनं, अनुसेवनं, परिष्कारः, अनुष्ठानं, अनुपालनं, प्रतिपालनं, संवर्धनं; 'of learning,' विद्यानुसेवनं.

CULTIVATOR, *s.* (Of land) कृषकः, कर्षकः, कार्षिकः, क्षेत्रिकः, सेवी *m.* (न्), क्षेत्राजीवः, हालिकः.—(One who labours at or promotes) सेवी *m.* (न्), अनुसेवी, अनुष्ठायी *m.* (न्), अनुपाली *m.* (न्), प्रतिपाली *m.* (न्), संवर्धकः; 'cultivator of learning,' विद्यानुसेवी, विद्यानुपाली.

CULVER, *s.* Pigeon, कपोतः, पारावतः, पारापतः, कलरवः.

CULVER-HOUSE, *s.* कपोतपालिका, कपोतागारं, विटङ्कः.

To CUMBER, *v. a.* बाध् (c. 1. बाधते -धितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेष्टुं), अवरुध् (c. 7. -रुणद्धि -रोद्धुं), अतिभारो भू, विघ्न (nom. विघ्नयति -यितुं), कष्टं जन् (c. 10. जनयति -यितुं).

CUMBER, *s.* अतिभारः, बाधः -धनं, क्लेशः, कण्टकः, शल्यं, कष्टं, विघ्नः.

CUMBERSOME, CUMBROUS, *a.* भारी -रिणी -रि (न्) or अतिभारी, क्लेशकः -की -कं, कष्टकरः -री -रं, दुःखकरः -री -रं, दुर्भरः -रा -रं, बाधकः -का -कं.

CUMBERSOMELY, *adv.* अतिभारेण, यथा क्लेशः or कष्टं or बाधा जायते तथा.

CUMBERSOMENESS, CUMBRANCE, *s.* भारः, अतिभारः, क्लेशः, कष्टं, विघ्नः, अवरोधः.

CUMIN, *s.* जीरकः, जीरः, जीर्णः, जरणः, सुगन्धं, सूक्ष्मपत्रः, कृष्णजरणी, दूतः, सुषवी, अजाजी, श्वेतः, कणा.

To CUMULATE, *v. a.* सञ्चि (c. 5. -चिनोति -चेतुं), समाचि, समुपचि; राशीकृ, पूगीकृ, पिण्डीकृ, ओघीकृ, एकत्र कृ.

CUMULATION, *s.* सञ्चयः -यनं, निचयः, प्रचयः, राशीकरणं, पूगीकरणं.

CUNCTATION, *s.* विलम्बः, कालक्षेपः, कालयापः -पनं, दीर्घसूत्रता.

CUNEIFORM, *a.* कीलाकारः -रा -रं, कीलाकृतिः -तिः -ति, कीलस्वरूपः -पा -पं.

CUNNING, *a.* (Sly) विदग्धः -ग्धा -ग्धं, छली -लिनी -लि (न्), छलनापरः -रा -रं, सव्याजः -जा -जं, मायी -यिनी -यि (न्), मायान्वितः -ता -तं, कापटिकः -की -कं, कूटकृत् *m. f. n.*, विप्रलम्भकः -का -कं, धूर्त्तः -र्त्ता -र्त्तं, वञ्चनशीलः -ला -लं, प्रतारणाशीलः -ला -लं.—(Skilful) निपुणः -णा -णं, चतुरः -रा -रं, पटुः -टुः -ट्वी -टु.

CUNNING, *s.* (Deceit, slyness) विदग्धता, वैदग्ध्यं, छलं -लना, व्याजः, माया, कपटः, कापट्यं, कूटः -टं, धूर्त्तता, वञ्चनं, प्रवञ्चना, शठता, वक्रता, कैतवं.—(Skill) पाटवं, नैपुण्यं, चातुर्य्यं, युक्तिः *f.*

CUNNINGLY, *adv.* विदग्धं, छलेन, सव्याजं, समायं, वैदग्ध्येन, सपाटवं.

CUP, *s.* पात्रं, पानपात्रं, भाजनं, भाजनं, कंसः -सं, कांस्यः -स्यं, चषकः, शरावः, कुन्तलः, कुशयः, शालाजिरः -रं, पानीयाधारः.—(Any thing hollow like a cup) पुटः -टकं; 'the cup of a flower,' पुटं, पुष्पगर्भः, पुष्पकोषः; 'cup of a balance,' कर्षः.—(Drinking bout) सम्पीतिः *f.*; 'one who loves a cup,' पानासक्तः.

To CUP, *v. a.* (Draw blood by applying cupping-glasses) अलाबूपात्रं कृ, अलाबुपात्रयन्त्रेण रक्तं स्रु in caus. (स्रावयति -यितुं) or मुच् in caus. (मोचयति -यितुं) or मोक्ष् (c. 10. मोक्षयति -यितुं).

CUPBEARER, *s.* पात्रवाहकः, पानपात्रवाही *m.* (न्), पात्रभृत्, मद्यदायकः.

CUPBOARD, *s.* अन्नकोष्ठः, कुशूलः, कण्डोलः -लकः, खाद्यद्रव्याधारः.

To CUPBOARD, *v. a.* अन्नकोष्ठे निधा (c. 3. -दधाति -धातुं) or निविश् in caus. (-वेशयति -यितुं).

CUPEL, *s.* स्वर्णकारैर् व्यवहारिता सुवर्णशोधनार्थं मूषा.

CUPID, *s.* कामः, कामदेवः, अनङ्गः, मदनः, कन्दर्पः. See KÁMADEVA

CUPIDINOUS, *a.* कामी -मिनी -मि (न्), कामुकः -का -कं, लोभी -भिनी -भि (न्), लोलुभः -भा -भं, लोभाविष्टः -ष्टा -ष्टं, लाभलिप्सुः -प्सुः -प्सु, लिप्सुः -प्सुः -प्सु.

CUPIDITY, *s.* कामः -मिता, कामुकत्वं, अभिलाषः, लोभः, लुब्धता -त्वं, लाभलिप्सा, लिप्सा, कामना, तृष्णा, अभिकाङ्क्षा, अतिस्पृहा.

CUPOLA, *s.* अर्द्धगोलाकारं प्रासादशृङ्गं or हर्म्यशिखरं.

CUPPER, *s.* अलाबूपात्रयन्त्रेण रक्तमोचकः or अलाबूपात्रकारी *m.* (न्).

CUP-NG-GLA s. ...रक्ताकृषणार्थं काचपात्र

CUR ...(श्वा m. (न्)) शुनकः, कुक्कुरः, दुष्कुक्कुरः ... ur-like श्वपच्

CURABLE, a. चिकित्स्यः -त्स्या -त्स्यं, साध्यः -ध्या -ध्यं, प्रतीकार्य्यः -र्य्या -र्य्यं, शमनीयः -या -यं, चिकित्सितुं शक्यः -क्या -क्यं, स्वास्थ्यप्रापणीयः -या -यं.

CURABLENESS, s. चिकित्स्यत्वं, साध्यता, प्रतीकार्य्यत्वं, उपशमनीयता.

CURACY, s. उपपुरोहितस्य वृत्तिः f. or व्यापारः or अधिकारः.

CURATE, s. उपपुरोहितः, उपयाजकः, पुरोहितप्रतिनिधिः m., उपगुरुः.

CURATIVE, a. रोगघ्नः -घ्नी -घ्नं, रोगहरः -रा -रं, रोगान्तकः -का -कं, व्याधिशमकः -का -कं, शान्तिकरः -री -रं, शान्तिदः -दा -दं.

CURATOR, s. उपरक्षः, अधिकारी m. (न्), अधिकृतः, रक्षकः, अध्यक्षः, अवेक्षिता m. (तृ), आधिकर्म्मिकः, द्रष्टा m. (ष्टृ).

CURB, s. (Of a bridle) मुखयन्त्रणं, वल्गाशृङ्खलः, वागासम्बन्धिनी शृङ्खला, अश्वमुखशृङ्खला.—(Restraint) यन्त्रणं, शृङ्खलता, संयमः, यमः, निग्रहः, अवरोधः, निषेधः.

To CURB, v. a. (Hold a horse in with a curb) अश्वं मुखयन्त्रणेन or मुखशृङ्खलया यम् (c. 1. यच्छति, यन्तुं).—(Restrain) यम्, संयम्; यन्त्र् (c. 10. यन्त्रयति -यितुं), निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अवरुध् (c. 7. -रुणद्धि -रोद्धुं), निरुध्.

CURBED, p. p. शृङ्खलितः -ता -तं, यन्त्रितः -ता -तं, संयतः -ता -तं.

CURB-STONE, s. परिखातटसोपानार्थे सुदृढप्रस्तरः.

To CURD or CURDLE, v. n. दधिरूपेण श्यै (c. 1. श्यायते, श्यातुं) or घनीभू.

To CURD or CURDLE, v. a. दधिसात्कृ, श्यै in caus. (श्यापयति -यितुं), घनीकृ.

CURDS, s. दधि n., पयस्यं, क्षीरजं, गव्यं, किलाटः, गोरसजं, प्रपं, दृष्पा, रसाला, मार्जिता.

CURDY or CURDLED, a. दधिमयः -यी -यं, श्यानः -ना -नं, शीनः -ना -नं, आश्यानः -ना -नं, घनीभूतः -ता -तं, दधिवत् संहतः -ता -तं.

CURE, s. (Act of healing) चिकित्सा -त्सनं -त्सितं, शमः, शान्तिः f., उपशमः, रोगशान्तिः f., रोगशमः, रोगोपशमः, समाधानं, प्रतिसमाधानं, रुक्प्रतिक्रिया, प्रतीकारः, रोगोपचारः.—(*State of being healed*) समुत्थानं, स्वास्थ्यं, सुस्थता.—(The *remedy itself*) भेषजं, भैषज्यं, औषधं, रोगघ्नं.—(Benefice of clergyman) पुरोहितवृत्तिः f., धर्म्माध्यापकस्य व्यापारः or अधिकारः.

To CURE, v. a. कित् in des. (चिकित्सति -त्सितुं), शम् in caus. (शमयति -यितुं), प्रशम्, उपशम्, स्वस्थं -स्थां -स्थं कृ, सुस्थं -स्थां -स्थं कृ, प्रतिकृ, समाधा (c. 3. -दधाति -धातुं), प्रतिसमाधा, समुत्था in caus. (-थापयति for -स्थापयति -यितुं), भिषज् (nom. भिषज्यति), साध् in caus. (साधयति -यितुं).—(Cure fish or meat) लवण (nom. लवणयति -यितुं), लवणीकृ.

CURED, p. p. चिकित्सितः -ता -तं, शमितः -ता -तं, शान्तः -न्ता -न्तं, उपशान्तः -न्ता -न्तं, प्रशान्तः -न्ता -न्तं, स्वस्थः -स्था -स्थं, सुस्थः -स्था -स्थं, प्रतिकृतः -ता -तं, समुत्थितः -ता -तं, रोगमुक्तः -क्ता -क्तं, 'cured of fever,' विगतज्वरः -रा -रं.

CURELESS, a. अचिकित्स्यः -त्स्या -त्स्यं, असाध्यः -ध्या -ध्यं, दुरुपचारः -रा -रं.

CURER, s. चिकित्सकः, रोगशान्तकः, रोगहारी m. (न्), रोगहा m. (न्), औषदः.

CURFEW, s. अग्निप्रदीपा निर्वापयितव्या इति पुरा निर्देशार्थं प्रदोषकाले वादिता घण्टा, प्रदोषकाले घण्टाशब्दः.

CURIOSITY, s. (Inquisitiveness) कौतूहलं, कुतूहलं, कौतुकं, कुतुकं, जिज्ञासा, जिज्ञासाकुतूहलं, पिपृच्छिषा, अनुसन्धानेच्छा, असति प्रयोजने किमेतदिति जिज्ञासा; '*one whose curiosity is excited*,' उपजातकौतुकः.—(A rarity) दुर्लभद्रव्यं, दुष्प्रापद्रव्यं, अद्भुतद्रव्यं, विशिष्टद्रव्यं, अपूर्वद्रव्यं.

CURIOUS, a. (Inquisitive) कुतूहली -लिनी -लि (न्), कौतूहलान्वितः -ता -तं, कौतूहलपरः -रा -रं, कौतुकाविष्टः -ष्टा -ष्टं, जिज्ञासुः -सुः -सु, पिपृच्छिषुः -षुः -षु, अनुसन्धानेच्छुः -च्छुः -च्छु.—(Skilled in) अभिज्ञः -ज्ञा -ज्ञं, विचक्षणः -णा -णं.—(Exact, nice) सूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मदर्शी -र्शिनी -र्शि (न्).—(Worthy of being seen, rare) दर्शनार्हः -र्हा -र्हं, दर्शनीयः -या -यं, दुर्लभः -भा -भं, दुष्प्रापः -पा -पं, अद्भुतः -ता -तं.—(Strange, wonderful) अद्भुतः -ता -तं, चित्रः -त्रा -त्रं, विचित्रः -त्रा -त्रं, आश्चर्य्यः -र्य्या -र्य्यं, अपूर्वः -र्वा -र्वं.

CURIOUSLY, adv. (Inquisitively) कौतूहलात्, कुतूहलेन, कौतुकेन, जिज्ञासया.—(Skilfully, nicely, strangely) निपुणं, सूक्ष्मं, अद्भुतं.

To CURL, v. a. (Turn the hair in curls) अलकरूपेण केशान् कुञ्च् (c. 1. कुञ्चति -ञ्चितुं or c. 10. कुञ्चयति -यितुं), अलकान् कृ or रच् (c. 10. रचयति -यितुं).—(Twist) कुञ्च्, आकुञ्च्, आवृत् in caus. (-वर्त्तयति -यितुं).—(Raise in waves) तरङ्ग (nom. तरङ्गयति -यितुं), बन्धुरीकृ, उन्नतानतीकृ.

To CURL, v. n. अलकरूपेण कुञ्च् in pass. (कुञ्च्यते) or आकुञ्च् in pass., आवृत् (c. 1. -वर्त्तते -र्त्तितुं).—(Rise in waves) तरङ्ग (nom. तरङ्गायते), तरल (nom. तरलायते), बन्धुरीभू, उन्नतानतीभू.

CURL, s. अलकः, आवर्त्तः -र्त्तकः, कुरलः, कर्कराल: -लं, चक्रः, काकपक्षः, वर्त्तरीकः, चूर्णकुन्तलः, कल्लरी, भ्रमरकः; 'row of curls,' अलकसंहतिः f.—(Undulation) ऊर्म्मिः f., तरङ्गः.

CURLEW, s. क्रौञ्चः, कुङ्, कलिकः, कालिकः, कालीकः, अतिजागरः.

CURMUDGEON, s. कृपणः, कदर्यः, स्वल्पव्ययी m. (न्), मत्सरः, गाढमुष्टिः.

CURRANT, s. (The tree) अल्पफलविशिष्टः क्षुद्रवृक्षः.—(A small dried grape) शोषितरसा क्षुद्रद्राक्षा.

CURRENCY, s. (Circulation, general reception) प्रचारः, प्रचरः, प्रचलनं, चलनं, हस्ताद्हस्तं चलनं, व्यवहारः, सर्व्वसाधारणव्यवहारः, सर्व्वग्रहणं, सर्व्वसम्मानं.—(Continuous flow or course) प्रवाहः, प्रसरः.—(Easiness of utterance) सुखोच्चारणं, सुखोच्चार्य्यता.—(Current coin) प्रचलमुद्रा, ...

CURRENT, a. (Circulatory, ... received) प्रचलः -ला -लं, प्रचलितः -ता -तं, प्रचलन् ... -लत् (त्), प्रचरितः -ता -तं, प्रचरन् -रन्ती -रत् (त्), चलमानः -ना -नं, परिचालितः -ता -तं, सञ्चारितः -ता -तं, सर्व्वसम्मतः -ता -तं, सर्व्वगृहीतः -ता -तं.—(Common, general, popular) सर्व्वसाधारणः -णी -णं, सर्व्वसामान्यः -न्या -न्यं, लोकप्रसिद्धः -द्धा -द्धं, लोकविश्रुतः -ता -तं, व्यावहारिकः -की -कं, आचारिकः -की -कं, लौकिकः -की -कं.—(Received as authority, allowable) प्रचलितः -ता -तं, प्रामाणिकः -की -कं, ग्राह्यः -ह्या -ह्यं.—(What is now passing) वर्त्तमानः -ना -नं, विद्यमानः -ना -नं, 'the current year,' वर्त्तमानवत्सरः, 'current moment,' आपातः; 'current report,' लोकप्रवादः, जनवादः.

CURRENT, s. (A running stream) स्रोतः n. (स्), स्रवन्ती, स्रोतस्वती, स्रोतस्विनी.—(The flow or course of water) वेला, वेगः, रयः, प्रवाहः, उदकप्रवाहः, धारः -रा, स्रोतः n. (स्), ओघः, प्रस्रवः -वणं, संसृतिः f., प्रवृत्तिः f., पाथःसंस्कारः, अनुपद्धतिः f., पात्रसंस्कारः, रयभाटी ऊर्म्मी, कूलङ्कषः, पुरोटिः m.; 'current of the Ganges,' गाङ्गौघः, '*against* the current,' प्रतिस्रोतस्.

CURRENTLY, adv. (Generally, popularly) सामान्यतस्, साधारणतस्, लोकतस्, प्रसिद्धं, 'it is currently reported,' इति लोकप्रवादः श्रूयते; 'it is currently known,' लोकप्रसिद्धम् अस्ति.

C——— s. रथ ... ...

C[UR]... चर्मकारः री m. (न्) चर्मच्छेदनकारी m. चर्मावकर्त्ती m. (न्) करट

C[URRISH]... कुक्कुराचारः रा रं श्वशील शीला लं. शौव. वी वं. दुःशील. -ला -लं, शौवापद: -दी -दं; 'a currish man,' श्वचरः

To CURRY, *v. a.* (Dress leather) चर्म परिष्कृ.—(Beat) तड् (c. 10. ताडयति -यितुं), प्रहृ (c. 1. -हरति -हर्त्तुं).—(Rub a horse with a curry-comb) अश्वलोम लोहकङ्कतेन मृज् (c. 2. मार्ष्टि, मार्ष्टुं).—(Curry favour) आराध् in caus. (-राधयति -यितुं), सान्त्व् (c. 10 सान्त्वयति -यितुं), लल् in caus. (लालयति -यितुं).

CURRY, *s.* (The dish) व्यञ्जनमिश्रणीयं or भक्तेन सह खाद्यो व्यञ्जनविशेषः.

CURRY-COMB, *s.* अश्वलोममार्जनार्थं लोहकङ्कतः, अश्वमार्जनी.

To CURSE, *v. a.* शप् (c. 1. शपति -ते, c. 4. शप्यति, शप्तुं), अभिशप्, परिशप्, शापं or अभिशापं दा or कृ, अमङ्गलं or अनिष्टम् आशंस् (c. 1. -शंसते -सितुं), आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), गर्ह् (c. 1. गर्हते -र्हितुं), धिक्कृ, भर्त्स् (c. 10. भर्त्सयति -यितुं).

To CURSE, *v. n.* शप् (c. 1. शपते, शप्तुं), शपथं or शापं वद् (c. 1. वदति -दितुं) or ब्रू (c. 2. ब्रवीति, वक्तुं); 'to curse and swear,' शपथाभिशापौ कृ.

CURSE, *s.* (Malediction) शापः, अभिशापः, शपथः, शपः -पनं, परिशापः, आक्रोशनं, अवक्रोशः, भर्त्सनं, अभिषङ्गः, अभीषङ्गः, गालिः m., मन्दवाक्यं; 'under a curse,' शापग्रस्तः -स्ता -स्तं.—(A pest) कण्टकः, दूषकः, अपकारकः. The following are forms of curses answering to '*confusion seize* you,' &c., सर्वविपत्तिस्ते भूयात्, अकालमृत्युस्तेऽस्तु, निग्राहस्ते भूयात्, अवग्राहस्ते स्यात्, अजननिर् अस्तु तव.

CURSED, *p. p.* शप्तः -प्ता -प्तं, अभिशप्तः -प्ता -प्तं, शापार्हः -र्हा -र्हं, गर्हितः -ता -तं, गर्हणीयः -या -यं, घृणार्हः -र्हा -र्हं, धिक्कृतः -ता -तं, अपध्वस्तः -स्ता -स्तं.

CURSEDLY, *adv.* गर्हितं, गर्हणीयप्रकारेण, दुष्टं, दुष्टु.

CURSHIP, *s.* कुक्कुरत्वं, श्वशीलता, दुःशीलता, अधमाचारत्वं.

CURSITOR, *s.* महाविचारस्थानसम्बन्धी लेखकविशेषः.

CURSORILY, *adv.* ईषदवेक्षया, ईषन्मनोयोगेन, त्वरितवत्, ईषद्दर्शनेन, सत्वरं, अनवधानेन, अनपेक्षया.

CURSORY, *a.* त्वरितः -ता -तं, असावधानः -ना -नं, अनवहितः -ता -तं, चपलपूर्वः -र्वा -र्वं, शीघ्रः -घ्रा -घ्रं, 'cursory view,' ईषद्दर्शनं, अर्द्धावेक्षणं.

CURST, *a.* कर्कशः -शा -शं, नृशंसः -सा -सं, दुश्चेताः -ताः -तः (स्).

CURT, *a.* ह्रस्वः -स्वा -स्वं, खर्वः -र्वा -र्वं, संक्षिप्तः -प्ता -प्तं.

To CURTAIL, *v. a.* ह्रस् in caus. (ह्रासयति -यितुं), छिद् (c. 7 छिनत्ति, छेत्तुं), अवछिद्, संछिद्, संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), संहृ (c. 1. -हरति -हर्त्तुं).

CURTAILED, *p. p.* ह्रसितः -ता -तं, छिन्नः -न्ना -न्नं, संक्षिप्तः -प्ता -प्तं, खण्डितः -ता -तं, अवरोपितः -ता -तं, अल्पीकृतः -ता -तं.

CURTAIN, *s.* तिरस्करिणी, यवनिका, आवरणं, तिरोधानं, आवरणपटः, प्रच्छदपटः, जवनी, यवनिका, नीशारः; 'bed-curtain,' मशकुटी, मशहरी.

To CURTAIN, *v. a.* आवरणपटेन परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं) or परिवृ (c. 5. -वृणोति -वरितुं -रीतुं) or प्रच्छद् (c. 10. -छादयति -यितुं).

CURTAIN-LECTURE, *s.* रात्रिकाले शय्यागतपतिमुद्दिश्य भार्य्योक्तं निन्दावाक्यं or भर्त्सनवाक्यं or तर्जनं.

CURTSY, *s.* स्त्रीलोकेन कृतः प्रणामः or अङ्गप्रणामः or नमस्कारः.

CURVATED, *a.* नतः -ता -तं, आनतः -ता -तं, प्रणतः -ता -तं, परिणतः -ता -तं, भुग्नः -ग्ना -ग्नं, अवभुग्नः -ग्ना -ग्नं, विभुग्नः -ग्ना -ग्नं, कुञ्चितः -ता -तं, आकुञ्चितः -ता -तं.

CURVATION, *s.* नम्रीकरणं, नम्रीकरणं, कुञ्चनं, आकुञ्चनं, अवकुञ्चनं.

CURVATURE, *s.* नतिः *f.*, आनतिः *f.*, वक्रता, वक्रिमा m. (न्), वक्रीभावः, जिह्मता, कुटिलता, कौटिल्यं, नम्रत्वं, भुग्नता, ... of ... spin ...

CURVE, *a.* वक्रः -क्रा -क्रं, वक्रिमः -मा -मं, नतः -ता -तं, कुटिलः -ला -लं, नम्रः -म्रा -म्रं, जिह्मः -ह्मा -ह्मं, भुग्नः -ग्ना -ग्नं, कुञ्चितः -ता -तं.

CURVE, *s.* नतिः *f.*, वर्त्त, भुग्नं, कुटिः m., वक्रता, वक्रिमा m. (न्), कुञ्चनं, अवकुञ्चनं; 'a curve line,' धनुर्मार्गः, वक्ररेखा.

To CURVE, *v. a.* नम् in caus. (नामयति -यितुं), आनम्, अवनम्; नम्रीकृ, वक्रीकृ; आवृत् in caus. (-वर्त्तयति -यितुं), कुञ्च् (c. 1. कुञ्चति -ञ्चितुं), कुटिलीकृ, अञ्च् (c. 1. अञ्चति -ञ्चितुं), जिह्म (nom. जिह्मयति -यितुं).

CURVED, *p. p.* नतः -ता -तं, नामितः -ता -तं, वक्रीभूतः -ता -तं, कुटिलीकृतः -ता -तं, जिह्मितः -ता -तं, विभुग्नः -ग्ना -ग्नं, अवभुग्नः -ग्ना -ग्नं, सम्भुग्नः -ग्ना -ग्नं, रुग्णः -ग्णा -ग्णं, कुञ्चितः -ता -तं, वृजिनः -ना -नं, अवनतः -ता -तं.

To CURVET, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), वल्ग् (c. 1. वल्गति -ल्गितुं), आवल्ग्.

CURVET, *s.* प्लुतं, प्लवः, वल्गितं, उत्प्लुतं, आस्कन्दितं, प्लुत्यः.

CURVILINEAR, *a.* वक्ररेखः -खा -खं, धनुर्मार्गाकारः -रा -रं, वक्रः -क्रा -क्रं.

CURULE, *a.* (Chair) पूर्व्वं रोमनगरे विचारकर्तृणाम् आसनं.

CUSHION, *s.* उपधानं -नीयं, पीठोपधानं, आलिङ्ग्यं, विष्टरः, विस्तरः, आस्तरणं, पीठास्तरणं, पीठमर्दः m. *f.*, उपबर्हः, पीठाजिनं, अजिनं, चर्म्म *n.* (न्).

CUSHIONED, *a.* उपधानसंविष्टः -ष्टा -ष्टं, अजिनशयानः -ना -नं, आलिङ्ग्यनिषण्णः -ण्णा -ण्णं.

CUSP, *s.* अर्द्धचन्द्रकोणः, अर्द्धेन्दुशिखा, अर्द्धचन्द्राग्रं, कलाग्रं, कलाकोणः.

CUSPATED, CUSPIDATED, *a.* सूक्ष्माग्रः -ग्रा -ग्रं, सूच्यग्रः -ग्रा -ग्रं.

CUSTARD, *s.* अण्डक्षीरादिमयं मिष्टान्नं.

CUSTODY, *s.* (Imprisonment) रोधः, निरोधनं, बन्धनं, कारासेधः, आसेधः, कारागारे निरोधः.—(Care, charge) गुप्तिः *f.*, रक्षा, रक्षणं.—(Defence) रक्षणं, पालनं, त्राणं.

CUSTOM, *s.* (Habit, established manner, fashion) आचारः, व्यवहारः, व्यवहृतिः *f.*, प्रचारः, समाचारः, रीतिः *f.*, नियमः, अभ्यासः, नित्यकर्म, धारा, मार्गः, स्थितिः *f.*, अनुसारः, आवृत्तिः *f.*, चर्य्या, चरितं, क्रमः, सम्प्रदायः, व्यापारः, शीलः; 'according to custom,' यथाव्यवहारं.—(Practice of buying of one person) एकपण्यविक्रेतुः सदाक्रयः or नित्यक्रयः.—(Tribute, toll) शुल्कः -ल्कं, करः, राजस्वं, राजभागः, शौल्किकः.

CUSTOMABLE, *a.* व्यावहारिकः -की -कं, आचारिकः -की -कं, लोकसिद्धः -द्धा -द्धं.

CUSTOMABLY, *adv.* व्यवहारानुसारेण, व्यवहारतस्, आचारानुरूपं.

CUSTOMARILY, *adv.* यथाव्यवहारं, यथारीति, रीत्यनुसारात्, प्रायशस्.

CUSTOMARY, *a.* आचारिकः -की -कं, व्यावहारिकः -की -कं or व्यवहारिकः, व्यवहारानुसारी -रिणी -रि (न्), आचारानुयायी -यिनी -यि (न्), आचरितः -ता -तं, प्रचरितः -ता -तं, प्रचलः -ला -लं, प्रचलितः -ता -तं, नैयमिकः -की -कं, रीत्यनुसारी &c., यौगिकः -की -कं.—(Habitual) आभ्यासिकः -की -कं, नित्यः -त्या -त्यं.—(Usual) प्रायिकः -की -कं, लोकसिद्धः -द्धा -द्धं, लौकिकः -की -कं, प्रसिद्धः -द्धा -द्धं.

CUSTOMER, *s.* क्रेता m. (तृ), क्रयी m. (न्), नित्यक्रेता m., सदाक्रयी.

CUSTOM-HOUSE, *s.* शुल्कग्रहणशाला, शुल्कस्थानं, करसञ्चयगृहं.

CUSTOM-HOUSE-OFFICER, *s.* शौल्कः, शौल्किकः, करग्राही m. (न्).

To CUT, *v. a.* कृत् (c. 6. कृन्तति, कर्त्तितुं), छिद् (c. 7. छिनत्ति, छेत्तुं), संछिद्, लू (c. 9. लुनाति, लवितुं), व्रश्च् (c. 6. वृश्चति, व्रश्चितुं), छो (c. 4. छ्यति, छातुं), दो or दा (c. 4. द्यति, c. 2. दाति -तुं).—(Cut in two) द्विधा छिद् or कृ, द्विखण्डीकृ.—(Divide) भिद् (c. 7. भिनत्ति, भेत्तुं), खण्ड् (c. 10. खण्डयति -यितुं).—(Pierce) व्यध् (c. 4. विध्यति

कृत्), भिद् . . 10. भिदयति -यितुं), निर्भिद्, खन् (c. 1. खनति -नितुं), छिद्.—(Carve, make by sculpture) तक्ष् (c. 1. तक्षति -क्षितुं).—(Hew) छिद्, विशस् (c. 1 -शसति -सितुं).—(Intersect) परिच्छिद्.—(Scratch) क्षुर् (c. 6. क्षुरति, क्षोरितुं).—(Cut away) अपकृत्, निकृत्, उच्छिद्.—(Cut down) अवकृत्, प्रकृत्, अपछिद्, अवभञ्ज् (c. 7. -भनक्ति -भंक्तुं), निभञ्ज्, प्रभञ्ज्; अवपत् in caus. (-पातयति -यितुं)—(Cut off) छिद्, अपछिद्, निकृत्, अवकृत्, लू; 'destroy,' उच्छिद्, उद्धृ (c. 1. -हरति -हर्तुं), उन्मूल् (c. 10. -मूलयति -यितुं); 'rescind,' लुप् (c. 6. लुम्पति, लोप्तुं); 'take away,' अपनी (c. 1. -नयति -नेतुं), अपहृ, 'intercept,' विछिद्, उच्छिद्, अवरुध् (c. 7 -रुणद्धि -रोद्धुं); 'interrupt,' विछिद्, खण्ड् (c. 10. खण्डयति -यितुं); 'preclude,' निवृ in caus. (-वारयति -यितुं), निरुध्; 'obviate,' परिच्छिद्; 'cut off a limb,' अङ्गं छिद्.—(Cut out) उत्कृत्, निष्कृत्; 'shape,' क्लृप् (c. 10. कल्पयति -यितुं), परिक्लृप्; 'contrive,' मनसा चित्र् (c. 10 चित्रयति -यितुं), परिक्लृप्, 'adapt,' युज् in caus. (योजयति -यितुं); 'outdo,' अतिवृत्, विशिष् in pass. (-शिष्यते); 'cut off a letter,' लुप्.—(Cut short, abridge) संहृ, संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उच्छिद्, लुप्; 'interrupt abruptly,' सहसा विछिद्.—(Cut up) व्यवछिद्, विनिकृत्, निकृत्; 'eradicate,' उच्छिद्.—(Cut the hair) केशान् छिद् or वप् in caus. (वापयति -यितुं) or परिवप्.—(Cut to the heart) मर्म्म भिद् or छिद् or व्यध्.

To CUT, *v. n.* (Make way by dividing) उद्भिद् in pass. (-भिद्यते), प्रोद्भिद्, स्फुट् (c. 6. स्फुटति -टितुं), उत्पद् in pass. (-पद्यते), प्रभू.

CUT, *p. p.* छिन्नः -न्ना -न्नं, कृत्तः -त्ता -त्तं, कर्त्तितः -ता -तं, लूनः -ना -नं, छातः -ता -तं, दातः -ता -तं, छितः -ता -तं, दितः -ता -तं, वृक्णः -क्णा -क्णं, खण्डितः -ता -तं, त्रुटितः -ता -तं, कृष्टः -ष्टा -ष्टं, तष्टः -ष्टा -ष्टं, परिशातितः -ता -तं; 'cut up,' व्यवच्छिन्नः -न्ना -न्नं, छिन्नभिन्नः -न्ना -न्नं, निकृत्तः -त्ता -त्तं; 'cut off,' in grammar, लुप्तः -प्ता -प्तं.

CUT, *s.* (The blow of a sharp instrument) प्रहारः, आघातः; 'a sword-cut,' खड्गप्रहारः, खड्गाघातः; 'cut with a whip,' कशाघातः.—(Impression made by an edge) छेदः, छेदकः, व्रणचिह्नं.—(Channel or canal) खातं, कुल्या, कृत्रिमा सरित्.—(Part cut off from the rest) खण्डः -ण्डं, छेदः, भित्तं, भित्तिः *f.*, दलं.—(Small particle) लवः, कणः, लेशः.—(A direct road) ऋजुमार्गः, अविमार्गः, अदीर्घपथः.—(Print) मुद्रा, पत्रे मुद्रिता प्रतिमा or प्रतिमूर्त्तिः *f.*—(Fashion, form) रीतिः *f.*, रूपं, आकारः, विधानं, संस्कारः, संस्थानं.

CUTANEOUS, *a.* त्वाचः -ची -चं, चार्म्मिकः -की -कं, चर्म्मी -र्म्मिणी -र्म्मि (न्), त्वक्सम्बन्धी -न्धिनी -न्धि (न्); 'cutaneous disease,' त्वग्रोगः, चर्म्मदूषिका; 'cutaneous eruption,' दद्रुः *m.*, दद्रूः *m.*

CUTICLE, *s.* अवभासिनी, बाह्यत्वक् *f.* (च्), बाह्यचर्म्म *n.* (न्).

CUTICULAR, *a.* त्वाचः -ची -चं, बाह्यत्वक्सम्बन्धी -न्धिनी -न्धि (न्).

CUTIS, *s.* (The true skin) वेतनी.

CUTLASS, *s.* कर्त्तरिका, खड्गः, कृपाणः, पृथुपत्रः खड्गः.

CUTLER, *s.* छुरिकाकारः, शस्त्रकारः, छुरिकाविक्रेता *m.* (तृ), शस्त्रमार्जः.

CUTLET, *s.* खण्डः -ण्डं, पर्शुका, पार्श्वास्थि *n.*; 'of mutton,' मेषमांसखण्डः.

CUTPURSE, *s.* ग्रन्थिभेदः -दकः, चौरः, अपहारकः, तस्करः.

CUTTER, *s.* (One who cuts) छेत्ता *m.* (तृ), छेदकरः, छिद् in comp., 'wood-cutter,' वनछिद्.—(Cutting instrument) कर्त्तरिका, कृन्तनं, छिदिरः.—(A nimble boat) लघुनौका.—(Front-teeth) छेदकदन्ताः *m. pl.*, राजदन्ताः *m. pl.*

CUT-THROAT, *s.* घातकः, सुप्तघातकः, मारणघातकः, आततायी *m.* (न्)

CUT-THROAT, *a.* घर्षोद्यतः -ता -तं, मारात्मकः -का -कं, क्रूरः -रा -रं.

CUTTING, *s.* (Piece cut off) विदलं, खण्डः -ण्डं, तष्टं, भित्तिः *f.*, शकलं भित्तं.—(Act of cutting) छेदनं, कर्त्तनं, त्रश्चनं, खण्डनं, छिदा छित्तिः *f.*, लूनिः *f.*, लावः, दातिः *f.*, दानं

CUTTING, *a.* छित्वरः -रा -रं, छिदुरः -रा -रं.—(Caustic) खरः -रा -रं, अरुन्तुदः -दा -दं, मार्म्मिकः -की -कं, मर्म्मभेदी -दिनी -दि (न्).

CUTTLE, *s.* (A fish, or its bone) मेलः -न्धकः, समुद्रफेनः, सिन्धुकफः अब्धिकफः, डिण्डीरः, डिण्डिरः, हिण्डीरः, श्वेतधामा *m.* (न्), सुफेनं मलं.—(A foul-mouthed fellow) मुखरः, वाग्दुष्टः, दुर्मुखः.

CUVERA, *s.* See KUVERA.

CYCLE, *s.* चक्रं, कालचक्रं, आवृत्तिः *f.*, कालावृत्तिः *f.*, कालावर्त्तः, परिवृत्तिः *f.*, परिवर्त्तः, पर्य्यायः, आवलिः *f.*; 'of the seasons,' ऋतुपर्य्यायः.

CYCLOPÆDIA, *s.* ज्ञानचक्रं, विद्याचक्रं, विद्यापर्य्यायः, विद्याहारावलिः *f.*

CYCLOPTIC, CYCLOPEAN, *a.* क्रूराचारः -रा -रं, दारुणः -णा -णं, मनुष्यघ्नहारः -रा -रं, अतिमहान् -हती -हत् (त्).

CYGNET, *s.* हंसशावकः, बालहंसः, युवहंसः, हंसापत्यं.

CYLINDER, *s.* गोलः, नलः, स्तम्भः, शलाका, निघः.

CYLINDRICAL, *a.* वर्त्तुलः -ला -लं, गोलाकारः -रा -रं, स्तम्भाकारः -रा -रं.

CYMBAL, *s.* घनं, झर्झरी, झल्लकं, झिल्लिः *f.*, झर्झरी, भेरी, करतालं.

CYNEGETICS, *s.* मृगव्यं, मृगया, मृगव्यविद्या, आखेटविद्या.

CYNIC, *s.* (A misanthrope) सर्व्वमनुष्यनिन्दकः -न्दी *m.* (न्), पुरुषद्वेषी *m.* (न्)

CYNICAL, *a.* सदावक्रः -क्रा -क्रं, अपरिचयी -यिनी -यि (न्), निरानन्दः -न्दा -न्दं, कुटिलभावः -वा -वं, निन्दाशीलः -ला -लं, चिरदुःखी -खिनी -खि (न्), अनालाप्यः -प्या -प्यं, परुषाकारः -रा -रं.

CYNOSURE, *s.* ध्रुवः, नक्षत्रनेमिः *m.*, ध्रुतिकरः, ज्योतीरथः.

CYPHER, *s.* अङ्कः, शून्यं, गुणनिका. See CIPHER

CYPHERING, *s.* अङ्कनं, अङ्कविद्या, गणनविद्या. See CIPHERING.

CYPRESS-TREE, *s.* श्मशानरोपितः शाकलाख्यविकस् पिकपत्रो दीर्घवृक्षः.

D.

To DAB, *v. a.* आर्द्रद्रव्यलघ्वाघातेन सिच् (c. 6 सिञ्चति, सेक्तुं) or प्रोक्ष् (c. 1. -उक्षति -क्षितुं), सिक्तद्रव्येण लघु आहन् (c. 2. -हन्ति -हन्तुं).

DAB, *s.* (Small lump) क्षुद्रपिण्डः, पिण्डः, क्षुद्रखण्डः.—(Blow with something moist) सिक्तद्रव्येण लघुप्रहारः or लघ्वाघातः, सेचनं, निषेकः.—(Something muddy thrown upon one) मलसेचनं, क्षिप्तपङ्कः.—(A man expert at something) निपुणः, पटुः, कुशलः, दक्षः.

To DABBLE, *v. a.* सिच् (c. 6. सिञ्चति, सेक्तुं), अवसिच्, निषिच्, लिप् (c. 6. लिम्पति, लेप्तुं), उक्ष् (c. 1. उक्षति -क्षितुं), प्रोक्ष्, क्लिद् in caus. (क्लेदयति -यितुं).

To DABBLE, *v. n.* (Play in water) जले or पङ्के क्रीड् (c. 1. क्रीडति -डितुं).—(Dabble in books, read superficially) शास्त्राणि चुम्ब् (c. 1. चुम्बति -म्बितुं).

DABBLER, *s.* (One that plays in water or mud) जलक्रीडः, पङ्कक्रीडः.—(Superficial reader) शास्त्रचुम्बकः, शास्त्रगण्डः, किञ्चिज्ज्ञः, अल्पमात्रविद्.

DACE, *s.* नदीचरः क्षुद्रमत्स्यभेदः.

DACTYL, *s.* चरणः -णं, भगणः, छन्दःशास्त्रेषु असमानपदं.

DAD, DADDY *s.* बालकभाषायां पितृसमानार्थः शब्दः, बप्पा, तातः.

DÆDAL, *a.* विचित्रविचित्रः -त्रा -त्रं, नानाप्रकारः -रा -रं, बहुविधः -धा -धं.

DAFFODIL, DAFFODOWNDILLY, *s.* उत्पलजातीयः पुष्पभेदः.

DAGGER, *s.* कट्टारः, कृपाणी, छुरिका, शङ्कुः *m.*, असिपुत्रिका, कर्त्तरी.

To DAGGLE, *v. a.* मलेन or पङ्केन लिप् (c. 6. लिम्पति, लेप्तुं).

To DAGGLE, *v. n.* पङ्के or कर्द्दमे लुठ् (c. 6. लुठति -ठितुं).

DAGGLETAIL, *a.* मलपङ्की -ङ्किनी -ङ्कि (न्), मलदूषितः -ता -तं.

DAILY, *a.* आह्निकः -की -कं, दैनिकः -की -कं, दैनः -नी -नं, दैवसिकः -की -कं, प्रात्यहिकः -की -कं, दिवातनः -नी -नं, अन्वाह्निकः -की -कं, नैत्यिकः -की -कं, अवश्यकः -का -कं; 'daily occupation,' आह्निकं, नित्यकृत्यं.

DAILY, *adv.* प्रतिदिनं, प्रतिदिवसं, प्रत्यहं, प्रतिवासरं, अनुदिनं, अन्वहं, दिवसे दिवसे, दिने दिने, अहनि अहनि, अहरहः.

DAINTILY, *adv.* ललितं, सलालित्यं, सलौल्यं, सुकुमारं, कोमलं, विलासेन.

DAINTINESS, *s.* (Delicacy, softness) सौकुमार्य्यं, कोमलता, मृदुता.—(Elegance, nicety) लालित्यं, सौल्यं, लावण्यं, विलासः, सूक्ष्मता, विनीतता.—(Deliciousness) सुस्वादुता, सुरसत्वं, सौरस्यं.

DAINTY, *a.* (Delicious) स्वादुः -दुः -द्वी -दु or सुस्वादुः, सुरसः -सा -सं, रसिकः -का -कं, सरसः -सा -सं, मिष्टः -ष्टा -ष्टं, स्वादुकारः -रा -रं, सुस्वाद्यः -द्या -द्यं.—(Delicate, nice) सुकुमारः -रा -रं, कोमलः -ला -लं, मृदुः -द्वी -दु, विनीतः -ता -तं, सूक्ष्मः -क्ष्मा -क्ष्मं.—(Over-nice, ceremonious) अतिविनीतः -ता -तं, अतिसभ्यः -भ्या -भ्यं.

DAINTY, *s.* सुरसः, स्वाद्वन्नं, स्वादुभोजनं, विशिष्टाहारः, भोजनविशेषः, सुखाद्यं.

DAIRY, *s.* क्षीरसम्पन्नशाला, दधिसम्पन्नगृहं, गोदुग्धस्थानं, पयोरक्षणस्थानं.

DAIRY-MAID, *s.* गोदोहिनी, क्षीरमन्थिनी, गोदुग्धरक्षिका, गोपी, आभीरी.

DAISY, *s.* वसन्तसमये यवसप्ररोही शुक्लदलः क्षुद्रपुष्पभेदः.

DALE, *s.* दरी -रा, दरीभृत् *f.*, कन्दरः -री, अद्रिद्रोणी, उपत्यका, प्रान्तरं.

DALLIANCE, *s.* (Act of fondness) कामचेष्टा, हावः, ललितं, लालसा, रमणं, रमणं, विलासः, विलसितं.—(Delay) विलम्बः, कालयापः.

To DALLY, *v. n.* (Sport, play, trifle) क्रीड् (c. 1. क्रीडति -डितुं), प्रक्रीड्; रम् (c. 1. रमते, रन्तुं), लल् (c. 1. ललति -लितुं), विलस् (c. 1. -लसति -सितुं), कुर्द् (c. 6. कुर्दति -र्दितुं).—(Caress a woman) स्त्रिया सह रम् or विलस्, कामचेष्टां कृ.—(Delay) विलम्ब् (c. 1. -लम्बते -म्बितुं).

DAM, *s.* (Mother, said of animals) जननी, जनिका, प्रजनिका, प्रजायिनी, प्रसूः *f.*, प्रसविनी, अम्बा, माता *f.* (तृ).—(Bank to confine water) सेतुः *m.*, सेतुबन्धः, जलबन्धकः, धरणं, पिधानः, आलिः *f.*

To DAM UP, *v. a.* सेतुना जलं बन्ध् (c. 9. बध्नाति, बन्द्धुं) or संस्तम्भ् (c. 9. -स्तभ्नाति -स्तम्भितुं) or निरुध् (c. 7. -रुणद्धि -रोद्धुं).

DAMAGE, *s.* क्षतिः *f.*, क्षतं, अपचयः, अपायः, हानिः *f.*, नाशः, दोषः, दूषणं, क्षयः, उपक्षयः, अपकारः, अपकृतं, हिंसा, द्रोहः, ध्वंसः, प्रध्वंसः, भ्रंशः, अनिष्टं.—(Damages in law) क्षतिपूरणं, दण्डः, पारितोषिकं, प्रतिफलं, निष्कृतिः *f.*, प्रायश्चित्तं.

To DAMAGE, *v. a.* हिंस् (c. 7. हिनस्ति c. 1. हिंसति -सितुं), उपहिंस्, विहिंस्; दुष् in caus. (दूषयति -यितुं); अपकृ; अर्द् in caus. (अर्दयति -यितुं); क्षण् (c. 8. क्षणोति -णितुं), परिक्षण्, नश् in caus. (नाशयति -यितुं), द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं).

DAMAGEABLE, *a.* हिंसनीयः -या -यं, दूष्यः -ष्या -ष्यं, अपचयक्षमः मा -मं.—(Mischievous) हिंस्रः -स्रा -स्रं, दूषकः -का -कं, अपकारकः -का -कं.

DAMAGED, *p. p.* क्षतः -ता -तं, परिक्षतः -ता -तं, विक्षतः -ता -तं, दूषितः -ता -तं, सदोषः -षा -षं, अर्दितः -ता -तं, कृतापकारः -रा -रं, अपकृतः -ता -तं.

DAMASK, *s.* पुष्पादिसूचिकर्म्मालङ्कृतं दमस्कनाम चित्रदुकूलं.

To DAMASK, *v. a.* (Adorn stuffs with flowers) दुकूलं सूचिकर्म्मद्वारा पुष्पादिना अलङ्कृ.—(Variegate) चित्र् (c. 10. चित्रयति -यितुं), कर्बुरीकृ.

DAMASK-ROSE, *s.* हेमपुष्पं, रक्तपुष्पो जवाप्रभेदः.

DAME, *s.* (Lady) स्वामी, भाविनी.—(Woman) स्त्री, वधूः, गृहिणी.

To DAMN, *v. a.* (Doom to hell or eternal torment) नरकं गच्छ इति शापं वद् (c. 1. वदति -दितुं); अनन्तदण्डं or नरकदण्डं प्राप्य इति ब्रू (c. 2. ब्रवीति, वक्तुं), अनन्तदुःखं or अनन्तयातना ते भूयाद् इति धिक्कृ; नरके पततु or अधोऽधो निरये पततु इति शापं कृ, नरकदण्डार्हं ज्ञा (c. 9. जानाति, ज्ञातुं), नरके नियत् in caus. (-पातयति -यितुं).—(Condemn) दण्ड् (c. 10. दण्डयति -यितुं), दण्डार्हं ज्ञा.—(Hiss any public performance) रङ्गे नाटकं प्रेक्ष्य कर्कशशब्देन् उपहासं सूत्क् (c. 10. सूत्कयति -यितुं).

DAMNABLE, *a.* अनन्तदण्डार्हः -र्हा -र्हं, नरकदण्डार्हः -र्हा -र्हं, नरके पतनार्हः -र्हा -र्हं.—(Odious) गर्हितः -ता -तं, गर्हणीयः -या -यं.

DAMNABLY, *adv.* यथा नरकदण्डार्हो भवति तथा, गर्हितं.

DAMNATION, *s.* अनन्तदण्डः, नरकदण्डः, अनन्तयातना, नरकयातना, नरके पतनं, नरकगमनं, अधोगमनं, अभिशम्पातः, ईश्वरकृपाबहिष्करणं.

DAMNED, *p. p.* नरकगतः -ता -तं, नरकपतितः -ता -तं, नरकस्थः -स्था -स्थं, नारकी -किणी -कि (न्), नैरयः -यी -यं, नरकप्राप्तः -प्ता -प्तं, अभिशप्तः -प्ता -प्तं, गर्हितः -ता -तं, गर्हणीयः -या -यं, घृणार्हः -र्हा -र्हं.

DAMNIFIC, *a.* क्षतिकारकः -का -कं, अपकारी -रिणी -रि (न्), दूषकः -का -कं.

To DAMNIFY, *v. a.* दुष् in caus. (दूषयति -यितुं), अपकृ, क्षतं -तां -तं कृ.

DAMP, DANK, *a.* (Moist) आर्द्रः -र्द्रा -र्द्रं, साद्र्रः -र्द्रा -र्द्रं, जलार्द्रः -र्द्रा -र्द्रं, क्लिन्नः -न्ना -न्नं, तिमितः -ता -तं, स्तिमितः -ता -तं, उन्नः -न्ना -न्नं, समुन्नः -न्ना -न्नं, सरसः -सा -सं, जलसिक्तः -क्ता -क्तं, अनूपः -पा -पं, समुक्षितः -ता -तं, क्लेदः -दा -दं, उन्नः -न्ना -न्नं.—(Dejected) म्लानः -ना -नं, क्लान्तः -न्ता -न्तं, विषण्णः -ण्णा -ण्णं.

DAMP, *s.* (Moisture) क्लेदः, प्रक्लेदः, स्नेहः, तेमः -मनं, समुन्दनं, जलावसेकः, चिक्लिदं.—(Fog, vapour) बाष्पः, अवश्यायः, धूमः -मिका, स्वेदः.—(Dejection) विषादः, म्लानिः *f.*; 'to be damp,' क्लिद् (c. 4. क्लिद्यति) तिम् (c. 4. तिम्यति or तीम्यति).

To DAMP, *v. a.* (Moisten) क्लिद् in caus. (क्लेदयति -यितुं), परिक्लिद्; सिच् (c. 6. सिञ्चति, सेक्तुं), अवसिच्; वृष् (c. 1. वर्षति -र्षितुं), समुक्ष्; उन्द् (c. 7. उनत्ति, उन्दितुं), आर्द्रीकृ.—(Dispirit) मनो खण्ड् (c. 10. खण्डयति -यितुं), खण्डिताशं -शां -शं कृ, भग्नाशं -शां -शं कृ, म्लानाशं -शां -शं, कृ.

DAMPISH, *a.* ईषदार्द्रः -र्द्रा -र्द्रं, ईषत्तिमितः -ता -तं, आक्लिन्नः -न्ना -न्नं.

DAMPNESS, *s.* आर्द्रता, आद्रिता, जलार्द्रत्वं, क्लिन्नता, जलसिक्तत्वं, अनूपता.

DAMPY, *a.* विषादी -दिनी -दि (न्), अवसन्नः -न्ना -न्नं, उद्विग्नः -ग्ना -ग्नं.

DAMSEL, *s.* कन्या, कुमारी -रिका, कन्यका, युवतिः *f.* -ती, सुन्दरी, बाला -लिका, अविवाहिता स्त्री; 'damsel's child,' कानीनः -नी.

DAMSON, *s.* डाम्सन्नामकः कृष्णवर्णः क्षुद्रफलप्रभेदः.

To DANCE, *v. n.* नृत् (c. 4. नृत्यति, नर्त्तितुं), प्रनृत्, उपनृत्, सम्प्रनृत्, नट् (c. 1. नटति -टितुं), नृत्यं कृ, नर्त्तकवद् हस्तपादादि सञ्चल् in caus. (-चालयति -यितुं); 'to dance attendance,' उपास् (c. 2. -आस्ते -आसितुं).

To DANCE, *v. a.* नृत् in caus. (नर्त्तयति -यितुं), चल् in caus. (चालयति -यितुं).

DANCE, *s.* नृत्यं, नाट्यं, ताण्डवं, लास्यं, चारणत्वं, पादन्यासः, गुणनिका.

DANCER, *s.* नर्त्तकः -की *f.*, नटः -टी *f.*, कुशीलवः, लासकः -की *f.*, लासिका *f.*, चारणः, चारणदाराः *f. pl.*, शैलाली *m.* (न्), शैलूषः, नाटकः -की *f.*, कृशाश्वी *m.* (न्), नर्त्तनवृत्तिः *m. f.*, नृत्यकुशलः, भरतः, भारतः, जायाजीवः, तालावचरः.

DANCING, *s.* नृत्यं, नर्त्तनं, नाट्यं, नटनं, प्रनर्त्तनं लास्यं लासः ताण्डवं

चोरीकर्म, चारकर्म, गुखमिका, हस्तपादादिभङ्गाकरणं.

DANCING-MASTER, *s.* नृत्याचार्य्यः, नृत्यशिक्षकः नृत्यगुरुः *m.*

DANCING-SCHOOL, *s.* नृत्यशिक्षणशाला, नृत्यशाला, नृत्यशिक्षावेश्म *n.* (न्).

DANDELION, *s.* सिंहपर्णी, सिंहदन्ताकृतिपत्रः क्षुद्रौषधिभेदः.

DANDIPRAT or DAPPERLING, *s.* बालकः, पुत्रकः, माणवकः, वामनः.

To DANDLE, *v. a.* अङ्कदेशे बालकं धृत्वा लल् in caus. (लालयति -यितुं).

DANDLED, *p. p.* लालितः -ता -तं, सान्त्वकरणार्थं जानुदेशे धृतः -ता -तं.

DANDRIFF, DANDRUFF, *s.* मज्जा, शिरोमध्ये पिण्डितक्लेदः, शिरोमलं.

DANDY, *s.* सुवेशी *m.* (न्), सुवसनः, दर्शनीयमानी *m.* (न्), छेकः.

DANGER, *s.* भयं, भयहेतुः *m.*, संशयः, शङ्का, सन्देहः, विकल्पः, आतङ्कः, आपद् *f.*, विपद् *f.*, अपायः, विपत्तिः *f.*, उत्पातः, बाधा, व्याघातः; 'any thing exposed to *danger*,' भयस्थानं, संशयस्थानं, शङ्कास्पदं; 'danger of life' जीवितसंशयः, प्राणसंशयः, प्राणबाधः; 'we are in danger of being led to *justice*,' अस्माकं विचारस्थाने आनयनशङ्का विद्यते; 'in danger of punishment,' दण्डयोग्यः -ग्या -ग्यं; '*brought* into danger,' संशयितः -ता -तं, 'an act attended with danger,' सन्दिग्धकर्म्म *n.* (न्).

To DANGER, *v. a.* संशयस्थं -स्थां -स्थं कृ, शङ्कास्पदं कृ, सन्देहस्थं -स्थां -स्थं कृ; 'one who dangers his life,' संशयितजीवितः.

DANGEROUS, *a.* भयङ्करः -रा -रं, भयानकः -का -कं, भयहेतुकः -का -कं, सन्दिग्धः -ग्धा -ग्धं, सांशयिकः -की -कं, संशयस्थः -स्था -स्थं, संशयापन्नः -न्ना -न्नं, शङ्काक्रान्तः -न्ता -न्तं, भयाक्रान्तः -न्ता -न्तं, भयजनकः -का -कं, भैरवः -वी -वं, विपत्तिजनकः -का -कं; 'a *dangerous* illness,' सन्निपातकः.

DANGEROUSLY, *adv.* यथा संशयः or भयहेतुर् उत्पद्यते तथा, भैरवं, शङ्कापूर्व्वकं, भयानकं, सन्दिग्धं; 'dangerously ill,' सन्निपातकरोगग्रस्तः.

DANGEROUSNESS, *s.* भयानकत्वं, सन्दिग्धता, सांशयिकत्वं, शङ्कास्थानत्वं.

To DANGLE, *v. n.* लुठ् (c. 6. लुठति -ठितुं), चञ्च् (c. 1. चञ्चति -ञ्चितुं), लम्ब् (c. 1. लम्बते -म्बितुं), अवलम्ब्, लुल् (c. 1. लोलति -ते -लितुं).

DANGLER, *s.* स्त्रीणाम् उपासने or स्त्रीभिः सह विलासकरणे कालक्षेपकः.

DANGLING, *a.* चञ्चन् -ञ्चन्ती -ञ्चत् (त्), लोलः -ला -लं, लोलमानः -ना -नं, लुठन् -ठन्ती -ठत् (त्), लम्बमानः -ना -नं, अवलम्बितः -ता -तं, लुठितः -ता -तं.

DAPPER, *a.* विनीतः -ता -तं, शृङ्गाकारः -रा -रं, ललितरूपः -पा -पं.

To DAPPLE, *v. a.* चित्र् (c. 10. चित्रयति -यितुं), चित्रविचित्रीकृ, कर्बुरीकृ.

DAPPLED, *a.* चित्रितः -ता -तं, कर्बुरितः -ता -तं, नानावर्णः -र्णा -र्णं.

To DARE, *v. n.* धृष् (c. 5. धृष्णोति, धर्षितुं), साहसं कृ, साहसेन व्यवसो (c. 4. -स्यति -सातुं); 'I dare *not* ask him,' न तं प्रष्टुं धृष्णोमि.

To DARE, *v. a.* (Challenge) आह्वे (c. 1. -ह्वयति -ह्वातुं), समाह्वे, नियुद्धार्थम् आह्वे, स्पर्ध् (c. 1. स्पर्धते -र्धितुं), आक्रन्द् (c. 1. -न्दति -न्दितुं).

DARE, *s.* आह्वानं, समाह्वानं, योधसंरावः, आक्रन्दितं, अभिग्रहः.

DARED, *p. p.* (Challenged) आहूतः -ता -तं, समाहूतः -ता -तं.

DARING, *s.* साहसं, प्रतिभा, धार्ष्ट्यं; 'act of daring,' सत्याहितं.

DARING, *a.* साहसी -सिनी -सि (न्), साहसिकः -की -कं, धृष्टः -ष्टा -ष्टं, धृष्णुः -ष्णुः -ष्णु, प्रगल्भः -ल्भा -ल्भं, वीरः -रा -रं, प्रवीरः -रा -रं, शूरः -रा -रं, निर्भयः -या -यं, अभीतः -ता -तं, निर्विशङ्कः -ङ्का -ङ्कं, अकुतोभयः -या -यं, विक्रान्तः -न्ता -न्तं, पराक्रमी -मिणी -मि (न्), प्रतिभानवान् -वती -वत् (त्), प्रतिभान्वितः -ता -तं.

DARINGLY, *adv.* साहसेन -सात्, साहसपूर्व्वकं, धृष्टं, धृष्टत्वात्, सधार्ष्ट्यं, प्रगल्भं, निर्भयं, निर्विशङ्कं, सविक्रमं, सप्रतिभानं, वीरवत्.

DARINGNESS, *s.* साहसं, साहसिकत्वं, धृष्टता, धृष्णुता, धार्ष्ट्यं, प्रगल्भता, प्रागल्भ्यं, प्रतिभा -भानं, निर्भयत्वं, वीरता, शौर्य्यं, धैर्य्यं, विक्रमः

DARK, *a.* तामसः -सी -सं -सिकः -की -कं, तमस्वी -स्विनी -स्वि (न्) सान्धकारः -रा -रं, अन्धकारयुक्तः -क्ता -क्तं, सतिमिरः -रा -रं, तिमिरयुक्तः -क्ता -क्तं, तमोवृतः -ता -तं, तमोमयः -यी -यं, तमोभूतः -ता -तं, निरालोकः -का -कं, निष्प्रभः -भा -भं, अप्रकाशः -शा -शं, हतज्योतिः -तिः -ति (स्).—(Obscure) गूढः -ढा -ढं, निगूढः -ढा -ढं, दुर्ज्ञेयः -या -यं, अस्पष्टः -ष्टा -ष्टं, दुर्दर्शः -र्शा -र्शं.—(*Dark-coloured*) कृष्णः -ष्णा -ष्णं, श्यामः -मा -मं, कालेयः -यी -यं, मेचकः -का -कं, नीलः -ला -लं, सितेतरः -रा -रं.—(*Opaque*) अस्वच्छः -च्छा -च्छं; 'a dark night,' तामसी तमिस्रा, नष्टचन्द्रा रात्रिः.

DARK, *s.* तमः *n.* (स्), अन्धकारः, तिमिरं, तमिस्रं, आन्ध्यं.

To DARKEN, *v. a.* तिमिर (nom. तिमिरयति -यितुं), तिमिरीकृ, अन्धीकृ

To DARKEN, *v. n.* तमस्वी -स्विनी -स्वि भू, तिमिरीभू, अन्धीभू.

DARKENED, *p. p.* तमोवृतः -ता -तं, तिमिरीकृतः -ता -तं, सतमस्कः -स्का -स्कं

DARKISH, *a.* तमस्कल्पः -ल्पा -ल्पं, ईषत्तामसः -सी -सं.—(In colour) ईषत्कृष्णः -ष्णा -ष्णं, आकालः -ला -लं, आनीलः -ला -लं.

DARKLING, *a.* तमोवर्त्ती -र्त्तिनी -र्त्ति (न्) or अन्धकारवर्त्ती.

DARKLY, *adv.* अस्पष्टं, अप्रकाशं, अव्यक्तं, सान्धकारं, अन्धवत्, अन्धं.

DARKNESS, *s.* अन्धकारः, तमः *n.* (स्), तिमिरं, तमिस्रं, तमसं, ध्वान्तं, निरालोकता, सान्धकारत्वं, निष्प्रभता, आन्ध्यं, शार्वरं, रात्रिवासः *n.* (स्), निशाचर्म्म *n.* (न्), भूच्छाया, मेलुक् *m.* (ष्); '*slight* darkness,' अवतमसं; 'great darkness,' अन्धतमसं, तमस्ततिः *f.*, 'universal darkness,' संतमसं.

DARKSOME, *a.* तमस्वी -स्विनी -स्वि (न्), तमस्कल्पः -ल्पा -ल्पं, निष्प्रभः -भा -भं.

DARLING, *s.* प्रियः -या, हृदयप्रियः -या, दयितः -ता, स्नेहपात्रं.

DARLING, *a.* हृदयप्रियः -या -यं, सुप्रियः -या -यं, प्रियतमः -मा -मं, हृद्यः -द्या -द्यं, वल्लभः -भा -भं, इष्टः -ष्टा -ष्टं इष्टतमः -मा -मं.

DARN, *s.* वस्त्रयोन्त्यतुकृतं जीर्णवस्त्रसीवनं, वस्त्रग्रन्थिः *m.*

To DARN, *v. a.* जीर्णवस्त्रादि सिव् (c. 4. सीव्यति, सेवितुं) or सूक्ष्मसूचिकर्म्मद्वारा सन्धा (c. 3. -धत्ते -धातुं).

DARNEL, *s.* कक्षः, शस्यक्षेत्ररुहः कक्षभेदः.

DART, *s.* शूलः -लं, प्रासः, शल्यं, शङ्कुः *m.*, क्षेपणिः *m.*, पाणिमुक्तं, करमुक्तं, मुक्तकं, बाणः, अस्त्रं, समिकं, दूरवेधी *m.* (न्).

To DART, *v. a.* अस् (c. 4. अस्यति, असितुं), प्रास्, क्षिप् (c. 6. क्षिपति, क्षेप्तुं), मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, सृज् (c. 6. सृजति, स्रष्टुं), ईर् (c. 10. ईरयति -यितुं), पत् in caus. (पातयति -यितुं), प्रहृ (c. 1. -हरति -हर्त्तुं).

To DART, *v. n.* (As lightning) स्फुर् (c. 6. स्फुरति -रितुं).—(Dart upon one) आपत् (c. 1. -पतति -तितुं), अभिद्रु (c. 1. -द्रवति -द्रोतुं).

To DASH, *v. a.* (Throw or strike any thing *suddenly* or forcibly against another) सहसा or प्रसभं क्षिप् (c. 6. क्षिपति, क्षेप्तुं) *or* प्रक्षिप् *or* अस् (c. 4. अस्यति, असितुं) or प्रास् or पत् in caus. (पातयति -यितुं) or अभिहन् (c. 2. -हन्ति -न्तुं), or अभ्याहन् or प्रतिहन् or प्रहृ (c. 1. -हरति -हर्त्तुं).—(Break by *collision, dash* in pieces) मृद् (c. 9. मृद्नाति, मर्द्दितुं), निष्पिष् (c. 7. -पिनष्टि -पेष्टुं), प्रभञ्ज् (c. 7. -भनक्ति, भंक्तुं), विघट्ट् (c. 10. -घट्टयति -यितुं), भूमौ प्रक्षिप्य खण्डं खण्डं कृ *or* खण्डशः कृ *or* लवशः कृ or चूर्ण् (c. 10. चूर्णयति -यितुं).—(Bespatter, besprinkle) अवकॄ (c. 6. -किरति -करितुं -रीतुं), अभ्यवकॄ, समवकॄ; उक्ष् (c. 1. उक्षति -क्षितुं), अभ्युक्ष्, प्रोक्ष्, अवसिच् (c. 6. -सिञ्चति -सेक्तुं).—(Mingle, adulterate) मिश्र् (c. 10. मिश्रयति -यितुं), सम्मिश्र्, संसृज् (*c.* 6. -सृजति -स्रष्टुं).—(Confound) मुह् in caus. (मोहयति -यितुं), विनश् in caus. (-नाशयति -यितुं).—(Obliterate) व्यामृश् (c. 2. -मार्ष्टि -मार्ष्टुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विलुप्

in caus. (-लोपयति -यितुं); 'dash one's hopes,' आशा भञ्ज् or खण्ड् (c. 10. खण्डयति -यितुं), 'dash out the brains,' मस्तकं निष्पिष्.

To DASH, *v. n.* (Rush against with a violent motion) प्रपत् (c. 1. -पतति -तितुं), प्रोत्पत्, आपत्, प्रस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), प्रस्रु (c. 1. -स्रवते -स्रोतुं), अभिद्रु (c. 1. -द्रवति -द्रोतुं).—(Be dashed in pieces), प्रभञ्ज् in pass. (-भज्यते).

DASH, *s.* (Collision) सङ्घट्टः -ट्टनं, समाघातः, प्रतिघातः, अभिघातः, परस्पराघातः, प्रभङ्गः, सम्मर्द्दः, मर्द्दनं, निष्पेषः.—(Infusion, admixture) प्रक्षेपः, मिश्रणं, सम्पर्कः, संसर्गः; 'a dash, a slight quantity,' किञ्चित्, ईषत्.—(A line in writing to denote a pause or omission) लिखने विरामसूचनार्थं or लोपसूचनार्थं क्षुद्ररेखा.—(Blow) प्रहारः, आघातः, आहतिः *f.*

DASTARD, *s.* कापुरुषः, कुपुरुषः, हतकः, क्लीवः, कातरः, कृपणः, भीरुः.

To DASTARD OR DASTARDISE, *v. a.* त्रस् in caus. (त्रासयति -यितुं), सन्त्रस्; भी in caus. (भाययति or भीषयति -यितुं), दीनचेतसं -सां -सं कृ.

DASTARDLY, *a.* अमनुष्यः -ष्या -ष्यं, कातरः -रा -रं, निर्वीरः -रा -रं, क्लीवः -वा -वं, अपौरुषेयः -यी -यं, दीनमनस्कः -स्का -स्कं.

DASTARDY, *s.* कापुरुषत्वं, अमनुष्यता, अपौरुषं, कातर्य्यं, क्लैव्यं, दीनता.

DATA, DATUM, *s.* तत्त्वानि *n. pl.*, सत्यानि *n. pl.*, सद्भिरनुमतं तत्त्वं, उपन्यासः.

DATE, *s.* (Time at which a letter, &c. is written) लिखनकालः, लिखनदिवसः, दिवसः, दिनं, तिथिः *m. f.*—(Time at which a thing was done) कालः, कालिकता, तत्कालः.—(Period, term) अवधिः *m.*, कालावधिः *m.*, परिसीमा.—(Fruit) खर्जूरः, कादिनः; 'out of date,' अव्यवहारितः -ता -तं, निरूढः -ढा -ढं.

To DATE, *v. a.* कालं or दिवसं or दिनं or तिथिं लिख् (c. 6 लिखति, लेखितुं).

DATED, *p. p.* कालसम्पन्नः -न्ना -न्नं, सकालः -ला -लं, कृतकालः -ला -लं.

DATE-TREE, *s.* खर्जूरः, तृणद्रुमः, यवनामयः; 'marshy date-tree,' हिन्तालः, हीनतालः, हिमहासकः.

DATIVE, *a.* (Case) सम्प्रदानं, सम्प्रदानकारकः, चतुर्थी विभक्तिः.

To DAUB, *v. a.* लिप् (c. 6 लिम्पति, लेप्तुं), आलिप्, उपलिप्, समालिप्; अञ्ज् (c. 7. अनक्ति, अंक्तुं or caus. अञ्जयति -यितुं), दिह् (c. 2. देग्धि -ग्धुं), प्रदिह्.—(Cover over) छद् (c. 10. छादयति -यितुं), प्रच्छद्.

DAUB, *s.* लेपः, विलेपः.—(Bad painting) कुचित्रं, कुचित्रलेखा, मन्दचित्रं.

DAUBED, *p. p.* लिप्तः -प्ता -प्तं, उपलिप्तः -प्ता -प्तं, विलिप्तः -प्ता -प्तं, अक्तः -क्ता -क्तं, अभ्यक्तः -क्ता -क्तं, दिग्धः -ग्धा -ग्धं, निदिग्धः -ग्धा -ग्धं.

DAUBER, *s.* लेपकः, लेपकरः, प्रलेपकः.—(Coarse painter) अनभिज्ञचित्रकरः, कुचित्रलिख् *m.* (ख्) चित्रकरदेशीयः, चित्रकरपाशः.

DAUBY, *a.* श्यानः -ना -नं, श्रीनः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, लेप्यः -प्या -प्यं.

DAUGHTER, *s.* दुहिता *f.* (तृ), पुत्री, पुत्रिका, पुत्रका, सुता, सूनुः -नूः *f.*, आत्मजा, तनुजा, अङ्गजा, कन्या, तनया, कायकाजनः, जाता, दारिका, प्रसूतिः *f.*, पिद् *f.* (द्), 'legitimate daughter,' औरसी, धर्म्मजा; 'daughter in law,' स्नुषा, जनी, पुत्रवधूः *f.*, वधूः *f.*, वधूटी, सुतस्त्री; 'adopted daughter,' करणीसुता, पुत्रिका, पोष्यपुत्री, क्रीतपुत्री; 'daughter's husband,' जामाता *m.* (तृ), दुहितुःपतिः *m.*

To DAUNT, *v. a.* त्रस् in caus (-त्रासयति -यितुं), सन्त्रस्, भी in caus (भाययति or भीषयति -यितुं), भयं जन् in caus. (जनयति -यितुं), मनो भञ्ज् (c. 7. भनक्ति, भंक्तुं), मनोहतं -तां -तं कृ.

DAUNTLESS, *a.* निर्भयः -या -यं, अशङ्कः -ङ्का -ङ्कं, निःशङ्कः -ङ्का -ङ्कं, अभीतः -ता -तं, अकुतोभयः -या -यं, अपभीः -भीः -भि, निःसाध्वसः -सा -सं.

DAUNTLESSNESS, *s.* निर्भयत्वं, अभीतिः *f.*, अभयं, अभीरुता, निःशङ्कता.

DAUPHIN, *s.* युवराजः, ज्येष्ठो राजपुत्रः, राज्ञः पूर्व्वजपुत्रः.

To DAWDLE, *v. n.* विलम्ब् (c. 1. -लम्बते -म्बितुं), कालं क्षिप् (c. 6 क्षिपति, क्षेप्तुं).

DAWDLER, *s.* विलम्बी *m.* (न्), कालक्षेपकः, दीर्घसूत्री *m.* (न्).

To DAWN, *v. n.* प्रभा (c. 2. -भाति -तुं), उषस् (nom. उषस्यति), उष् (c. 1 उच्छति, ओषितुं), व्युष्, समुष्, प्रभातीभू.

DAWN, *s.* अरुणः, प्रभातं, उषः -षा *n.* (स्), प्रत्युषः -षा *n.* (स्), प्रत्यूष -षः *n.* (स्), अरुणोदयः, व्युष्टं, विभातं, भातः, उदयः, प्रातःकाल कल्यं, काल्यं, पूर्व्वसन्ध्या, प्राक्सन्ध्या, सन्ध्या, दिवसमुखं, अहर्मुखं दिनारम्भः, दिनादिः *m.*, निशावसानं, निशान्तं, क्षपान्तः, रात्रिविगम गोसर्गः, प्राणोधिकः; 'at dawn,' प्रभाते, उषा, प्रातःकाले, प्रातर 'belonging to the dawn,' उषस्यः -स्या -स्यं, प्राभातीणः -णा -णं प्रातःकालीनः -ना -नं.

DAY, *s.* दिवसः -सं, दिनं, अहः *m.* (न्), वासरः, वारः, द्यु *n.*, घस्र वाश्रः; 'a lunar day,' तिथिः *m. f.* -थी; 'to day,' अद्य; 'by day,' दिवा, अह्नाय; 'day by day,' प्रतिदिनं, प्रतिदिवसं, प्रतिवासरं, प्रत्यहं, दिवसे दिवसे, अहन्यहनि, अहरहः, दिने दिने; 'day and night,' अहोरात्रं, अहर्निशं, दिवानिशं, दिवारात्रं, क्षपाहं, द्युनिशं द्युनिशौ, 'from day to day,' दिनाद्दिनं, वारं वारं, 'one day,' एकदा, 'a former day,' पूर्व्वेद्युस्; 'a future day,' उत्तरेद्युस् 'another day,' अन्येद्युस्, 'next day,' परेद्युस्, परेद्यवि; 'the day before yesterday,' अपरेद्युस्; 'the day after to-morrow परश्वस्, अधरेद्युस्; 'a night and two days or a day and two nights,' पक्षिणी; 'a day of Brahma,' ब्राह्मः; 'a day of the gods,' दैवतः; 'a rainy day,' दुर्द्दिनं, वार्दलं; 'day's hire,' दिनिका, दैनिकी.

DAY-BOOK, *s.* महाजनस्य दैनिकपुस्तकं, वाणिज्यपुस्तकं यस्मिन् दिवसे दिवसे पणव्यवहारवृत्तान्तो लिख्यते or आरोप्यते.

DAY-BREAK, *s.* अरुणोदयः, उदयकालः, उषः, प्रत्युषः, प्रभातं, प्रभातकाल दिवसमुखं, अहर्मुखं, दिनारम्भः, दिनादिः *m.*, रात्र्यवसानं, निशान्तं

DAY-LABOUR, *s.* भ्रातं, दैनिककर्म्म *n.* (न्), आह्निकक्रिया, दिवाकर्म्म *n.*

DAY-LABOURER, *s.* भ्रातीनः, भ्रातकरः, भ्रातव्यापृतः, दैनिककर्म्मकर

DAY-LIGHT, *s.* दिनज्योतिः *n.* (स्), सूर्य्यकालः, सूर्य्यरश्मिः *m.*, दिवालोकः, दीप्तिः *f.*

DAY-SPRING, *s.* अरुणोदयः, उदयः, सूर्य्योदयः, दिवसमुखं, दिनारम्भ

DAY-STAR, *s.* प्रभातनक्षत्रं, प्रभातीयतारा, प्रातरुदयिनी तारा, शुक्रतारा

DAY-TIME, *s.* दिवसकालः, सूर्य्यकालः, सूर्य्यसमयः, दिनकालः, रविकाल

DAY-WORK, *s.* दिवसकर्म्म *n.* (न्), दिवाकर्म्म, आह्निकक्रिया, भ्रातं.

To DAZZLE, *v. a.* अतिशयतेजसा दृष्टिं मन्दय् in caus (-तापयति -यितुं) or उपहन् (c. 2. -हन्ति -न्तुं) or अवरुध् (c. 7. -रुणद्धि -रोद्धुं).

To DAZZLE, *v. n.* अतिदीप्त्युपहतत्वात् समापितदृष्टिः -ष्टिः -ष्टि भू.

DAZZLED, *p. p.* उपहतदृष्टिः -ष्टिः -ष्टि or अवरुद्धदृष्टिः, उपहतनयनः -ना -नं

DAZZLING, *a.* अतितेजसः -सी -सं, उज्ज्वलः -ला -लं, दृष्टिसन्तापकः -का -कं दुरालोकः -का -कं, दुर्निरीक्ष्यः -क्ष्या -क्ष्यं, दुर्दर्शः -र्शा -र्शं, नयनोपघाती -तिनी -ति (न्).

DEACON, *s.* उपपुरोहितः, उपधर्म्माध्यापकः, पुरोहितसहायः -सहकारी *m.* (न्)

DEACONESS, *s.* पूर्व्वकाले ख्रीष्टीयसमाजे पुरोहितसहकारिणी स्त्री.

DEACONRY, DEACONSHIP, *s.* उपपुरोहितस्य पदं or व्यापारः or कर्म्म *n.* (न्)

DEAD, *a.* and *p.* मृतः -ता -तं, प्रेतः -ता -तं, परेतः -ता -तं, संस्थितः -ता -तं, प्रेतीभूतः -ता -तं, अतीतः -ता -तं, व्यतीतः -ता -तं, अपगतः -ता -तं

To garrison, *v. a.* नगररक्षार्थं दुर्गे सैन्यान् or रक्षकान् निविश् in caus. (-वेशयति -यितुं), नगररक्षणे सैन्यगुल्मं नियुज् (c. 7. युनक्ति -योक्तुं).

Garrisoned, *p. p.* रक्षकयुक्तः -क्ता -क्तं, रक्षार्थं सैन्ययुक्तः -क्ता -क्तं.

Garrulity, *s.* वावदूकता, वाचालता, बहुवादित्वं, बहुभाषिता, अतिशयोक्तिः *f.*, जल्पकता, जल्पाकत्वं, वाग्मित्वं, अतिभाषणं, प्रलापः, अतिवादः.

Garrulous, *a.* वावदूकः -का -कं, वाचालः -ला -लं, बहुभाषी -षिणी -षि (न्), बहुवादी -दिनी -दि (न्), जल्पकः -का -कं, जल्पाकः -का -कं, वाग्मी -ग्मिनी -ग्मि (न्), भाषितुः -तुः -तु, मुखरः -रा -रं, वक्ता -क्त्री -क्तृ (क्तृ).

Garter, *s.* जङ्घाबन्धनी, पादबन्धनी, जङ्घाबन्धः, जङ्घावस्त्रबन्धनी.

Garuda, *s.* (The bird on which the god Vishnu is carried, represented as being something between a man and a bird, and considered as the lord of the feathered tribe. He is the son of Kssyapa by Vinatá, and younger brother of Aruna) गरुडः, गरुत्मान् *m.* (-त्मत्), तार्क्ष्यः, खगेश्वरः, सुपर्णः, विष्णुरथः, वैनतेयः, विनतासूनुः *m.*, नागान्तकः, पन्नगाशनः, भुजगदारणः, सितानरः, दक्षाय्यः. The son of Garuda is called सम्पातिः -तिकः.

Gas, *s.* वायुः *m.*, वाष्पः, वातः, धूमः, धूमिका, अङ्गारजो वायुः *m.*

Gash, *s.* दीर्घच्छेदः, गम्भीरच्छेदः, दीर्घक्षतं, गम्भीरक्षतं, दीर्घगम्भीरस् त्वग्भेदः or त्वक्छेदः.

To gash, *v. a.* दीर्घच्छेदं कृ, गम्भीरच्छेदं कृ, दीर्घगम्भीरं त्वग्भेदं कृ.

Gasometer, *s.* वायुमापनयन्त्रं, अङ्गारजवायुनिर्माणस्थानं.

To gasp, *v. n.* मुखं व्यादाय कृच्छ्रेण श्वासप्रश्वासं कृ, कृच्छ्रेण श्वस् (c. 2 श्वसिति -तुं) or प्राण् (c. 2. प्राणिति -तुं), दुःश्वासं कृ, प्राणकृच्छ्रोपहतः -ता -तं भू.

Gasp, *s.* दुःश्वासः, श्वासः, श्वसितं, दुःश्वसितं, उच्छ्वासः, उच्छ्वसितं, प्राणः.

Gasping, *part.* उच्छ्वसन् -सन्ती -सती -सत् (त्), कृच्छ्रेण श्वसन् &c., उच्छ्वसितः -ता -तं, काशश्वासः -सा -सं, दुःश्वासी -सिनी -सि (न्), श्वासकृच्छ्रोपहतः -ता -तं, गतप्राणः -णा -णं.

Gastric, *a.* जाठरः -री -रं, औदरिकः -की -कं, उदरीयः -या -यं, जठरीयः -या -यं; 'gastric juice,' कोष्ठाग्निः *m.*, अग्निः.

Gastronome, *s.* उदरपरायणः, उदरसेवी *m.* (न्), कुक्षिम्भरिः *m.*, सर्वान्नरसज्ञः.

Gastronomy, *s.* सर्वान्नरसविद्या, पक्वान्नरसविद्या, उदरसेवा.

Gastrotomy, *s.* उदरच्छेदः -दनं, जठरच्छेदः -दनं.

Gate, *s.* द्वारं, द्वाः *f.* (र्), प्रतीहारः, प्रतिहारः, अररः -री -रं, गृहमुखं, द्वारकपाटकः; 'back-gate,' पक्षद्वारं, 'private-gate,' अन्तर्द्वारं, प्रच्छन्नद्वारं, 'city-gate,' पुरद्वारं, नगरद्वारं, गोपुरं; 'raised place over it,' हस्तिनखः; 'outer-gate,' बहिर्द्वारं.

Gate-post, *s.* द्वारस्तम्भः, द्वारस्थूणा, द्वारदारु *m.*; 'its ornament,' तोरणं.

Gate-way, *s.* द्वारवर्त्म *n.* (न्), द्वारपथः, निःसरणं.

To gather, *v. a.* (Collect) चि (c. 5. चिनोति, चेतुं), अवचि, समाचि, सञ्चि, आचि, प्रचि, समानी (c. 1. -नयति -नेतुं), समुपानी, समाहृ (c. 3. -दधाति -धातुं), समाहृ (c. 1. -हरति -हर्तुं), उपसंहृ, समूह् (c. 1. ऊहते -हितुं), सङ्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), ग्रह्, सम्भृ (c. 1. -भरति c. 3. -बिभर्त्ति -भर्त्तुं), संवृ (c. 5. -वृणोति, c. 1. -वरति -रितुं), एकीकृ, एकत्र कृ.—(Gather flowers, &c.) पुष्पाणि चि or अवचि or लू (c. 9. लुनाति, लवितुं).—(Select) ग्रह्, समुद्ग्रह्, वृ, उद्धृ.—(Deduce infer) अनुमा (c. 2. -माति -तुं, c. 3. -मिमीते), ऊह् (c. 1. ऊहते -हितुं), अपोह्, अवगम् (c. 1. -गच्छति -गन्तुं).

To gather, *v. n.* (Congregate) सङ्गम् (c. 1. -गच्छति -गन्तुं), समागम्, समे (सम् and आ with rt. इ, समैति -तुं), एकत्र मिल् (c. 6. मिलति, मेलितुं), सम्मिल्, एकत्र आगम्.—(Increase) वृध् (c. 1. वर्धते -र्धितुं), उपचि in pass. (-चीयते).—(Form matter) पूय् (c. 1. पूयते -यितुं), पूयं बन्ध् (c. 9. बध्नाति, बन्धुं), पूयपूर्णः -र्णा -र्णं भू.

Gather, *s.* (Fold) वस्त्रपुटः, ऊर्मिः *m.f.*, ऊर्मिका, आवर्त्तनं, पुटः.

Gathered, *p. p.* चितः -ता -तं, सञ्चितः -ता -तं, अवचितः -ता -तं, उपचितः -ता -तं, समूढः -ढा -ढं, सङ्गृहीतः -ता -तं, लूनः -ना -नं.

Gatherer, *s.* अवचायी *m.* (न्), सञ्चयी *m.* (न्), सङ्ग्रहीता *m.* (तृ), सङ्ग्राहकः; 'gatherer of taxes,' करग्रहः, शुल्कग्राही *m.* (न्); 'of flowers,' पुष्पावचायी *m.*

Gathering, *s.* (Act of collecting) चयनं, सञ्चयनं, चायः, अवचयः, अवचायः, लावः, सङ्ग्रहः -हणं, एकत्रकरणं; 'of flowers,' पुष्पचयः, कुसुमावचयः, पुष्पप्रचायः.—(Crowd, assembly) समूहः, सङ्घः, सङ्घातः, सङ्घातः, समागमः, समवायः, समाहारः, समजः; 'of people,' जनसमूहः, जननिवहः, लोकसङ्घः.—(Abscess) विद्रधिः *m.*, पूयमयः स्फोटः.—(Gathering of clouds) घनचयः, घनौघः, घनजालं, घनसञ्चयः.

Gaudery, *s.* अलङ्कारः, चित्रविचित्राभरणानि *n. pl.*, शोभाकरद्रव्याणि *n. pl.*

Gaudily, *adv.* अतिचित्रालङ्कारं, शोभाकरणार्थं, एकान्तशोभनं, चित्रविचित्रं; 'gaudily dressed,' उज्ज्वलवेशधारी -रिणी -रि (न्).

Gaudiness, *s.* रक्तता, सरागत्वं, रागः, रङ्गः, चित्रता, चित्रविचित्रता, शोभा, एकान्तशोभा, अतिशोभा, वर्णः, नानावर्णत्वं, कर्बुरता, चारुदृष्टिः *f.*

Gaudy, *a.* बहुवर्णः -र्णा -र्णं, नानावर्णः -र्णा -र्णं, चित्रः -त्रा -त्रं, चित्रविचित्रः -त्रा -त्रं, अतिशोभनः -ना -नं, एकान्तशोभनः -ना -नं, रक्तः -क्ता -क्तं, अतिरागी -गिणी -गि (न्), चित्रालङ्कारवान् -वती -वत् (त्), उज्ज्वलः -ला -लं.

Gaudy, *s.* (A feast) उत्सवः, उत्सवदिनं, पर्वाहः, उद्धर्षः.

To gauge, *v. a.* प्रमाणदण्डेन भाण्डभरणं मा (c. 2. माति -तुं, c. 10. मापयति -यितुं).

Gauge, *s.* (Measure) परिमाणं, प्रमाणं, मानं, परिमाणविधिः *m.*, परिमाणरीतिः *f.*—(Instrument for measuring) मापनयन्त्रं, परिमापनदण्डः, प्रमाणदण्डः, ——— मतिः *m.* *See* Gage.

G[illegible], s. ... परिमाणमापक:, परिमाणकर्ता m. (र्तृ).

GAUGING, s. मानदण्डेन भाजनस्थानमापनं or भाजनपूरणपरिमाणकरणं.

GAUNT, a. कृश: -शा -शं, परिकृश: -शा -शं, कृशाङ्ग: -ङ्गी -ङ्गं, क्षीणशरीर: -रा -रं, क्षीणमांस: -सा -सं, क्षाम: -मा -मं, शुष्काङ्ग: &c., शुष्काङ्ग: &c.

GAUNTLET, s. लोहनिर्म्मितं हस्तच्छादनं or हस्तत्राणं; 'to throw the gauntlet,' युद्धेच्छुहस्तच्छादनं भूमौ प्रक्षिप्य युद्धार्थम् आह्वे (c. 1. -ह्वयति -ह्वातुं).

GAUR, s. (The country) गौड:; 'its inhabitants,' गौडा: m. pl.

GAUZE, s. विरलतन्तु: स्वच्छवस्त्रविशेष:, विरलांशुकं, सूक्ष्मांशुकं.

GAVOT, s. गवोत्संज्ञको लघुनृत्यविशेष:.

GAWK, s. मूर्ख:, मूढ:, स्थूलबुद्धि: m., स्थूलधी: m., जडधी: m.

GAWKY, a. स्थूल: -ला -लं, स्थूलशरीर: -रा -रं, दीर्घस्थूल: -ला -लं, दीर्घदेह: -हा -हं, कद्रूप: -पा -पं, विरूप: -पी -पं.

GAY, a. (Merry) उल्लस: -सा -सं -सित: -ता -तं, आनन्दी -न्दिनी -न्दि (न्). हृष्ट: -ष्टा -ष्टं, प्रहृष्ट: -ष्टा -ष्टं, हृष्टहृदय: -या -यं, प्रफुल्ल: -ल्ला -ल्लं, उल्लासित: -ता -तं, समुल्लसित: -ता -तं, विलासी -सिनी -सि (न्), केलिक: -का -कं, मुदित: -ता -तं, प्रमोदी -दिनी -दि (न्), ललित: -ता -तं, परिहासशील: -ला -लं, हासी -सिनी -सि (न्).—(Showy) नानावर्ण: -र्णा -र्णं, बहुवर्ण: -र्णा -र्णं, चित्रविचित्र: -त्रा -त्रं, अतिशोभन: -ना -नं.

GAIETY, s. उल्लासता, उल्लास:, आनन्द:, आह्लाद:, आनन्दता, हर्ष:, प्रहर्ष:, प्रफुल्लता, मुदा, प्रमोद:, चित्तप्रसन्नता, प्रहसनं.—(Merry making) उत्सव:, महोत्सव:, उत्सवकरणं.

GAYLY, adv. सानन्दं, सहर्षं, प्रमोदेन, उल्लासेन, सहर्षवत्.—(Showily) सबहुवर्णं, चित्रविचित्रं, अतिशोभनं; 'gayly dressed,' उज्ज्वलवेशधारी -रिणी -रि (न्).

To GAZE, v. a. and n. ईक्ष् (c. 1. ईक्षते -क्षितुं), प्रेक्ष्, निरीक्ष्, वीक्ष्, अभिवीक्ष्, समीक्ष्, आलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं), बद्धदृष्ट्या or स्थिरदृष्ट्या or अनिमिषनयनाभ्यां निरीक्ष् or दृश् (c. 1. पश्यति, द्रष्टुं), स्थिरदृष्टिं कृ, दृष्टिं or लक्ष्यं बन्ध् (c. 9. बध्नाति, बन्धुं).

GAZE, s. स्थिरदृष्टि: f., बद्धदृष्टि: f., अनिमिषदृष्टि: f., दृष्टि: f., आलोकनं, ईक्षणं, निरीक्षा, वीक्षणं, वीक्षितं, प्रेक्षणं, प्रेक्षितं, दर्शनं, लक्ष्य: -क्ष्यं; 'with fixed gaze,' बद्धदृष्टि: -ष्टि: -ष्टि, अनिमिषनयन: -ना -नं.

GAZEHOUND, s. दृष्टिमात्रेण शशकाद्यनुसरणशीलो मृगव्यकुक्कुर:.

GAZELLE, s. तनुशरीरो हरिणभेद:, मृग: -गी; 'gazelle-eyed,' मृगीदृश् m. f. n. (क्).

GAZETTE, s. वार्त्तिकपत्रं, समाचारपत्रं, संवादपत्रं, सन्देशपत्रं.

To GAZETTE, v. a. वार्त्तिकपत्रेण प्रकाश् (c. 10. -काशयति -यितुं).

GAZETTEER, s. अमुकदेशे यत्किञ्चित् नगरग्रामपर्वतादि विद्यते तदकारादिक्रमाद्विज्ञापकं पुस्तकं.

GAZING, part. स्थिरदृष्ट्या प्रेक्षमाण: -णा -णं or आलोकयन् -यन्ती -यत् (त्), 'gazing up to heaven,' नभोदृष्टि: -ष्टि: -ष्टि; 'in various directions,' इतस्ततो दत्तदृष्टि:.

GAZING-STOCK, s. तिरस्कारविषय:, अवहासभूमि: f., परिवादास्पदं, कौतुकं.

GEAR, s. उपकरणं, सामग्री -ग्र्यं सज्जा, परिच्छद:, परिधानं, आभरणं, प्रसाधनं, प्रतिकर्म्म n. (न्), 'plough-gear,' हलोपकरणं.

GEESE, s. pl. हंसा: m. pl. See GOOSE.

GELATIN, s. क्षुपितमांसनिर्म्मितं घनीभूतं or श्यानीभूतं स्वच्छद्रव्यं.

GELATINOUS, a. पूर्वोक्तश्यानद्रव्यगुणविशिष्ट: -ष्टा -ष्टं, श्यान: -ना -नं, घन: -ना -नं, सान्द्र: -न्द्रा -न्द्रं, संलग्नशील: -ला -लं, अवलेह्य: -ह्या -ह्यं.

To GELD, v. a. वृषणान् उत्कृत् (c. 6. -कृन्तति -कर्त्तितुं) or छिद् (c. 7. छिनत्ति, छेत्तुं), वृषणक्षयम् उत्पद् (c. 10. -पादयति -यितुं).

GELDED, p. p. छिन्नवृषण: -णा -णं, छिन्नमुष्क: -ष्का -ष्कं, मुष्कशून्य: -न्या -न्यं.

GELDING, s. (Horse) अवृषणो अश्व:, छिन्नवृषणो वाजी m. (न्).

GELID, a. अतिशीतल: -ला -लं, घनातिशिशिर: -रा -रं, हिम: -मा -मं.

GELIDITY, GELIDNESS, s. अतिशीतलता, अतिशैत्यं, शीतता, शिशिरत्वं.

GELLY, s. क्षुपितमांसनिर्म्मितो घनीभूत: or श्यानीभूत: स्वच्छरस:.

GEM, s. (Precious stone) मणि: m. f. -णी, रत्नं आकरोद्भवं, प्रशस्त मणिरत्नं. 'necklace of gems,' मणिमाला, मणिसर:, रत्नावलि: f.; 'its central gem,' तरल:; 'mine of gems,' रत्नाकर:.—(Bud) मुकुलं, कलिका, पल्लव: -वं, कुड्मलं.

To GEM, v. a. मणिभि: or रत्नै: अलङ्कृ or भूष् (c. 10. भूषयति -यितुं).

To GEM, v. n. (Bud) फुल्ल् (c. 1. फुल्लति -ल्लितुं), अङ्कुर (nom. अङ्कुरयति -यितुं).

To GEMINATE, v. a. द्विगुणीकृ, द्विगुण (nom. द्विगुणयति -यितुं), द्वैधीकृ, द्विकं -कां -कं कृ.

GEMINATION, s. द्विगुणीकरणं, द्वैगुण्यं, द्विरावृत्ति: f., पुनरुक्ति: f.

GEMINI, s. pl. (Twins) यमौ m. du., यमलौ m. du.—(Constellation) द्वन्द्व:, मिथुन:, मिथुनं.

GEMINOUS, a. द्विगुण: -णा -णं, द्विक: -का -कं, द्वैध: -धी -धं, द्विविध: -धा -धं, यम: -मा -मं, यमक: -का -कं.

GEMINY, s. मिथुनं, द्वन्द्वं, यमकं, यमलं, युगं, युग्मं, युगलं, द्वयं.

GEMMATE, a. मुकुलित: -ता -तं, फुल्लवान् -वती -वत् (त्), पल्लवित: -ता -तं.

GEMMED, p. p. रत्नवान् -वती -वत् (त्), मणिमान् -मती -मत् (त्), रत्नमय: -यी -यं, रत्नानुविद्ध: -द्धा -द्धं, रत्नालङ्कृत: -ता -तं, मणिभूषित: -ता -तं.

GEMMY, a. मणिमय: -या -यं, रत्नशोभी -भिनी -भि (न्), मणिमय: -यी -यं.

GENDER, s. लिङ्गं, प्रकृति: f.; 'masculine gender,' पुंलिङ्गं, पुरुष:; 'feminine gender,' स्त्रीलिङ्गं; 'a noun of invariable gender,' अजहल्लिङ्ग:.

To GENDER, v. a. जन् in caus. (जनयति -यितुं), सञ्जन्, प्रभू or प्रसु (c. 2. -सूते, c. 4. -सूयते -सोतुं), उत्पद् in caus. (-पादयति -यितुं).

To GENDER, v. n. स्त्रीपुरुषवत् सङ्गम् (c. 1. -गच्छति -गन्तुं) or मैथुनं कृ.

GENEALOGICAL, a. वंशावलीविषय: -या -यं, वंशान्वयविषयक: -का -कं, वंशक्रमसम्बन्धी -न्धिनी -न्धि (न्).

GENEALOGIST, s. अन्वयज्ञ:, वंशावलिज्ञ:, घटक:, कुलाचार्य:, वंशावलिरचक:, वंशपरम्पराज्ञ:.

GENEALOGY, s. वंशावली -लि: f., आवलि: f., वंशान्वय:, अन्वय:, वंशश्रेणी, वंशक्रम:, वंशपरम्परा, वंशानुचरितं, वंशविततिः f., वंशविवरणं; 'of kings,' राजावलि: f., नृपावलि:, पार्थिवावलि:.

GENERAL, a. (Common to many, or all) साधारण: -णा -णी -णं, सामान्य: -न्या -न्यं, सर्व्वसामान्य: -न्या -न्यं, बहुसामान्य: -न्या -न्यं, सर्व्वसाधारण: -णी -णं, सर्व: -र्वा -र्वं, सार्व: -र्वी -र्वं, सार्व्वत्रिक: -की -कं, सर्व्वीय: -या -यं, सर्व्वजनीय: -या -यं, सार्व्वजनिक: -की -कं, सर्व्वजनीन: -ना -नं, विश्वजनीन: -ना -नं, विश्वजनीय: -या -यं, विश्वजन्य: -न्या -न्यं, सार्व्वलौकिक: -की -कं, लौकिक: -की -कं, व्यापक: -का -कं, सर्व्वव्यापक: -का -कं, सर्व्वमय: -यी -यं, औत्सर्गिक: -की -कं.—(Not particular) अविशेषक: -का -कं, अपच्छेदासच्छेदक: -का -कं.—(Usual) प्रायिक: -की -कं, लोकसिद्ध: -द्धा -द्धं, आचारिक: -की -कं, सर्व्वत्र प्रचल: -ला -लं or प्रचलित: -ता -तं; 'general practice,' जनरीति: f., लोकव्यवहार:; 'general order,' सामान्यशासनं, 'general opinion,' बहुमतं, 'general collection,' सर्व्वसङ्ग्रह:, 'general reader,' चुम्बक:, प्रपदाविद् m.; 'in general,' प्रायेण, प्रायशस्, बहुशस्. See GENERALLY.

GENERAL. O n m सेनापतिः वाहिनीपतिः m सेनानीः m सेनाधिपः सेनाग्रगः चमूपतिः m योधमुख्यः सैन्याध्यक्षः बलाध्यक्षः महासेनः k u me सायगीन

—(Public, whole) साकल्यं, सामान्यं, सुमुदायः

GENERALISSIMO, s. प्रधानसेनापतिः m., अग्रसेनानीः m., प्रधानसैन्याध्यक्षः.

GENERALITY, s. (State of being general) सामान्यं -न्यत्वं, साधारण्यं, साधारणत्वं.—(Greatest part) प्रधानभागः, अधिकभागः, बहुतरभागः, प्रधानांशः.

GENERALIZATION, s. अवच्छेदावच्छेदः, व्यापकत्वं, जातिनिर्देशः, बहुसामान्यकरणं, गणीकरणं.

To GENERALIZE, v. a. अवच्छेदावच्छेदं कृ, बहुव्यापकं -कां -कं कृ, बहुसामान्यं -न्यां -न्यं कृ, गणीकृ, जातिनिर्देशं कृ.

GENERALLY, adv. प्रायस्, प्रायशस्, प्रायेण, भूयस्, बहुशस्, बाहुल्येन, भूयिष्ठं, बहुतरं, साधारण्येन, सामान्यतस्, साकल्येन.

GENERALNESS, s. साधारणत्वं, सामान्यत्वं, व्यापकत्वं, बाहुल्यं, प्रसिद्धत्वं.

GENERALSHIP, s. सेनापत्यं, सेनापतित्वं.—(Skill in tactics) व्यूहपाण्डित्यं, रणपाण्डित्यं, सेनाव्यूहनैपुण्यं, बलविन्यासकौशल्यं, सेनाजयप्रवीणता.

GENERALTY, s. साकल्यं, समस्तत्वं, सामान्यं, कार्त्स्न्यं, साखिल्यं, समुदायः.

To GENERATE, v. a. जन् in caus. (जनयति -यितुं), सञ्जन्, प्रसू or प्रसू (c. 1. -सवति, c. 2. -सूते, c. 4. -सूयते -सोतुं), सू, उत्पद् in caus. (पादयति -यितुं).

GENERATED, p. p. जातः -ता -तं, जनितः -ता -तं, उपजातः -ता -तं, सञ्जातः -ता -तं, उत्पादितः -ता -तं, समुत्पादितः -ता -तं, प्रसूतः -ता -तं, प्ररूढः -ढा -ढं, कृतजन्मा -न्मा -न्म (न्), उद्भवः -वा -वं, प्रभवः -वा -वं, 'generated in water,' जलोद्भवः -वा -वं.

GENERATION, s. (Production) जननं, प्रजननं, जन्म n. (न्), उत्पादनं, उत्पत्तिः f., प्रसूतिः f., प्रसवः, सम्भवः, उद्भवः, प्रभवः.—(Race) जातिः f., वंशः, सन्तानः, सन्ततिः f., कुलं, अन्वयः, प्रवरं.—(The people living at the same time) समवयस्काः or समकालजीविनः पुरुषाः m. pl.—(Series of descendants) वंशावली, वंशपरम्परा, वंशश्रेणी; 'extending to seven generations,' साप्तपौरुषः -षी -षं, 'organ of generation,' उपस्थः.

GENERATIVE, a. जनकः -का -कं, उत्पादकः -का -कं, सावकः -विका -कं.

GENERATOR, s. जनयिता m. (तृ), जनिता m. (तृ), जननः, जनकः, जन्मदः दाता m. (तृ), बीजप्रदः, बीजी m. (न्), उत्पादकः.

GENERIC, GENERICAL, a. सामान्यः -न्या -न्यं, साधारणः -णा -णी -णं, वर्गीयः -या -यं, जातीयः -या -यं, जातिसम्बन्धीयः -या -यं, व्यापकः -का -कं; 'generic property,' जातित्वं, जातिधर्म्मः, जातिस्वभावः, सामान्यं, समानाधिकरणं, 'generic characteristic,' जातिलक्षणं, सामान्यलक्षणं.

GENERICALLY, adv. जातिमुद्दिश्य, वर्गमुद्दिश्य, जातितस्, सामान्यतस्.

GENEROSITY, s. (Liberality) औदार्य्यं, उदारता, दानशीलता, त्यागशीलता त्वं, त्यागः, त्यागिता, बहुप्रदत्वं, अतिसर्ज्जनं, अतिदानं, वदान्यता, अकार्पण्यं, विलम्भः.—(Nobleness of soul) माहात्म्यं, औदार्य्यं, उदारता.

GENEROUS, a. (Liberal) उदारः -रा -री -रं, दानशीलः -ला -लं, त्यागशीलः -ला -लं, बहुप्रदः -दा -दं, बहुदः -दा -दं, अतिदाता -त्री -तृ (तृ), दायकः -का -कं, दानरतः -ता -तं, वदान्यः -न्या -न्यं, अकृपणः -णा -णं, स्थूललक्ष्यः -क्ष्या -क्ष्यं, उदात्तः -त्ता -त्तं.—(Noble-minded) उदारचेताः -ताः -तः (स्), उदारधीः -धीः -धि, उदारचरितः -ता -तं, माहात्मिकः -की -कं, महात्मा -त्मा -त्म (न्), महानुभावः -वा -वं, महेच्छः -च्छा -च्छं, उदीर्णः -र्णा -र्णं.—(Of honourable birth) सत्कुलीनः -ना -नं, महाकुलः -ला -लं.

GENEROUSLY, adv. उदारवत्, वदान्यवत्, सदाक्षिण्यं, दानशीलत्वात्, माहात्म्येन.

GENEROUSNESS, s. औदार्य्यं, उदारता, माहात्म्यं. See GENEROSITY.

GENESIS, s. बाइबल्नाम्नि धर्म्मग्रन्थे मध्यात् प्रथमग्रन्थः, जगत्सृष्टिविषयकं मूसालिखितम् आदिपुस्तकं.

GENET, s. (Horse) क्षुद्ररूपी विदेशीयः क्षुद्रवाजी m. (न्).—(Civet) गन्धमार्ज्जारः.

GENETHLIAC, s. (Birthday poem) जन्मदिवसमुद्दिश्य काव्यं.

GENIAL, a. (Contributing to propagation) सावकः -का -कं, प्रसवकारी -रिणी -रि (न्), प्रसूतिवर्धकः -का -कं.—(Contributing to life and cheerfulness) जीवदः -दा -दं, तेजोवर्धकः -का -कं, आनन्दकरः -रा -रं, रम्यः -म्या -म्यं, रमणीयः -या -यं, मनोरमः -मा -मं, सुखकरः -री -रं, प्रसन्नः -न्ना -न्नं, सुभगः -गा -गं, प्रसादकरः -रा -रं, रुचिरः -रा -रं.

GENIALLY, adv. प्रसन्नं, प्रसादेन, सप्रसादं, सानन्दं, प्रमोदेन, सहर्षं.

GENIALNESS, s. सुखदता, रम्यता, रमणीयत्वं, प्रसन्नता, सानन्दता.

GENICULATED, a. जानुपर्व्वाकारग्रन्थियुक्तः -क्ता -क्तं, ग्रन्थिलः -ला -लं.

GENITAL, a. प्रसवसम्बन्धी -न्धिनी -न्धि (न्), जननसम्बन्धी &c., यौनः -नी -नं.

GENITALS, s. pl. उपस्थः, शिश्नादि n., भगादि n., अधोङ्गं, जननाङ्गं.

GENITIVE, a. or s. (In grammar) सम्बन्धः, शेषः, षष्ठी विभक्तिः f.

GENITOR, s. जनयिता m. (तृ), जनिता m. (तृ), जनकः, जननः, जन्मदः.

GENIUS, s. (Natural disposition) स्वभावः, प्रकृतिः f., शीलः, गुणः.—(Strength of mind, power of intellect) धीशक्तिः f., बुद्धिशक्तिः f., मनःशक्तिः f., मनोयुक्तिः f., बुद्धिसामर्थ्यं, बुद्धिप्रभावः, मतिप्रयोगता.—(Power of invention) कल्पनाशक्तिः f.—(Man endowed with talent) गुणी m. (न्), गुणवान् m. (त्), धीशक्तियुक्तः, बुद्धिशक्तिमान् m. (त्), युक्तबुद्धिः m., बुद्धिमान् m. (त्), धीमान् m. (त्).—(Peculiar characteristic) विशेषगुणः, लक्षणं, स्वभावः, स्वधर्म्मवृत्तिः f.; 'poetical genius,' कवित्वशक्तिः f.

GENIUS, s. (Demon) भूतः, असुरः, दैत्यः, दानवः, प्रेतः, पिशाचः; 'evil genius,' दुर्दैवं, 'good genius,' सुदैवं, शुभदैवं.

GENTEEL, a. सभ्यः -भ्या -भ्यं, सभ्याचारी -रिणी -रि (न्), आर्य्यः -र्य्या -र्य्यं, आर्य्यव्यवहारः -रा -रं, आर्य्यवृत्तः -त्ता -त्तं, सद्वृत्तः -त्ता -त्तं, सुजनः -ना -नं, साधुवृत्तः -त्ता -त्तं, साधुव्यवहारः -रा -रं, सुशीलः -ला -लं, अग्राम्यः -म्या -म्यं, शिष्टाचारी -रिणी -रि (न्), महानुभावः -वा -वं.—(Elegant) विनीतः -ता -तं, चारुः -र्वी -रु, ललितः -ता -तं.

GENTEELLY, adv. सभ्यवत्, सुशीलवत्, आर्य्यवत्, सुजनवत्, सभ्याचारानुसारेण.

GENTEELNESS, s. सभ्यता, आर्य्यत्वं, सभ्याचारत्वं, आर्य्यवृत्तत्वं, सुशीलता, शिष्टाचारत्वं, सौजन्यं, सुजनता, साधुता, विनीतत्वं.

GENTIAN, s. (Plant) किराततः, किराततिक्तः, अनार्य्यतिक्तः, चिरातिक्तः, चिरतिक्तः, काण्डतिक्तकः, कैरातं, भूनिम्बः, भूतीकः.

GENTILE, s. अन्यदेशीयः, भिन्नदेशीयः, भिन्नदेशीयलोकः, अन्यदेशीयलोकः, देवतार्च्चकः, देवताभ्यर्च्चकः, देवार्च्चकः.—(Kindred) गोत्रजः; 'in grammar,' ज्ञातिवाचकः.

GENTILE, a. अन्यदेशीयः -या -यं, भिन्नदेशीयः -या -यं, जातीयः -या -यं.

GENTILISM, s. देवार्च्चकत्वं, देवतार्च्चनं -ना, देवताभ्यर्च्चनं, भिन्नदेशीयता.

GENTILITIAL, a. कौलिकः -की -कं, कुलजः -जा -जं, वांशिकः -की -कं, वंश्यः -श्या -श्यं, जातीयः -या -यं, दैशिकः -की -कं.

GENTILITY, s. (Politeness of manners) सभ्यता, सभ्याचारत्वं, सुशीलता, शिष्टाचारत्वं, आर्य्यत्वं, आर्य्यवृत्तत्वं, सौजन्यं, सुजनता, साधुवृत्तत्वं, सुविनीतता, महानुभावता.—(Good birth) कुलीनता, महाकुलत्वं, वंशविशुद्धता, कुलोत्कर्षः.

GENTLE, a. (Well-born) कुलीनः -ना -नं, सत्कुलीनः -ना -नं, महाकुलः

ला लं महाकलप्रसूत ता त साधज' मा मं साधवग्रज' जा जं साध्यवंशभ' जा जं सजन्मा ना न्म न a nad f ge b कुलकन्यका M d f b nd मृ ह्वी दु मृदुल ला लं मन्द' न्दा न्दं कोमल' ला लं सौम्य' म्या म्यी म्यं स्निग्ध ग्धा ग्धं, सुकुमार: -रा -री -रं, मसृण: -णा -णं, अनुग्र: -ग्रा -ग्रं, अकर्कश: -शा -शं, अपरुष: -षा -षं, अप्रगल्भ: -ल्भा -ल्भं. अखर: -रा -रं, असाहसिक: -की -कं, सुकर: -रा -री -रं. 'of a gentle disposition,' मृदुभाव: -वा -वं, मृदुस्वभाव: -वा -वं.—(Quiet, tame) शान्त: -न्ता -न्तं. उपशान्त: -न्ता -न्तं, शमी -मिनी -मि (न्), दान्त: -न्ता -न्तं; 'a gentle breeze,' मन्दानिल:, मृदुवात:, 'a gentle laugh,' मन्दहास्यं, मन्दस्मितं, ईषद्धास:, gentle remedy,' सौम्योपचार:, सामोपचार:. 'by gentle means,' साम्ना; 'gentle speech,' प्रियवाक्यं, प्रियोक्तिः.

GENTLE, *s.* (Maggot) कृमिः ., मली *m.* (न्), कोषकारी *m.* (न्).

GENTLEFOLK, *s.* आर्य्यलोका: *m. pl.*, साधुजना: *m. pl.*, आर्य्यमिश्रा: *m. pl.*, कुलीनलोका:.

GENTLEMAN, *s.* आर्य्य:, आर्य्यजन:, आर्य्यमिश्र:, साधु: *m.*, साधुजन:, महाशय:, महानुभाव:, कुलीन:, कुलीनजन:, सत्कुलीन:, सुजन:, सुजन्मा *m.* (न्), सज्जन:, सज्जाति: *m.*, महाजन:, सत्कुलजात:, सुविनीत:. श्री prefixed.

GENTLEMAN-COMMONER, *s.* राजविद्यालये अन्तेवासिनां मध्यात् प्रथमपदस्थ:.

GENTLEMANLIKE, GENTLEMANLY, *a.* आर्य्यव्यवहारानुसारी -रिणी -रि (न्), सभ्याचारानुसारी &c., सभ्य: -भ्या -भ्यं. आर्य्यवृत्त: -त्ता -त्तं, सुशील: -ला -लं, सुविनीत: -ता -तं, शिष्टाचारयोग्य: -ग्या -ग्यं, 'gentlemanly deportment,' आर्य्यवृत्तिः *f.*, सौजन्यं.

GENTLEMANLINESS, *s.* आर्य्यत्वं, सुशीलता, सौजन्यं, सुविनीतता.

GENTLENESS, *s.* मृदुता, म्रदिमा *m.* (न्), मार्द्दवं, मन्दता, कोमलता, सौम्यता त्वं, स्निग्धता, सौकुमार्य्यं, सुकुमारता, अनुग्रता, अकार्कश्यं, अकर्कशत्वं, अपरुषता, अप्रागल्भ्यं, अप्रगल्भता, असाहसं, 'of disposition,' भावमृदुता.

GENTLEWOMAN, *s.* आर्य्या, कुलीना स्त्री, सुशीला स्त्री, सुविनीता स्त्री.

GENTLY, *adv.* शनैस्, शनैः शनैस्, शनकैस्, मन्दं मन्दं, मृदु, अनुग्रं, अकर्कशं, अपरुषं, अचण्डं, साहसं विना.

GENTRY, *s.* आर्य्यलोका: *m. pl.*, आर्य्या: *m. pl.*, साधुलोका: *m. pl.*, कुलीनलोका: *m. pl.*, कुलीनवर्ग:, सुजनवर्ग:, सुजनता, सौजन्यं.

GENUFLEXION, *s.* पूजार्थं जानुभ्यां नतिः *f.* or आनतिः *f.*, जानुनतिः *f.*

GENUINE, *a.* सत्य: -त्या -त्यं, प्रकृत: -ता -तं, वास्तव: -वी -वं -विक: -की -कं, अकल्पित: -ता -तं, अकृत्रिम: -मा -मं, अकपट: -टा -टं, निष्कपट: टा -टं, निर्व्याज: -जा -जं, निर्व्यलीक: -का -कं, यथार्थ: -र्था -र्थं, सार: -रा -रं.

GENUINELY, *adv.* सत्यं, निष्कपटं, कपटं विना, निर्व्याजं, निर्व्यलीकं, यथार्थं.

GENUINENESS, *s.* सत्यता, प्रकृतत्वं, अकृत्रिमता, अकल्पितत्वं, याथार्थ्यं, यथार्थता, निर्व्यलीकता, निर्व्याजत्वं, वास्तविकता, सारता.

GENUS, *s* (In logic) पर —(A class) जातिः *f.*, गण:, वर्ग:, जातिमात्रं, गोत्रं.

GEOGRAPHER, *s* भूपृष्ठविद्याज्ञ:, भूगोलविद्याज्ञ:, भूगोलशास्त्रज्ञ:, भूपृष्ठलेखक:, भूगोलशास्त्री *m.* (न्), भूगोलस्य यत् किञ्चिद् देशसमुद्रनगरादि विद्यते तदाकारनामादिलेखक:, भूपृष्ठस्य देशसमुद्रपर्व्वतनद्यादिव्याख्याता *m.* (तृ), भूपृष्ठविवरणकृत्.

GEOGRAPHICAL, *a.* भूगोलविषय: -या -यं, भूपृष्ठविषयक: -का -कं, भूगोलशास्त्रविषय: -या -यं, भूपृष्ठसम्बन्धी -न्धिनी -न्धि (न्), भूगोलशास्त्रीय: -या -यं.

GEOGRAPHICALLY, *adv.* भूगोलशास्त्रानुसारेण, भूगोलशास्त्रवत्.

GEOGRAPHY, *s.* भूपृष्ठविद्या, भूगोलविद्या, भूपृष्ठविषयकं ज्ञानं, भूगोलस्य यत् किञ्चिद् देशसमुद्रनगरादि विद्यते तदाकारनामादिव्याख्या, भूपृष्ठस्य देशसमुद्रपर्व्वतनद्यादीनां ज्ञानं or विवरणं. भूगोलशास्त्रं.

GEOLOGICAL, *a.* या यं न्धिनी न्धि (न्) का कं

GEOLOGIST, *s.* पार्थिवांशविद्याज्ञ: पृथिवीविद्याज्ञ: *m.* (तृ) विवरणकृत् *m.*

GEOLOGY, *s.* पार्थिवांशानां ज्ञानं or विद्या. पार्थिवांशविषयं ज्ञानं, पृथिवीविद्या, पार्थिवांशानां प्राचीनेतिहास:, पृथिवीसंस्थानविद्या. मृत्तिकासंस्थानविद्या, मृत्तिकाभावगुणादिविवरणविद्या.

GEOMETRAL, GEOMETRIC, GEOMETRICAL, *a.* क्षैत्र: -त्री -त्रं, क्षेत्रपरिमाणविषय: -या -यं, क्षेत्रगत: -ता -तं. क्षेत्रविद्यानुसारी -रिणी -रि (न्) रेखागणितसम्बन्धी -न्धिनी -न्धि (न्); 'geometrical proof,' क्षेत्रगतोपपत्तिः *f.*

GEOMETRICALLY, *adv.* क्षेत्रविद्यानुसारेण, रेखागणितशास्त्रवत् or -तस्

GEOMETRICIAN, *s.* क्षेत्रविद्याज्ञ:, रेखागणितविद् *m.*, क्षेत्रज्ञ:, रेखागणितशास्त्रदर्शी *m.* (न्), क्षेत्रपरिमाणविद्याध्यापक् *m.* (तृ).

GEOMETRY, *s.* क्षैत्रं, क्षेत्रं, क्षेत्रविद्या, क्षेत्रपरिमाणविद्या, क्षेत्रपरिमाणविषया विद्या, रेखागणितं, रेखागणितशास्त्रं, रेखागणनाविद्या; 'proof by geometry,' क्षेत्रगतोपपत्तिः *f.*

GEORGIC, *s.* क्षेत्रादिविषयं गीतं, कृषिविद्याविषयकं काव्यं.

GERANIUM, *s.* बकमुखाकारबीजकोश: सुपुष्पवान् ओषधिभेद:.

GERFALCON, *s.* श्येनभेद:, कपोतारिः *m.*, घातिपक्षी *m.* (न्).

GERM, GERMEN, GERMIN, *s.* (The embryo of fruit, a bud) पल्लव: -वं, अङ्कुर:, अभिनवोद्भिद् *m.*, कालकं, कारक:, कोषिका, कुन्दुक, 'of leaves,' मातिः *f.*—(Origin, that from which any thing springs) बीजं, योनिः *m. f.*, आदिः *m.*, आरम्भ:, गर्भ:, मूलं.

GERMAN, *a.* (Related) सम्बन्धी -न्धिनी -न्धि (न्), सम्पर्की -र्किणी -र्कि (न्), 'cousin german,' पितृव्यपुत्र: -त्री, मातुलपुत्र: -त्री —(Belonging to Germany) जर्म्मणिदेशसम्बन्धी &c., जर्म्मणिदेशज: -जा -जं. 'language,' जर्म्मणिदेशभाषा.

GERMANDER, *s.* अनेकौषधीनां सामान्यनाम *n.* (न्), ओषधिगणसंज्ञा

GERMANISM, *s.* जर्म्मणिदेशभाषासम्बन्धी सम्प्रदाय:.

To GERMINATE, *v. n.* स्फुट् (c. 6. स्फुटति -टितुं), मुल् (c. 1. मुलति -लितुं), अङ्कुर् (nom. अङ्कुरयति -यितुं), विकस् (c. 1. -कसति -सितुं), उद्भिद् in pass. (-भिद्यते), प्रोद्भिद्, प्ररुह् (c. 1. -रोहति -रोढुं), वृध् (c. 1 वर्धते -र्धितुं).

GERMINATING, *part.* उद्भिज्ज: -ज्जा -ज्जं, उद्भिद् *m. f. n.*, उद्भिद: -दा -दं, प्ररोही -हिणी -हि (न्), अङ्कुरित: -ता -तं, मुलवान् -वती -वत्, प्रस्फुट: -टा -टं, स्फुटन् -टन्ती -टत् (त्).

GERMINATION, *s.* स्फुटनं, स्फुटता, उद्भेद:, प्रोद्भेद:, प्ररोह:, अङ्कुरणं

GERUND, *s.* लाटीनभाषाव्याकरणे क्रियावाचक: शब्द:.

GESTATION, *s.* गर्भधारणं. गर्भपोषणं, गर्भवहनं, गर्भिणीभाव:

To GESTICULATE, *v. n.* अङ्गानि विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), हस्तादि विक्षिप् or सञ्चल् in caus. (-चालयति -यितुं), अङ्गविक्षेपं कृ, इङ्ग् (c.1.इङ्गति-ङ्गितुं), नट् (c.10. नाटयति-यितुं), अभिनयं कृ, आङ्गिककर्म्म कृ

GESTICULATION, *s.* अङ्गविक्षेप: -पणं, हस्तादिविक्षेप:, अङ्गहार:, इङ्गितं इङ्गितकरणं, अङ्गसञ्चालनं, हस्तादिसञ्चालनं, सङ्केतकरणं, आङ्गी, सूचा -चना, भावकरणं, आङ्गिककर्म्म *n.* (न्).

GESTICULATOR, *s.* अङ्गविक्षेपक:, हस्तादिविक्षेपक:, अङ्गसञ्चालक:, इङ्गितकारी *m.* (न्), सङ्केतकारी *m.* (न्).

GESTURE, *s.* इङ्गितं, अङ्गविक्षेप:, हस्तादिविक्षेप:, सङ्केत:, अङ्गहार: -रिः *m* चेष्टा, भाव:, इङ्ग:, अभिनय:, अभिनीतिः *f.*, सूचना.

To GESTURE, *v. a.* साङ्गविक्षेपं कृ, सहस्तविक्षेपं कृ. साभिनयं कृ.

To GET, *v. a.* (Obtain) आप् (c. 5 आप्नोति, आप्तुं), प्राप्, अवाप्

सम्प्राप्, समवाप्, लभ् (c. 1. लभते, लब्धुं), उपलभ्, अर्ज् (c. 10. अर्जयति -यितुं), उपार्ज्, आसद् (c. 10. -सादयति -यितुं), समासद्, अधिगम् (c. 1. -गच्छति -गन्तुं), गम्, प्रतिपद् (c. 4. -पद्यते -पत्तुं), आपद्, अभिपद्, आविश् (c. 6. -विशति -वेष्टुं), इ (c. 2. एति, एतुं), अश् (c. 5. अश्नुते, अशितुं), उपाश्, समश्.—(Have) धा (c. 3. दधाति, धत्ते, धातुं), धृ in caus. (धारयति -यितुं), भृ (c. 3. बिभर्त्ति, भर्तुं), आप.—(Beget) जन् (c. 10. जनयति -यितुं).—(Learn) शिक्ष् (c. 1. शिक्षते -क्षितुं), अधी (c. 2. अधीते, अध्येतुं rt. इ), अधिगम्.—(Induce, persuade) अनुनी (c. 1. -नयति -नेतुं), प्रोत्सह् (c. 10. -साहयति -यितुं), or expressed by the causal; as, 'he got him to return,' निवर्त्तयामास.—(Earn) उपार्ज्, लभ्.—(Receive, take) आदा (c. 3. -दत्ते -दातुं), ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), उपलभ्.—(Procure, get ready) कॢप् (c. 10. कल्पयति -यितुं), परिकॢप्, सज्जीकृ, उत्पद् (c. 10. -पादयति -यितुं).—(Get together) समानी (c. 1. -नयति -नेतुं), सञ्चि (c. 5. -चिनोति -चेतुं), समादा, सङ्ग्रह, एकीकृ, एकत्र कृ.—(Get over, get through, surmount) आरुह् (c. 1. -रोहति -रोढुं), अधिरुह्, अतिक्रम् (c. 1. -क्रामति -क्रमितुं), तीर् (c. 10. तीरयति -यितुं), पार् (c. 10. पारयति -यितुं), तॄ (c. 1. तरति -रितुं -रीतुं), निस्तॄ; 'get over a difficulty,' दुःखम् आरुह्, दुःखपारं गम् (c. 1. गच्छति, गन्तुं), दुःखस्यान्तं गम्.—(Get up, prepare) उपस्कृ, संस्कृ, पुरस्कृ, विरच् (c. 10. -रचयति -यितुं), सज्जीकृ.—(Get into debt) ऋणी कृ, ऋणग्रस्तः -स्ता -स्तं भू, ऋणवान् -वती -वत् भू.

To GET, v. n. (Arrive at) आगम् (c. 1. -गच्छति -गन्तुं), उपगम्, अभिगम्, प्राप् (c. 5. -आप्नोति -आप्तुं), अवाप्, आया (c. 2. -याति -तुं), उपस्था (c. 1. -तिष्ठति -स्थातुं).—(Get away) अपगम्, अपया, अपे (c. 2. अपैति -तुं, rt. इ), अपसृ (c. 1. -सरति -सर्त्तुं), अपक्रम् (c. 1. -क्रामति -क्रमितुं), चल्, (c. 1. चलति -लितुं), प्रस्था.—(Get before) अग्रे or पूर्व्वं or पूर्व्वम् आगम् or प्राप्.—(Get clear) मुच् in pass. (मुच्यते).—(Get down) अवरुह् (c. 1. -रोहति -रोढुं), अवतॄ (c. 1. -तरति -रितुं -रीतुं), अधो या or गम्.—(Get in) विश् (c. 6. विशति, वेष्टुं), प्रविश्, निविश्, आविश्.—(Get off, escape) पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, निःसृ, अपक्रम्, निर्गम्.—(Get off, alight) अवतॄ, अवरुह्.—(Get out) अपगम्, अपसृ, अपे.—(Get up) उत्था for उत्स्था.—(Get quit of) मुच् in pass.—(Get on) प्रगम्, प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रसृ, प्रया, प्रचल्.—(Get drunk) मत्तः -त्ता -त्तं भू, उन्मत्तीभू; 'get out with you,' अपसर, अपेहि, अपेहि.

GETTER, s. प्रापकः, अवाप्ता m. (प्तृ), लब्धा m. (ब्धृ), अर्जकः, उपार्जकः, अधिगन्ता m. (न्तृ), लाभकृत् m., आदाता m. (तृ), ग्राहकः, जनकः, उत्पादकः.

GETTING, s. लाभः, लब्धिः f., आप्तिः f., प्राप्तिः f., प्रापणं, अवाप्तिः f., सम्प्राप्तिः f., अर्जनं, उपार्जनं, आसादनं, अधिगमः, आगमः, ग्रहणं.

GEWGAW, s. अल्पमूल्यकम् आभरणं, बालार्थं क्रीडाद्रव्यं, क्रीडनकं, कन्दुकं, खेलाद्रव्यं, कदर्थद्रव्यं.

GHASTFULLY, adv. पिशाचवत्, भूतवत्, प्रेतवत्, दारुणं, भयानकं, घोरं.

GHASTLINESS, s. रूपदारुण्यं, वदनघोरता, भुखरौद्रता, भूतसरूपता, भौतत्वं, करालत्वं, विकटत्वं.

GHASTLY, a. (Like a ghost) भूतसरूपः -पी -पं, प्रेतसरूपः -पी -पं, भौतिकः -की -कं, पैशाचिकः -की -कं, शवरूपी -पी -पि, प्रेतरूपी -पी -पि.—(Frightful) घोररूपः -पी -पं, घोराकृतिः -तिः -ति, दारुणः -णा -णं, भयानकः -का -कं, रौद्रः -द्री -द्रं, भीमदर्शनः -ना -नं, उग्ररूपः -पा -पं, करालमुखः -खी -खं.

GHAUT, s. (Landing-place) घट्टः -ट्टी, सज्जनं, गुल्मः.—(Malaya range of mountains) मलयः, मलयाचलः, मलयपर्व्वतः, मलयाद्रिः m., दक्षिणाचलः, दक्षिणपर्व्वतः.

GHEE, s. घृतं, हविस् n., सर्पिस् n., हव्यं, हवनीयं, हविष्यं, आज्यं, तनूनपं, तृप्रं.

GHOST, s. (Soul) आत्मा m. (न्), प्राणः m. (न्).—(Dead man's spirit) प्रेतः, प्रेतनरः, परेतः, नारकः, नरकवासी m. (न्), नरकामयः.—(Goblin) वेतालः, रात्रिचरः, निशाचरः, निशाटः, भूतः -तं, श्मशानवासी m. (न्), राक्षसः; 'to give up the ghost,' प्राणत्यागं कृ, ईश्वरहस्ते जीवनं or प्राणं सृज् in caus. (-सर्जयति -यितुं).

GHOSTLIKE, s. प्रेतसरूपः -पा -पी -पं, भूतसरूपः -पा -पी -पं.

GHOSTLINESS, s. प्रेतत्वं, भूतत्वं, परेतत्वं, आत्मता, पारमार्थिकत्वं.

GHOSTLY, a. (Spiritual) आत्मिकः -की -कं, आत्मविषयः -या -यं, पारमार्थिकः -की -कं, अशारीरिकः -की -कं, पारत्रिकः -की -कं.—(Pertaining to ghosts) भौतिकः -की -कं, प्रेतसम्बन्धी -न्धिनी -न्धि (न्).

GIANT, s. (A man of extraordinary size) बृहत्कायः, बृहच्छरीरः, विकटशरीरः, भीमविग्रहः, प्रकाण्डशरीरः, अखर्व्वः.—(A titan) दैत्यः, असुरः, राक्षसः, दानवः, दैतेयः, रक्षस् n., इन्द्रारिः m., सुरद्विट् m. (ष्), दितिसुतः, दनुजः, यातु n., यातुधानः, पूर्व्वदेवः, शुक्रशिष्यः, कौणपः, नैर्ऋतः, निकषात्मजः, क्रव्याद् m., निशाचरः.

GIANTESS, s. बृहत्काया, बृहच्छरीरा, विकटशरीरा स्त्री, राक्षसी.

GIANT-LIKE, GIANTLY, a. बृहत्कायः -या -यं, बृहच्छरीरः -रा -रं.

To GIBBER, v. n. जल्प् (c. 1. जल्पति -ल्पितुं), अस्पष्टं वद् (c. 1. वदति दितुं).

GIBBERISH, s. अनर्थकवाक्यं, असम्बद्धवाक्यं, वृथाकथा, अपार्थकवचनं, जल्पितं; 'one who talks it' असम्बद्धप्रलापी m. (न्).

GIBBET, s. उद्बन्धनकाष्ठं, उद्बन्धनवृक्षः, वधस्थानं, घातस्थानं.

To GIBBET, v. a. रज्जुपाशेन उद्बन्ध् (c. 9. -बध्नाति -बन्द्धुं), उद्बन्धनं कृ.

GIBBOSITY, s. कुब्जता, न्युब्जता, कूर्म्मपृष्ठाकारत्वं, विम्बाकारता, आभोगः, अवग्रहमण्डलत्वं.

GIBBOUS, a. (Convex, protuberant) न्युब्जः -ब्जा -ब्जं, विम्बाकारः -रा -रं, कूर्म्मपृष्ठाकारः -रा -रं, गण्डाकारः -रा -रं, आभोगी -गिनी -गि (न्); 'as the moon,' असम्पूर्णमण्डलः -ला -लं.—(Hump-backed) कुब्जः -ब्जा -ब्जं, गडुरः -रा -रं.

GIBBOUSNESS, s. न्युब्जता, कूर्म्मपृष्ठाकारता, आभोगता. See GIBBOSITY.

GIB-CAT, s. जीर्णमार्जारः, अतिवृद्धो विडालः.

To GIBE, v. a. and n. क्षिप् (c. 6. क्षिपति, क्षेप्तुं), अवक्षिप्, परिक्षिप्, अवहस् (c. 1. -हसति -सितुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), तिरस्कृ, मुखरीकृ.

GIBE, s. क्षेपः, अवक्षेपः, तिरस्कारः, अवहासः, दुर्व्वाक्यं, दुरुक्तं, कटुवाक्यं.

GIBER, s. क्षेपकः, अवक्षेपकः, दुर्मुखः, मुखरः, दुर्वक्ता m. (क्तृ).

GIBLETS, s. pl. हंसादेः यत् पादपक्षयकृदादि प्राक्शूलारोपणाद् अवछिद्य अभिभूय पृथक् पच्यते, हंसस्य पचनयोग्य हृद्यकृदन्त्रादि, हंसखण्डकाः m. pl.

GIDDILY, adv. भ्रामररोगग्रस्तवत्, सभ्रामरं, चपलं, सलोलौत्स्यात्.

GIDDINESS, s. (Of the head, &c.) भ्रमरं, भ्रामरं, भ्रमिः f., भ्रमः, विभ्रमः, विभ्रान्तिः f., घूर्णिः f., घूर्णनं, चक्षुरादिचापल्यं-चापलं, चक्षुरादिविभ्रान्तिः f., प्रमादः.—(Of character) चपलता, चापल्यं, चञ्चलत्वं, चाञ्चल्यं, चलचित्तता, अस्थिरता, अस्थैर्य्यं, लोलता, अनवस्थितिः f., अधीरत्वं, लौल्यं, मनोलौल्यं, विभ्रान्तिः f., विभ्रान्तशीलता, तरलता, प्रमत्तता.

GIDDY, a. (In the head) भ्रामरी -रिणी -रि (न्), भ्रमी -मिणी -मि (न्), घूर्णरोगी -गिणी -गि (न्), भ्रामररोगी &c., विभ्रान्तः -न्ता -न्तं.—(Causing giddiness) भ्रमकरः -री -रं.—(In character) चपलः -ला -लं, चञ्चलः -ला -लं, विभ्रान्तशीलः -ला -लं, अस्थिरः -रा -रं, अनवस्थः -स्था -स्थं, अनवस्थितः -ता -तं, अधीरः -रा -रं, चपलबुद्धिः -द्धिः -द्धि, चपलात्मकः -का -कं, चलचित्तः -त्ता -त्तं, लोलः -ला -लं, लोलमनाः

ता न म प्रमद्य' स्त्रा र्थं प्रमादी दिनी दि म E te
प्रद्वत ता त मस स्त्रा र्थ w h p ऐश्वर्यमस्त्र' स्त्रा र्थं

G FT दान प्रदानं दत्तं प्रदेय सम्प्रदान दाय उपहार उपायन
वितरणं त्याग उत्सर्जनं विसर्ग विसर्जन विश्राणन संहति *f*
उपग्राह्यं, उपहीकनं, उपदा -दानकं, प्रदा, दादः, दा, दं, विश्राणितं,
प्रतिपादनं, निर्वपणं, स्पर्शन, प्राहेणकं, प्रदेशनं, अपवर्जनं, उपचारः,
प्रीतिदानं, प्राभृत, 'a special gift,' प्रदायः, सुदायः, हरणं, 'nuptial
gift,' यौतकं; 'desirable gift,' प्रवारणं, प्रहारणं; 'gift to deceased ancestors,' पितृदानं.—(Endowment) गुणः, शक्तिः *f.*

GIFTED, *p. p.* or *a.* (Endowed) सम्पन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं, युक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, उपेतः -ता -तं, अन्वितः -ता -तं, शीलितः -ता -तं.
—(With talents) गुणी -णिनी -णि (न्), गुणवान् -वती -वत् (त्), दृष्टगुणसम्पन्नः -न्ना -न्नं, सद्गुणोपेतः -ता -तं.

GIG, *s.* (Any thing that whirls round in play) भ्रमरं, भ्रमरक्रीडनकं.
—(A light carriage) द्विचक्रयुक्तं लघुयानं, लघुरथः.—(Boat) उपनौका, लघुनौका, क्षुद्रनौका.

GIGANTIC, *a.* बृहत्कायः -या -यं, बृहच्छरीरः -रा -रं -री -रिणी -रि (न्), अतिविग्रहः -हा -हं, अतिकायः -या -यं, विकटशरीरः -रा -रं, अतिमहान् -ती -हत् (त्), अतिबृहन् -हती -हत् (त्), राक्षसपरिमाणः -णा -णं, दैत्यपरिमाणः -णा -णं.

GIGGLE, *s.* असम्बद्धपरिहासः, अनर्थकहासः, कुहसितं, मूर्खहसितं.

To GIGGLE, *v. n.* असम्बद्धपरिहासं कृ, अनर्थकहासं कृ, मूर्खवत् or असम्बद्धं or कु हस् (c. 1. हसति -सितुं), कक्ख् (c. 1. कक्खति -क्खितुं), खख् (c. 1. खखति -खितुं).

GIGGLER, *s.* असम्बद्धपरिहासशीलः, निरर्थकहासकारी *m.* (न्).

To GILD, *v. a.* (Overlay with gold) सुवर्ण (nom. सुवर्णयति -यितुं), स्वर्णपत्रपिनद्धं -द्धां -द्धं कृ, सुवर्णीयितं -तां -तं कृ.—(Illuminate) रञ्ज् (c. 10. रञ्जयति -यितुं), द्युत् (c. 10. द्योतयति -यितुं), विराज् (c. 10. राजयति -यितुं), प्रकाश् (c. 10. -काशयति -यितुं).

GILDED, *p. p.* सुवर्णितः -ता -तं, रञ्जितः -ता -तं, स्वर्णपत्रपिनद्धः -द्धा -द्धं, स्वर्णमण्डितः -ता -तं, स्वर्णपत्रवर्णितः -ता -तं or -प्रतिबद्धः -द्धा -द्धं, रागतान्वितः -ता -तं, रञ्जितः -ता -तं, राजितः -ता -तं, प्रद्योतितः -ता -तं.

GILDER, *s.* स्वर्णपत्राद्विना रञ्जकः, स्वर्णपत्रपिनद्धकारी *m.* (न्)

GILDING, *s.* स्वर्णरञ्जनं, सुवर्णीकरणं, स्वर्णमण्डनं; 'of the leaves of a book,' पत्ररञ्जनं.

GILL, *s.* (Organ of respiration in fishes) मत्स्यानां श्वासेन्द्रियं, मत्स्यानां श्वासप्रश्वासार्थं मस्तकरन्ध्रं or शिरोरन्ध्रद्वयं.—(Of a fowl) कुक्कुटस्य मुखकम्बलः or मुखस्याधःस्थं लोलमांसं.—(Flesh on the lower part of the cheek) अधोगण्डमांसं, अधोगण्डः, अधःकपोलः, चिबुकमांसं.—(Measure) द्रवद्रव्याणां परिमाणविशेषः.

GILLY-FLOWER, *s.* कलेऔषधीनां सामान्यनाम *n.* (न्), औषधिगणसंज्ञा.

GILT, *p. p.* or *a.* सुवर्णितः -ता -तं, रञ्जितः -ता -तं, रागतान्वितः -ता -तं. *See* GILDED.

GILT, *s.* सुवर्णरञ्जनं, स्वर्णपत्रं, 'silver-gilt,' विमलं.

GILT-HEAD, *s.* (Fish) मद्गुकः, शकुलगण्डः, शकुलार्भकः, शालः, कुम्भिलः.

GIMCRACK, *s.* निरर्थकयन्त्रं, क्रीडायन्त्रं, क्रीडाद्रव्यं, क्रीडनकं.

GIMLET, *s.* वेधनिका, आस्फोटनी, तास्फोटनी, आविधः.

GIMP, *s.* कौशिकसूत्रनिर्मितः सूक्ष्मचेलकः.

GIN, *s.* (Spirit) शुण्डा, सुरा -री, वारुणी, शीधुः *m.* -धु *n.*, मदिरा, हाला, आसवं; 'gin-drinker,' सुरापः -पी, सुरापायी *m.* -यिनी; 'gin-drinking,' सुरापानं; 'gin-shop,' शुण्डापानं, मद्यविक्रयशाला.

—(S p पत्रा' उन्माथ' जाल कूटयन्त्रं वागुरा पाशबन्धं
G आर्द्रकं शृङ्गवेरं कटुभद्रं गन्धमूलं अपाकशाक d
n शुण्ठी शुण्ठि *f* खदी रुच्य विश्वभेषज विश्व महौषध नागर
G आर्द्रकपान आर्द्रकरस आर्द्रकपानीयं आर्द्रकसुरा

GINGER-BREAD, *s.* आर्द्रकपिष्टकः, आर्द्रकपूपः, आर्द्रकमयं मिष्टान्नं.

GINGER-WINE, *s.* आर्द्रकमद्य, आर्द्रकमदिरा, आर्द्रकसुरा

GINGERLY, *adv.* सावधानं, अवधानेन, शनैः शनैस्, असहसा

GINGHAM, *s.* रेखाचित्रितं कार्पासाम्बरं or तूलावस्त्रं.

GINGIVAL, *a.* दन्तमांससम्बन्धी -न्धिनी -न्धि (न्), दन्तशिरासम्बन्धी &c.

To GINGLE, *v. n.* शिञ्ज् (c. 2. शिङ्क्ते, c. 1. शिञ्जते -ञ्जितुं), विशिञ्ज्, क्वण् (c. 1. क्वणति -णितुं), किङ्किण (nom. किङ्किणायते), झञ्झनं कृ.

GINGLE, GINGLING, *s.* शिञ्जः -ञ्जा, शिञ्जितं, आशिञ्जितं, क्वणितं, किङ्किणिशब्दः, झञ्झनं, झनत्कारः.

GINGLING, *part.* क्वणन् -णन्ती -णत् (त्), शिञ्जी -ञ्जिनी -ञ्जि (न्)

GINNET, *s.* अश्वकः. *See* JENNET.

GIPSY, *s.* इतस्ततोभ्रमणशीलो दैवकथनाद्युपजीवी चक्रचरः, अयनिचरः -रा *f.*, धूर्तः -र्ता *f.*, काकचरित्रः -त्रा.

GIRAFFE, *s.* तरक्षुरूपेण चित्रित उष्ट्रजातीयो दीर्घग्रीवो जन्तुभेदः

To GIRD, *v. a.* (Bind round) बन्ध् (c. 9. बध्नाति, बन्धुं), परिबन्ध्.—(Bind on) आबन्ध्, पिनह् (c. 4. -नह्यति -नद्धुं), अवनह्, सन्नह्, पिनद्धं -द्धां -द्धं कृ, आकष् (c. 1. -कषते -षितुं), 'gird the loins कटिं बन्ध्.—(Encircle, invest) परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं), परिधा (c. 3. -दधाति -धत्ते -धातुं), परिवृ (c. 5. -वृणोति -वरितुं -रीतुं)

To GIRD, *v. n.* (Gibe) क्षिप् (c. 6. क्षिपति, क्षेप्तुं), अवक्षिप्, अवहस् (c. 1. -हसति -सितुं).

GIRD, *s.* आकर्षः, शूल, अपतानकः, अपतन्त्रकः, आक्षेपकः, वेगाघात

GIRDED, *p. p.* बद्धः -द्धा -द्धं, पिनद्धः -द्धा -द्धं, आनद्धः -द्धा -द्धं, अवनद्धः -द्धा -द्धं, आबद्धः -द्धा -द्धं, परिवेष्टितः -ता -तं, परिहितः -ता -तं.

GIRDER, *s.* गृहतले बृहत्काष्ठं or स्तम्भकाष्ठं or महादारु *m.*

GIRDLE, *s.* (Belt) मेखला, रशना, कटिसूत्रं, कटिबन्धनं -नी, काञ्ची कलापः, कक्षा, कक्ष्या, परिकरः, सारसं -सनं, वरत्रं, सप्तकी, शृङ्खरी रशना, शृङ्खला.—(Inclosure, circumference) वेष्टनं, परिवेष्टनं आवेष्टनं, मण्डलं, वलयः, चक्रवालं.—(Zodiac) राशिचक्रं.

To GIRDLE, *v. a.* मेखलया बन्ध् (c. 9. बध्नाति, बन्धुं), वेष्ट् (c. 1. वेष्टते -ष्टितुं, c. 10. वेष्टयति -यितुं), परिवेष्ट्, परिवृ (c. 5. -वृणोति -वरितुं -रीतुं)

GIRDLER, *s.* मेखलाकारः, रसनाकर्त्ता *m.* (र्त्तृ), कटिसूत्रकारी *m.* (न्)

GIRL, *s.* कन्या, कुमारी, तरुणी, बाला, बालिका, पुत्री, दारिका, अनाग्नकिा, नग्निका, गौरी, वासू *f.*

GIRLHOOD, *s.* कन्यात्वं, कुमारीत्वं, तरुणीत्वं, कौमार्यं, तारुण्यं

GIRLISH, *a.* कन्यायोग्यः -ग्या -ग्यं, कुमारीयोग्यः -ग्या -ग्यं.

GIRLISHLY, *adv.* कन्यावत्, कुमारीवत्, तरुणीवत्, कन्यारूपेण.

GIRT, *p. p.* बद्धः -द्धा -द्धं, पिनद्धः -द्धा -द्धं, वेष्टितः -ता -तं, परिवेष्टितः -ता -तं; 'girt with a falchion,' सन्नद्धनिस्त्रिंशः -शा -शं; 'sea-girt समुद्रमेखलः -ला -लं.

GIRTH, *s.* उदरत्राणं, अधोबन्धनं -नी, वरत्रा, वर्द्धी, वद्धी, नद्धी, चूषा कक्षा, कक्ष्या.

To GIRTH, *v. a.* वरत्रया बन्ध् (c. 9. बध्नाति, बन्धुं), उदरत्राणं पिनह् (c. 4. -नह्यति -नद्धुं)

GIST, *s.* अर्थः, मुख्यार्थः, परमार्थः, उत्तमार्थः, अग्रविषयः.

To GIVE, *v. a.* दा (c. 3. ददाति, दत्ते, दातुं), प्रदा, आदा, अभिदा, सम्प्रदा

निदा अनुदा सम्प्रदा प्रयम् पच्छति त दातुं प्रयम प्रयच्छ प्रतियम सम्प्रयम दद् ददा दितुं प्रतिप 0 पादयति पितुं उपपद ऋ a. सर्पयति पित सम निक्षिप 6 क्षिपति क्षेप्तुं वितृ तरति रितु रीतु, विश्रण् (0 श्राणयति पितु सृज् सृजति, स्रष्टु), विसृज् (c. 10. -सर्जयति -यितुं), ग्रह् in caus (ग्राहयति -यितुं), आहृ (c. 1 हरति -हर्तुं), उपक्रम्, सङ्क्रम् in caus. (-क्रामयति -यितुं), दिश् (c. 6. दिशति, देष्टुं).—(Give away) प्रदा, प्रयम्.—(Give back) प्रतिदा, प्रतिपद्, प्रत्यर्प (caus of ऋ with प्रति), निर्यत् (c 10. -यातयति -यितुं), प्रतिनिर्यत्, प्रतिरुह् in caus. (-रोपयति -यितुं).—(Give chase) अनुधाव् (c. 1. धावति -वितुं), अनुसृ (c. 1. -सरति -सर्तुं).—(Give forth) प्रकाश् (c 10. -काशयति -यितुं), ख्या in caus. (ख्यापयति -यितुं), निविद् (c. 10. -वेदयति -यितुं).—(Give the hand for support) करालम्बनं कृ.—(Give in) अनुदा, अनुज्ञा (c. 9. जानाति -ज्ञातुं), त्यज्.—(Give over) त्यज्, उत्सृज् (c. 6. सृजति -स्रष्टुं), विरम् (c. 1. -रमति -रन्तुं) with abl. c., निवृत् (c 1. वर्तते -र्तितुं) with abl c 'To give over a sick man,' असाध्य इति परिच्छिद्य रोगातुरं मुच् (c. 6. मुञ्चति, मोक्तुं).—(Give out) निविद्, प्रकाश्, विघुष् (c. 10 -घोषयति -यितुं); 'emit,' उत्सृज्, मुच्, निःसृ in caus (-सारयति -यितुं).—(Give up) त्यज्, परित्यज्, सन्त्यज्; हा (c. 3. जहाति, हातुं), विहा; उत्सृज्, विमुच्, उज्झ् (c. 6. उज्झति -झितुं), प्रोज्झ्, प्रत्यादिश्.—(Give one's self up to) आसञ्ज् in pass. (-सज्यते or -सज्जते), सेव् (c. 1. सेवते -वितुं), आसेव्, आसक्तः -क्ता -क्तं भू, निरतः -ता -तं भू.—(Give ground) अपक्रम् (c 1 -क्रामति -क्रमितुं), अवस्था (c 1. -तिष्ठते -स्थातुं), परावृत्, निवृत्.—(Give way) पन्थानं दा, त्यज्, अपसृ (c. 1. -सरति -सर्तुं); 'give way,' अवकाशं, पन्थानं त्यज्.—(Give in marriage) दा, प्रदा, उपादिश्; 'the girl is given in marriage to a husband,' कन्या वोढुः प्रदीयते —(Give thanks) धन्यवादं कृ, धन्यं वद् (c. 1. वदति -दितुं), कुशलं वद्.—(Give ear) कर्णं दा.—(Give power) शक्तिं दा, क्षमतां कृ, नियुज् (c. 7 -युनक्ति -योक्तुं).—(Give utterance) उदीर् (c. 10. ईरयति -यितुं), उच्चर् (c. 10. -चारयति -यितुं), उदाहृ.—(Give suck) धे in caus. (धापयति -यितुं), उपधे, पा in caus. (पाययति -यितुं).—(Give offence) रुष् in caus. (रोषयति -यितुं), विप्रियं कृ.

To GIVE, *v. n.* (Give way, sink) सद् (c 1. सीदति, सत्तुं), अवसद्.—(Relent, be mitigated) शम् (c. 4. शाम्यति, शमितुं), प्रशम्, शान्तिं or सान्त्वनं या (c 2. याति -तुं), शान्तीभू, शिथिलीभू.—(Recede) अपसृ (c. 1 -सरति -सर्तुं), निवृत् (c. 1. -वर्तते -र्तितुं), अपया.—(Cease) विरम् (c. 1 -रमति -रन्तुं), निवृत्, शम्.—(Give in to) अनुज्ञा (c. 9. -जानाति -ज्ञातुं), अनुमन् (c. 4. -मन्यते -मन्तुं).

GIVEN *p. p.* दत्तः -त्ता -त्तं, प्रदत्तः -त्ता -त्तं, प्रत्तः -त्ता -त्तं, नीतः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, निक्षिप्तः -प्ता -प्तं, प्रतिपादितः -ता -तं, उपपादितः -ता -तं, विश्राणितः -ता -तं, अर्पितः -ता -तं, समर्पितः -ता -तं, वितीर्णः -र्णा -र्णं, विसर्जितः -ता -तं, विसृष्टः -ष्टा -ष्टं, उपन्यस्तः -स्ता -स्तं, 'well given,' सुदत्तः -त्ता -त्तं; 'given and taken,' दत्तादत्तः -त्ता -त्तं, दत्तापहृतः -ता -तं.—(Given up) त्यक्तः -क्ता -क्तं, परित्यक्तः -क्ता -क्तं, उत्सृष्टः -ष्टा -ष्टं.—(Addicted to) आसक्तः -क्ता -क्तं, रतः -ता -तं, निरतः -ता -तं. 'given quantity,' दृश्यः

GIVER *s* दाता *m.* (तृ), प्रदाता, दायकः, दायी *m.* (न्), दानकर्त्ता *m.* (र्त्तृ), दाकः ददी *m.* (न्), प्रदः or दः in comp., त्यागी *m.* (न्); 'giver and receiver,' दातृग्राहकौ m. du., दातृप्रतिग्राहकौ m du.

GIVING *s.* दानं, प्रदानं, सम्प्रदानं, त्यागः, वितरणं, विसर्जनं.

G[illegible] कुक्कुटादीनां जठरं ० उदरं अन्तर्जठरं पक्वाशयः

GLA[illegible] *a* हैमः -मी -मं हिमजः -जा -जं हिमसंहतः -ता -तं

To G[illegible] *v. n.* हिमीभू हिमवत् संहतीभू शीतीभू

G[illegible] शीतीकरणं शीतीभावः हिमीकरणं हिमसंहतिः *f*

GLACIER, *s* हिमपर्वतोपत्यके सुचिरस्थायी हिमसंहतिः

GLACIS, *s.* दुर्गबहिर्भागे प्रवणभूमिः *f* or निम्नभूमिः or स्थानं क्रमशो निम्नं

GLAD, *a.* हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, हृष्टहृदयः -या -यं, हृष्टमानसः -सा -सं, हर्षयुक्तः -क्ता -क्तं, आनन्दी -न्दिनी -न्दि (न्), आनन्दितः -ता -तं, सानन्दः -न्दा -न्दं, प्रीतः -ता -तं, आह्लादितः -ता -तं, प्रह्लादितः -ता -तं, प्रह्लन्नः -न्ना -न्नं, तुष्टः -ष्टा -ष्टं, परितुष्टः -ष्टा -ष्टं, तृप्तः -प्ता -प्तं, प्रमोदितः -ता -तं, प्रफुल्लः -ल्ला -ल्लं, उल्लसः -सा -सं, -लितः -ता -तं, अभिकाङ्क्षितः -ता -तं, मत्तः -त्ता -त्तं.—(Making glad) हर्षकः -का -कं, नन्दकः -का -कं, मोदकः -का -कं, आनन्दकरः -री -रं, हर्षकरः -री -रं, सुभगः -गा -गं, रमणीयः -या -यं.

To GLAD, GLADDEN, *v. a.* हृष् (c. 10 हर्षयति -यितुं), प्रहृष्, परिहृष्, नन्द् (c. 10. नन्दयति -यितुं), अभिनन्द्, ह्लाद् (c. 10. ह्लादयति -यितुं), आह्लाद्, प्रह्लाद्, रम् (c. 10. रमयति -यितुं), उल्लस् (c. 10. -लासयति -यितुं), तुष् (c. 10. तोषयति -यितुं), तृप् (c. 10. तर्पयति -यितुं), प्रमुद् (c. 10. -मोदयति -यितुं), प्री (c 9. प्रीणाति, c 10. प्रीणयति -यितुं)

GLADDENED, *p p* आह्लादितः -ता -तं, आनन्दितः -ता -तं, प्रमोदितः -ता -तं

GLADDENING, *a.* हर्षकः -का -कं, हर्षणः -णा -णं, हर्षकरः -री -रं, नन्दकः -का -कं, आनन्दनः -ना -नं, आनन्ददः -दा -दं, प्रीतिदः -दा -दं

GLADDER, GLADDENER, *s.* आनन्दकारी *m.* (न्), आनन्दकः, सुखदः

GLADE, *s.* जङ्गलमध्ये or वनमध्ये पथः, वनपथः, वनमार्गः, वृक्षावृत पथः तरुगुल्मावृतो मार्गः.

GLADIATE, *a.* खड्गाकारः -रा -रं, असयाकारः -रा -रं, खड्गाकृतिः -तिः -ति

GLADIATOR, *s* मल्लः, मल्लः, आसिकः, असिक्रीडकः, खड्गक्रीडकः शस्त्रक्रीडकः, नैस्त्रिंशिकः

GLADIATORIAL, *a.* मल्लसम्बन्धी -न्धिनी -न्धि (न्), असिक्रीडासम्बन्धी &c आसिकः -की -कं.

GLADIATURE, *s.* असियुद्धं, खड्गयुद्धं, असिक्रीडा, खड्गक्रीडा.

GLADLY, *adv.* सानन्दं, सहर्षं, हर्षेण, हृष्टमनसा, हृष्टवत्, साह्लादं, आह्लादेन प्रह्लादेन, प्रमोदेन, समोदेन.

GLADNESS, *s.* हर्षः, आनन्दः, आह्लादः, प्रह्लादः, प्रमोदः, आमोदः, तुष्टिः *f* मुदा, हृष्टता, प्रहृष्टता, प्रफुल्लता, उल्लासः, उल्लसत्वं, चित्तप्रसन्नता प्रीतिः *f.*, प्रीतता, तुष्टिः *f.*, सन्तुष्टिः *f.*, मोदः, उत्सवः.

GLADSOME, *a.* आनन्दी -न्दिनी -न्दि (न्), रम्यः -म्या -म्यं, सुभगः -गा -गं

GLAIR, *s.* अण्डशुक्लं, अण्डगर्भपरिगतः शुक्लरसः, अण्डपयस् *n.*

GLANCE, *s.* (Of the eye) दृष्टिपातः, दृष्टिनिपातः, नयनपातः, दृष्टिविक्षेपः कटाक्षः, नेत्रकटाक्षः, अपाङ्गदृष्टिः *f.*, अपाङ्गदर्शनं, वीक्षितं, प्रेक्षितं, अवलोकनं, काक्षः, दृष्टिपाताः.—(Slight view) ईषद्दर्शनं, ईषद्दृष्टिः *f*, अर्द्धवीक्षणं, अर्द्धदृष्टिः *f*; 'glance in return,' प्रतिसमीक्षणं.—(A shoot of light) स्फुरितं, स्फुरणं, द्युतिपातः, रश्मिः *m*.

To GLANCE, *v. n* (As light) स्फुर् (c 6. स्फुरति -रितुं), परिस्फुर्, लस् (c. 1. लसति -सितुं).—(Strike lightly and pass by) लघु हत्वा or ताडयित्वा अतिक्रम् (c. 1. -क्रामति -क्रमितुं) or अती (c. 2. अत्येति -तुं, rt. इ), दूरतः अतिक्रम्य सृप् (c. 1. सर्पति -र्प्तुं).—(Glance with the eye) दृष्टिं पत् (c. 10. पातयति -यितुं) or विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), दृष्टिपातं पत्, कटाक्ष (nom. कटाक्षयति -यितुं).—(Glance at, inspect slightly) ईषद् दृश् (c. 1. पश्यति, द्रष्टुं) or निरीक्ष् (c 1 -ईक्षते -क्षितुं), अर्द्धवीक्षणं कृ

Glancing, *part.* स्फुरन् -रन्ती -रत् (त्), लसन् -सन्ती -सत् (त्), स्फुरितः -ता -तं
Glancing, *adv.* लघु ईषत् चलनमार्थं कटाक्षेण छायया तिर्यक् तिरश्च, सकटाक्षं.

Gland, *s.* शरीराभ्यन्तरे ग्लाण्डसंज्ञकः पित्तश्लेष्माद्याशयो मृदुमांसपिण्डः, मांसग्रन्थिः *m.*

Glanders, *s.* अश्वानाम् ज्वररोगविशेषो यत्र नासिकारन्ध्रेण दुर्गन्धश्लेष्म or दुर्गन्धमलम् उत्सृज्यते.

Glandule, *s.* शरीराभ्यन्तरे श्लेष्माद्याशयो मृदुमांसपिण्डकः.

Glandulous, glandular, *a.* मृदुमांसपिण्डसम्बन्धी -न्धिनी -न्धि (न्).

Glans, *s.* (Penis) मणिः *m. f*

Glare, *s.* तेजस् *n.*, अतितेजस्, अतिद्युतिः *f.*, द्युतिः *f.*, अतिप्रभा, भाः *f.* (स्), दृष्टिसन्तापिका द्युतिः, नयनोपघातिनी प्रभा, हेतिः *f.*, उज्ज्वलद्युतिः *f.*, प्रखरदीप्तिः *f.*, खरदीप्तिः *f.*—(Fierce look) उग्रदृष्टिः *f.*, तीक्ष्णदृष्टिः, कोपज्वलिता दृष्टिः.

To glare, *v. n.* अतितेजसा द्युत् (c. 1. द्योतते -तितुं), उज्ज्वल् (c. 1. ज्वलति -लितुं) ज्वल् in freq (जाज्वल्यते), दीप् in freq. (देदीप्यते), अतितेजसा दृष्टिं सन्तप् (c 10 -तापयति -यितुं) or उपहन् (c. 2. हन्ति -न्तुं), स्फुर् (c 6. स्फुरति -रितुं).—(Look with fierce eyes) तीक्ष्णदृष्टिं or कोपज्वलितां दृष्टिं पत् (c. 10. -पातयति -यितुं), रोषप्रदीप्ताक्षः -क्षा -क्षं भू.

Glareous, *a.* अण्डशुक्लांशगुणः -णा -णं, अण्डशुक्लांशधर्मा -र्म्मा -र्म्म (न्).

Glaring, *part.* or *a.* अतितेजस्वी -स्विनी -स्वि, उज्ज्वलः -ला -लं, अतिद्योती -तिनी -ति (न्), अतितेजसा दृष्टिसन्तापकः -का -कं or नयनोपघाती -तिनी -ति (न्), भास्वान् -स्वती -स्वत् (त्), काशीनवः -वी -वं.—(Clear, notorious) सर्व्वप्रकाशः -शा -शं, सुप्रकाशः -शा -शं, पुरःस्फुरन् -रन्ती -रत् (त्): 'having eyes glaring with anger,' रोषदीप्ताक्षः -क्षा -क्षं.

Glaringly, *adv.* सुप्रकाशं, सर्व्वप्रकाशं, सर्व्वप्रसिद्धं, अतितेजसा.

Glass, *s.* (Transparent substance formed by fusing sand with alkalies) काचः, क्षारः, सिद्धं, अभ्रं -भ्रकं, स्फटिकः.—(Glass drinking-vessel) काचभाजनं, काचपात्रं, काचकूपी, पलिघः, पुलकः, पारी, 'glass jar,' काचघटी.—(Looking-glass, mirror) दर्पणः, मुकुरः, आदर्शः.

Glass, *a.* काचमयः -यी -यं, काचनिर्म्मितः -ता -तं, काच in comp.

To glass, *v. a.* *See To* glaze.

Glass-blower, *s.* काचधमकः, क्षारधमकः, काचध्माकारः, काचनिर्म्माणकृत्.

Glassful, *s.* काचपात्रपूरणं, काचभाण्डभरकः, काचभाण्डपूरकः.

Glass-grinder, *s.* काचपरिष्कारकः, काचमार्जकः, काचतेजस्कारी *m.* (न्).

Glass-house, *s.* काचनिर्म्माणशाला, क्षारनिर्म्माणगृहं, काचशाला.

Glassiness, *s.* स्वच्छता, प्रसन्नता, प्रसत्तिः *f.*, विमलता, श्लक्ष्णता.

Glass-like, *a.* काचोपमः -मा -मं, काचसगुणः -णा -णं

Glass-man, *s.* काचविक्रेता *m.* (तृ), काचद्रव्यविक्रयी *m.* (न्), काचव्यवसायी *m.* (न्).

Glass-work, *s.* काचनिर्म्माणं, काचनिर्म्माणशिल्पं, काचकर्म्म *n.* (न्)

Glassy, *a.* काचोपमः -मा -मं, काचवत्प्रसन्नः -न्ना -न्नं, काचवन्निर्म्मलः -ला -लं, स्वच्छः -च्छा -च्छं, स्फटिकप्रभः -भा -भं, श्लक्ष्णः -क्ष्णा -क्ष्णं.

Glaucous, *a.* समुद्रवर्णः -र्णा -र्णं, श्यामहरित् *m f n.*, घननीलः -ला -लं

Glave, *s.* पृथुपत्रः खड्गः, कृपाणः, निस्त्रिंशः, असिः *m.*

To glaze, *v. a.* काच (nom. काचयति -यितुं), काचेन आच्छद् (c. 10. छादयति -यितुं), काचान्वितं -तां -तं कृ, काचोपेतं -तां -तं कृ.—(Make smooth) श्लक्ष्ण (nom. श्लक्ष्णयति -यितुं), स्निग्धीकृ, श्लक्ष्णीकृ.

Glazed, *p. p.* काचितः -ता -तं काचान्वितः -ता -तं काचाच्छादितः -ता -तं

Glazier, *s.* [illegible] *m.* (न्), [illegible] *m.* (न्)

Glazing, *s.* काचबन्धनं, काचाच्छादनं, काचकर्म्म *n.* (न्)

Gleam, *s.* (Sudden shoot of light) द्युतिस्फुरणं, स्फुरितं, अकस्मात्स्फुरणं, प्रभास्फुरणं, क्षणप्रभा, क्षणद्युतिः *f.*, क्षणज्योतिस् *n.*, अचिरप्रभा अचिरद्युतिः *f.*, अकस्माद्दीप्तिः *f.* द्युतिज्वाला —(Beam) रश्मिः *m.* किरणः, अंशुः *m.*—(Brightness) उज्ज्वलता, प्रभा, तेजस् *n.*

To gleam, *v. n.* स्फुर् (c. 6. स्फुरति -रितुं), प्रस्फुर्, परिस्फुर्, लस् (c 1 लसति -सितुं), विद्युत् (c. 1. -द्योतते -तितुं), अकस्मात् or क्षणमात्रं प्रकाश् (c. 1. -काशते -शितुं) or ज्वल् (c. 1 ज्वलति -लितुं) or उज्ज्वल्.

Gleaming, *part.* स्फुरन् -रन्ती -रत् (त्), लसन् -सन्ती -सत् (त्), स्फुरितः -ता -तं

Gleamy, *a.* क्षणमात्रद्योतमानः -ना -नं, क्षणप्रभः -भा -भं, कम्पितप्रभः -भा -भं, चञ्चलप्रभः -भा -भं, चञ्चलद्योती -तिनी -ति (न्), प्रकाशमानः -ना -नं, उज्ज्वलः -ला -लं.

To glean, *v. a.* and *n.* उञ्छ् (c. 1. 6. उञ्छति -ञ्छितुं), शिल् or सिल् (c. 6. शिलति, सिलति -लितुं), ग्रस् or उग्रस् (c. 9. ग्रस्नाति, c 10. ग्रासयति, उग्रस्नाति, उग्रासयति -यितुं), शेषधान्यानि or शस्यशेषं or अवशिष्टकणिशान् or लूनशस्यावशिष्टं चि (c. 5. चिनोति, चेतुं) or अवचि or उद्धृ (c. 1. -हरति -हर्त्तुं) or हृ or सङ्ग्रह् (c. 9. गृह्णाति -ग्रहीतुं)

Glean, *s.* धान्यशेषं, अवशिष्टकणिशसङ्ग्रहः, शेषधान्यसञ्चयः, लूनशस्यावशिष्टं

Gleaned, *p. p.* हृतधान्यशेषः -षा -षं, हृतशस्यावशेषः -षा -षं, उद्धृतसर्व्वकणिशः -शा -शं, सङ्गृहीतसर्व्वशस्यः -स्या -स्यं.

Gleaner, *s.* शिलोञ्छवृत्तिः *m. f.*, उञ्छवृत्तिः *m. f.*, उञ्छशीलः -ला -लं शिलोञ्छकारी *m.* (न्), शेषधान्यसङ्ग्राहकः, अवशिष्टकणिशसञ्चयी *m* (न्), उच्छिष्टशस्यावचायी *m.* (न्).

Gleaning, *s.* (The act) उञ्छः, उञ्छनं, शिलोञ्छः, उञ्छशिलं, उञ्छसिलं शिलोञ्छवृत्तिः *f.*, उञ्छवृत्तिः *f.*, शिलं, ऋतं, कडम्भकः, अवशिष्टशस्यसङ्ग्रह -हणं, लूनक्षेत्रशेषधान्यावचयः, उच्छिष्टकणिशचयः, शस्यशेषापहरणं, धान्यशेषादानं.—(That which is gleaned) शस्यशेषं, शस्यावशिष्टं, लूनशस्योच्छिष्टं, लूनकेदारशेषधान्यानि *n. pl.*, कणिशावशेषः.

Glebe, *s.* (Soil, ground) मृद् *f.*, मृत्तिका, स्थलं -ली, भूमिः *f.*, लोष्टः मृल्लोष्टः.—(Land belonging to a beneficed clergyman) धर्म्माध्यापकभूमिः *f.*, धर्म्माध्यापकक्षेत्रं.

Gleby, *a.* मृल्लोष्टमयः -यी -यं, मृत्पूर्णः -र्णा -र्णं, मार्त्तिकः -की -कं

Glee, *s.* हर्षः, आह्लादः, प्रह्लादः, आनन्दः, मुदा, प्रमोदः, आमोदः, मदः, उल्लासः, उत्सवः, महोत्सवः

Gleeful, *a.* हृष्टः -ष्टा -ष्टं, आनन्दी -न्दिनी -न्दि (न्), हृष्टचित्तः -त्ता -त्तं

To gleek, *v. n.* अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अवहस् (c. 1. -हसति -सितुं).

Gleet, *s.* मूत्रमार्गरोगः, मूत्रमार्गदोषः, मेहविकारः, प्रमेहविकारः, इक्षुमेहः मूत्रमार्गनिर्गतं पूयशोणितं, धातुस्रावः.

To gleet, *v n.* शनैर् मूत्रमार्गात् स्रु (c. 1. स्रवति, स्रोतुं) or प्रस्रु.

Glen, *s.* दरी -रा, कन्दरः -रा, दरीभूः *f.*, अद्रिद्रोणी, निम्नभूमिः *f.*, प्रान्तरं

Glene, *s.* अक्षिपात्रं, अक्षिरन्ध्रं, नयनपात्रं, नयनकोशः.

To hoot, v. n. रु (c. 2. रौति, रवितुं), चिक्, दीर्घरुतं कृ, दीर्घरावं कृ, घूत्कृ, घूत्कारं कृ, चित्कारं कृ, उच्चैःस्वरेण उद्घुष् (c. 10. -घोषयति -यितुं), 'to hoot at,' हे, रे, अरे, धिक्, हुम्, थुत् इत्यादिशब्दैर् अवमानं or अवज्ञां or अपवादं सूच् (c. 10. सूचयति -यितुं) or इत्यादिशब्दैर् अवहास्यतां कृ.

Hoot, hooting, s. दीर्घरुतं, दीर्घरावः, रावः, घूत्कारः, घूत्कृतं, चित्कारः, हे, रे, धिक्, थुत् इत्यादिशब्दैर् अवमानसूचनं or अपवादसूचनं.

To hop, v. n. प्लु (c. 1. प्लवते, प्लोतुं), वल्ग् (c. 1. वल्गति -ल्गितुं), नृत् (c. 4. नृत्यति, नर्तितुं), एकपादेन प्लु or धाव्.

Hop, s. (The plant) लताविशेषो यस्य पुष्पाणि यवरसेन सह संसृज्यन्ते तेन च यवसुरा उत्पद्यते.—(Jump) प्लवः, प्लुतं, वल्गितं, कम्पः, नृत्यं, नर्त्तनं, एकपादेन प्लुतं, वल्गितं.

Hope, s. आशा, प्रत्याशा, आशंसा, आकांक्षा, आशाबन्धः, मनोरथः, अपेक्षा, व्यपेक्षा, प्रतीक्षा, सम्प्रतीक्षा, स्पृहा, निरीक्षा, उदीक्षणं, ईप्सितं, मनस्विता, 'hope of a good issue,' फलाकांक्षा; 'having one's hopes fulfilled,' पूर्णमनोरथः, आशाप्राप्तः, 'hopes whose fulfilment is delayed,' विलम्बितफला मनोरथाः, 'hope-inspiring,' आशाजननः -ना -नं.

To hope, v. a. and n. आशंस् (c. 1. -शंसते -सितुं), आकांक्ष् (c. 1. -कांक्षति -क्षितुं), प्रत्याकांक्ष्, प्रतीक्ष् (c. 1. -ईक्षते -क्षितुं), अपेक्ष्, व्यपेक्ष्, उदीक्ष्, स्पृह् (c. 10. स्पृहयति -यितुं), वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं), अभिवाञ्छ्, आशां कृ, प्रत्याशां कृ, आशंसां कृ, आशास् (c. 2. -शास्ते -शासितुं); 'I hardly hoped to see you again,' न खलु म आसीद् आशंसा यथा पुनरपि त्वां प्रेक्षिष्ये, 'I hope' may be expressed by the particle कच्चित्; as, 'I hope the fever does not pain you much,' कच्चित् त्वां नातिबाधते ज्वरः.

Hopeful, a. (Full of hope) आशावान् -वती -वत् (त्), आशान्वितः -ता -तं, आशायुक्तः -क्ता -क्तं, आशाविष्टः -ष्टा -ष्टं, आशाबद्धः -द्धा -द्धं, स्पृहयालुः -लुः -लु, आकांक्षी -क्षिणी -क्षि (न्), सप्रत्याशः -शा -शं, प्रत्याशी -शिनी -शि (न्), अपेक्षी -क्षिणी -क्षि (न्), अपेक्षकः -का -कं. —(Promising, exciting hope) आशाजननः -ना -नं, आशाकारी -रिणी -रि (न्).

Hopefully, adv. सप्रत्याशं, साशंसं, आशापूर्व्वं, आशंसापूर्व्वं.

Hopefulness, s. आशावत्त्वं, आशाविष्टत्वं सप्रत्याशत्वं.

Hopeless, a. आशाहीनः -ना -नं, निराशः -शा -शं, आशारहितः -ता -तं, गताशः -शा -शं, नष्टाशः -शा -शं, निःप्रत्याशः -शा -शं, हताशः -शा -शं.

Hopelessly, adv. निराशं, निःप्रत्याशं, आशां विना, गताशं.

Hopelessness, s. नैराश्यं, निराशता, आशाहीनता, आशाराहित्यं.

Hopper, s. (One who hops) एकपादेन प्लुतकारी m. (न्), एकपादेन नर्त्तकः.—(In a mill) शस्याधारः, शस्यपात्रं.

Hopping, s. एकपादेन नर्त्तनं or नृत्यं or प्लुतकरणं or वल्गितकरणं.

Horal, horary, a. मौहूर्त्तिकः -की -कं, घटिकाविषयः -या -यं.

Horde, s. अस्थिरवासिनां or पर्य्यटनकारिणां म्लेच्छमनुष्याणां समूहः or सङ्घः or वृन्दकुलं or वृन्दशः, शबरगणः, किरातगणः.

Horizon, s. दिङ्मण्डलं, मण्डलं, चक्रवालं, चक्रं, दिगन्तः, आकाशकक्षा, चक्रवालं -लः, चक्रपालः. 'The eastern horizon,' प्राची दिक्, प्राचीमूलं.

Horizontal, a. अनुप्रस्थः -स्था -स्थं, अन्वायतनः -ना -नं, दिगन्तसम -मा -मं, समः -मा -मं, समरेखः -खा -खं, समस्थः -स्था -स्थं, समान्तरः -रा -रं; 'a horizontal line,' तिर्य्यग्मार्गः, समरेखा, 'plane,' समानभूभाग.

Horizontally, adv. अनुप्रस्थं, अन्वायतनं, समं, समरेखं, समानरूपेण.

Horn, s. (Of an animal) शृङ्गं, विषाणः -णी -णं, कूणिका, काहलः -ला -लिका; 'of a buffalo,' गवलं.—(Wind-instrument) शृङ्गं काहलः -ला, 'to blow a horn,' शृङ्गं ध्मा (c. 1. धमति, ध्मातुं) or प्रध्मा.—(Of the moon) चन्द्रशिखा, चन्द्रशृङ्गं, चन्द्रार्द्धं.

Horn-book, s. बालकस्य आरम्भपुस्तकं or अक्षरपुस्तकं or प्रथमपाठग्रन्थः.

Horned, a. शृङ्गी -ङ्गिणी -ङ्गि (न्), शृङ्गिणः -णा -णं, विषाणी -णिनी -णि (न्), शृङ्गविशिष्टः -ष्टा -ष्टं, 'in the form of a horn,' शृङ्गाकारः -रा -रं; 'horned moon,' सिनीवाली.

Hornet, s. बृहद्वरलभेदः, बृहद्भ्रमरः, विषशृङ्गी m. (न्), विषशूकः.

Hornless, a. अशृङ्गः -ङ्गा -ङ्गं, शृङ्गहीनः -ना -नं; 'hornless bull,' तूपर.

Horn-owl, s. उलूकभेदः, शृङ्गिपेचकः, शृङ्गिकौशिकः.

Horn-pipe, s. नृत्यविशेषः यस्मिन् नर्त्तको हस्तपादादि इतस्ततः क्षिप्रं प्रचालयति, नाविकनृत्यं.

Horny, a. शार्ङ्गः -र्ङ्गी -र्ङ्गं, शृङ्गमयः -यी -यं, शृङ्गतुल्यः -ल्या -ल्यं.

Horologe, horology, s. घटी, यामघोषा, कालमापकयन्त्रं.

Horoscope, s. जन्मपत्रं -त्रिका, जन्मनक्षत्रपत्रं, जन्मयोगपत्रं, जन्मकालग्रहाः.

Horrible, a. दारुणः -णा -णं, घोरः -रा -रं, सुभैरवः -वी -वं, भैरवः -वी -वं, रौद्रः -द्री -द्रं, भयङ्करः -री -रं, सुभयानकः -की -कं, भयानकः -की -कं, भीमः -मा -मं, उग्रः -ग्रा -ग्रं, भीषणः -णा -णं, भयकरः -रा -रं, भयावहः -हा -हं, विकटः -टा -टं, करालः -ला -लं, भीष्मः -ष्मा -ष्मं.—(In appearance) घोरदर्शनः -ना -नं, रौद्रदर्शनः -ना -नं, भीमदर्शनः -ना -नं.

Horribly, adv. दारुणं, घोरं, भयानकं, सुभैरवं, रौद्रं, उग्रं, विकटं.

Horrid, a. घोरः -रा -रं, दारुणः -णा -णं, उग्रः -ग्रा -ग्रं, कुत्सितः -ता -तं, भयानकः -का -कं, भयङ्करः -री -रं, भीमः -मा -मं, भीषणः -णा -णं, रौद्रः -द्री -द्रं, भैरवः -वी -वं, विकटः -टा -टं, करालः -ला -लं.

Horridly, adv. घोरं, दारुणं, उग्रं, कुत्सितं, अतिकुत्सितं, रौद्रं.

Horridness, s. घोरता, दारुणता, उग्रता, कुत्सितत्वं, भयानकत्वं, रौद्रता.

Horrific, a. भैरवकारकः -का -कं, भैरवजनकः -का -कं, सुभयङ्करः -री -रं, सुभयानकः -का -कं, साध्वसकारी -रिणी -रि (न्).

Horrified, p. p. भयसंहृष्टरोमा -मा -म (न्), साध्वसोपहतः -ता -तं.

To horrify, v. a. भैरवं जन् (c. 10. जनयति -यितुं), साध्वसं -सां -सं कृ.

Horripilation, s. रोमहर्षः -र्षणं, लोमहर्षणं, संहर्षः, उद्धर्षणं, रोमाञ्चः -ञ्चनं, रोमोद्गमः, रोमोद्भेदः, पुलकः, पुलकोद्गमः, उद्धूषणं.

Horror, s. भैरवं, भयसंहर्षः, भयकम्पः, साध्वसं, भीमता, भीष्मं, भीमं, घोरं, भयानकं, भयङ्करं, त्रासः, सन्त्रासः, परिकम्पः.

Horse, s. अश्वः, हयः, तुरङ्गः -ङ्गमः, तुरगः, वाजी m. (न्), घोटकः, वाहः, वाहनं, अर्वा m. (न्), सैन्धवः, सप्तिः m., किल्की m. (न्), प्रचेलकः, श्रीभ्राता m. (तृ), वीतिः m., पीतरी m. (न्), पीतिः m., पत्त्वारः, मुद्भुक् m. (ज्), मुद्भोजी m. (न्), गन्धर्वः; 'a well-bred horse,' आजानेयः, कुलीनः, सिन्धुवारः, भूमिपक्षः, भूमिरक्षकः, 'a well-trained horse,' विनीतः, साधुवाही m. (न्); 'a white horse,' कर्कः; 'a bay horse,' उक्कनाहः, त्रियाहः; 'a fleet horse,' जवनः, जवाधिकः, प्रजवी m. (न्); 'a good horse,' ययुः, हयोत्तमः; 'a chariot horse,' रथ्यः; 'a pack-horse,' पृष्ठ्यः, स्थौरी m. (न्), स्थूरी m., स्थौरी m.; 'a horse for sacrifice,' ययुः m., अश्वमेधीयः; 'four-horsed carriage,' चतुरश्वो रथः.—

C काश्व आश्विक अश्वारूढा m —(S pp f
& वरजाधार g h
अश्वीय: या य आश्विक की के आश्व श्वी श्व A mb..
.f horses, अश्वीय. आश्वं.

To horse, *v. a.* अश्वम् आरुह् in caus (-रोपयति-यितुं),अश्वारूढं-ढां-ढं कृ.

Horse-back, *s.* अश्वपृष्ठं, अश्वोपस्थिति: *f* ; 'on horse-back,' अश्वपृष्ठे loc. c. ; 'going on horse-back,' तुरङ्गयायी *m.* (न्).

Horse-bean, *s.* क्षुद्रशिम्बिकभेद:, शिम्बा, मुद्ग:, माष:.

Horse-boat, *s.* अश्ववहन, अश्ववहनयोग्या नौका

Horse-breaker, *s.* अश्वदमक:, अश्वविनेता *m* (तृ), अश्वशिक्षक:, अश्वशिक्षाशीयी *m* (न्).

Horse-breaking, *s.* अश्वदमनं, अश्वशिक्षा, अश्वविनय:.

Horse-chestnut, *s.* (Tree) श्यामफलविशिष्टो वृक्षभेद:

Horse-cloth, *s.* अश्वास्तरणं, आस्तर:, अश्वपरिस्तोम:.

Horse-comb, *s.* अश्वमार्जनी, अश्वलोमशोधनी.

Horse-dealer, *s.* अश्वव्यापारी *m* (न्), हयज्ञ:, हेडावुक्क:, हेलावुक्क:, हयविद्याविशारद:.

Horse-driving, *s.* अश्वसारथ्यं, अश्वप्रेरणं, हयप्रेरणं.

Horse-dung, *s.* अश्वशकृत *n*, अश्वपुरीषं, अश्वमलं, अश्वहन्नं.

Horse-faced, *a.* अश्वमुख: -खी -खं, अश्ववदन: -ना -नं, हयमुख: -खी -खं, तुरङ्गवक्त्र: -क्त्रा -क्त्रं, तुरङ्गानन: -ना -नं, तुरङ्गास्य: -स्या -स्यं.

Horse-flesh, *s.* अश्वमांसं, घोटकमांसं, तुरगमांसं.

Horse-fly, *s.* अश्वदंशक:, हयदंशी, अश्वमक्षिका.

Horse-guards, *s* अश्वारूढसैनिका: *m. pl.*, राजशरीररक्षकम अश्वारूढसैन्यं.

Horse-hair, *s.* अश्वलोम *n.* (न्), अश्वरोम *n.* (न्), अश्ववाल:.

Horse-laugh, *s* अट्टहास:, अतिहास:, अतिहसितं, महाहास:, आच्छुरितं, सोल्लास:.

Horse-leech, *s.* अश्वदंशका जलौका, अश्वरक्तपायिनी —(Farrier) अश्वचिकित्सक:, अश्ववैद्य:.

Horseman, *s.* अश्वारूढ:, अश्वारोह: -ही *m.* (न्), हयारूढ:, हयारोह:, सादी *m* (न्), अश्वसादी *m.* (न्), तुरगी *m.* (न्), तुरङ्गी *m.* (न्), अश्ववह:, अश्ववार:, मापी *m.* (न्), हयविद्याविशारद:.

Horsemanship, *s.* अश्वविद्या, हयविद्या, अश्वारोहणविद्या, हयज्ञता, हयारोह:, अश्वहृदयं.

Horse-meat, *s.* अश्वाहार:, अश्वभोजनं, अश्वखाद्यं, पशुखाद्यद्रव्यं.

Horse-pond, *s.* अश्वतडाग:, अश्वपुष्करिणी, अश्ववापी.

Horse-race, *s.* अश्वचर्या, अश्वमार्ग:, अश्वधावनं

Horse-radish, *s.* कुरुकन्दक: -कं, कन्दमूलभेद:.

Horse-shoe, *s.* अश्वखुरत्रं, अश्वखुरत्राणं, अश्वखुरबन्धनं, अश्वपादुका.

Horse-stealer, *s.* अश्वहारक:, वाजिहर्ता *m.* (र्तृ), अश्वमुष् *m.* (ष्).

Horse-trappings, *s.* आदानं, अश्वपरिच्छद:, अश्वसज्जा, अश्वालङ्कार:.

Horse-way, *s.* अश्वपथ:, अश्वमार्ग:, अश्ववर्त्म *n.* (न्).

Horse-whip, *s.* कशा, अश्वकशा, अश्वताडनी, अश्वप्रणोद:, प्रतिष्कश:, प्रतिष्कष:, चर्मदण्ड:.

To horse-whip, *v. a.* कशया or चर्मदण्डेन तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ (c. 1. -हरति -हर्तुं), कशाघातं कृ.

Hortation, *s.* उपदेश:, उपदेशवाक्यं, प्रबोधनं, प्रबोधवाक्यं, मन्त्रणं.

Hortatory, *a.* उपदेशक: -का -कं, प्रबोधक: -का -कं, आदेशक: -का -कं.

Horticultural, *a.* उद्यानविद्यासम्बन्धी -न्धिनी -न्धि (न्), उद्यानविषय: -या -यं.

Horticulture, *s* उद्यानविद्या, उद्यानकर्षणविद्या, उद्यानकर्षणं, उद्यानकरणविद्या, उद्यानकरणं, उद्यानकृषिकर्म *n.* (न्), पुष्पफलोत्पत्तिकर्म *n.* (न्).

H उद्यानविद्याज्ञ उद्यानकर्षक *n.* न्
F न्धिनी न्धि न्

Hortus siccus, *s* शुष्कोद्यानं, शुष्कौषधिपुस्तकं, शुष्कौषधिसङ्ग्रह:, शुष्कवृक्षादिसङ्ग्रह:, शुष्कौषधय: *f. pl.*

Hose, *s* ऊरोर्मयं पादत्राणं, और्णपादत्रं, पादरक्षणं, जङ्घापरिधानं.

Hosier, *s.* पूर्वोक्तपादत्रविक्रेता *m.* (तृ), और्णपादत्रविक्रयी *m.* (न्).

Hospitable, *a.* आतिथ्य: -थ्या -थ्यं, आतिथेय: -यी -यं, अतिथिसेवक: -का -कं, अतिथिपूजक: -का -कं, आतिथ्यकारी -रिणी -रि (न्), प्रियातिथि: -थि: -थि, वत्सलातिथि: -थि: -थि, सत्कारशील: -ला -लं

Hospitably, *adv.* आतिथ्यपूर्वं, आतिथ्यं, सत्कारेण, सत्कारपूर्वं, आतिथेयं 'to receive hospitably,' सत्कृ आतिथ्यं कृ

Hospital, *s.* आरोग्यशाला, चिकित्साशाला, चिकित्सागारं, रोगप्रतीकारशाला, रोगोपचारशाला, रोगार्त्तलोकपोषणस्थानं, दरिद्रलोकानां रोगचिकित्सनशाला, धर्मशाला.

Hospitality, *s.* आतिथ्यं, आतिथेयं, अतिथिक्रिया, आतिथ्यकर्म *n.* (न्) अतिथिसत्कार:, अतिथिसत्क्रिया सत्कार:, सत्क्रिया, सत्कर्म *n.* (न्) सत्कृति: *f.*, सत्कृतं, अतिथिसेवा, अतिथिपूजनं, मनुष्ययज्ञ:, नृयज्ञ:.

Host, *s.* (Entertainer) सत्कारी *m.* (न्), सत्कृत् *m.*, आमन्त्रयिता *m* (तृ), निमन्त्रणकृत *m.*, निमन्त्रक:, भोजनदाता *m.* (तृ), आतिथ्यकृत *m* —(Army) चमू: *f.*, सेना, अनीकं, वाहिनी, अनीकिनी, वरूथिनी, योधसमूह:.—(A great number) समूह:, सङ्घ:, सङ्घात:, गण:, कुलं, समवाय:, समुदाय:, निवह:, निकाय:, 'a host of persons,' जनसमूह: लोकसङ्घ:, जनौघं. 'a host of enemies,' शत्रुनिकाय: ; 'a host of excellencies,' गुणग्राम:.

To host, *v. n.* (Lodge) वस् (c. 1 वसति, वस्तुं), निवस्, अतिथिर् भू or अस्.—(Encounter in battle) युद्धे समागम् (c. 1 -गच्छति -गन्तुं) or सङ्गम्.

Hostage, *s.* शरीरबन्धक:, बन्धक:, सन्धिनियमस्योपरि विश्वासार्थं न्यस्त: शरीरबन्धक:

Hostel, hostelry, *s* उत्तरणस्थानं, उत्तरणगृहं, उपकारी -रिका

Hostess, *s.* आतिथ्यकारिणी, सत्कारिणी, निमन्त्रणकारिणी, भोजनदात्री.

Hostile, *a.* वैरी -रिणी -रि (न्), विरुद्ध: -द्धा -द्धं, विरोधी -धिनी -धि (न्), विपक्ष: -क्षा -क्षं, प्रतिकूल: -ला -लं, विपरीत: -ता -तं, अहित: -ता -तं, अहितकारी -रिणी -रि (न्), प्रतिपक्ष: -क्षा -क्षं, विद्वेषी -षिणी -षि (न्), द्वेषी &c., द्वेषण: -णा -णं, विद्विष: -षा -षं, शात्रव: -वी -वं, द्रोहबुद्धि: -द्धि: -द्धि, अपकारी -रिणी -रि (न्), प्रतिरोधी -धिनी -धि (न्), पर्यवस्थाता -त्री -तृ (तृ), सवैर: -रा -रं, 'a hostile invasion,' शत्रुविग्रह: ; 'to be hostile,' विपक्षीभू, प्रतिकूल (nom. प्रतिकूलयति -यितुं), विरुध् (c. 7. -रुणद्धि -रोद्धुं), वैर (nom. वैरायते), शत्रु (nom. शत्रूयति), द्विष् (c. 2. द्वेष्टि -ष्टुं), विद्विष्, पर्यवस्था (c. 1. -तिष्ठति -स्थातुं).

Hostilely, *adv.* शत्रुवत्, रिपुवत्, विरोधेन, विरुद्धं, विपरीतं, विपक्षवत्.

Hostility, *s.* वैरिता, वैरभाव:, वैरं, शत्रुता, रिपुता, विपक्षता, विरोध:, विरुद्धता, विद्वेष:, द्वेष:, शात्रवं, अरिता, प्रतिपक्षता, विद्विष्टता, अप्रीति: *f*, प्रतिद्वन्द्वं, परता -त्वं ; 'natural hostility,' जातिवैरं —(War, state of war) युद्धं, युद्धभाव:, युद्धावस्था, विग्रह:, संग्राम:.

Hostler, *s.* अश्वपाल: -लक:, अश्वरक्षक:, उत्तरणस्थाने अभ्यागतान् अश्वान् पालयति यो जन:.

Hot, *a.* (*Contrary to cold*) उष्ण: -ष्णा -ष्णं, तप्त: -प्ता -प्तं, चण्ड: -ण्डा -ण्डं, प्रचण्ड: -ण्डा -ण्डं, उच्चण्ड: -ण्डा -ण्डं, सन्तप्त: -प्ता -प्तं, उत्तप्त: -प्ता -प्तं, तापी -पिनी -पि (न्), कोष्ण: -ष्णा -ष्णं, तीक्ष्ण: -क्ष्णा -क्ष्णं तीक्ष्ण

ष्मा -ष्म न्, नैदाघ -घी -घं, अशिशिर: -रा -रं, अनुष्णशीत: -ता -तं, तिग्म: -ग्मा -ग्मं, तीव्र: -व्रा -व्रं, तीक्ष्ण: -क्ष्णा -क्ष्णं, खर: -रा -रं, ग्रीष्म: -ष्मा -ष्मं, घर्म in comp.; 'hot season,' उष्णकाल:, उष्णसमय:, ग्रीष्म:, ग्रीष्मकाल:, निदाघ:, निदाघकाल:, उष्णागम:; 'hot water,' उष्णोदकं, घर्मोदकं, घर्मांशु n.—(Hot to the taste) तिग्म: -ग्मा -ग्मं, तीक्ष्ण: -क्ष्णा -क्ष्णं, तीव्र: -व्रा -व्रं, खर: -रा -रं, कटु: -टु: -टु, उग्र: -ग्रा -ग्रं.—(Passionate) चण्ड: -ण्डा -ण्डं, चण्डवान् -वती -वत् (त्), तीक्ष्ण: -क्ष्णा -क्ष्णं, तिग्म: -ग्मा -ग्मं, उग्र: -ग्रा -ग्रं, शीघ्रकोपी -पिनी -पि (न्), रागी -गिणी -गि (न्), उष्ण: -ष्णा -ष्णं.—(Impetuous) तीक्ष्णकर्मा -र्मा -र्म (न्), संरम्भी -म्भिणी -म्भि (न्), उद्धत: -ता -तं. 'to make hot,' तप् (c. 10 तापयति -यितुं); 'to be hot,' उष्णीभू, उष्ण (nom. उष्णायते).

Hotbed, s. गोमयपशुकृदादिप्रक्षेपेण ऊष्मीकृतम् उद्यानस्थलं, उष्णस्थलं.

Hotch-potch, s. नानाखाद्यद्रव्यसंयोग:, नानाशाकादिसम्मिश्रणं, सन्निपात:, प्रकीर्णकं.

Hotel, s. उत्तरणशाला, उत्तरणगृहं, उत्तरणस्थानं, उपकारी -रिका, उपकार्या, सौधकार्या, प्रवासीयगृहं.

Hot-headed, a. साहसिक: -की -कं, साहसी -सिनी -सि (न्), उच्चण्ड: -ण्डा -ण्डं, उद्धत: -ता -तं, संरम्भी -म्भिणी -म्भि (न्), शीघ्रकोपी -पिनी -पि (न्), तीक्ष्णकर्मा -र्मा -र्म (न्); 'hot-headed zeal,' उत्ताप:.

Hot-house, s. उष्णदेशे विदेशीयवृक्षरक्षणार्थं काचाच्छादितं तप्तगृहं or उष्णगृहं.

Hotly, adv. तीक्ष्णं, तीव्रं, तिग्मं, सतैक्ष्ण्यं, चण्डं, प्रचण्डं, उच्चण्डं, उग्रं, उग्रतया, उत्तापेन, कोपं, उष्णं, उष्णं.

Hot-mouthed, a. तीक्ष्णवादी -दिनी -दि (न्), उग्रमुख: -खी -खं, दुर्मुख: -खी -खं.

Hotness, s. उष्णता, औष्ण्यं, ताप:, तप्तत्वं, चण्डता, प्रचण्डता, अशिशिरता, तिग्मता, तैग्म्यं, तीक्ष्णता, निदाघ:.—(To the taste) तिग्मता, तीक्ष्णता, तीव्रता, कटुता, उग्रता -त्वं.—(Ardor, vehemence) उत्ताप:, उच्चण्डता, व्यग्रता, तीक्ष्णता, उष्म:, संरम्भ:.—(Of temper) चण्डता, शीघ्रकोपित्वं.

Hotspur, s. साहसिकजन:, तीक्ष्णस्वभावो जन:, संरम्भी m. (न्).

Hovel, s. कुटीर:, कुटेर:, कुटी, तृणकुटी, उटज:, मण्डप:, गोष्ठं.

To hovel, v. a. कुटीरे वस् (c. 1. वसति, वस्तुं) or निवस्, कुटीरम् अधिवस्.

Hoven, a. उच्छून: -ना -नं, प्रस्फुरित: -ता -तं, उत्थित: -ता -तं.

To hover, v. n. विहायसा or व्योममध्ये वृत् (c. 1. वर्त्तते -र्त्तितुं) or व्यावृत्, आकाशमध्ये मस्तकोपरि वृत्, डीनम् अकृत्वा अर्द्धवियति विसृप् (c. 1. -सर्पति -र्प्तुं) or विचल् (c. 1. -चलति -लितुं), व्योममध्ये पक्षास्फालनं कृत्वा निश्चलो वृत्.—(Hesitate, waver) विलम्ब् (c. 1. -लम्बते -म्बितुं), दोल (nom. दोलायते), आन्दोल (nom. आन्दोलयति -यितुं), विक्लृप् (c. 1. -कल्पते -ल्पितुं), विचर् (c. 10. -चारयति -यितुं), विशङ्क् (c. 1. -शङ्कते -ङ्कितुं).

Hough, s. जङ्घास्थिशिरा, जङ्घास्थिस्नायु: m. जङ्घासन्धिबन्धनं.

To hough, v. a. जङ्घास्थिशिरां छिद् (c. 7. छिनत्ति, छेत्तुं).

Hound, s. मृगयाकुक्कुर:, मृगव्यकुक्कुर:, मृगयार्थं कुक्कुर:, आखेटकार्थं श्वा m. (न्), आखेटिक:, मृगारि: m., मृगदंशक:, वृकारि: m., विश्वकद्रु: m.

To hound, v. a. मृगव्यकुक्कुरै: अनुसृ (c. 1. -सरति -सर्त्तुं).

Hour, s. घटिका, होरा, करली, दिवसस्य चतुर्विंशभाग: or चतुर्विंशतितमांश:, दिनांश:; 'an hour of forty eight minutes,' मुहूर्त्त: -र्त्तं; 'a space of twenty-four minutes,' दण्ड:; 'half-an-hour,' अर्द्धघटिका; 'an hour and a half,' अर्द्धयाम:.

Hour-glass, s. यामनाली, कालकायन्त्रं, कालपरिमाणयन्त्रं.

Houri, s. दिव्याङ्गना, दिव्यकन्या, देवकन्या, स्वर्गकन्या, स्वर्वेश्या.

Hourly, adv. प्रतिमुहूर्त्तं, मुहूर्त्ते मुहूर्त्ते, दण्डे दण्डे, प्रतिदण्डं.

House, s. गृहं, गेहं, वेश्म n. (न्), भवनं, आलय:, निलय:, आयतनं, निकेतन: -नं, निकेतं, सदनं, मन्दिरं, वास:, संवास:, वासस्थानं, आगार: -रं, अगार: -रं, निवास:, निवासस्थानं, निवसति: f., वसति: f., समावास:, आवसथ:, निकाय्य:, अवस्थानं, सद्म, उदवसितं, वास्तु: m., ओक: n., धाम n. (न्), क्षय:, निशान्तं, कुट: -टी, शाला, सभा, स्थानं; 'house and land,' गृहक्षेत्रादि; 'a number of houses,' गृहपंक्ति: f.; 'house of confinement,' बन्धनगृहं, बन्धनागारं, बन्धनालय:; 'confined to the house,' गृहानुबद्ध: -द्धा -द्धं.—(Family, race) कुलं, वंश:, कुटुम्ब:, जाति: f.—(Family, household) गृहजन:, परिजन:, परिवार:, स्वजन:, कुटुम्बकं, स्त्रीपुत्रकन्यादि.

To house, v. a. गृहे निविश् (c. 10 -वेशयति -यितुं), गृहं प्रविश् (c. 10 -वेशयति -यितुं), वेश्मनि वस् (c. 10 वासयति -यितुं), आश्रयं दा, वासस्थानं दा.

House-breaker, s. गृहभेदक:, आगारभेदक:, भित्तिचौर:, सन्धिचौर:, सन्धिचौर:, कारुचौर:, कुड्यच्छेदी, कपाटघ्न:, खनित्र:, सुरङ्गकृत: -गिल:.

House-builder, s. गृहकारक:, गृहकारी m. (न्), गृहकर्म्मी m. (न्), गृहनिर्म्माता m. (तृ).

House-burner, s. गृहदाहक:, आगारदाहक:, गृहदाहनकृत् m.

House-burning, s. गृहदाह: -हनं, गृहदहनं, गृहप्लोष:, आगारदाह:.

Housedog, s. गृहकुक्कुर:, गृहरक्षक: श्वा m. (न्).

Housedoor, s. गृहद्वारं, गेहद्वारं.

Household, s. गृहजन:, परिजन:, गृहपरिजन:, गृहपरिवार:, स्वजन:, परिवार:, अभिजन:, कुटुम्बकं.

Household, a. गृह्य: -ह्या -ह्यं, गृहसम्बन्धी -न्धिनी -न्धि (न्), आवसथिक: -की -कं or expressed by गृह in comp.; as, 'household affairs,' गृहकार्य्यं, गृहकरणं, गृहव्यापार:; 'household utensils,' गृहोपस्कर:; 'household gods,' गृह्या देवता: f. pl., कुलदेवता: f. pl.; 'household bread,' गृहापूप:.

Householder, s. गृहस्थ:, गृहस्वामी m. (न्), गृहपति: m., गृहाधिकारी m. (न्), गृही m. (न्), गेही m. (न्), कुटुम्बी m. (न्), कौटुम्बिक:, गृहमेधी m. (न्), स्नातक:, ज्येष्ठाश्रमी m. (न्).

Household-stuff, s. गृहोपस्कर:, गृहोपकरणं, गृहसामग्री -ग्र्यं.

Housekeeper, s. (Householder) गृही m. (न्), गेही m. (न्), गृहस्वामी m. (न्), गृहाधिकारी m. (न्), कुटुम्बी m. (न्).—(A woman who has the care of a family) गृहिणी, गेहिनी, कुटुम्बिनी, गृहमेधिनी.

Housekeeping, s. गृहव्यापार:, गृहकार्य्यं, गृहकरणं, गृहकर्म्म n. (न्), गार्हस्थ्यं, गृहस्थता.

Houseleek, s. कुट्या, गृहभित्तिरूढ ओषधिभेद:.

Houseless, a. गृहहीन: -ना -नं, गृहशून्य: -न्या -न्यं, निरालय: -या -यं, अनिकेतन: -ना -नं, अकेतन: -ना -नं, अलय: -या -यं, निराश्रय: -या -यं, अशरण: -णा -णं, निर्वास: -सा -सं.

Housemaid, s. गृहदासी, गृहपरिष्कारिणी, गृहमार्जनी, दासी.

House-room, s. गृहावस्थानं, वासस्थानं, निवासस्थानं, आवास:, वास:.

House-top, s. गृहपृष्ठं, गृहाग्रं, गृहशिखरं, गृहशृङ्गं.

House-warming, s. गृहप्रवेश:, नवगृहप्रवेशकाले उत्सव:, वास्तुप्रवेश:, वास्तुसंशमनं -नीयं.

Housewife, s. गृहमेधिनी, गृहव्यापारकुशला, गृहकार्य्यदक्षा, गृहकर्म्मनिपुणा, गृहिणी, गेहिनी.

Housewifery, s. गृहव्यापारकुशलता, गृहकार्य्यदक्षता, गृहकर्म्मनिपुणता, गृहमेधित्वं, परिमितव्यय:.

I ई u वासस्थानं निवासस्थानं (O. a house or elephant) आस्तरः -रणं, परिस्तोमः, वर्णः, आदानं.

How, *adv.* कथं, किं, केन प्रकारेण, केन रूपेण, किंनु, कुतस्, किमुत, 'how much, how many, how little, how long &c.' कियान् -यती -यत् (त्) or कियत् indec., कति -ति -ति or कति in comp., as, 'how long?' कियत्कालं, कियन्तं कालं, कियता कालेन, कतिकालं; 'how long!' कियच्चिरं, 'how many sorts?' कतिविधः -धा -धं, 'how many times?' कतिकृत्वस्, 'for how much?' कियता मूल्येन; 'how far?' कियत्पर्य्यन्तं, किम्पर्य्यन्तं, कियदवधि, 'how much more,' किम्पुनर्, किमुत, किमु, किम्, कुतःपुनर्, 'how much less,' किमुत, किमु, 'how so?' किमिति, किमिव, 'how else,' अथकिम्; 'how wonderful,' किमाश्चर्य्यं; 'how do you do?' किं क्षेमम् अस्ति भवतः, किं कुशलम् अस्ति भवतः, कीदृशी स्थितिर् भवतः, 'how are we to act?' किम् अस्माभिः कार्य्यं, 'he knows not how to act,' यथाकार्य्यं न जानाति; 'how great is that darkness!' सोऽन्धकारः कियान् महान्, 'any how,' यथाकथञ्चित्, यथातथा, कथञ्चन, कथञ्चित.

Howbeit, *adv.* तथापि, तथैव, तथाच, किञ्च, अपि, अपितु, किन्तु.

Howdah, *s.* (On the back of an elephant) परस्तकः.

However, *adv.* तथापि, किञ्च, अपितु, किन्तु, तु, परन्तु, पुनर्, 'in whatever manner.' यत्प्रकारेण.

Howitzer, *s.* वह्निबलेन लोहगुलिकाप्रक्षेपकं युद्धयन्त्रं.

To howl, *v. n.* रु (c. 2. रौति, रवितुं), विरु, दीर्घरावं कृ, दीर्घरुतं कृ, गर्ज् (c. 1. गर्जति -र्जितुं), भष् (c. 1. भषति -षितुं), रै (c. 1. रायति रातुं), रस् (c. 1. रसति -सितुं), रट् (c. 1. रटति -टितुं), वाश् (c. 1. वाशते -शितुं).

Howl, howling, *s.* रावः, रुतं, दीर्घरावं, दीर्घरुतं, गर्जनं, रसितं, भषः, भषणं, कुक्कनं, वाशितं, मुखवाद्यं; 'making a howling,' दीर्घरावः -वी -वं.

Howsoever, *adv.* यत्प्रकारेण, येन प्रकारेण, यथा यथा, यथातथा, तथापि

To hox, *v. a.* जङ्घास्थिशिरां छिद् (c. 7. छिनत्ति, छेत्तुं).

Hoy, *s.* बृहन्नौकाविशेषः, विशालनौका.

Hubbub, *s.* कोलाहलः, कलकलः, कलरवः, रासः, हलहलाशब्दः, कालकीलः, तुमुलं, विप्लवः, कलहः.

Huckaback, *s.* नानारेखाङ्कितः क्षौमपटविशेषः

Hucklebacked, *a.* कुब्जः -ब्जा -ब्जं, कुब्जः -ब्जा -ब्जं, वक्रस्कन्धः -न्धा -न्धं

Hucklebone, *s.* कट्यस्थि *n.*, कटास्थि *n.*, श्रोण्यस्थि *n.*, जघनास्थि.

Huckster, *s.* क्षुद्रवाणिज्यकारी *m.* (न्), तुच्छवाणिज्यकृत्, कुत्सितवणिक् *m.* (ज्).

To huckster, *v. n.* तुच्छवाणिज्यं कृ, तुच्छप्रकारेण or नीचप्रकारेण or कुत्सितप्रकारेण वाणिज्यं कृ.

To huddle, *v. a.* सम्मिश्रीकृ, अस्तव्यस्तीकृ, सङ्कुलीकृ, सङ्करीकृ, सम्मिश्र् (c. 10. -मिश्रयति -यितुं), सम्बाध् (c. 1. -बाधते -धितुं), अधरोत्तरीकृ, संक्षुभ्.

To huddle, *v. n.* सम्मिश्रीभू, सङ्कुलीभू, सङ्कीर्णीभू, सङ्करीभू, अस्तव्यस्तीभू, अधरोत्तरीभू, सम्बाधीभू.

Huddle, *s.* अस्तव्यस्तता -त्वं, अधरोत्तरं, सङ्करः, साङ्कर्य्यं, सङ्क्षोभः.

Hue, *s.* (Dye, colour) वर्णः, रागः, रङ्गः, छाया, रुचि *f.*—(Hue and cry) जनरवः, बहुभिः कृता संहूतिः, जनघोषणा.

Huff, *s.* (Anger) क्रोधावेशः, क्रोधः, कोपः, रोषः, संरम्भः.—(Arrogance) दर्पः, दर्पावेशः, औद्धत्यं.—(One inflated with arrogance) दर्पाध्मातः, अतिगर्व्वितः, उद्धतः.

To huff, *v. a.* रुष् (c. 10. रोषयति -यितुं), कुप् (c. 10. कोपयति -यितुं)

To huff, *v. n.* दृप् (c. 4. दृप्यति, दर्प्तुं), धृष् (c. 5. धृष्णोति, धर्षितुं) दर्पाध्मातः -ता -तं भू, भर्त्स् (c. 10. भर्त्सयति -ते -यितुं) विकत्थ् (c. 1. -कत्थते -त्थितुं).

Huffer, *s.* दाम्भिकः, भर्त्सनकारः, विकत्थी *m.* (न्), धर्षी *m.* (न्), शूरम्मन्यः

Huffish, *a.* (Angry) क्रोधाविष्टः -ष्टा -ष्टं, कोपी -पिनी -पि (न्), सरोषः -षा -षं, सक्रोधः -धा -धं.—(Arrogant) दृप्तः -प्ता -प्तं, गर्व्वी -र्व्विणी -र्व्वि (न्), उद्धतः -ता -तं, धर्षी -र्षिणी -र्षि (न्), आत्मश्लाघी -घिनी -घि (न्).

Huffishly, *adv.* सक्रोधं, सरोषं, सदर्पं, धृष्टवत्, गर्व्वितवत्.

Huffishness, *s.* सक्रोधत्वं, सरोषत्वं, क्रोधाविष्टता, गर्व्वित्वं, अहङ्कारः

To hug, *v. a.* आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), समालिङ्ग्, आश्लिष् (c. 4. -श्लिष्यति -श्लेष्टुं), संश्लिष्, समाश्लिष्, परिष्वञ्ज् (c. 1. -ष्वजते -ष्वङ्क्तुं), परिरभ् (c. 1. -रभते -रब्धुं), बाहुभ्यां पीड् (c. 10. पीडयति -यितुं) or परिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).

Hug, *s.* आलिङ्गनं -ङ्गितं, आश्लेषः, परिष्वङ्गः, बाहुपपीडः, अङ्कपाली

Hugged, *p. p.* आलिङ्गितः -ता -तं, आश्लिष्टः -ष्टा -ष्टं, पीडितः -ता -तं.

Huge, *a.* बृहन् -हती -हत् (त्), अतिबृहत् &c., सुबृहत् &c., महान् -हती -हत् (त्), अतिमहान् &c., सुमहान् &c., स्थूलः -ला -लं, अतिविशालः -ला -लं, बृहत्परिमाणः -णा -णं, अपरिमितः -ता -तं, वरीयान् -यसी -यः (स्), वरिष्ठः -ष्ठा -ष्ठं, गरिष्ठः -ष्ठा -ष्ठं.—(In body) महाकायः -या -यं, अतिकायः -या -यं, बृहत्कायः -या -यं, बृहच्छरीरः -रा -रं.

Hugely, *adv.* सुमहत्, अतिमहत्, सुबृहत्, अत्यन्तं, अतिमात्रं, अपरिमितं.

Hugeness, *s.* सुबृहत्त्वं, बृहत्त्वं, महत्त्वं, सुमहत्त्वं, अतिमहत्त्वं, स्थूलता, अतिविशालता, अपरिमितत्वं, भूयिष्ठता, कायबृहत्त्वं, बृहत्कायत्वं.

Hugger-mugger, *s.* रहस् *n.*, गूढता, प्रच्छन्नता, 'in huggermugger,' रहसि, रहस्यं, निभृतं, प्रच्छन्नं, गुप्तं, उपांशु.

Hulk, *s.* जीर्णनौका, गुणकूपकादिरहिता नौका, रज्जुकूपकादिहीनो नौकायाः स्थूलभागः.

Hull, *s.* (Integument) कञ्चुकः, आवेष्टनं, परिवेष्टनं, कोशः, कोषः, पुटः, त्वक् *f.* (च्).—(Of a ship) गुणकूपकादिभिन्नो नौकाभागः, नौकायाः स्थूलभागः or कायः.

Hully, *a.* कोशवान् -वती -वत् (त्), तुषवान् &c., त्वग्युक्तः -क्ता -क्तं.

To hum, *v. n.* गुञ्ज् (c. 1. गुञ्जति -ञ्जितुं), रु (c. 2. रौति, रवितुं), विरु, रणरणं कृ; 'to hum and haw,' भिन्नस्वरेण or स्खलितवाचा वद् (c. 1. वदति -दितुं)

Hum! *interj.* हुम्, हूम्, आ, आम्, हा, अहो, अहोवत, माधत्, किं.

Hum, *s.* (Buzzing sound) कलः, कलरवः, कलकलः, कलस्वरः, रुतं, विरुतं, रावः, विरावः, गुञ्जनं, गुञ्जितं, मर्मरः, झङ्कारः, रणत्कारः; 'of bees,' अलिविरावः, अलिविरुतं

Human, *a.* मानुषः -षी -षं, मानुषिकः -की -कं, मानवीनः -ना -नं, मानवीयः -या -यं, पौरुषः -षी -षं, पौरुषेयः -यी -यं, जनकीयः -या -यं, नागरः -री -रं, मनुष्यजातीयः -या -यं, लौकिकः -की -कं, 'human nature,' पुरुषत्वं -ता, मनुष्यत्वं -ता, मानुष्यं, मानुषत्वं; 'human race,' मनुष्यजातिः *f.*, मनुष्यवर्गः, नृजातिः *f.*; 'human form,' नररूपं, 'human art,' मनुष्यकला, 'a human brute,' पुरुषपशुः *m.*

Humane, *a.* परोपकारशीलः -ला -लं, परोपकारी -रिणी -रि (न्), परहितैषी -षिणी -षि (न्), परहितः -ता -तं, परहितकामः -मा -मं, उपकारपरः -रा -रं, दयालुः -लुः -लु, कृपालुः -लुः -लु, कारुणिकः -की -कं, सकरुणः -णा -णं, दयाशीलः -ला -लं, करुणाशीलः -ला -लं, करुणात्मा -त्मा -त्म (न्), करुणार्द्रः -द्रा -द्रं, अनुकम्पी -म्पिनी -म्पि (न्), सानुकम्पः -म्पा -म्पं, सर्व्वभूतानुकम्पकः -का -कं, [illegible] -ला -लं [illegible]

वान् -वती -वत् (त्). सुदयः -या -यं. सुशीलः -ला -लं, दीनानुकम्पनः -ना -नं, सदयः -या -यं, सानुक्रोशः -शा -शं. दयावान् -वती -वत् (त्), अनुशंसः -सा -सं. अनुकम्पावेशी -शिनी -शि (न्).

HUMANELY, *adv.* सकरुणं. सदयं. सानुकम्पं, करुणं, दयाशीलत्वात्, कृपालुवत्, परहितेच्छया.

HUMANIST, *s.* व्याकरणः, शास्त्रज्ञः, ग्रन्थशास्त्रवित् *m.*, विद्वज्जनः.

HUMANITY, *s.* (Benevolence, compassion) दया, दयाशीलता, दयालुता, कारुण्यं, करुणा, करुणाशीलत्वं, अनुकम्पा, कृपा, परहितेच्छा, परोपकारशीलता, हितकाम्या, परकाम्यता, कृपालुता, सानुकम्पता, सानुक्रोशत्वं.—(Nature of man) पुरुषता -त्वं, मनुष्यता, मनुष्यत्वं, मानुष्यं, मानवत्वं, नरत्वं.

To HUMANIZE, *v. a.* शिष्टाचारान् or सामाजिकाचारान् शिक्ष् (c. 10. शिक्षयति -यितुं) or शास् (c. 2. शास्ति, शासितुं), शिष्टीकृ, सुशीलीकृ, विनीतं -तां -तं कृ, सभ्यं -भ्यां -भ्यं कृ.

HUMANKIND, *s.* मनुष्यजातिः *f.*, नृजातिः *f.*, मनुष्यवंशः, कृत्स्नलोकः.

HUMANLY, *adv.* पुरुषवत्, मनुष्यवत्, नरवत्, मानुषवत्, मानुषव्यवहारेण.

HUMBIRD or HUMMING BIRD, *s.* अत्यल्पाकारो नानावर्णः सुन्दरपक्षिभेदः.

HUMBLE, *a.* नम्रबुद्धिः -द्धिः -द्धि, नम्रचेताः -ताः -तः (स्), नम्रः -म्रा -म्रं, विनयः -या -यं, नम्रशीलः -ला -लं, विनयचेताः &c., विनीतः -ता -तं, विनयी -यिनी -यि (न्), विनीतः -ता -तं, अविनयः -या -यं, निर्विण्णः -ण्णा -ण्णं, निर्विण्णचेताः &c., अगर्वः -र्वा -र्वं, गर्वहीनः -ना -नं, दर्पहीनः -ना -नं, दर्परहितः -ता -तं, दम्भरहितः -ता -तं, अभिमानः -ना -नं, निरहङ्कारः -रा -रं, अनहङ्कारी -रिणी -रि (न्), अनहङ्कृतः -ता -तं, निरहङ्कारी &c., निरभिमानः -ना -नं, अभिमानरहितः -ता -तं, अनभिमानः -ना -नं, अनभिमानी -निनी -नि (न्), अनुद्धतः -ता -तं, अल्पात्मा -त्मा -त्म (न्).—(Low) अपकृष्टः -ष्टा -ष्टं, नीचः -चा -चं, अधमः -मा -मं, प्राकृतः -ती -तं, क्षुद्रकः -का -कं.

To HUMBLE, *v. a.* अपकृष् (c. 1. -कर्षति, c. 6. -कृषति -क्रष्टुं), नम् (c. 10. नमयति -यितुं), अवनम्, नम्रीकृ, भञ्ज् (c. 10. -भञ्जयति -यितुं), भ्रंश् (c. 10. भ्रंशयति -यितुं), अभिभू (c. 1. -भवति -वितुं), तिरस्कृ (c. 10. -कारयति -यितुं), दर्पं or गर्वं भञ्ज् (c. 7. भनक्ति, भंक्तुं) or हृ (c. 1. हरति, हर्तुं).

HUMBLE-BEE, *s.* गुञ्जकृत् *m.*, भ्रमरो ऽलि *m.* (न्), पुष्पलिट्, भ्रमरः.

HUMBLED, *p. p.* भग्नदर्पः -र्पा -र्पं, भग्नगर्वः -र्वा -र्वं, हृतगर्वः -र्वा -र्वं, अभिभूतः -ता -तं, पराभूतः -ता -तं, नामितः -ता -तं, नम्रीकृतः -ता -तं, नामितः -ता -तं.

HUMBLENESS, *s.* बुद्धिनम्रता, नम्रता, विनयता, नम्रशीलता, विनयः, विनीतिः *f.*, विनतिः *f.*, अधृष्टता, अनहङ्कारः, अगर्वः, गर्वहीनता, दर्पहीनता, अनभिमानता, अपकृष्टता.

HUMBLING, *s.* अभिभवः, अभिभूतिः *f.*, अपकर्षः -र्षणं, दर्पभङ्गः, मानभङ्गः, दर्पहरणं, नम्रीकरणं.

HUMBLING, *a.* दर्पघ्नः -घ्ना -घ्नं, दर्पहरः -रा -रं, मानहरः -रा -रं.

HUMBLY, *adv.* सविनयं, नम्रचेतसा, नम्रं, विनयं, दर्पं विना, गर्वं विना, अगर्वेण, निरभिमानेन, अहङ्कारं विना, सनिर्वेदं, निर्विण्णं, अनुद्धतं, कृपणं.

HUMBUG, *s.* प्रतारणं -णा, कपटः -टं, व्याजः, प्रवञ्चना, छलं, कैतवं.

To HUMBUG, *v. a.* प्रतृ (c. 10. -तारयति -यितुं), वञ्च् (c. 10. वञ्चयति -यितुं), मुह् (c. 10. मोहयति -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), अभिसन्धा (c. 3. -दधाति -धातुं).

HUM-DRUM, *a.* मन्दः -न्दा -न्दं, विरसः -सा -सं, अरसिकः -का -कं, मन्दुः -न्दुः -न्दु, जडकरः -रा -रं, जडः -डा -डं.

HUMECTATION, *s.* क्लेदनं, आर्द्रीकरणं, आप्लावनं, तेमनं, समुन्दनं.

To HUMECTATE, *v. a.* क्लिद् (c. 10. क्लेदयति -यितुं), आप्लु (c. 10. -आप्लावयति -यितुं), आर्द्रीकृ, उन्द् (c. 7. उनत्ति, उन्दितुं), समुन्द्, तेमीकृ.

HUMERUS, *s.* प्रगण्डः.

HUMID, *a.* आर्द्रः -र्द्रा -र्द्रं, सार्द्रः -र्द्रा -र्द्रं, क्लिन्नः -न्ना -न्नं, क्लेदितः -ता -तं, सजलः -ला -लं, क्लिन्नः -न्ना -न्नं, उन्नः -न्ना -न्नं, अनुष्णः -ष्णा -ष्णं, स्नेहः -हा -हं.

HUMIDITY, *s.* आर्द्रता, आर्द्रत्वं, क्लेदः, संक्लेदः, क्लिन्नता, सजलता, तेमः, स्नेहः, तैमित्यं, अनुष्णत्वं, उन्नता.

HUMILIATING, *a.* दर्पघ्नः -घ्ना -घ्नं, दर्पहरः -रा -रं, मानहरः -रा -रं.

HUMILIATION, *s.* मानभङ्गः, मानहानिः *f.*, दर्पभङ्गः, दर्पहरणं, अपकर्षः -र्षणं, अभिभवः, अभिभूतिः *f.*, नम्रता, नम्रीकरणं, विनतिः *f.*, अवनतिः *f.*, विनयनं, मूर्छनं.

HUMILITY, *s.* विनयः, विनीतिः *f.*, विनतिः *f.*, नम्रता, विनयता, नम्रबुद्धिता, बुद्धिनम्रता, अनहङ्कारः, अगर्वः, गर्वहीनता, दर्पहीनता, अनभिमानं, नम्रत्वं, दैन्यं, दीनता, निर्वेदः, निर्विण्णता, अनौद्धत्यं, आनतिः *f.*, नतिः *f.*, अपकृष्टता, कृपणता, कार्पण्यं.

HUMORIST, *s.* परिहासवेदी *m.* (न्), परिहासशीलः, रसिकः, रसज्ञः, वैहासिकः, हासकरः, विदूषकः, नर्मः, नर्मसचिवः, रागी *m.* (न्).

HUMOROUS, *a.* रसिकः -का -कं, रसी -सिनी -सि (न्), रसवान् -वती -वत् (त्), सरसः -सा -सं, परिहासशीलः -ला -लं, हासकरः -री -रं, हास्यजनकः -का -कं, हास्यः -स्या -स्यं, सपरिहासः -सा -सं, नर्मवादी -दिनी -दि (न्), विनोदी -दिनी -दि (न्), कौतुकी -किनी -कि (न्).

HUMOROUSLY, *adv.* सरसं, रसिकव्यापारेण, हास्यप्रकारेण, रसिकं, हास्यं, विनोदार्थं, परिहासबुद्ध्या.

HUMOROUSNESS, *s.* रसिकत्वं, रसवत्त्वं, सरसत्वं, परिहासशीलता, हास्यता, सपरिहासता, हास्यजनकता, विनोदकता.

HUMOURSOME, *a.* (Peevish) वक्रभावः -वा -वं, वक्रशीलः -ला -लं.—(Full of whims) चपलप्रकृतिः -तिः -ति, चपलभावः -वा -वं, चलचित्तः -त्ता -त्तं, छन्दोवान् -वती -वत् (त्), हैकमात्रस्वभावः -वा -वं.

HUMOUR, *s.* (Moisture) क्लेदः -दं, संक्लेदः, स्नेहः तेमः, स्वल्पक्लेदः, आर्द्रत्वं, आर्द्रता, क्लेदः, आर्द्रता.—(Fluid) रसः, नर्म; 'of the body,' धातुः *m.*, 'disorder of the humours,' दोषः; 'vitiation of the three humours,' दोषत्रयं.—(Temper of mind) भावः, स्वभावः, शीलः, शीलता -त्वं, प्रकृतिः *f.*; 'good humour,' सद्भावः, सत्प्रकृतिः *f.*, सुशीलता, सुप्रकृतिः *f.*; 'bad humour,' कुभावः, वक्रभावः; 'in a bad humour,' दुष्प्रकृतिः -तिः -ति, दुःशीलः -ला -लं, वक्रभावः -वा -वं.—(Whim) छन्दस् *n.*, छन्दं, मनोलौल्यं, बुद्धिलौल्यं, बुद्धिविलासः, बुद्धिचापल्यं, चापल्यं, तरङ्गः, लहरी, कामोर्मिः *m.*—(Wit) रसः, रसिकता, रसिता, नर्म, वैदग्ध्यं, कौतुकं.

To HUMOUR, *v. a.* अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), अनुकूल् (c. 10. -कूलयति -यितुं), सन्तुष् (c. 10. -तोषयति -यितुं), परितुष्, अनुरुध् (c. 4. -रुध्यते -द्धि -रोद्धुं), आराध् (c. 10. -राधयति -यितुं), अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), प्रसद् (c. 10. -सादयति -यितुं), अनुरञ्ज् (c. 10. -रञ्जयति -यितुं), भज् (c. 1. भजति -ते, भक्तुं), लल् (c. 10. लालयति -यितुं), 'to humour one's inclination,' छन्दोऽनुवृत्.—(Suit) युज् (c. 4. युज्यते, c. 10. योजयति -यितुं).

HUMOURED, *p. p.* अनुवृत्तः -त्ता -त्तं, अनुरुद्धः -द्धा -द्धं, अनुगृहीतः -ता -तं, आराधितः -ता -तं, प्रसादितः -ता -तं, सन्तोषितः -ता -तं.

HUMOURING, *s.* (Indulging) अनुवर्त्तनं, अनुवृत्तिः *f.*, छन्दोऽनुवृत्तं, अनुरोधः -धनं, सन्तोषणं, तुष्टिकरणं, तुष्टिदानं, आराधनं, प्रसादनं, प्रीतिकरणं, लालनं.

HUMP, *s.* गडुः *m.*, स्वगुः *m.*, पृष्ठग्रन्थिः *m.*; 'of a bull, &c.,' ककुद् *f.*, ककुदः -दं, अंसकूटः, 'having a hump,' ककुद्मान् -द्मती -द्मत् (त्), ककुद्मी -द्मिनी -द्मि (न्), कुब्जः -ब्जा -ब्जं.

Hump-backed, *a.* कुब्जः -ब्जा -ब्जं, कुब्जकः -का -कं, गडुः -डुः -डु, गडुरः -रा -रं, गडुलः -ला -लं. वक्रपृष्ठः -ष्ठा -ष्ठं. वक्रस्कन्धः -न्धा -न्धं

Hunch, *s.* (A hump) गडुः *m.*, कुब्जः *m.* —(A lump) पिण्डः, गण्डका, घनः.

To **hunch**, *v. a.* कफोणिना तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं).

Hunch-backed, *a.* गडुपृष्ठः -ष्ठा -ष्ठं. See Hump-backed.

Hundred, *a.* शतं, शतसंख्यकः -का -कं. एकाधिकनवनवतिसंख्यकः -का -कं, शतकः -का -कं, दशदशतिः *f.* The word शतं may be used with the nom. pl. or gen. pl., as, 'a hundred ancestors,' शतं पितरः or शतं पितॄणां; or in comp., as 'a hundred years,' वर्षशतं, शतवर्षं; 'a hundred and fifty,' सार्द्धशतं; 'a hundred thousand,' लक्षं -क्षा; 'a hundred millions,' अर्बुदं; 'a hundred years old,' शतायुः -युः -युः (स्).

Hundred, *s.* शतं, शतकं, दशतिः *f.*; 'by hundreds,' शतशस्.

Hundredth, *a.* शततमः -मी -मं, शतः -ती -तं.

Hunger, *s.* क्षुधा, क्षुत् *f.* (ध्), बुभुक्षा, जिघत्सा, अशनेच्छा, आहारेच्छा, अशनायाः -यितं, अशनाया, क्षुत्पिपासा: 'hunger and thirst,' क्षुत्पिपासा or -से *f.* du.

To **hunger**, *v. n.* क्षुध् (c. 4. क्षुध्यति, क्षोद्धुं), भुज् in des. (बुभुक्षति -ते -क्षितुं), घस् in des. (जिघत्सति -त्सितुं), अशन (nom. अशनायति -यितुं), अन्नं or आहारं लभ् in des. (लिप्सते -प्सितुं); 'to hunger after righteousness,' धर्माय क्षुध्.

Hunger-bit, **hunger-bitten**, *a.* क्षुधार्त्तः -र्त्ता -र्त्तं, क्षुत्पीडितः -ता -तं.

Hungered, *a.* क्षुधितः -ता -तं, बुभुक्षितः -ता -तं, क्षुधार्त्तः -र्त्ता -र्त्तं.

Hungerly, *a.* अन्नार्थी -र्थिनी -र्थि (न्), भोजनार्थी &c., आहारार्थी &c.

Hunger-starved, *a.* क्षुदवसन्नः -न्ना -न्नं क्षुधावसन्नः -न्ना -न्नं, क्षुधार्दितः -ता -तं.

Hungry, *a.* क्षुधार्त्तः -र्त्ता -र्त्तं, क्षुधितः -ता -तं, क्षुत्पीडितः -ता -तं, क्षुधापीडितः -ता -तं, क्षुधातुरः -रा -रं, बुभुक्षितः -ता -तं, बुभुक्षुः -क्षुः -क्षु, जिघत्सुः -त्सुः -त्सु, आहारार्थी -र्थिनी -र्थि (न्), अन्नार्थी &c., अन्नलिप्सुः -प्सुः -प्सु, आहारलिप्सुः -प्सुः -प्सु, अशनायितः -ता -तं, क्षुधाव्याकुलः -ला -लं; 'hungry and thirsty,' क्षुत्पिपासितः -ता -तं, क्षुत्तृष्णोपपीडितः -ता -तं.—(Lean) कृशः -शा -शं, अपुष्टः -ष्टा -ष्टं, विपुष्टः -ष्टा -ष्टं

Hunks, *s.* कृपणः, कदर्य्यः, धनलोभी *m.* (न्), कितवः.

To **hunt**, *v. a.* and *n.* (Chase) मृग् (c. 10. मृगयते -यितुं), मृगयां कृ, आखिट् (c. 1. -खेटति -टितुं), परिकल् (c. 10. -कालयति -यितुं).—(Pursue, follow after, search for) अनुसृ (c. 1. -सरति -सर्तुं), अनुधाव् (c. 1. -धावति -वितुं), पश्चाद्धाव्, अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), पश्चाद्वृत्, अन्विष् (c. 4. -इष्यति -एषितुं).

Hunt, *s.* (Chase) मृगया, मृगव्यं, खेटः -टं, आखेटः, आखोदनं, आच्छोदनं, पापर्द्धिः *f.*, पराद्धिः *f.*—(Pursuit, search) अनुसरणं, अनुधावनं, अन्वेषणं -णा, पर्य्येषणा, मृगणं, मार्गणं.

Hunted, *p. p.* मृगितः -ता -तं, अनुसृतः -ता -तं, अनुधावितः -ता -तं, आखेटितः -ता -तं, अन्विष्टः -ष्टा -ष्टं, अन्वेषितः -ता -तं.

Hunter, *s.* (One who pursues wild animals) व्याधः, मृगयुः *m.*, लुब्धकः, मृगवधाजीवः, मृगजीवनः, आखेटकः, मृगादिघातुकः *m.* (तृ), जैवातृकः, व्याधः, शाकुनिकः, 'with nets,' जालिकः.—(Horse) मृगयाश्वः.

Hunting, *s.* मृगया, मृगव्यं, खेटः -टं, आखेटः, आखोदनं, आच्छोदनं, पापर्द्धिः *f.*, पराद्धिः *f.*; 'hunting-knife,' कर्त्तरिका; 'hunting-dog,' [illegible] *m.* (न्), मृगयाकुक्कुरः; 'hunting appointments,' [illegible].—(Pursuit, search) अनुसरणं, अनुधावनं, अन्वेषणं -णा, पर्य्येषणा, मृगणं, मार्गणं.

Hunting-horn, *s.* मृगयाशङ्खः, मृगव्यशङ्खः, व्याधवादितं शृङ्गं or विषाणं

Huntress, *s.* व्याधी *f.*, व्याधपत्नी, आखेटकी, मृगयानुसारिणी

Huntsman, *s.* मृगयाकारी *m.* (न्), मृगव्यकारी *m.*, मृगयुः *m.*, आखेटकः

Huntsmanship, *s.* मृगयाविद्या, मृगव्यविद्या, आखेटविद्या.

Hurdle, *s.* काष्ठशलाकानिर्मितम् अवरोधकं or आवरणं, कम्भकारः.

Hurdy-gurdy, *s.* कर्कशशब्दः सतन्त्रीवाद्यविशेषः.

To **hurl**, *v. a.* क्षिप् (c. 6. क्षिपति, क्षेप्तुं), प्रक्षिप्, अस् (c. 4. अस्यति असितुं), प्रास्, ईर् (c. 10. ईरयति, -यितुं), उदीर्, समीर्, मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, सृज् (c. 6. सृजति, स्रष्टुं), अवसृज्, पत् (c. 10. पातयति -यितुं), प्रहृ (c. 1. -हरति -ते -हर्त्तुं), प्रेष् (c. 10. प्रेषयति -यितुं rt. इष्), उद्गुर् (c. 6. -गुरते -रितुं); 'to hurl stones,' शिलाप्रहरणं कृ; 'is hurled down,' निपात्यते.

Hurl, *s.* (Throw) क्षेपः -पणं, असनं, पातनं.—(Tumult) तुमुलं, कोलाहलः, विप्लवः, डिम्बः.

Hurled, *p. p.* क्षिप्तः -प्ता -प्तं, प्रक्षिप्तः -प्ता -प्तं, अस्तः -स्ता -स्तं, प्रास्तः -स्ता -स्तं, पातितः -ता -तं, ईरितः -ता -तं, विसृष्टः -ष्टा -ष्टं.

Hurler, *s.* क्षेपकः, क्षेप्ता *m.* (प्तृ), असिता *m.* (तृ), प्रासकः.

Hurling, *s.* क्षेपणं, असनं, पातनं; 'of stones,' शिलाप्रहरणं.

Hurly-burly, *s.* कोलाहलः, हलहलाशब्दः, कलकलः -लकः, तुमुलं.

Hurrah, *exclam.* जयशब्दः, प्रशंसाशब्दः, आनन्दशब्दः.

Hurricane, *s.* चक्रवातः, प्रभञ्जनः, उत्पातवातः, अतिवातः, झञ्झा, वातावेगः, प्रचण्डवातः, प्रचण्डवायुः *m.*, वाताली, वातरूषः, वातगुल्मः, झञ्झावातः, झञ्झा, जवानिलः, भूमिः *m.*, निर्घातः, पवनाघातः.

Hurried, *a.* त्वरितः -ता -तं; 'spoken fast,' त्वरितोदितः -ता -तं, निरस्तः -स्ता -स्तं

Hurriedly, *adv.* त्वरितं, सत्वरं, द्रुतं, शीघ्रं, अविलम्बितं, सरभसं.

To **hurry**, *v. a.* त्वर् (c. 10. त्वरयति -यितुं), सन्त्वर्.—(Hurry along, drive, impel) कृष् (c. 1. कर्षति, क्रष्टुं), समाकृष्, प्रेर् (c. 10. -ईरयति -यितुं), प्रणुद् (c. 6. -णुदति -णोत्तुं).

To **hurry**, *v. n.* त्वर् (c. 1. त्वरते -रितुं), सन्त्वर्, अभित्वर्, शीघ्र (nom. शीघ्रायते), सत्वरं or शीघ्रं गम् (c. 1. गच्छति, गन्तुं) or चर् (c. 1. चरति -रितुं).

Hurry, *s.* त्वरा, सम्भ्रमः, संवेगः, आवेगः, वेगः, रभसः, क्षिप्रकारिता, त्वरितगतिः *f.*, आशुगमनं, शीघ्रता.—(Bustle) सम्भ्रमः, आकुलत्वं, व्यग्रता, व्यस्तता; 'in a hurry,' त्वरितः -ता -तं, सम्भ्रमी -मिणी -मि (न्), सम्भ्रान्तः -न्ता -न्तं, आकुलः -ला -लं.

Hurry-skurry, *adv.* ससम्भ्रमं, सरभसं, सावेगं, व्याकुलं, सम्भ्रमेण.

To **hurt**, *v. a.* हिंस् (c. 7. हिनस्ति, c. 1. हिंसति -सितुं), विहिंस्, उपहिंस्, आहिंस्, क्षतं कृ, क्षतिं कृ, क्षण् (c. 8. क्षणोति -णितुं), परिक्षण्, अपकृ, द्रोहं कृ, अर्द् (c. 10. अर्दयति -यितुं), समर्द्, पीड् (c. 10. पीडयति -यितुं), व्यथ् (c. 10. व्यथयति -यितुं), रिष् (c. 1. रेषति, c. 4. रिष्यति, रेषितुं, रेष्टुं), क्षि (c. 5. क्षिणोति, c. 1. क्षयति, क्षेतुं), हन् (c. 2. हन्ति -न्तुं), विहन्, अपहन्, तुद् (c. 6. तुदति, तोत्तुं), नश् (c. 10. नाशयति -यितुं), दुष् (c. 10. दूषयति -यितुं), द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं); 'you hurt me by your sharp words,' तुदसि मे मर्म्माणि वाक्शरैः.

Hurt, *s.* क्षतं, क्षतिः *f.*, परिक्षतं, हिंसा -सनं, अपकारः, अपकृतं, द्रोहः, अभिद्रोहः, अपायः, क्षयः, उपघातः, पीडा, व्यथा, आघातः, बाधः, नाशः, दोषः, विहेठः -ठनं, हानिः *f.*, रिष्टं.

Hurt, *p. p.* क्षतः -ता -तं, परिक्षतः -ता -तं, विक्षतः -ता -तं, हिंसितः -ता -तं, विहिंसितः -ता -तं, अपकृतः -ता -तं, कृतापकारः -रा -रं, अर्दितः

-ता -तं, पीडित: -ता -तं, सम्पीडित: -ता -तं, व्यथित: -ता -तं, विहत: -ता -तं, दूषित: -ता -तं, दुष्ट: -ष्टा -ष्टं.

H[illegible] क्षतकारी m. (न्), अपकारी m. हिंसक: द्रोही m. (न्).

H[illegible] हिंस्र: -स्रा -स्रं, हिंसालु: -लु: -लु, हिंसालुक: -का -कं, हिंसात्मक: -का -कं, अपकारी -रिणी -रि (न्), अपकारक: -का -कं, आपकर: -री -रं, क्षतिकारी &c., क्षतिजनक: -का -कं, अहित: -ता -तं, नृशंस: -सा -सं, शरारु: -रु: -रु, अनिष्टक: -का -कं, घातुक: -का -कं, उपघातक: -का -कं, हानिजनक: -का -कं, बाधक: -का -कं, सबाध: -धा -धं, रिष्व: -ष्वा -ष्वं, अनिष्टजनक: -का -कं, द्रोही -हिणी -हि (न्).

Hurtfully, adv. हिंसापूर्व्वं, हिंसया, क्षतपूर्व्वं, सक्षतं, हिंस्रं, हिंस्रप्रकारेण, अहितं, यथा हिंसा क्रियते तथा, यथा क्षतं जायते तथा.

Hurtfulness, s. हिंस्रता -त्वं, हिंसालुता, क्षतिकारिता, अहितत्वं.

To hurtle, v. a. समाहन् (c. 2. -हन्ति -न्तुं), परस्परसमाघातं कृ.—(Whirl) भ्रम् (c. 10. भ्रमयति -यितुं).

Hurtless, a. अहिंस्र: -स्रा -स्रं, अनपकारी -रिणी -रि (न्).

Husband, s. (Man married to a woman) पति: m., भर्त्ता m. (र्तृ), स्वामी m. (न्), वर:, वोढा m. (ढृ), विवोढा m., वरयिता m. (तृ), कान्त:, परिणेता m. (तृ), परिणायक:, नाथ:, दयित:, इष्ट:, प्रिय: -यतम:, धव:, उपयन्ता m. (न्तृ), परिग्रहीता m. (तृ), क्षेत्रिक:, हृदयेश:, प्राणेश:, जीवितेश:, प्राणनाथ:, प्राणाधिनाथ:, सेक्ता m. (क्तृ); 'husband and wife,' दम्पती m. du., जम्पती m. du., भार्य्यापती m. du., जायापती m. du.; 'a husband's brother,' देवा m. (वृ), देव:, देवर:, देवल:, 'a second husband,' दिधिषु: m. -षू: m.—(Economist) परिमितव्ययी m. (न्), अल्पव्ययी m.—(Cultivator) कृषक:, कृषिकारी m. (न्).

To husband, v. a. (Economize) परिमितव्ययं कृ, न व्ययीकृ, न विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं); 'to husband one's time,' न कालक्षेपं कृ.—(Cultivate) कृष् (c. 6. कृषति, क्रष्टुं).

Husbandless, a. पतिहीना, भर्तृहीना, भर्तृरहिता, निर्नाथा, अनाथा.

Husbandly, a. परिमितव्यय: -या -यं, गृहव्यापाराभिज्ञ: -ज्ञा -ज्ञं.

Husbandman, s. (Cultivator, farmer) कृषक:, कृषिक:, कर्षक:, कार्षक:, कार्षिक:, कृषीवल:, क्षेत्रकर्षक:, क्षेत्रिक:, क्षेत्री m. (न्), क्षेत्राजीव:, कृषिजीवी m. (न्), हालिक:, क्षेत्रपति: m., कृषाण:, कीनाश:, सार्द्दिक:.—(Man of the third tribe) वैश्य:, विट् m. (श्), ऊरव्य:, ऊरुज:, अर्य्य:, भूमिस्पृक् m. (श्).

Husbandry, s. (Agriculture) कृषि: f., कार्षि: f., कृषिकर्म्म n. (न्), कृषिविद्या, ऋतं, वैश्यक्रिया, वैश्यवृत्ति: f., हलभृति: f., कर्षणं, कृष्टि: f., प्रमृतं.—(Frugality, economy) परिमितव्यय:, गृहकर्म्मनय:, गृहकर्म्मनिर्वाहविद्या.

Hush, exclam. शान्तं, शान्तं शान्तं, शब्दं मा कुरु, तूष्णीम्भव, मौनीभव, निःशब्दो भव, यच्छ यम, वाग्रोधं कुरु, हुम्, नीचैस्.

To hush, v. a. शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, सान्त्व् (c. 10. सान्त्वयति -यितुं), शब्दशान्तिं कृ, शब्दरोधं कृ, निःशब्दीकृ.

To hush, v. n. शम् (c. 4. शाम्यति, शमितुं), उपशम्, प्रशम्, प्रसद् (c. 1. -सीदति -सत्तुं), शान्तीभू, निःशब्दीभू, मौनीभू, तूष्णीम्भू.

Hushed, p. p. शान्त: -न्ता -न्तं, शमित: -ता -तं, प्रशमित: -ता -तं.

Husk, s. तुष: -षा, तुस:, त्वक् f. (च्), कञ्चुक:, कोश:, पुट:, आवेष्टनं; 'of corn,' धान्यत्वक् f. (च्), धान्यतुष:.—(Chaff) बुसं, बुषं, तुच्छं, तुच्छधान्यकं, धान्यत्वक्, 'rice in husk,' शुष्कान्नं.

To husk, v. a. निस्तुष (nom. निस्तुषयति -यितुं), निस्तुषीकृ, तुषीकृ, निस्त्वच (nom. निस्त्वचयति -यितुं), निस्त्वचीकृ, त्वच (nom. त्वचयति -यितुं), तुषं or त्वचं हृ (c. 1. हरति, हर्त्तुं).

Husked, p. p. [illegible] निस्तुषित: -ता -तं, निस्तुष: -षा -षं, निस्त्वच: -चा -चं, त्वचीकृत: -ता -तं.

Husking, s. [illegible] तुषहरणं.

Husky, a. (Having husks, consisting of husks) सतुष: -षा -षं, बहुतुषवान् -वती -वत् (त्), तुषमय: -यी -यं, त्वङ्मय: -यी -यं.—(Rough, harsh) रूक्ष: -क्षा -क्षं, कर्कश: -शा -शं; 'in sound,' रूक्षस्वर: -रा -रं.

Hussar, s. अश्वारूढ: सैन्य:, अश्वारोही m. (न्), सादी m. (न्).

Hussy, s. पापीयसी, दासीपुत्री, बन्धकी, दुष्टा स्त्री.

Hustings, s. काष्ठनिर्म्मितो मञ्चविशेषो यत्र नगरप्रतिनिधिवरणं क्रियते.

To hustle, v. a. निरस् (c. 4. -रस्यति -असितुं), निःसृ (c. 10. -सारयति -यितुं), निराकृ, बहिष्कृ, सबाध् (c. 1. -बाधते -धितुं), संक्षुभ् (c. 10. -क्षोभयति -यितुं).

Huswife, s. गृहिणी, कुटुम्बिनी, गेहिनी, स्वामिनी, गृहमेधिनी, गृहव्यापारकुशला.

Huswifery, s. गृहव्यापारकुशलता, गृहकार्य्यदक्षता, गृहकर्म्मनिपुणता, गृहमेधित्वं, परिमितव्यय:.

Hut, s. उटज:, कुटीर:, पर्णशाला, कुटि:, कुटिरं, सहोटज:, तृणौकस् n., तृणकुटी, कुट्टिम:, वेश्म n. (न्), कायमानं.

Hutch, s. (Bin) धान्यकोष्ठकं, कुशूल:, पिट:.—(For rabbits) शशकागारं, शशकरक्षणी.

Huzza, s. जयशब्द:, जयनाद:, आनन्दशब्द:, प्रणाद:, जयध्वनि: m., जयकोलाहल:, जयारव:, प्रशंसानाद:.

To huzza, v. n. जयशब्दं कृ, प्रणादं कृ, जयप्रणादं कृ.

Hyacinth, s. सुगन्धपुष्प ओषधिभेद:, सुगन्धिकुसुमं.

Hybrid, a. सङ्कीर्णजाति: -ति: -ति, सङ्कीर्णजातीय: -या -यं, सङ्करजात: -ता -तं, सङ्कीर्ण: -र्णा -र्णं.

Hydra, s. जलव्याल:, जलभुजङ्गम:, कल्पितो बहुमस्तकविशिष्टो वृहत् जलव्याल:.

Hydraulic, hydraulical, a. जलचलनविषय: -या -यं, चलनजलसम्बन्धी -न्धिनी -न्धि (न्), जङ्गमजलसम्बन्धी &c.

Hydraulics, s. चलनजलविद्या, जङ्गमजलविद्या, जलचलनविषया विद्या.

Hydrocele, s. कोषवृद्धि: f., मुष्कवृद्धि: f., कुरण्ड:.

Hydrocephalus, s. जलमस्तक:, उदकमस्तक:, मस्तकाध्मानं.

Hydrodynamics, s. जलगुणविषया विद्या, जलशक्तिविषया विद्या.

Hydrogen, s. जलकार:, जलजं, जलजो वायु:, जलजो वाष्प:.

Hydrographer, s. समुद्रवेलादिपत्रलेखक:, नदीसमुद्रादिपत्रलेखक:, समुद्रलेखक:, समुद्रालेख्यकृत् m., वेलालेख्यकृत् m.

Hydrographical, a. समुद्रलिखनसम्बन्धी -न्धिनी -न्धि (न्).

Hydrography, s. समुद्रलिखनं, समुद्रलिखनविद्या, नदीसमुद्रादिपत्रलिखनं, समुद्रवेलादिविवरणं.

Hydromancy, s. जलादिलक्षणात् शुभाशुभदर्शनं or भविष्यद्भावं or अनागतवृत्तसूचनं or भाविविषयप्रदर्शनं.

Hydromel, s. जलसंसृष्टं मधु, जलमधु n., जलमाक्षिकं, मधु n.

Hydrometer, s. जलपरिमापकयन्त्रं, जलमापनी.

Hydropathy, s. शीतजलप्रयोगेण रोगचिकित्सा, जलोपचार:.

Hydrophobia, s. जलत्रासरोग:, जलभयं, अलर्कदंशनप्रयुक्तो जलभयरोग:.

Hydropic, hydropical, a. जलोदरी -रिणी -रि (न्), जलोदरीय: -या -यं.

Hydropsy, s. जलोदरं -री, दकरी, उदकोदरं, आध्मानं, जठरामय:.

Hydrostatics, s. स्थावरजलविषया or अजङ्गमद्रवविषया विद्या, जलादिद्रवद्रव्यधर्म्मविषया विद्या.

Hyemal, a. शीतकालीन: -ना -नं, हैमन: -नी -नं -न्तिक: -की -कं.

Hyena, s. तरक्षुः m., तरक्षुकः, तरक्षः, तर्क्षुः m., मृगादनः, मृगधूर्त्तकः, गुडगुडकः.

Hygrometer, s. क्लेदपरिमाणयन्त्रं, तोयपरिमापकं.

Hymen, s. विवाहाधिष्ठात्री देवता, विवाहाधिष्ठाता m. (तृ).

Hymeneal, a. वैवाहिकः -की -कं, विवाहीयः -या -यं, वध्वाहिकः -की -कं, पाणिग्रहणिकः -की -कं.

Hymn, s. स्तुतिगीतं, ईश्वरस्तुतिगीतं, स्तुतिगानं, स्तोत्रं, ऋक्गीतं, साम, ऋचिकागानं, गाथा, गेयं, गीतिः f., स्तोत्रं, सूक्तं: 'a cluster of hymns,' गुच्छः m., स्तबकः, प्रगाथ m. (थ्).

To hymn, v. a. (Celebrate in song) स्तुतिगानेन स्तु (c. 2. स्तौति, स्तोतुं) or स्तुतिं कृ or गद्गद (c. 1. -अर्चति -र्चितुं), उपवीणय (nom. उपवीणयति -यितुं).

To hymn, v. n. गै (c. 1. गायति गातुं), स्तु, गै, जुष् (nom. गुदयते), स्तुतिं पठ् (c. 1. पठति -ठितुं), स्तुतिपाठं कृ.

Hymned, p. p. स्तुतगीतः -ता -तं, स्तुतिगानसहितः -ता -तं, स्तुतः -ता -तं, संस्तुतः -ता -तं, स्तुतगीतः -ता -तं.

Hyp, s. विषादः, अवसादः, अवसन्नता, उद्वेगः, ग्लानिः f., खेदः.

To hyp, v. a. विषद् (c. 10.-षादयति -यितुं), विषादीकृ, ग्लानीकृ, खेदान्वितीकृ.

Hyperbole, s. अत्युक्तिः f., अतिशयोक्तिः f., विवक्षिः f., अतिवोक्तिः f., अतिरेकः, महापरिकल्पो, अत्युक्तम्, अत्यल्पगुणं, अतिकथनं, अत्युक्तिकथा, अत्यर्थोपन्यासः, अत्यर्थकथनं, अत्युक्तिका कथा.

Hyperbolic, hyperbolical, a. अत्युक्तियुक्तः -क्ता -क्तं, अत्युक्तिमान् -मती -मत् (त्), अधिकः -का -कं, अतिशयोक्तिपूर्णः -र्णा -र्णं, अतिशयोक्तिमयः -यी -यं, अत्युक्तिमयः -यी -यं.

Hyperbolically, adv. अत्युक्त्या, अत्युक्तिपूर्वं, अतिशयोक्त्या, अत्यतिशयेन.

To hyperbolize, v. n. अत्युक्तिं कृ, अतिशयोक्तिं कृ, अतिवर्णनं कृ, अतिशयोक्त्या वद् (c. 1. वदति -दितुं).

Hyperborean, a. उत्तरः -रा -रं, उत्तरदिक्स्थः -स्था -स्थं, उत्तरीयः -या -यं, उदक् -दीची -दक् (च्), उदीचीनः -ना -नं, उत्तरदिक्सम्बन्धी -न्धिनी -न्धि (न्): 'a hyperborean,' उत्तरदेशजः.

Hypercritic, s. अतिशयेन गुणदोषपरीक्षकः, दृष्टाभासी गुणदोषविवेचकः or दोषग्राही m. (न्), छिद्रान्वेषकः.

Hypercriticism, s. अतिशयेन गुणदोषपरीक्षा or गुणदोषविवेचनं, छिद्रता, अतिविवेचना.

Hyphen, s. समासचिह्नं, संयोगचिह्नं, समासमूलकं चिह्नं or चिह्नः.

Hypochondres, hypochondria, s. कुक्षिवायुः m., वायुरोगः, विषादः, चित्तखेदः, अवसादः, उद्वेगः.

Hypochondriac, hypochondriacal, a. कुक्षिवायुग्रस्तः -स्ता -स्तं, विषादी -दिनी -दि (न्), विषण्णः -ण्णा -ण्णं, अवसन्नः -न्ना -न्नं (न्), चिन्ताकुलः -ला -लं, उद्विग्नः -ग्ना -ग्नं.

Hypocrisy, s. कुहना, -निका, दम्भः, कुहकवृत्तिः f., धर्मध्वजः, धर्मध्वजिता, -ता, कपटधर्मः, धर्मविषये छद्म n. (न्), कपटवेशः or कपटवेषः, कुवृत्तिः f. -टी, धार्मिकता, धर्मकञ्चुकता, धार्मिकता, धार्मिकताभासः, व्याजः, छद्म.

Hypocrite, s. दम्भी m. (न्), दाम्भिकः, कुहकः, कुहकवृत्तिः m., कपटधर्मी m. (न्), कपटी m. (न्), धार्मिकवेषधारी m. (न्), वेशधारी m., धर्मध्वजी m. (न्), धार्मिकाभासः, धर्मलिङ्गी m. (न्), छद्मतापसः, कपटप्रवक्ता m. (न्), कपटतपस्वी m. (न्), छिद्रानुवृत्तिः m., छद्मवेशी m. (न्), कपटवेशी m. (न्), धर्मध्वजी m. (न्), वैडालव्रतिकः, कौसृतिकः, बकवृत्ती m. (न्), बकध्यानः, लोकरञ्जनार्थं धार्मिकवेषधारी m. (न्), धर्मध्वजः.

Hypocritical, a. दाम्भिकः -की -कं, दम्भी -म्भिनी -म्भि (न्), कुहकः -का -कं, कपटी -टिनी -टि (न्), धार्मिकः -की -कं, छद्मवेशी -शिनी -शि (न्), दाम्भिकः -की -कं, धर्मध्वजी -जिनी -जि (न्), धार्मिकाभासः -सा -सं.

Hypocritically, adv. कुहकया, दाम्भिकवत्, सदम्भं, सकपटं, छिद्मानुवृत्त्या.

Hypogastric, a. वस्तीयः -या -यं: 'hypogastric region,' वस्तिः m. f.

Hypothenuse, s. कर्णः, विकर्णरेखा.

Hypothesis, s. उपन्यासः, प्रतिज्ञा, कल्पना, पक्षः, सिद्धान्तोपन्यासः, अप्रमाणपूर्वकः उपन्यासः, अनुमानं, अनुमानं.

Hypothetic, hypothetical, a. अप्रमाणपूर्वकः -का -कं, अनुमानिकः -की -कं, काल्पनिकः -की -कं, औपन्यासिकः -की -कं, विकल्पितः -ता -तं.

Hypothetically, adv. अप्रमाणपूर्वकेन, अनुमानेन, औपन्यासिकं, विकल्पेन.

Hyson, s. चीनदेशजात कटुरसविशिष्ट ओषधिभेदः.

Hysteric, hysterical, a. मूर्च्छितः -ता -तं, मूर्च्छावान् -वती -वत् (त्), गर्भाशयोत्पन्नः, मूर्च्छापन्नः -न्ना -न्नं, मूर्च्छोपद्रुतः -ता -तं.

Hysterics, s. गर्भाशयोत्पन्ना मूर्च्छा or मूर्च्छा, अपतन्त्रकं or अपतन्त्रः.

I, pron. अहम् (अस्मद्); 'I myself' स्वयम्.

Iambic, s. छन्दः, अक्षरं पदं यस्य पूर्वाक्षरं लघु परिमाणापरं गुरु.

Ibex, s. पर्वतवासी छागभेदः, छागः, वस्तः, पर्वतच्छागः.

Ibis, s. पूर्व मिसरदेशे सम्पूज्यमानः कश्चित् पक्षिभेदः.

Ice, s. हिमं, हिमानी, हिमसंहतिः f., हिमसंहतम् उदकं, शीतमुदकं, घनजलं, हिमजलं, तुषारः, नीहारः, प्रालेयं, अवश्यायः.

To ice, v. a. हिमीकृ, तुषारीकृ, हिमकणं -णां -णं कृ.—(Cool with ice) हिमद्वारेण or तुषारद्वारेण शीतलीकृ or शिशिरीकृ or शीतय (nom. शीतयति -यितुं).

Iceberg, s. हिमपर्वतः, हिमराशिः m., तुषारपर्वतः, तुषारराशिः m., घनकराशिः.

Ice-bound, a. हिमबद्धः -द्धा -द्धं, हिमपरिवेष्टितः -ता -तं.

Ice-house, s. शीतकाले हिमरक्षणयोग्यं गृहं, हिमगृहं, हिमगुप्तिः f.

Ichneumon, s. नकुलः, बभ्रुः, सर्पहा m.

Ichor, s. पूयरक्तं, पूयशोणितं.

Ichthyology, s. मत्स्यविद्या, मत्स्यजातिगुणादिविषया विद्या.

Ichthyosaurus, s. मत्स्यमकरः.

Icicle, s. हिमकणः -णिका, तुषारकणः, नीहारकणः, हिमबिन्दुः m.

Iciness, s. हिमता, हिमत्वं, हिमवत्त्वं, हैमता, हैमं, शीतता, शैत्यं.

Iconoclasm, s. देवप्रतिमाभञ्जनं, देवतामूर्तिभञ्जनं.

Iconoclast, s. देवप्रतिमाभञ्जकः, देवतामूर्तिभञ्जकः.

Iconography, s. प्रतिमालिखनं, मूर्तिचित्रणं, प्रतिमूर्तिव्याख्या.

Iconology, s. प्रतिमाविद्या, देवतादिप्रतिमानविषया विद्या.

Icy, a. हिमः -मा -मं, हिमवः -मा -मं, हैमः -मी -मं, हिमवान् -वती -वत् (त्), तुषारवान् &c., तौषारः -री -रं, नीहारवान् &c.—(Frigid) शीतः -ता -तं, शीतलः -ला -लं, शिशिरः -रा -रं, जडः -डा -डं.—(Wanting in affection) निःस्नेहः -हा -हं, स्नेहशून्यः -न्या -न्यं.

Idea, s. बुद्धिः f., मतिः f., सङ्कल्पः, मनोगतं, मनसिजं, चिन्ता, मनःकल्पितं, मनःकल्पना, कल्पना, भावना, भावना, बोधः: 'with the idea that,' 'under the idea of,' is expressed by the inst. c. of बुद्धिः; as, 'with the idea that he was a tiger,' व्याघ्रबुद्ध्या; 'with the idea of reaching,' प्राप्तबुद्ध्या; 'from an idea of (his) incapacity,' अशक्तबुद्ध्या.—(Abstract idea) भावः.

Ideal, a. मानसिकः -की -कं, मनोगतः -ता -तं, मनोज्ञ -ज्ञा -ज्ञं काल्पनिक

-नी -नि, मानस: -सी -सं, मनोमय: -यी -यं, चित्तोद्भूत: -ता -तं, चिन्ताभव: -वा -वं, काल्पनिक: -की -कं, मन:कल्पित: -ता -तं, मायामय: -यी -यं, मायिक: -की -कं.

Idealism, *s.* माया, विषयाभावबुद्धि: *f.* असृष्टिवाद:, अविद्या.

Idealist, *s.* मायिकमतावलम्बी *m.* (न्), विषयाभाववादी *m.* (न्).

Ideally, *adv.* मनसा, मनसि, बुद्ध्या, बुद्धिमात्रेण, चिन्तया, चिन्तामात्रेण.

Identical, *a.* अनन्य: -न्या -न्यं, अभिन्न: -न्ना -न्नं, अविभिन्न: -न्ना -न्नं, अनन्यरूप: -पा -पं, अभिन्नरूप: -पा -पं, सम: -मा -मं, समान: -ना -नं, समसमान: -ना -नं, तुल्य: -ल्या -ल्यं, अभेद: -दा -दं, अपर: -रा -रं, अविपरीत: -ता -तं, निरभेद: -दा -दं, निर्विशेष: -षा -षं; 'identical with the world,' जगन्मय: -यी -यं, जगदात्मक: -का -कं.

Identically, *adv.* अनन्यं, अभिन्नं, समं, समानं, समसमानं, अपृथक्.

IMPATIENTLY, *adv.* सामर्षं, सविमर्षं, अमर्षेण, विमर्षेण, असहिष्णुवत्, अक्षान्त्या, असहनशीलत्वात्, सावेगं.

TO IMPAWN, *v. a.* आधीकृ, पण् (c. 1. पणते -णितुं), परिपण्, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), न्यस् (c. 4. -अस्यति -असितुं).

TO IMPEACH, *v. a.* अभियुज् (c. 7. -युनक्ति -योक्तुं), व्यवहारप्रमाणं or व्यवहारानुसारेण अभियुज् or अभिशंस् (c. 1. -शंसति -सितुं) or अभियोगं कृ or अभिशंसनं कृ or अपवद् (c. 1. -वदति -दितुं), दोषीकृ, उपालभ् (c. 1. -लभते -लब्धुं).

IMPEACHABLE, *a.* अभियोक्तव्य: -व्या -व्यं, व्यवहारप्रमाणात् अभियोज्य: -ज्या -ज्यं.

IMPEACHED, *a.* व्यवहाराभियुक्त: -क्ता -क्तं, अभियुक्त: -क्ता -क्तं, व्यवहाराभिशस्त: -स्ता -स्तं.

IMPEACHER, *s.* अभियोगी *m.* (न्), अभियोक्ता *m.* (क्तृ), अभियोगकृत् *m.*, अपवादक:.

IMPEACHMENT, *s.* अभियोग:, व्यवहाराभियोग:, अभिशंसनं, व्यवहाराभिशंसनं, अपवाद:, संशय:.

IMPECCABILITY, *s.* निष्पापत्वं, पापहीनता, पापाभाव:, पापाक्षमता.

IMPECCABLE, *a.* अपाप: -पा -पं, निष्पाप: -पा -पं, पापाक्षम: -मा -मं.

TO IMPEDE, *v. a.* रुध् (c. 7. रुणद्धि, रोद्धुं), प्रतिरुध्, निरुध्, उपरुध्, संरुध्, विरुध्; विहन् (c. 2. -हन्ति -न्तुं), व्याहन्, प्रतिहन्, प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), वृ (c. 10. वारयति -यितुं), निवृ, विनिवृ, आवृ, समावृ, प्रतिवृ, विघ्न (nom. विघ्नयति -यितुं), बाध् (c. 1. बाधते -धितुं), स्तम्भ् (c. 10. स्तम्भयति -यितुं, c. 9. स्तभ्नाति, स्तम्भितुं), विष्टम्भ्, प्रत्यूहीकृ, निषिध् (c. 1. -षेधति -षेद्धुं).

IMPEDED, *p. p.* रुद्ध: -द्धा -द्धं, विरुद्ध: -द्धा -द्धं, प्रतिरुद्ध: -द्धा -द्धं, निरुद्ध: -द्धा -द्धं, उपरुद्ध: -द्धा -द्धं, विहत: -ता -तं प्रतिहत: -ता -तं, पराहत: -ता -तं, वारित: -ता -तं, निवारित: -ता -तं, विघ्नित: -ता -तं, बाधित: -ता -तं, स्तम्भित: -ता -तं, स्तब्ध: -ब्धा -ब्धं, विष्टब्ध: -ब्धा -ब्धं, अन्तरित: -ता -तं, स्खलित: -ता -तं.

IMPEDIMENT, *s.* विघ्न:, व्याघात:, अन्तराय:, प्रत्यूह:, प्रतिबन्ध:, विष्टम्भ:, प्रतिष्टम्भ:, स्तम्भ: -म्भनं, रोध:, संरोध:, विरोध:, अवरोध:, उपरोध:, निरोध:, विघात: -तं, विहननं, विहति: *f.*, बाधा -धक:, वारणं, निवारणं, आवरणं.—(Impediment in speech) वाक्स्खलनं, वाग्भेद:, वाग्वैकल्यं; 'having an impediment in one's speech,' स्खलद्वाक्य: -क्या -क्यं, वाग्विकल: -ला -लं, भिन्नवाक् *m. f. n.*, कद्वद: -दा -दं.

IMPEDIMENTAL, *a.* (Causing impediment) व्याघातक: -का -कं, विघाती -तिनी -ति (न्), विघ्नकर: -री -रं, विघ्नकारी -रिणी -रि (न्), विरोधी -धिनी -धि (न्), प्रतिरोधी &c., औपरोधिक: -की -कं, विष्टम्भी -म्भिनी -म्भि (न्), निवारक: -का -कं.

TO IMPEL, *v. a.* (Drive or urge forward) प्रेर् ... *a.* [illegible] [illegible]).

प्रणुद् (c. 6. -णुदति -णोत्तुं), प्रचुद् (c. 10. -चोदयति -यितुं), सञ्चुद्, परिचुद्, चुद्, कृष् (c. 1. कर्षति, क्रष्टुं), समाकृष्.—(Incite to action) प्रवृत् (c. 10. -वर्त्तयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं), नियुज्, उद्युज्, उत्सह् (c. 10. -साहयति -यितुं), प्रोत्सह्, प्ररुच् (c. 10. -रोचयति -यितुं), चेष्ट् (c. 10. चेष्टयति -यितुं), उत्तप् (c. 10. -तापयति -यितुं).

IMPELLED, *p. p.* प्रेरितः -ता -तं, प्रणोदितः -ता -तं, प्रणुन्नः -न्ना -न्नं, प्रचोदितः -ता -तं, प्रवर्त्तितः -ता -तं, प्रवृत्तः -त्ता -त्तं, नियोजितः -ता -तं, प्रयोजितः -ता -तं, प्रोत्साहितः -ता -तं, प्ररोचितः -ता -तं, समाकृष्टः -ष्टा -ष्टं, आकृष्टः -ष्टा -ष्टं.

IMPELLENT, *s.* प्रेरकः, प्रेरयिता *m.* (तृ), प्रणोदकः, प्रवर्त्तकः, प्रयोजकः, प्रोत्साहकः, प्रचोदकः.

To IMPEND, *v. n.* (Be near) उपस्था (c. 1. -तिष्ठति -ते -स्थातुं), प्रत्युपस्था, समुपस्था, समीपे स्था or वृत् (c. 1. वर्त्तते -र्त्तितुं), निकटे स्था or वृत्, उपगम् (c. 1. -गच्छति -गन्तुं), उपागम्, समुपगम्, उपगतः -ता -तं भू.—(Hang over) आलम्ब् (c. 1. -लम्बते -म्बितुं), प्रलम्ब्, अवलम्ब्, लम्ब्.—(Be about to fall) पत् in des. (पिपतिषति -षितुं, पित्सति -त्सितुं), आपत् (c. 1. -पतति -तितुं).

IMPENDENT, IMPENDING, *a.* उपस्थायी -यिनी -यि (न्), उपस्थितः -ता -तं, अग्रस्थः -स्था -स्थं, समुपस्थितः -ता -तं, समीपवर्त्ती -र्त्तिनी -र्त्ति (न्), निकटवर्त्ती &c., आसन्नवर्त्ती &c., उपनतः -ता -तं, समुपगतः -ता -तं, पतनोन्मुखः -खा -खं, पिपतिषुः -षुः -षु, पित्सुः -त्सुः -त्सु.

IMPENETRABILITY, *s.* अवेध्यता, अव्यध्यता, अभेद्यता, अच्छेद्यत्वं, अप्रवेश्यत्वं, वज्रता -त्वं, गहनत्वं; 'impenetrability,' *as* a property of matter, is expressed in scientific treatises by the word विरोधः.

IMPENETRABLE, *a.* (Not to be pierced) अवेध्यः -ध्या -ध्यं, अव्यध्यः -ध्या -ध्यं, अभेद्यः -द्या -द्यं, अभेदनीयः -या -यं, अच्छेद्यः -द्या -द्यं, अच्छेदनीयः -या -यं, अव्याध्यः -ध्या -ध्यं, अच्छिद्रणीयः -या -यं, अखिलः -ला -लं.—(Not to be entered) अप्रवेश्यः -श्या -श्यं, अप्रवेष्टव्यः -व्या -व्यं, गहनः -ना -नं.—(Very hard) वज्रमयः -यी -यं, घनः -ना -नं.

IMPENETRABLY, *adv.* अभेद्यं, अवेध्यं, अच्छेदनीयं, गहनं, वज्रवत्.

IMPENITENCE, IMPENITENCY, *s.* अननुतापः, अपश्चात्तापः, पश्चात्तापहीनता, पश्चात्तापाभावः, अननुशोकः, अखेदः, खेदहीनता, खेदराहित्यं, अप्रायश्चित्तं, अननुशयः, कठिनचित्तत्वं.

IMPENITENT, *a.* अननुतापी -पिनी -पि (न्), अननुतप्तः -प्ता -प्तं, पश्चात्तापहीनः -ना -नं, अननुतापशीलः -ला -लं, खेदहीनः -ना -नं, खेदरहितः -ता -तं, अननुशयी -यिनी -यि (न्), स्तब्धचित्तः -त्ता -त्तं, कठिनचित्तः -त्ता -त्तं.

IMPERATIVE, *a.* आज्ञापकः -का -कं, आदेशकः -का -कं, आदेशी -शिनी -शि (न्), नियोजकः -का -कं, प्रयोजकः -का -कं, अवश्यकर्त्तव्यः -व्या -व्यं; '*imperative mood,*' विधिः *m.*, आज्ञावाचकः -कं.

IMPERCEPTIBLE, *a.* अव्यक्तः -क्ता -क्तं, अप्रत्यक्षः -क्षा -क्षं, अविभाव्यः -व्या -व्यं, अविभावनीयः -या -यं, अगम्यः -म्या -म्यं, अगोचरः -रा -रं.—(To the senses) अतीन्द्रियः -या -यं, इन्द्रियागोचरः -रा -रं, इन्द्रियागम्यः -म्या -म्यं, इन्द्रियातीतः -ता -तं.—(To the eye) परोक्षः -क्षा -क्षं, अलोकनीयः -या -यं, नयनागोचरः -रा -रं.—(To the ear) कर्णागोचरः -रा -रं.

IMPERCEPTIBLY, *adv.* अव्यक्तं, अप्रत्यक्षं -क्षेण, अविभावनीयं, अगोचरं, 'going imperceptibly,' अव्यक्तगतिः -तिः -ति.

IMPERFECT, *a.* (Not complete) असम्पूर्णः -र्णा -र्णं, अपूर्णः -र्णा -र्णं, अपरिपूर्णः -र्णा -र्णं, असमस्तः -स्ता -स्तं, असमाप्तः -प्ता -प्तं, असिद्धः -द्धा -द्धं, असमग्रः -ग्रा -ग्रं, असकलः -ला -लं, अनिष्पन्नः -न्ना -न्नं, अपर्याप्तः -प्ता -प्तं, असंसिद्धः -द्धा -द्धं, अपक्वः -क्वा -क्वं, खण्ड in *comp.*—(Defective) ऊनः -ना -नं, विकलः -ला -लं, हीनः -ना -नं, न्यूनः -ना -नं, दोषी -षिणी -षि (न्), सच्छिद्रः -द्रा -द्रं, क्षतः -ता -तं.—(Wanting some organ) अङ्गहीनः -ना -नं, न्यूनेन्द्रियः -या -यं, विकलेन्द्रियः -या -यं, विकलाङ्गः -ङ्गा -ङ्गं.—(Tense) अनद्यतनभूतः, अनद्यतनः; the grammatical symbols are भी, लङ्. 'imperfect comparison' लुप्तोपमा.

IMPERFECTION, *s.* (Defect) दोषः, छिद्रं, अगुणः, अपराधः, कलङ्कः, दूषणं, वैकल्यं, हानिः *f.*, हीनता, क्षतिः *f.*, न्यूनता, असमाप्तिः *f.*, अशुद्धता, 'in a gem,' पुलकः, खण्डः.

IMPERFECTLY, *adv.* असम्पूर्णं, असमग्रं, खण्डशस्, अविशिष्टेन, असम्यक्, असम्यक्, अपर्याप्तं, विकलं, वैकल्येन.

IMPERFECTNESS, *s.* असम्पूर्णता, अपूर्णता, असम्पन्नता, असिद्धिः *f.*, असमग्रता.

IMPERFORATE, *a.* नीरन्ध्रः -न्ध्रा -न्ध्रं, निश्छिद्रः -द्रा -द्रं, अच्छिद्रितः -ता -तं.

IMPERIAL, *a.* माहाराजिकः -की -कं, साधिराजिकः -की -कं, महाराजकीयः -या -यं, महाराजयोग्यः -ग्या -ग्यं, साम्राजिकः -की -कं, महेश्वरीयः -या -यं.

IMPERIALIST, *s.* महाराजाधीनः, अधिराजाधीनः, महाराजानुचरः, महाराजानुपक्षी *m.* (न्); 'imperialist army,' महाराजसैन्यं.

To IMPERIL, *v. a.* संशयस्थं -स्थां -स्थं कृ, सन्देहस्थं -स्थां -स्थं कृ.

IMPERIOUS, *a.* (Commanding) आज्ञापकः -का -कं, आदेशकः -का -कं.—(Overbearing, haughty) धृष्टः -ष्टा -ष्टं, गर्वी -र्विणी -र्वि (न्), भर्त्सनकारी -रिणी -रि (न्), उद्धतः -ता -तं, अवलिप्तः -प्ता -प्तं, सावहेलः -ला -लं, सोन्माथः -था -थं, प्रगल्भः -ल्भा -ल्भं, दृप्तः -प्ता -प्तं.

IMPERIOUSLY, *adv.* धर्षेण, प्रगल्भं, सावहेलं, सावलेपं, सोन्मादं, साटोपं.

IMPERIOUSNESS, *s.* धृष्टता, धर्षः, अवलिप्तता, अवलेपः, सावलेपत्वं, अवहेला, उद्धतिः *f.*, अविनयवृत्तिः *f.*, प्रगल्भता, प्रागल्भ्यं, उत्सिक्तता, साटोपत्वं.

IMPERISHABLE, *a.* अक्षयः -या -यं, अक्षय्यः -य्या -य्यं, अक्षयी -यिणी -यि (न्), अनश्वरः -रा -रं, अविनश्वरः -रा -रं, अविनाशी -शिनी -शि (न्), अनाश्यः -श्या -श्यं, अव्ययः -या -यं, अजरः -रा -रं, निर्जरः -रा -रं, अजर्यः -र्या -र्यं, अक्षरः -रा -रं, अक्षयणीयः -या -यं.

IMPERISHABLENESS, *s.* अक्षयता -त्वं, अनश्वरता, अनाश्यत्वं, अविनाश्यता, अक्षरत्वं, निर्जरत्वं, अव्ययीभावः.

IMPERMEABLE, *a.* अव्याप्यः -प्या -प्यं, अप्रवेश्यः -श्या -श्यं, अप्रवेशनीयः -या -यं.

IMPERMEABLENESS, *s.* अव्याप्यता, अप्रवेश्यता, अभेद्यत्वं.

IMPERSONAL, *a.* अकर्तृकः -का -कं, कर्तृविहीनः -ना -नं, अकर्तृवाच्यः -च्या -च्यं, भाववाचकः -का -कं; 'impersonal verb,' भाववाच्यं, अकर्तृवाचका क्रिया.

IMPERSONALLY, *adv.* अकर्तृकं, अकर्तृवाच्यक्रमेण, भाववाच्यानुसारेण.

IMPERTINENCE, IMPERTINENCY, *s.* (Rudeness) अविनयः, अविनीतता, अशिष्टता, परुषवचनं, दुरुक्तिः *f.*, वाक्पारुष्यं, कुशीलता, दुःशीलता, अशीलता, वामशीलता, धृष्टता, धर्षः, प्रगल्भता, चापल्यं, क्लेशदायकत्वं, उत्तरदायकत्वं.—(Meddling with *others'* affairs) पराधिकारचर्चा, पराधिकारप्रवेशः.—(State of not relating to *the subject*) निर्विषयता -त्वं, अप्रासङ्गिकत्वं, अप्रस्तुतत्वं, असम्बन्धः.—(Nonsense) आनर्थक्यं, अनर्थकता, असङ्गतत्वं.

IMPERTINENT, *a.* (Rude) अविनीतः -ता -तं, अशिष्टः -ष्टा -ष्टं, धृष्टः -ष्टा -ष्टं, प्रगल्भः -ल्भा -ल्भं, दुःशीलः -ला -लं, अशीलः -ला -लं, कुशीलः -ला -लं, वामशीलः -ला -लं, चपलः -ला -लं, परुषवाक् *m. f. n.*, परुषवादी -दिनी -दि (न्), क्लेशदायकः -का -कं; 'giving impertinent answers,' उत्तरदायकः -का -कं.—(Meddling with others' affairs) पराधिकारचर्चकः -का -कं.—(*Irrelevant*) अप्रासङ्गिकः -की -कं, अप्रस्तुतः -ता -तं, निर्विषयः -या -यं, असम्बन्धी -न्धिनी -न्धि (न्),

समसम्पर्कीयः -या -यं, निष्प्रयोजनः -ना -नं, प्रस्तुतवहिर्भूतः -ता -तं.—(Nonsensical) अनर्थकः -का -कं, असम्बद्धः -द्धा -द्धं

IMPERTINENTLY, *adv.* (Rudely) अविनयेन, अविनीतवत्, धृष्टवत्, प्रगल्भवत्, अशिष्टवत्, कुशीलवत्, परुषोक्त्या.—(Officiously) अतिव्यापृतं.—(Irrelevantly) असम्बद्धं, अप्रस्तुतं, अप्रासङ्गिकं, निष्प्रयोजनं.

IMPERTURBABLE, *a.* अक्षोभ्यः -भ्या -भ्यं, अक्षोभणीयः -या -यं, अवस्थितमतिः -तिः -ति, स्थिरमतिः -तिः -ति, समबुद्धिः -द्धिः -द्धि, अनाकुलचित्तः -त्ता -त्तं, अपारिप्लवः -वी -वं, अकातरः -रा -रं, अविक्षिप्तमनाः -ना. -नः (स्), निर्विकारः -रा -रं.

IMPERTURBATION, *s.* अक्षोभ्यता, अनाकुलचित्तता, अपारिप्लवत्वं, अव्यग्रता.

IMPERVIOUS, *a.* (Not to be penetrated or entered) अप्रवेश्यः -श्या -श्यं, अप्रवेशनीयः -या -यं, अगम्यः -म्या -म्यं, गहनः -ना -नं, सुगहनः -ना -नं, गहीयः -या -यं, गभीरः -रा -रं, गम्भीरः -रा -रं, कलिलः -ला -लं, सङ्कटः -टा -टं, सम्बाधः -धा -धं, अच्छः -च्छा -च्छं.—(Compact, without interstice) निविडः -डा -डं, अविरलः -ला -लं, निर्विवरः -रा -रं, नीरन्ध्रः -न्ध्रा -न्ध्रं.—(Not to be pierced) अवेध्यः -ध्या -ध्यं, अव्याप्यः -प्या -प्यं, अभेद्यः -द्या -द्यं, अच्छेदनीयः -या -यं.

IMPERVIOUSNESS, *s.* अप्रवेश्यता, गम्भीरत्वं, गहनत्वं, अव्याप्यता, अगम्यता, अवध्यता, नीरन्ध्रता, नैविड्यं.

IMPETRABLE, *a.* अभ्यर्थनीयः -या -यं, प्रार्थनेन प्राप्यः -प्या -प्यं.

To IMPETRATE, *v. a.* प्रार्थनेन or अभ्यर्थनाद्वारेण प्राप् (c. 5. -प्राप्नोति -प्राप्तुं)

IMPETRATION, *s.* प्रार्थनया or याञ्चाद्वारेण प्राप्तिः *f.* or प्रापणं.

IMPETUOSITY, *s.* वेगः, आवेगः, महावेगः, संवेगः, अत्यन्तवेगः, संरम्भः, सरभसत्वं, आघातः, तीक्ष्णता, तैक्ष्ण्यं, साहसं, उग्रता, उच्चण्डता, अमर्षः, क्षिप्रता, रभसः, कुतूहलं, तीव्रता.

IMPETUOUS, *a.* वेगवान् -वती -वत् (त्), वेगी -गिनी -गि (न्), महावेगः -गा -गं, भीमवेगः -गा -गं, उद्दीर्णवेगः -गा -गं, संरम्भी -म्भिणी -म्भि (न्), चण्ड -ण्डा -ण्डं, उच्चण्ड -ण्डा -ण्डं, तीक्ष्णः -क्ष्णा -क्ष्णं, तीक्ष्णकर्मा -र्मा -र्म (न्), अमर्षी -र्षिणी -र्षि (न्), अमर्षणः -णा -णं, अमर्षवान् -वती -वत् (त्), साहसी -सिनी -सि (न्), साहसिकः -की -कं, उग्रः -ग्रा -ग्रं, तीव्रः -व्रा -व्रं, प्रबलः -ला -लं, रोषणः -णा -णं, कुतूहली -लिनी -लि (न्).

IMPETUOUSLY, *adv.* महावेगेन, भीमवेगेन, अत्यन्तवेगेन, वेगतस्, सवेगं, संरम्भेण, आघाततस्, तीक्ष्णं, सामर्षं, उच्चण्डं, उग्रं, सरभसं, साहसेन, संरम्भवत्, सकुतूहलं, कौतूहलेन.

IMPETUOUSNESS, *s.* *See* IMPETUOSITY

IMPETUS, *s.* वेगः, आवेगः, संवेगः, आघातः, अत्यन्तवेगः, गतिशक्तिः *f*

IMPIETY, *s.* अधर्म्मः -र्म्मत्वं, वैधर्म्यं, निर्धर्म्मत्वं, धर्म्मलोपः, धर्म्महीनता, अभक्तिः *f.* भक्तिहीनता, अभक्तत्वं, देवनिन्दा, दुष्टता, अपुण्यत्वं, असाधुता, पापिष्ठत्वं, सपापत्वं, पापं, दुष्कृतं, कुकर्म्म *n.* (न्).

To IMPINGE, *v. a.* आहन् (c. 2. -हन्ति -न्तुं), अभिहन्, अभ्याहन्, आपत् (c. 1. -पतति -तितुं), प्रपत्, संघट्ट (c. 1. -घट्टते -ट्टितुं).

IMPIOUS, *a.* अधर्म्मी -र्म्मिणी -र्म्मि (न्), अधार्म्मिकः -की -कं, निर्धर्म्मः -र्म्मा -र्म्मं, धर्म्महीनः -ना -नं, धर्म्मलोपकः -का -कं, अभक्तः -क्ता -क्तं, देवनिन्दकः -का -कं, भक्तिहीनः -ना -नं, दुष्टः -ष्टा -ष्टं, अपुण्यः -ण्या -ण्यं, असाधुः -ध्वी -धु, पापी -पिनी -पि (न्), पापिष्ठः -ष्ठा -ष्ठं, ईश्वरदोषितः -ता -तं.

IMPIOUSLY, *adv.* अधर्म्मतस्, अधर्म्मेण, अपुण्यवत्, पापिष्ठवत्, देवनिन्दकवत्.

IMPIOUSNESS, *s.* *See* IMPIETY.

IMPLACABILITY, IMPLACABLENESS, *s.* अशाम्यता, असान्त्वनीयता, अतोषणीयता, अप्रसाद्यत्वं.

IMPLACABLE, *a.* अशाम्यः -म्या -म्यं, अतोषणीयः -या -यं, अशमनीयः -या -यं, असान्त्वनीयः -या -यं, अनाराध्यः -ध्या -ध्यं, अप्रसाद्यः -द्या -द्यं, दुःखेन शाम्यः -म्या -म्यं or आराध्यः -ध्या -ध्यं.—(Constant in hatred) दीर्घद्वेषी -षिणी -षि (न्), अतिद्वेषी &c.; 'implacable hatred,' दीर्घद्वेषः, बद्धवैरं.

IMPLACABLY, *adv.* अशमनीयं, अशाम्यं, अतोषणीयं, अनाराधनीयं

To IMPLANT, *v. a.* निरुह् in caus. (-रोपयति -यितुं), निष्ठा in caus. (-ष्ठापयति -यितुं), प्रतिष्ठा, निर्बद्धं -द्धां -द्धं कृ, निधा (c. 3. -दधाति -धातुं) प्रणिधा, उपनिधा, निखन् (c. 1. -खनति -नितुं)

IMPLANTED, *p. p.* निरूढः -ढा -ढं, निहितः -ता -तं, प्रतिष्ठितः -ता -तं, सुप्रतिष्ठितः -ता -तं, निरूढः -ढा -ढं, निखातः -ता -तं, निहितः -ता -तं

To IMPLEAD, *v. a.* अभियुज् (c. 7. -युनक्ति -योक्तुं), व्यवहारसभायाम् अक्षरप्रत्युत्तरे कृ

IMPLEMENT, *s.* यन्त्रं, उपकरणं, साधनं, भाण्डं, कार्य्यसाधनं, सामग्र्य्यं द्रव्यं, पात्रं, उपस्करः, सम्भारः.

To IMPLICATE, *v. a.* सम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं), अनुबन्ध्, संश्लिष् (c. 10. -श्लेषयति -यितुं), आश्लिष्, परिश्लिष्, संसृज् (c. 6. -सृजति -स्रष्टुं) 'he is implicated in many crimes,' बहुपापैः सम्बध्यते

IMPLICATED, *p. p.* सम्बद्धः -द्धा -द्धं, अनुबद्धः -द्धा -द्धं, संश्लिष्टः -ष्टा -ष्टं, संसृष्टः -ष्टा -ष्टं, ग्रस्तः -स्ता -स्तं, अनुषङ्गी -ङ्गिणी -ङ्गि (न्), लिप्तः -प्ता -प्तं

IMPLICATION, *s.* (Involution, connection) सम्बन्धः, अनुबन्धः, अभिसम्बन्धः, अनुषङ्गः, समन्वयः, सम्पर्कः, संसर्गः.—(Implying) विवक्षा, अर्थापत्तिः *f.*, अनुमानं, अपवाहः, उपलक्षणं.

IMPLICIT, *a.* अनाशङ्कितः -ता -तं, अवितर्कितः -ता -तं, अवैकल्पिकः -की -कं, अविचार्य्य कृतः -ता -तं, अवितर्क्य कृतः -ता -तं, अशङ्कात्मकः -का -कं, असांशयिकः -की -कं, असन्दिग्धः -ग्धा -ग्धं.

IMPLICITLY, *adv.* अवितर्क्य, अविचार्य्य, अनाशङ्कापूर्ब्बं, अशङ्कया, अवितर्केण असंशयपूर्ब्बं, अविकल्पेन.

IMPLIED, *p. p.* or *a.* विवक्षितः -ता -तं, अर्थसम्बद्धः -द्धा -द्धं, उपलक्षितः -ता -तं, आनुषङ्गिकः -की -कं; 'implied meaning,' विवक्षितार्थः फलितार्थः, ध्वनितार्थः, ध्वनिः *m.*

To IMPLORE, *v. a.* प्रार्थ् (c. 10. -अर्थयते -ति -यितुं), अभ्यर्थ्, सम्प्रार्थ्, अर्थ्, विनयेन or अञ्जलिं कृत्वा प्रार्थ्, कृताञ्जलिः or निर्बन्धेन याच् (c. 1. याचति -चितुं), अभियाच्, संयाच्, प्रयाच्, सम्प्रयाच्, प्रसद् (c. 10. -सादयते -ति -यितुं), विनी (c. 1. -नयति -नेतुं), अनुनी, विनयेन स्वार्थं निविद् (c. 10. -वेदयति -यितुं), नाथ् (c. 1. नाथति -थितुं).

IMPLORED, *p. p.* अञ्जलिकर्म्मपूर्ब्बं प्रार्थितः -ता -तं or अभ्यर्थितः -ता -तं विनयेन or निर्बन्धेन याचितः -ता -तं or अभियाचितः -ता -तं, प्रसादितः -ता -तं, अनुनीतः -ता -तं.

IMPLORER, *s.* कृताञ्जलिः प्रार्थकः or प्रार्थयिता *m.* (तृ), निर्बन्धेन याचकः

To IMPLY, *v. a.* वच् in des. (विवक्षति -क्षितुं), सूच् (c. 10. सूचयति -यितुं), संसूच्. Often expressed by अर्थ in comp., as 'a speech which implies censure,' निन्दार्थो वादः

IMPOLICY, *s.* कुनीतिः *f.*, दुर्नीतिः *f.*, दुर्नयः, अनीतिः *f.*, दुर्नीतं, अनयः

IMPOLITE, *a.* अशिष्टः -ष्टा -ष्टं, असभ्यः -भ्या -भ्यं, अविनीतः -ता -तं, अशीलः -ला -लं, कुशीलः -ला -लं, विशीलः -ला -लं, दुःशीलः -ला -लं, दुर्मर्य्यादः -दा -दं, नष्टविनयः -या -यं, ग्राम्यः -म्या -म्यं, असुजनः -ना -नं, अनार्य्यः -र्य्या -र्य्यं.

IMPOLITENESS, *s.* अशिष्टता, असभ्यता, अविनयः, कुशीलता, दुःशीलता

IMPOLITIC, *a.* (Not acquainted with good policy, not prudent)

अनीतिज्ञः -ज्ञा -ज्ञं, अनीतिविद् *m. f. n.*, अनीतिमान् -मती -मत् (त्), अनीतिकुशलः -ला -लं, दुर्नीतः -ता -तं, अप्राज्ञः -ज्ञा -ज्ञं, अमतिमान् -मती -मत् (त्), अबुद्धिमान् &c., अबुधः -धा -धं, अविज्ञः -ज्ञा -ज्ञं, अविवेचकः -का -कं, अकोविदः -दा -दं.—(Not p… ad p… injure the public interest) अहितः -ता -तं, नीतिविरुद्धः -द्धा -द्धं, प्रजार्थविरोधी -धिनी -धि (न्), अर्थविरोधी &c., अनर्थकरः -रा -रं, अनर्थजनकः -का -कं, अनिष्टकरः -री -रं, असमीक्ष्य कृतः -ता -तं, सापकारः -रा -रं, अयौक्तिकः -की -कं.

IMPOLITICLY, *adv.* नीतिविरुद्धं, अहितं -ताय, अर्थविरोधेन, असमीक्ष्य.

IMPONDERABLE, IMPONDEROUS, *a.* निर्भारः -रा -रं, अभारी -रिणी -रि (न्), अतोलनीयः -या -यं, अगुरुः -र्वी -रु, अतिसूक्ष्मः -क्ष्मा -क्ष्मं, अतिलघुः -घुः -घु.

To IMPORT, *v. a.* (Bring goods from a foreign country) वाणिज्यद्रव्याणि or वाणिज्यवस्तूनि विदेशात् or देशान्तरात् or बहिर्देशाद् आनी (c. 1. -नयति -नेतुं) or उपनी or आवह् (c. 1. -वहति -वोढुं) or उपवह् or आहृ (c. 1. -हरति -हर्त्तुं).—(Convey a meaning, imply) सूच् (c. 10. सूचयति -यितुं), संसूच्, उद्दिश् (c. 6. -दिशति -देष्टुं), वच् in des. (विवक्षति -क्षितुं), उद्बुध् (c. 10. -बोधयति -यितुं), or expressed by अर्थ in comp., as, 'a speech which imports censure,' निन्दार्थो वादः.—(Be of weight or consequence) गुर्वर्थः -र्था -र्थं भू.

IMPORT, *s.* (Goods brought from a foreign country) विदेशात् or देशान्तरात् or बहिर्देशाद् आनीतानि वाणिज्यद्रव्याणि *n. pl.* or वाणिज्यवस्तूनि *n. pl.*, विदेशीयवस्तूनि *n. pl.*, विदेशजद्रव्याणि *n. pl.*, बहिर्देशवस्तूनि.—(Meaning) अर्थः, अभिप्रायः, अभिप्रेतं, विवक्षा, उद्देशः, आशयः, 'of like import,' समानार्थः -र्था -र्थं.—(Importance) गौरवं, गुरुत्वं, प्रभावः.

IMPORTABLE, *a.* विदेशाद् आनेयः -या -यं or आनेतव्यः -व्या -व्यं.

IMPORTANCE, *s.* (Consequence) गौरवं, गुरुत्वं -ता, गुर्वर्थत्वं, प्रभावः, भारः, 'of a thing,' द्रव्यगुरुता; 'of an act,' कार्य्यगुरुता.—(Of a person) उत्कर्षः, औत्कर्ष्यं, प्रधानता, सेव्यता, प्रतिपत्तिः *f.*, प्रागल्भ्यं, गर्वः, मानं.

IMPORTANT, *a.* गुरुः -र्वी -रु, गुर्वर्थः -र्था -र्थं, बह्वर्थः -र्था -र्थं, महार्थः -र्था -र्थं, परमार्थः -र्था -र्थं, गुरुप्रभावः -वा -वं, महाप्रभावः -वा -वं, बहुप्रभावः -वा -वं, परमप्रभावः -वा -वं, परमः -मा -मं, अलघुः -घुः -घु, महोपकारी -रिणी -रि (न्), भारी -रिणी -रि (न्), भारवान् -वती -वत् (त्), आवश्यकः -की -कं; 'important object,' गुर्वर्थः, परमार्थः, महार्थः; 'most important,' गरिष्ठः -ष्ठा -ष्ठं, गुरुतमः -मा -मं, 'more important,' गरीयान् -यसी -यः (स्).

IMPORTANTLY, *adv.* गुरु, परमप्रभावेण, परमं, अलघु.

IMPORTATION, *s.* (Act of bringing from a foreign country) विदेशात् or बहिर्देशात् or देशान्तराद् आनयः -यनं or उपनयः -यनं or आवाहनं or आवहनं or उपवाहनं.—(The commodities imported) विदेशाद् आनीतानि द्रव्याणि, देशान्तराद् आनीतवस्तूनि, विदेशीयवस्तुसमूहः.

IMPORTED, *p. p.* विदेशात् or बहिर्देशाद् आनीतः -ता -तं or उपनीतः -ता -तं.

IMPORTER, *s.* विदेशात् or बहिर्देशाद् वाणिज्यद्रव्यानेता *m.* (तृ).

IMPORTUNACY, *s.* निर्बन्धः, अतिनिर्बन्धः, अतियाचना -नं, अतिप्रार्थनं -ना, आग्रहः, अतिनिर्बन्धेन याचना or प्रार्थनं, वारं वारं प्रार्थना, नित्यप्रार्थनं, नित्ययाचना, नित्ययाचनेन परोद्वेजनं or परायासकरणं.

IMPORTUNATE, *a.* निर्बन्धशीलः -ला -लं, अतिनिर्बन्धशीलः -ला -लं, आग्रही -हिणी -हि (न्), आग्रहशीलः -ला -लं … -का -कं, अतिप्रार्थकः -का -कं, निर्बन्धेन याचकः -का -कं, नित्यप्रार्थकः -का -कं, नित्यं याचनेन परोद्वेजकः -का -कं … -री -रं, वारं वारं प्रार्थकः -का -कं … mpo… a e … a n निर्बन्धः आग्रह…

IMPORTUNATELY, *adv.* निर्बन्धेन, अतिनिर्बन्धेन, आग्रहेण, साग्रहं, प्रसभं, मुहुर्मुहुः, पुनःपुनर्.

IMPORTUNATENESS, *s.* *See* IMPORTUNACY.

To IMPORTUNE, *v. a.* अतिनिर्बन्धेन or निर्बन्धेन प्रार्थ् (c. 10. -अर्थयति -यितुं) or अभ्यर्थ् or याच् (c. 1. याचति -चितुं) or अभियाच्, आग्रहेण प्रार्थ्, वारं वारं प्रार्थ्, अतियाचनेन परम् उद्विज् (c. 10. -वेजयति -यितुं) नित्यप्रार्थनेन परम् आयस् (c. 10. -यासयति -यितुं).

IMPORTUNED, *p. p.* निर्बन्धेन प्रार्थितः -ता -तं or याचितः -ता -तं, अतियाचितः -ता -तं.

IMPORTUNER, *s.* अतिप्रार्थकः, अतियाचकः, निर्बन्धेन प्रार्थकः, अतियाच्ञया परोद्वेजकः.

IMPORTUNITY, *s.* निर्बन्धः, अतिनिर्बन्धः, अतियाचना -नं, आग्रहः, वारं वारं प्रार्थना, पुनःपुनः प्रार्थनं, अतियाचनेन परोद्वेजनं. *See* IMPORTUNACY.

To IMPOSE, *v. a.* (Lay on) न्यस् (c. 4. -अस्यति -असितुं), निविश् (c. 10. -वेशयति -यितुं), समाविश्, नियुज् (c. 10. -योजयति -यितुं, c. 7. -युनक्ति -योक्तुं), धा (c. 3. दधाति, धातुं), निधा, विधा, आरुह् in caus. (रोपयति -यितुं), स्था in caus. (स्थापयति -यितुं), उपस्था, अवस्था.—(Set over) अधिकृ, उपधिकृ, नियुज्, विनियुज्.—(Impose upon, deceive) प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, वञ्च् (c. 10. वञ्चयते -यितुं), परिवञ्च्, छल् (c. 10. छलयति -यितुं), अभिसन्धा, अतिसन्धा, दम्भ् (c. 5. दभ्नोति, दम्भितुं).

IMPOSED, *p. p.* न्यस्तः -स्ता -स्तं, निवेशितः -ता -तं, नियुक्तः -क्ता -क्तं, नियोजितः -ता -तं, विहितः -ता -तं, अधिकृतः -ता -तं; 'imposed upon,' वञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, विप्रलब्धः -ब्धा -ब्धं, अतिसंहितः -ता -तं.

IMPOSING, *a.* विस्मयोत्पादकः -का -कं, आश्चर्यकरः -रा -रं, विस्मापकः -का -कं, उद्धतः -ता -तं, गुरुः -र्वी -रु, महातेजाः -जाः -जः (स्).

IMPOSITION, *s.* (Act of laying on) न्यासः, न्यसनं, निवेशनं, आरोपणं, स्थापनं; 'of hands,' हस्तन्यासः.—(That which is imposed, a tax) करः, शुल्कः -ल्कं.—(Task given as a punishment) साहसव्रतं, शिष्येण दण्डार्थम् अधिककर्त्तव्यं किञ्चित्.—(Fraud, deception) दम्भः, वञ्चनं -ना, छलं, प्रलम्भः, विप्रलम्भः, अभिसन्धिः *m.*, अतिसन्धानं.

IMPOSSIBILITY, *s.* अशक्यता, असाध्यता, अकर्त्तव्यता, अकरणीयता, अकार्य्यता.—(An impossibility, an absurdity) असाध्यं, असम्भवः, मृगार्थकं, शशविषाणं, शशशृङ्गं, खपुष्पं, गगणपुष्पं, गगणकुसुमं, 'impossibilities,' असाध्यानि *n. pl.*

IMPOSSIBLE, *a.* अशक्यः -क्या -क्यं, असाध्यः -ध्या -ध्यं, असाधनीयः -या -यं, असम्भवः -वा -वं, अकर्त्तव्यः -व्या -व्यं, अकरणीयः -या -यं, अकार्य्यः -र्य्या -र्य्यं, असङ्गतः -ता -तं, अघटितः -ता -तं, अघटमानः -ना -नं, अघटनीयः -या -यं, अगम्यः -म्या -म्यं, अप्राप्यः -प्या -प्यं, अपार्य्यः -र्य्या -र्य्यं, अपारणीयः -या -यं, अक्षमः -मा -मं.

IMPOST, *s.* करः, शुल्कः -ल्कं, राजकरः, कारः, राजग्राह्यभागः, राजस्वं, राजदेयं, राजधनं, शाल्किकः, तारिकं, तार्य्यं.

IMPOSTHUME, *s.* विद्रधिः *m.*, पूयसम्पूर्णः स्फोटः or विस्फोटः, सपूयव्रणः.

IMPOSTOR, *s.* (Deceiver) दम्भी *m.* (न्), दाम्भिकः, दम्भकः, कुहकः, कूटकारः, कूटकः, वञ्चकः, कपटी *m.* (न्), कापटिकः, धूर्त्तः, कितवः, प्रतारकः, छद्मवेशी *m.* (न्).—(In religion) धर्मध्वजी *m.* (न्), धार्मिक…

लिङ्गी न साम्यन्च धर्म्मोऽस्य पापस्य पापस्य लिङ्गनाश सद्भलिङ्गी न उपतापस कपटधर्म्मी न
दम्भ वचन ता प्रवञ्चना प्रलम्भ विप्रलम्भ कूट कपट, व्याज, छल छलना कतव आद उपाध प्रतारणा मा कुहकः, अभिसन्धिः m. अभिसन्धानं, छद्म n (न्).

IMPOTENCE, IMPOTENCY, s. (Want of strength or power) वीर्य्यहानिः f., शक्तिहीनता, अशक्तिः f., अशक्तता, अवीर्य्यं, निर्बलता, बलहीनता, सत्त्वहानिः f., निःसत्त्वं, सत्त्वाभावः, वीर्य्याभावः, असामर्थ्यं, असमर्थत्वं, अतेजस् n, तेजोहीनता, क्लीबता, दौर्बल्यं दुर्बलता, शक्तिवैकल्यं.—(Absence of virility) क्लीबत्वं, क्लैब्यं, अपुंस्त्वं, निष्पुरुषत्वं, अपौरुषं, नपुंसकत्वं, ध्वजभङ्गः, निर्बीजता, निष्फलत्वं, अजनकता.

IMPOTENT, a. (Without power) निर्बलः -ला -लं, बलहीनः -ना -नं, शक्तिहीनः -ना -नं, अशक्तः -क्ता -क्तं, अबलः -ला -लं, असमर्थः -र्था -र्थं, सामर्थ्यहीनः -ना -नं, निर्वीर्य्यः -र्य्या -र्य्यं, वीर्य्यहीनः -ना -नं, अवीरः -रा -रं, निःसत्त्वः -त्त्वा -त्त्वं, सत्त्वहीनः -ना -नं, निस्तेजाः -जाः -जः (स्), तेजोहीनः -ना -नं, गततेजाः &c., अकल्पः -ल्पा -ल्पं, दुर्बलः -ला -लं, अक्षमः -मा -मं, अपारगः -गा -गं.—(Wanting virility) क्लीबः -बा -बं पुंस्त्वहीनः -ना -नं, पुंशक्तिहीनः -ना -नं, निष्पुरुषः -षा -षं, पुरुषशक्तिवर्जितः -ता -तं, नपुंसकः -का -कं, निर्बीजः -जा -जं, भग्नध्वजः -जा -जं, निष्फलः -ला -लं.

IMPOTENTLY, adv. निर्बलं, अबलं, दुर्बलं, अवीरवत्, निर्वीर्य्यवत्, क्लीबवत्, निर्वीर्य्यं, बलं विना, वीर्य्यं विना, निःसत्त्वेन.

To IMPOUND, v. a. पशुपरिग्रहणस्थानादि अवरोधस्थाने निरुध् (c. 7. -रुणद्धि -रोद्धुं) or रुध् (c. 1. रुणद्धि -रोद्धुं).

To IMPOVERISH, v. a. दरिद्रीकृ, निर्धनीकृ, क्षीणीकृ, धनं नश् (c. 10 नाशयति -यितुं), धनक्षयं -णां -णं कृ.—(Enfeeble, exhaust strength) कृश (nom. कृशयति -यितुं), कृशीकृ, तेजः or सत्त्वं or वीर्य्यं हृ (c. 1 हरति, हर्तुं) or नश्, दुर्बलीकृ, क्षि in caus. (क्षपयति -यितुं).

IMPOVERISHED, p. p. (Reduced to poverty) क्षीणधनः -ना -नं, निर्धनः -ना -नं, दरिद्रितः -ता -तं, दरिद्रीकृतः -ता -तं, दारिद्र्यगतः -ता -तं, धनच्युतः -ता -तं, क्षीणार्थः -र्था -र्थं, नष्टार्थः -र्था -र्थं, नष्टधनः -ना -नं, गतविभवः -वा -वं, प्रचलितविभवः -वा -वं, शिथिलवसुः -सुः -सु, विगतश्रीकः -का -कं, विनष्टलक्ष्मीकः -का -कं, निष्किञ्चनः -ना -नं, अकिञ्चनः -ना -नं.—(Exhausted of energy) क्षीणसत्त्वः -त्त्वा -त्त्वं, कृशीभूतः -ता -तं, गतवीर्य्यः -र्य्या -र्य्यं, च्युतोत्साहः -हा -हं.

IMPOVERISHMENT, s. दरिद्रता, दारिद्र्यं, दरिद्रीकरणं, धननाशः, धनहानिः f., धनच्युतिः f., सत्त्वहानिः f., क्षीणता.

IMPRACTICABILITY, s. असाध्यता -त्वं, असाधनीयता, अकर्त्तव्यता, अकरणीयता, अकार्य्यता, अशक्यता -त्वं, कर्त्तुम् अशक्यता, असम्भवत्वं, असम्भाव्यता, अनुपपाद्यता, अघटनीयत्वं, अगम्यत्वं, दुष्करत्वं.

IMPRACTICABLE, a. असाध्यः -ध्या -ध्यं, असाधनीयः -या -यं, अकर्त्तव्यः -व्या -व्यं, अकरणीयः -या -यं, अकार्य्यः -र्य्या -र्य्यं, अशक्यः -क्या -क्यं, कर्त्तुम् अशक्यः -क्या -क्यं, अकृतः -ता -तं, अघटनीयः -या -यं, असम्भवः -वा -वं, असम्भाव्यः -व्या -व्यं, असम्भावनीयः -या -यं, अनुपपाद्यः -द्या -द्यं, दुष्करः -रा -रं, अगम्यः -म्या -म्यं, अप्राप्यः -प्या -प्यं.

IMPRACTICABLY, adv. असाधनीयं, अकरणीयं, असम्भवेन, असम्भावनीयं.

To IMPRECATE, v. a. शप् (c. 1. शपति -ते, c. 4. शप्यति, शप्तुं), अभिशप्, परिशप्, आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), अमङ्गलं or अनिष्टम् आशंस् (c. 1. -शंसते -सितुं) or प्रार्थ् (c. 10. -अर्थयते -यितुं), गर्ह् (c 1. गर्हते -र्हितुं), भर्त्स् (c. 10. भर्त्सयति -यितुं), धिक्कृ.

IMPRECATED, p. p. अभिशप्तः -प्ता -प्तं, आक्रुष्टः -ष्टा -ष्टं, धिक्कृतः -ता -तं.

शाप आभशाप आक्रोशन उपक्रोश अभीषङ्ग, परिषङ्ग अ नष्टाशंसन अनिष्टप्रार्थना अमङ्गलप्रार्थना मन्दवाञ्छा भर्त्सना गा ऽ धिक्करण

अभिशापात्मक का कं आक्रोशक का कं अनिष्टाशंसकः -का -कं, अनिष्टप्रार्थकः -का -कं.

IMPREGNABLE, a. अलङ्घनीयः -या -यं, अलंघ्यः -घ्या -घ्यं, अनाक्रमणीयः -या -यं, अनाक्रम्यः -म्या -म्यं, दुराक्रमः -मा -मं, दुराक्रामः -मा -मं, अगम्यः -म्या -म्यं, दुर्गमः -मा -मं.—(Invincible) अजेयः -या -यं, दुर्जेयः -या -यं, अपराजितः -ता -तं.

To IMPREGNATE, v. a. (Infuse the principle of conception make pregnant) सिच् (c. 6. सिञ्चति, सेक्तुं), निषिच्, आसिच् रत सिच्, गर्भं ग्रह् in caus. (ग्राहयति -यितुं) or उत्पद् (c. 10. -पादयति -यितुं), गर्भवतीं कृ, अन्तर्वत्नीं कृ, आपन्नसत्त्वां कृ, अन्तरापत्नीं कृ, सञ्जातगर्भां कृ, गर्भाधानं कृ, निषेकं कृ.—(Infuse particles of one thing into another) प्रक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), निक्षिप्, प्रभेदं कृ, व्याप् (c. 5. -आप्नोति -आप्तुं), व्याप्तं -प्ता -प्तं कृ.

IMPREGNATED, p. p. सिक्तः -क्ता -क्तं, गृहीतगर्भा, उत्पन्नगर्भा, सत्त्वा आपन्नसत्त्वा, सञ्जातगर्भा.—(Infused) व्याप्तः -प्ता -प्तं.

IMPREGNATING, part. गर्भदः -दा -दं, सेचकः -का -कं, गर्भोत्पादकः -का -कं.

IMPREGNATION, s. सेकः, सेचनं, निषेकः, आसेकः, आसेचनं, गर्भग्रहणं, गर्भोत्पादनं, गर्भाधानं, गर्भधारणं, भेदग्रहः.

IMPREGNATOR, s. सेक्ता m. (क्तृ), सेचकः, निषेककारी m. (न्), गर्भदः, गर्भोत्पादकः.

To IMPRESS, v. a. (Imprint, stamp, make a mark by pressure) मुद्र् (nom. मुद्रयति -यितुं), मुद्रीकृ, अङ्क् (c. 10. अङ्कयति -यितुं) चिह्न् (nom. चिह्नयति -यितुं), मुद्रितं -तां -तं कृ, लक्ष् (c. 10. लक्षयति -यितुं), प्रणिधा (c. 3. -दधाति -धातुं), न्यस् (c. 4. -अस्यति -असितुं), निविश् (c. 10. -वेशयति -यितुं), निपीड् (c. 10. -पीडयति -यितुं) अङ्कितं -तां -तं कृ.—(Fix deep in the mind, &c.) हृदये सुनिहितं -तां -तं कृ, चित्तनिष्ठं -ष्ठां -ष्ठं कृ, हृत्स्थं -स्थां -स्थं कृ, हृद्गतं -तां -तं कृ, हृदयगतं -तां -तं कृ, हृदये कृ, हृदये निविश् or विश् in caus. (-वेशयति -यितुं), 'to be impressed,' निविश् (c. 6. -विशति -वेष्टुं).—(Impress seamen) राजाज्ञया बलात्कारेण धृत्वा नाविकादिकर्म्मणि व्याप् (c. 10. -आपयति -यितुं).

IMPRESS, s. मुद्रा, अङ्कः, चिह्नं, न्यासः, लक्षणं; 'having the impress of knowledge,' ज्ञानमुद्रः -द्रा -द्रं.

IMPRESSED, p. p. (Imprinted) मुद्रितः -ता -तं, मुद्रीकृतः -ता -तं, कृतमुद्रः -द्रा -द्रं, मुद्राङ्कितः -ता -तं, अङ्कितः -ता -तं, कृताङ्कः -ङ्का -ङ्कं, चिह्नितः -ता -तं, समुद्रः -द्रा -द्रं, लक्षितः -ता -तं.—(Infixed) निहितः -ता -तं, निष्ठः -ष्ठा -ष्ठं, न्यस्तः -स्ता -स्तं, निहितः -ता -तं, प्रणिहितः -ता -तं, निवेशितः -ता -तं; 'in the mind,' हृदयनिहितः -ता -तं, चित्तनिष्ठः -ष्ठा -ष्ठं, हृदयगतः -ता -तं, हृद्गतः -ता -तं, हृदयनिवेशितः -ता -तं, हृत्स्थः -स्था -स्थं.

IMPRESSIBLE, a. अङ्कनीयः -या -यं, अङ्क्यः -ङ्क्या -ङ्क्यं, चिह्नक्षमः -मा -मं.

IMPRESSION, s. (Mark, stamp) मुद्रा, अङ्कः, चिह्नं.—(Act of impressing) अङ्कनं.—(Impression on the mind) संस्कारः, चित्तसंस्कारः, मनःसंस्कारः.—(Idea, image in the mind) बुद्धिः f., मतिः f. अनुभवः, मनोगतं, मनसिजं, आभासः, भासः.—(Sensible effect) उत्पन्नं, निष्पन्नं, उत्पत्तिः f., सम्पन्नं.—(Indentation) आघातचिह्नं अभिघातचिह्नं, अङ्कः, छेदः.—(Number of books printed at once) एकवारे मुद्रितो ग्रन्थसमूहः.

IMPRESSIVE, a. हृदयङ्गमः -मा -मं, हृद्गमः -मा -मं, हृदयग्राही -हिणी -हि

न् चित्तहारी [illegible] णी [illegible] न हृदयस्पृक् [illegible] श मर्म्मस्पृक् *f*
विस्मयोत्पादक [illegible] का कं हृद्वेदक [illegible] का कं भावोत्पादक &c.

IMPRESSIVELY, *adv.* हृदयङ्गमप्रकारेण, यथा हृदयं स्पृश्यते इति प्रकारेण.

IMPRESSIVENESS, *s.* हृदयङ्गमत्वं, हृद्गमत्वं, हृदयस्पृक्त्वं, विस्मयोत्पादकत्वं.

IMPRESSMENT, *s.* राजाज्ञया बलात्कारधरणानन्तरं नाविकादिकर्म्मणि प्रवर्त्तनं.

To IMPRINT, *v. a.* मुद्र् (nom मुद्रयति -यितुं), मुद्रीकृ, मुद्रितं -तां -तं कृ, अङ्क् (c. 10 अङ्कयति -यितुं), चिह्न् (nom चिह्नयति -यितुं), प्रणिधा (c. 3. -दधाति -धातुं), न्यस् (c. 4. -अस्यति -असितुं), निविश् (c. 10. -वेशयति -यितुं), 'on the mind,' हृदयनिविष्टं -ष्टां -ष्टं कृ, हृदये मुद्रितम् इव किञ्चित् कृ, हृदये निविश्.

IMPRINTED, *p. p.* मुद्रितः -ता -तं, मुद्रीकृतः -ता -तं, अङ्कितः -ता -तं, मुद्राङ्कितः -ता -तं, कृतमुद्रः -द्रा -द्रं.—(Infixed) निहितः -ता -तं, न्यस्तः -स्ता -स्तं, निहितः -ता -तं, प्रणिहितः -ता -तं, निवेशितः -ता -तं, 'on the mind,' हृदयनिष्ठः -ष्ठा -ष्ठं, हृदयगतः -ता -तं, हृद्गतः -ता -तं, हृदयनिवेशितः -ता -तं.

To IMPRISON, *v. a.* कारायां or कारागारे निरुध् (c. 7. -रुणद्धि -रोद्धुं) or बन्ध् (c. 9. बध्नाति, बन्द्धुं), कारागृहं प्रविश् (c. 10. -वेशयति -यितुं), बन्धनालये रक्ष् (c. 1. रक्षति -क्षितुं) or अवरुध् or आसिध् (c. 1. -सेधति -सेद्धुं), कारागुप्तं -प्तां -प्तं कृ.

IMPRISONED, *p. p.* कारागुप्तः -प्ता -प्तं, कारानिरुद्धः -द्धा -द्धं, कारायां बद्धः -द्धा -द्धं, काराबद्धः -द्धा -द्धं, कारागारप्रवेशितः -ता -तं, अवरुद्धदेहः -हा -हं, निरुद्धः -द्धा -द्धं, आसिद्धः -द्धा -द्धं, प्रतिबद्धः -द्धा -द्धं.

IMPRISONMENT, *s.* कारानिरोधः, निरोधः -धनं, काराबन्धनं, बन्धनं, प्रतिबन्धनं, कारागारप्रवेशनं, कारागृहप्रवेशः, कारागोपनं, कारागृहगुप्तिः *f*, आसेधः, स्थानासेधः, रोधः, सम्प्रतिरोधकः, प्रग्रहः.

IMPROBABILITY, *s.* असम्भवः -वता -त्वं, असम्भाव्यता, असम्भावनीयता, असम्भावना, अनुपपत्तिः *f.*, अनुपपाद्यता, असङ्गतिः *f.*, असङ्गतत्वं, अघटनीयता, अभवनीयत्वं, अप्रमेयता, असाध्यता.

IMPROBABLE, *a.* असम्भवः -वा -वं, असम्भाव्यः -व्या -व्यं, असम्भावनीयः -या -यं, असम्भावितः -ता -तं, असङ्गतः -ता -तं, अनुपपन्नः -न्ना -न्नं, असत्यसन्निभः -भा -भं, असत्यसङ्काशः -शा -शं, अभवनीयः -या -यं, असाध्यः -ध्या -ध्यं, असाधनीयः -या -यं, अघटनीयः -या -यं, अघटितः -ता -तं, अघटमानः -ना -नं, अप्रमेयः -या -यं, 'it is improbable,' न उपपद्यते.

IMPROBABLY, *adv.* असम्भवेन, असम्भावनीयं, असङ्गतं, असाध्यं, अन्यथा.

IMPROBITY, *s.* असाधुत्वं -ता, अशुचित्वं, अधर्म्मः, असरलता, असारल्यं, अनृजुता, असदाशयता, अशुद्धता, दुष्टता, अभद्रता, नीचत्वं, खलता, जिह्मता, कौटिल्यं, कापट्यं, कौटं, वक्रता.

IMPROMPTU, *adv.* पूर्व्वचिन्ताम् अकृत्वा, पूर्व्वचिन्तां विना, अचिन्तितं, अनायासेन.

IMPROMPTU, *a.* अचिन्तापूर्व्वः -र्व्वा -र्व्वं, अपूर्व्वचिन्तः -न्ता -न्तं, अयत्नपूर्व्वः -र्व्वा -र्व्वं, आकस्मिकः -की -कं, प्रस्तुतः -ता -तं, पूर्व्वविचारहीनः -ना -नं.

IMPROPER, *a.* अयुक्तः -क्ता -क्तं, अयोग्यः -ग्या -ग्यं, अनुचितः -ता -तं, अन्याय्यः -य्या -य्यं, असङ्गतः -ता -तं, अनुपयुक्तः -क्ता -क्तं, असमञ्जसः -सा -सं, अनुपपन्नः -न्ना -न्नं, अनर्हः -र्हा -र्हं, असदृशः -शी -शं, अपथ्यः -थ्या -थ्यं, असमीचीनः -ना -नं, असम्भाव्यः -व्या -व्यं, असम्भावनीयः -या -यं, अपथ्यः -थ्या -थ्यं, अयथार्थः -र्था -र्थं; sometimes expressed by कु prefixed, as, 'an improper marriage,' कुविवाहः.—(Improper to be done) अकर्त्तव्यः -व्या -व्यं, अकरणीयः -या -यं, अकार्य्यः -र्य्या -र्य्यं, अननुष्ठेयः -या -यं, नानुष्ठेयः -या -यं, अननुष्ठातव्यः -व्या -व्यं; [illegible] to be spoken,' अवचनीयः -या -यं.

IMPROPERLY, *adv.* अयुक्तं, अयोग्यं, अनुपयुक्तं, अनुचितं -तेन, असाम्प्रतं -तं, असम्यक्, अन्यायेन, अन्यायतस्, अयुक्तं, अकार्य्यं, अयोगतस्, अकाण्डतस् [illegible] धर्मं [illegible] नियम [illegible] ng improprie[t]y [illegible] अकृत्यकारी [illegible] रिणी [illegible] न् व्यभिचारी &c.

IMPROPRIETY, *s.* अयुक्तिः *f.*, अयुक्तता, नियुक्तिः *f.*, अन्यायः -य्यत्वं, अनुपयुक्तता, अविनयः, अविनीतता, अनौचित्यं, अनुचितत्वं, अनौचित्यं, अयोग्यता, असमञ्जसं, असामञ्जस्यं, अनुपपत्तिः *f.*, असङ्गतत्वं, व्यलीकता, असम्यक्त्वं, अयाथार्थ्यं, 'of conduct,' अमर्य्यादा, कुचर्य्या, कुचरितं, कुचेष्टितं, दुश्चरितं, दुश्चेष्टितं, अपचारः, अकार्य्यं, अकर्त्तव्यता, भ्रम, व्यभिचारः, अनियमः, मर्य्यादातिक्रमः, 'of speech,' अवचनीयता, अवाच्यता.

IMPROSPERITY, *s.* असमृद्धिः *f.*, अकल्याणं, अकुशलं, अशुभं, असम्पत्तिः *f.*

IMPROSPEROUS, *a.* असमृद्धः -द्धा -द्धं, अकल्याणः -णा -णं, अक्षेमवान् -वती -वत् (त्).

IMPROVABILITY, *s.* वर्धनीयता, संवर्धनीयता, बृंहणीयता, श्रेयस्त्वक्षमता.

IMPROVABLE, *a.* वर्धनीयः -या -यं, संवर्धनीयः -या -यं, बृंहणीयः -या -यं, श्रेयस्त्वक्षमः -मा -मं, भद्रतरभावक्षमः -मा -मं, वृद्धिम् आनेयः -या -यं, भद्रतरीकरणीयः -या -यं.

To IMPROVE, *v. a.* (Make better, advance in good qualities) भद्रतरं -रां -रं कृ, अधिकतरं -रां -रं कृ, भद्रतरीकृ, अधिकीकृ, वृध् (c. 10. वर्धयति -यितुं), संवृध्, परिवृध्, बृंह् (c. 10. बृंहयति -यितुं), वृद्धिं नी (c. 1. नयति, नेतुं) or प्राप् in caus. (-आपयति -यितुं), श्रेयस्त्वं or भद्रतरत्वं or भद्रतरभावं नी or प्राप्, श्रेयांसं -यसीं -यः कृ.—(Make productive, turn to good account) सफलं -लां -लं कृ, सफलीकृ, सु प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं).

To IMPROVE, *v. n.* (Grow better, advance in goodness or any excellence) भद्रतरः -रा -रं भू, भद्रतरीभू, वृध् (c. 1. वर्धते -र्धितुं), अभिवृध्, विवृध्, प्रवृध्, संवृध्, वृद्धिं गम् (c. 1. गच्छति, गन्तुं) or प्राप् (c. 5. -आप्नोति -आप्तुं), श्रेयान् -यसी -यो भू, अधिकः -का -कं भू, अधिकतरः -रा -रं भू, अधिकीभू, अधिकतरीभू, उपचि in pass. (-चीयते) अभ्युदयं or उपचयं गम् or इ (c. 2. एति -तुं), 'improve in knowledge,' विद्यागमं कृ, विद्याप्राप्तिं कृ, विद्यार्ज्जनं कृ.

IMPROVED, *p. p.* वर्धितः -ता -तं, प्रवृद्धः -द्धा -द्धं, उपचितः -ता -तं, बृंहितः -ता -तं, परिबृंहितः -ता -तं, भद्रतरीभूतः -ता -तं, अधिकीभूतः -ता -तं, समुत्थितः -ता -तं.—(Employed profitably) सफलीकृतः -ता -तं, सुप्रयुक्तः -क्ता -क्तं.

IMPROVEMENT, *s.* (Advancement in any excellence) वृद्धिः *f.*, प्रवृद्धिः *f.*, वर्धनं, उपचयः, समुत्थानं, अभ्युदयः, बृंहणं, परिबृंहणं, आधिक्यं, प्राप्तिः *f.*, आगमः.—(State of being better) श्रेयस्त्वं, भद्रतरत्वं, श्रेष्ठता, श्रैष्ठ्यं.—(Advancement in knowledge) विद्यागमः, विद्याप्राप्तिः *f.*, विद्यार्ज्जनं.—(Progression) अग्रगमनं, अग्रगमनं.—(Employment to beneficial purposes) सुप्रयोगः, सफलीकरणं.

IMPROVIDENCE, *s.* अपूर्व्वदृष्टिः *f.*, अदीर्घदृष्टिः *f.*, अपरिणामदृष्टिः *f.* -दर्शनं, अदूरदृष्टिः *f.*, अपूर्व्वचिन्ता, अपूर्व्वविवेचनं, अपूर्व्वनिरूपणं, अप्रसमीक्षा, असमीक्ष्यकारिता, पूर्व्वविवेचनाभावः, पूर्व्वचिन्ताभावः, अपूर्व्वविचारणं, असावधानता.

IMPROVIDENT, *a.* अदीर्घदर्शी -र्शिनी -र्शि (न्), अदूरदर्शी &c., अपूर्व्वदृष्टिः -ष्टिः -ष्टि, अदीर्घदृष्टिः -ष्टिः -ष्टि, अपरिणामदर्शी &c., अपूर्व्वविवेकी -किनी -कि (न्), असमीक्ष्यकारी -रिणी -रि (न्), अभविष्यदर्शी &c.

IMPROVIDENTLY, *adv.* पूर्व्वचिन्तां विना, अग्रविवेचनां विना, अग्रनिरूपणं विना, पूर्व्वविचारणां विना, अपरिणामदृष्ट्या, असमीक्षापूर्व्वं, अप्रसमीक्ष्य, अप्रविमृश्य.

IM[illegible], *pa.* [illegible] *a.* (Growing bett[illegible] वर्धमानः -ना -नं वर्धी

B

विनी वि (न्) वर्धन नी न उपचयोन्मान ना न —(Make b वर्धक का क वृद्धिकर रं वृंहण श पो पो

अविनय अविनीतता अनीति दविनीतता त्वीति f दुर्णीयः, असमीक्ष्या, ..., अविज्ञता, अप्रज्ञता, अप्राज्ञत्वं, आववेचना, अविचारः -रणा, अविचक्षणता, अवैचक्षण्यं, असावधानता, अमनस्विता.

IMPRUDENT, *a.* अविज्ञः -ज्ञा -ज्ञं, अप्रज्ञः -ज्ञा -ज्ञं, अविचक्षणः -णा -णं, अविनीतः -ता -तं, दुर्विनीतः -ता -तं, अनभिज्ञः -ज्ञा -ज्ञं, अनीतिमान् मती -मत् (त्), अनीतिज्ञः -ज्ञा -ज्ञं, अविमृश्यकारी -रिणी -रि (न्), असमीक्ष्यकारी &c., अमनस्वी -स्विनी -स्वि (न्), अमतिमान् -मती -मत् (त्), अविवेकी -किनी -कि (न्), अविवेचकः -का -कं, अविचारणशीलः -ला -लं, अकार्यचिन्तकः -का -कं, अबुधः -धा -धं, असावधानः -ना -नं.

IMPRUDENTLY, *adv.* अविज्ञवत्, अविनीतवत्, अविमृश्य, असमीक्ष्य, असमीक्ष्यपूर्वं, अविचारपूर्वं, अविचार्य, अनालोचितं, अविचारितं, अबुधवत्.

IMPUDENCE, *s.* निर्लज्जता -त्वं, लज्जाहीनता, अलज्जता, अलज्जा, धृष्टता, धार्ष्ट्यं, प्रगल्भता, प्रागल्भ्यं, वैयात्यं, त्रपाहीनता, अनपत्रपत्वं, निस्त्रपत्वं, निरपत्रपत्वं, अव्रीडता, व्रीडाहीनता, अविनयः, अविनीतता.

IMPUDENT, *a.* निर्लज्जः -ज्जा -ज्जं, लज्जाहीनः -ना -नं, अलज्जः -ज्जा -ज्जं, विलज्जः -ज्जा -ज्जं, अविनीतः -ता -तं, दुर्विनीतः -ता -तं, धृष्टः -ष्टा -ष्टं, अत्रपः -पा -पं, त्रपाहीनः -ना -नं, निस्त्रपः -पा -पं, निरपत्रपः -पा -पं, अनपत्रपः -पा -पं, वियातः -ता -तं, प्रगल्भः -ल्भा -ल्भं, व्रीडाहीनः -ना -नं, त्यक्तव्रीडः -डा -डं, अल्पलज्जः -ज्जा -ज्जं, अभिभूतः -ता -तं, धर्षितः -ता -तं, धृष्णक् *m. f. n.* (ज्), धृष्णुः -ष्णुः -ष्णु, त्यक्तलज्जः -ज्जा -ज्जं, प्रौढः -ढा -ढं.

IMPUDENTLY, *adv.* धृष्टवत्, अविनीतवत्, दुर्विनीतवत्, अविनीतं, धार्ष्ट्येन, प्रगल्भं, प्रगल्भवत्, लज्जां विना, वैयात्येन, प्रौढवत्, वियातवत्.

To IMPUGN, *v. a.* विपरीतं वद् (c. 1 वदति -दितुं), अपवद्, विवद्, प्रत्याख्या (c. 2. -ख्याति -तुं), अधरीकृ, विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, प्रतिकूल (nom. प्रतिकूलयति -यितुं).

IMPUGNED, *p. p.* अपवादितः -ता -तं, प्रत्याख्यातः -ता -तं, अधरीकृतः -ता -तं, विरुद्धः -द्धा -द्धं, बाधितः -ता -तं, विप्रतिपन्नः -न्ना -न्नं.

IMPUGNER, *s.* विपरीतवादी *m.* (न्), अपवादकः, प्रतिवादी *m.* (न्).

IMPULSE, *s.* वेगः, आवेगः, मनोवेगः, प्रेरणं -णा, प्रचोदः, प्रवर्त्तः -र्त्तनं, प्रोत्साहः -हनं, प्ररोचनं, शक्तिः *f.*—(Motive) हेतुः *m.*, प्रयोगः, प्रयोजनं, निमित्तं, निबन्धनं, कारणं.—(Mental impression) मनःसंस्कारः.

IMPULSION, *s.* प्रेरणं -णा, प्रचोदः -दनं, प्रचोदनं, आकर्षः -र्षणं, प्रवर्त्तनं.

IMPULSIVE, *a.* प्रेरकः -का -कं, प्रचोदकः -का -कं, प्रचोदकः -का -कं.—(Actuated by impulse) वेगी -गिनी -गि (न्), वेगवान् -वती -वत् (त्), वेगशीलः -ला -लं.

IMPUNCTUAL, *a.* असमयपालकः -का -कं, असामयिकः -की -कं, अकालिकः -की -कं.

IMPUNITY, *s.* (Exemption from punishment) अदण्डः -ण्डः, दण्डाभावः, अशास्त्तं, अशिष्टिः *f.*—(Exemption from injury or hurt) अक्षतिः *f.*, अक्षतं, अहिंसा, हिंसाभावः, अपीडा, अनाशः, अनपकारः, 'with impunity to one's self,' स्वयमक्षतेन.

IMPURE, *a.* अशुद्धः -द्धा -द्धं, अशुचिः -चिः -चि, अपवित्रः -त्रा -त्रं, अमेध्यः -ध्या -ध्यं, अपूतः -ता -तं, अशुद्धिः -द्धिः -द्धि, अशौची -चिनी -चि (न्), आशौची &c., अनिर्मलः -ला -लं, समलः -ला -लं, मलवान् -वती -वत् (त्), मलिनः -ना -नं, अपुण्यः -ण्या -ण्यं, अपावनः -ना -नं, शौचहीनः -ना -नं.—(Obscene) गर्हितः -ता -तं, गर्ह्यः -र्ह्या -र्ह्यं, कुत्सितः -ता -तं, अवाच्यः -च्या -च्यं.—(Unchaste) लम्पटः -टा -टं, पांशुलः -ला -लं.

IMPURELY, *adv.* अशुद्धं, अपवित्रं, अपवत्र्यं, समलं, आशौच्य, अशुचिवत्, अमेध्यं, अशुद्धवत्, मलिनं, लम्पटवत्, गर्हितं.

IMPURENESS, IMPURITY, *s.* अशुद्धिः *f.*, अशुद्धत्वं -ता, अशोधनं, अशुचिता, अशुचित्वं, अशौचं -चत्वं, आशौचं, अपवित्रत्वं -ता, अमेध्यता, अपुण्यता, अपूतता, अपूतिः *f.*, समलता, मलवत्त्वं, मालिन्यं, मलं, कलुषत्वं, कालुष्यं, शौचहीनता, अप्रायत्यं.—(Obscenity) गर्हितत्वं, कुत्सितत्वं, अवाच्यता.—(Unchastity) लम्पटत्वं, लाम्पट्यं, पांशुलता; 'an impure thing,' अपद्रव्यं.

To IMPURPLE, *v. a.* धूम्रीकृ, धूम्रलीकृ, धूमल (nom. धूमलयति -यितुं). *See* EMPURPLE.

IMPUTABLE, *a.* आरोपणीयः -या -यं, अध्यारोपणीयः -या -यं, सम्बन्धनीयः -या -यं, अभिसम्बन्धनीयः -या -यं.

IMPUTATION, *s.* (Act of imputing) आरोपः -पणं, अध्यारोपः -पणं, अभिसम्बन्धनं, सम्बन्धनं, प्रसङ्गः; 'imputation of a crime,' दोषारोपः, दोषकल्पनं, दोषप्रसङ्गः.—(Charge) अभियोगः, अपवादः, अभिशंसनं, संशयः.—(Reproach) अवक्षेपः, क्षेपः, अभिवादः, परीवादः, दुर्वाक्यं, दुरुक्तं, तिरस्कारवाक्यं, कलङ्कः.

To IMPUTE, *v. a.* (Attribute) आरुह् in caus. (-रोपयति -यितुं), अध्यारुह्, अभिसम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं), सम्बन्ध्.—(Impute crime to any one) कस्मिंश्चिद् दोषम् आरुह् or क्षिप् (c. 6. क्षिपति, क्षेप्तुं), दोषारोपणं कृ, दोषप्रसङ्गं कृ, दोषकल्पनं कृ.—(Cast imputations) अवक्षिप्, अधिक्षिप्, क्षिप्, अपवद् (c. 1. -वदति -दितुं).

IMPUTED, *p. p.* आरोपितः -ता -तं, आरूढः -ढा -ढं, अध्यारोपितः -ता -तं.

IMPUTER, *s.* आरोपकः, आरोपयिता *m.* (तृ), आरोपणकृत् *m.*, अवक्षेपकः.

IN, *prep.* नि prefixed to roots may give the sense of 'in;' as, 'to enter in,' निविश्; 'to dwell in,' निवस्. When 'in' is used for 'within,' or 'in the midst,' it may be expressed by अन्तर्, अन्तरा, अन्तरे, मध्ये. But the most frequent use of 'in' is expressed in Sanskrit by the locative case without any preposition: as, 'in the city,' नगरे; 'in the night,' रात्रौ; 'a tree planted in the earth,' पृथिव्यां रोपितो वृक्षः; 'confidence in you,' त्वयि विश्वासः; 'engaging in the acquisition of wealth,' अर्थार्जने प्रवृत्तिः *f.*; 'the sun in the east,' प्राचि सूर्यः; 'he sinks in the mud,' पङ्के मज्जति; 'he delights in the good of others,' परहिते रमते; 'in the front of the fight,' रणमूर्द्धि. In cases where 'in' refers to any division of time, or the manner in which any thing is done, it is usually expressed in Sanskrit by the instr. case; as, 'in three years,' त्रिभिर् वर्षैः; 'in twelve months,' द्वादशभिर् मासैः; 'in hundreds of years,' वर्षशतैः; 'in an instant,' क्षणेन; 'in process of time,' कालपर्यायेण; 'in how long time?' कियता कालेन; 'in a short time,' अचिरेण; 'in this manner,' अनेन प्रकारेण; 'in abundance,' बाहुल्येन; 'in the form of a man,' नररूपेण; 'in joke,' परिहासेन; 'written in Sanskrit,' संस्कृतेन रचितं. Certain adverbial affixes and prefixes may often express 'in;' as, 'in front,' अग्रतस्; 'in the first place,' प्रथमतस्; 'in another place,' अन्यत्र; 'in one place,' एकत्र; 'in many places,' बहुत्र; 'in the next world,' अमुत्र; 'in every way,' सर्वथा; 'in another way,' अन्यथा; 'in one way,' एकधा; 'in a hundred ways,' शतधा; 'in many ways,' बहुधा; 'in some wa

कियत्किय् अल्पशस्, 'in small quantities,' अल्पशस्, 'in large quantities,' बहुशस्; 'in proper order,' क्रमशस्, क्रमतस्, अनुक्रमं; 'in every direction,' प्रतिदिशं; 'in three directions,' त्रेधा; 'in like manner,' तथैव, तद्वत्; 'in vain,' वृथा, मुधा. Sometimes 'in' may be expressed by a participle; as, 'he has pleasure in calumniating others,' अन्यान् परिवदन् स तुष्यति or पराभिशंसनं कृत्वा हृष्टो भवति; 'what bravery is there in killing a sleeping man?' किं पौरुषं हत्वा सुप्तं; 'he said that to me in joke,' उपहस्य माम् तद् अवदत्. The sense of 'in,' may be inherent in a noun; as, 'to go in and out,' गमनागमने कृ. 'In as much as,' is expressed by यस्मात्, येन, or by the abl. or instr. case of the abstract noun; as, 'in as much as it is founded on observation,' प्रत्यक्षमूलत्वात् or प्रत्यक्षमूलतया.

INABILITY, *s.* अशक्तिः *f.*, अशक्तता -त्वं, असामर्थ्यं, असमर्थत्वं, अक्षमता -त्वं, शक्तिहीनता, अबलत्वं, निर्बलत्वं, दौर्बल्यं, बलहीनता, शक्तिवैकल्यं, अयोग्यता -त्वं.

INABSTINENCE, *s.* असंयमः -मनं, असंयामः, अयतेन्द्रियत्वं, अयताहारत्वं, अनिवृत्तिः *f.*

INACCESSIBILITY, *s.* अगम्यता, अनभिगम्यता, दुर्गम्यता, दौर्ग्यं, अप्राप्यता, अलङ्घनीयत्वं, अलभ्यता, गहनत्वं.

INACCESSIBLE, *a.* अगम्यः -म्या -म्यं, अनभिगम्यः -म्या -म्यं, अगमनीयः -या -यं, दुर्गम्यः -म्या -म्यं, दुर्गमः -मा -मं, दुर्गः -र्गा -र्गं, अप्राप्यः -प्या -प्यं, दुष्प्राप्यः -प्या -प्यं, दुरासदः -दा -दं, दुरारोहः -हा -हं, सुदुरारुहः -हा -हं, दुरुपक्रमः -मा -मं, अलङ्घनीयः -या -यं, गहनः -ना -नं, विषमस्थः -स्था -स्थं.—(Not to be obtained) अलभ्यः -भ्या -भ्यं, दुर्लभः -भा -भं, अप्रापणीयः -या -यं.—(Forbidding access, haughty) दुर्धर्षः -र्षा -र्षं.

INACCURACY, *s.* अशुद्धिः *f.*, अशुद्धता -त्वं, अशोधनं, अयाथार्थ्यं, असम्यक्त्वं, असङ्गतत्वं, अतथ्यं, असामञ्जस्यं, भ्रमः, प्रमादः, अन्यथात्वं.

INACCURATE, *a.* अशुद्धः -द्धा -द्धं, अशोधितः -ता -तं, अयथार्थः -र्था -र्थं, असम्यङ् -मीची -म्यक् (क्), असङ्गतः -ता -तं, अतथ्यः -थ्या -थ्यं, असमञ्जसः -सा -सं, अलक्षणः -णा -णं, अयाथार्थिकः -की -कं, अनृतः -ता -तं.

INACCURATELY, *adv.* अशुद्धं, अयथार्थं, असम्यक्, अतथ्यं, असङ्गतं, असमञ्जसं, अन्यथा, अनक्षरा, अनृतं.

INACTION, *s.* अकर्म्म *n.* (न्), अक्रिया, अक्रियत्वं -ता, अप्रवृत्तिः *f.*, नैष्कर्म्यं, अचेष्टा, अनुद्योगः, आलस्यं, अलसता, अव्यवसायः, निर्व्यापारः, औदासीन्यं, औदास्यं, निर्वृत्तिः *f.*

INACTIVE, *a.* अकर्म्मा -र्म्मा -र्म्म (न्), *अकर्म्मकृत m. f. n.*, निष्कर्म्मा -र्म्मा -र्म्म (न्), अक्रियः -या -यं, क्रियाशून्यः -न्या -न्यं, निश्चेष्टः -ष्टा -ष्टं, निरुद्योगः -गा -गं, निरुत्साहः -हा -हं, निरुद्यमः -मा -मं, अप्रवर्त्तकः -का -कं, अयत्नः -त्ना -त्नं, अप्रयत्नः -त्ना -त्नं, प्रयत्नशून्यः -न्या -न्यं, अयत्नकारी -रिणी -रि (न्), अयत्नवान् -वती -वत् (त्), लघुप्रयत्नः -त्ना -त्नं, अव्यवसायी -यिनी -यि (न्), निर्व्यापारः -रा -रं, वृत्तिरहितः -ता -तं, अलसः -सा -सं, उदासीनः -ना -नं, अनुद्यतः -ता -तं; 'to remain inactive,' अलसीभू, अलसो भृत, उदास् (c. 2. -आस्ते -आसितुं).

INACTIVELY, *adv.* निरुद्योगं, निरुत्साहं, उद्योगम् अकृत्वा, यत्नं विना, प्रयत्नम् अकृत्वा, अलसवत्, उदासीनवत्.

INACTIVITY, *s.* अक्रिया -यत्वं, अकर्म्म *n.* (न्), अनुद्योगः, अनुत्साहः, अप्रवृत्तिः *f.*, अव्यवसायः, अयत्नः, अप्रयत्नता, अचेष्टा, निर्व्यापारः, नैष्कर्म्यं, क्रियाशून्यता, आलस्यं, अलसता, औदासीन्यं, औदास्यं, कार्य्यप्रद्वेषः.

INADEQUACY, *s.* अक्षमता -त्वं, असामर्थ्यं, अपर्य्याप्ता, अयोग्यता, अनुपयुक्तत्वं.

INADEQUATE, *a.* अक्षमः -मा -मं, असमर्थः -र्था -र्थं, अयोग्यः -ग्या -ग्यं, अनुपयुक्तः -क्ता -क्तं, अपर्य्याप्तः -प्ता -प्तं, अनुचितः -ता -तं, अप्रभूतः -ता -तं, कार्य्याक्षमः -मा -मं, अनलम् indec.

INADEQUATELY, *adv.* अपर्य्याप्तं, अनुपयुक्तं, अयोग्यं, अनलम्, अक्षमं.

INADMISSIBLE, *a.* अनादेयः -या -यं, अग्राह्यः -ह्या -ह्यं, अग्रहणीयः -या -यं, अनुपादेयः -या -यं, अस्वीकरणीयः -या -यं, अस्वीकार्य्यः -र्य्या -र्य्यं, अमन्तव्यः -व्या -व्यं; 'into society,' अपांक्तेयः -या -यं, अपांक्त्यः -क्त्या -क्त्यं, अपांक्तः -क्ता -क्तं.

INADVERTENCE, INADVERTENCY, *s.* प्रमादः, प्रमाद्यं, अनवधानं -नता, असावधानता, अमनोयोगः, अनपेक्षा, अनवेक्षा, उपेक्षा.

INADVERTENT, *a.* प्रमादी -दिनी -दि (न्), प्रमादवान् -वती -वत् (त्), प्रमत्तः -त्ता -त्तं, अनवधानः -ना -नं, असावधानः -ना -नं, अनवहितः -ता -तं, उपेक्षकः -का -कं, निरपेक्षः -क्षा -क्षं, अमनोयोगी -गिनी -गि (न्).

INADVERTENTLY, *adv.* प्रमादेन -दात्, प्रमत्तं, सप्रमादं, प्रमाद्यात्, अनवधानेन -नात्, अनवहितं, अमनोयोगात्, अनपेक्षया, निरपेक्षं, असमीक्ष्य.

INALIENABLE, *a.* अविभेद्यः -द्या -द्यं, अविभेदनीयः -या -यं, अविच्छेदनीयः -या -यं, परवशे कर्त्तुम् अशक्यः -क्या -क्यं, परवशे स्थापयितुम् अशक्यः -क्या -क्यं, अदेयः -या -यं, अनन्यादेयः -या -यं, अनन्यहार्य्यः -र्य्या -र्य्यं, अनन्यसमर्पणीयः -या -यं, परादेयः -या -यं, वंशमात्रोपभोग्यः -ग्या -ग्यं; 'inalienable property,' पराधीनं कर्त्तुं न शक्यते यद् द्रव्यं.

INALIENABLENESS, *s.* अविभेद्यता, अविभेदनीयता, अनन्यादेयता, अनन्यहार्य्यता.

INALTERABLE, *a.* अविकार्य्यः -र्य्या -र्य्यं, अविकरणीयः -या -यं.

INAMISSIBLE, *a.* अहेयः -या -यं, अहार्य्यः -र्य्या -र्य्यं, अत्याज्यः -ज्या -ज्यं, अहरणीयः -या -यं, अनाश्यः -श्या -श्यं, अविनाश्यः -श्या -श्यं.

INAMORATA, *s.* प्रिया, कान्ता, कामिनी, अनुरागवती, प्रणयिनी, रागिणी.

INAMORATO, *s.* प्रियः, कान्तः, कामी *m.* (न्), अनुरागवान् *m.* (त्), प्रणयी *m.* (न्), रागी *m.* (न्).

INANE, *a.* शून्यः -न्या -न्यं, रिक्तः -क्ता -क्तं, असारः -रा -रं, निःसारः -रा -रं, सारहीनः -ना -नं, वितानः -ना -नं, तुच्छः -च्छा -च्छं.

INANIMATE, *a.* निर्जीवः -वा -वं, विचेतनः -ना -नं, अचेतनः -ना -नं, अप्राणी -णिनी -णि (न्), प्राणहीनः -ना -नं, निष्पन्दः -न्दा -न्दं; 'animate and inanimate,' चेतनाचेतनं.

INANITION, *s.* शून्यता, असारता, सारहीनता, अपूर्णता, अवसादः, निरन्नत्व.

INANITY, *s.* शून्यत्वं, रिक्तता -त्वं, निःसारत्वं, साराभावः, रिक्तं.

INAPPETENCY, *s.* अलोभः, अनभिलाषः, अनभिरुचिः *f.*, अनिच्छा, अवाञ्छा.

INAPPLICABLE, *a.* अयोग्यः -ग्या -ग्यं, अनुपयुक्तः -क्ता -क्तं, अनुपयोगी -गिनी -गि (न्), अनुपपन्नः -न्ना -न्नं, अप्रयोक्तव्यः -व्या -व्यं, अप्रयोज्यः -ज्या -ज्यं.

INAPPLICATION, *s.* अनभिनिवेशः, अमनःप्रवेशः, अमनोयोगः, अनभ्यासः, अनुद्योगः, अप्रवृत्तिः *f.*, अप्रवृत्तत्व, अव्यवसायः, आलस्यं, अलसता -त्वं.

INAPPOSITE, *a.* अयुक्तः -क्ता -क्तं, असङ्गतः -ता -तं, अयोग्यः -ग्या -ग्यं, प्रस्तुतबहिर्भूतः -ता -तं, प्रस्तुतविरुद्धः -द्धा -द्धं.

INAPPOSITELY, *adv.* असङ्गतं, अयुक्तं, अयोग्यं, अनुपयुक्तं, अनुपपन्नं.

INAPPREHENSIBLE, *a.* अग्राह्यः -ह्या -ह्यं, अगम्यः -म्या -म्यं, अनुपलभ्यः -भ्या -भ्यं.

INAPPREHENSIVE, *a.* अशङ्की -ङ्किनी -ङ्कि (न्), अशङ्कान्वितः -ता -तं.

INAPPROACHABLE, *a.* अनभिगम्यः -म्या -म्यं, अनुपगम्यः -म्या -म्यं, अगम्यः -म्या -म्यं.

INAPPROPRIATE, *a.* अयोग्यः -ग्या -ग्यं, अयुक्तः -क्ता -क्तं, असङ्गतः -ता -तं, असङ्गतार्थः -र्था -र्थं, अनुपयोगी -गिनी -गि (न्), निर्युक्तिकः -की -कं.

INAPPROPRIATELY, *adv.* अयोग्यं, अयुक्तं, असङ्गतं, अनुपयुक्तं, अस्थाने.

INAPTITUDE, *s.* अयोग्यता, अनुपयुक्तत्वं, अनुपयोगिता, अपात्रता -त्वं, अयुक्तिः *f.*, निर्युक्तिः *f.*, अनुचितत्वं.

5

I... *adv.* अव्यक्तं अयोग्यं अनुपपन्नं अयुक्तं अस्थाने

I... *a.* अकर्मणीय ...या ...यं अकृपिदोग्य ...या ...यं ...नीय ...ता ...त

I... स्पष्टः ...ष्टा ...ष्टं ...स्पष्टं ...ष्टा ...ष्टं 'पष्टक्षपद' ...दा ...दं अस्पष्टाक्षरः ...रा ...रं, अस्फुटाक्षरः ...रा ...रं ...रा ...रं, अव्यक्तवर्णी ...र्णी ...र्णि, अस्फुटः -टा -टं, अपरिस्फुटः -टा -टं, अव्यक्तलः -ला -लं, क्लिष्टः -ष्टा -ष्टं, क्ष्वेडितः -ता -तं, कद्वदः -दा -दं: 'inarticulate speech, गद्गदवाक् *f.* (च्), गद्गदपदं, क्लिष्टं, क्ष्वेडितं, सीत्कृतं, हिक्का; 'with a voice inarticulate from weeping,' वाष्पसन्दिग्धया गिरा

INARTICULATELY, *adv.* अव्यक्तं, अस्पष्टं, अस्फुटं, गद्गदवाचा, सन्दिग्धाक्षरया गिरा, सन्दिग्धवाचा, अस्पष्टोच्चारणेन.

INARTICULATENESS, *s.* अव्यक्तता, अस्पष्टता, वागस्पष्टता, उच्चारणास्पष्टत्वं

INARTIFICIAL, *a.* अकृत्रिमः -मा -मं, अकृतकः -का -कं, अकाल्पनिकः -की -कं.

INARTIFICIALLY, *adv.* अकृत्रिमं, अकृत्रिमप्रकारेण, अकल्पनापूर्व्वं, अप्रतियत्नपूर्व्वं, अयत्नकृतं.

IN AS MUCH AS, *adv.* यस्मात्, येन. *See* IN.

INATTENTION, *s.* अनवधानं -नता, असावधानता, अनवहितत्वं, अमनोयोगः, उपेक्षा, अनवेक्षा, अनपेक्षा, प्रमादः, प्रमत्तता, प्रमाद, अनभिनिवेशः, अमनोनिवेशः, अमनःप्रवेशः, अनिविष्टचित्तता, अनासक्तचित्तता, विबोधः, अमनुष्ठानं, अननुष्ठातृत्वं, अनादरः, उद्भावनं, शून्यहृदयत्वं, असतर्कत्वं, विरक्तत्वं, अननुरागः.

INATTENTIVE, *a.* असावधानः -ना -नं, अनवधानः -ना -नं, अनवहितः -ता -तं, अमनोयोगी -गिनी -गि (न्), प्रमत्तः -त्ता -त्तं, प्रमादी -दिनी -दि (न्), प्रमादवान् -वती -वत् (त्), निरपेक्षः -क्षा -क्षं, उपेक्षकः -का -कं, अनिविष्टचित्तः -त्ता -त्तं, अनासक्तः -क्ता -क्तं, अनासक्तचित्तः -त्ता -त्तं, विमुग्धः -ग्धा -ग्धं, अनादरः -रा -रं, विरक्तः -क्ता -क्तं.

INATTENTIVELY, *adv.* अनवधानेन -नतस्, अनवहितं, अवधानं विना, सप्रमादं.

INAUDIBLE, *a.* अश्राव्यः -व्या -व्यं, अश्रवणीयः -या -यं, अश्रोतव्यः -व्या -व्यं, कर्णागोचरः -रा -रं, अकर्णविषयः -या -यं, श्रोत्राग्राह्यः -ह्या -ह्यं, श्रोतुम् अशक्यः -क्या -क्यं.

INAUDIBLY, *adv.* अश्रवणीयं, अश्राव्यं, यथा श्रोतुं न शक्यते तथा.

LET, s. (Hinderance) रोधः, व्याघातः, प्रत्यूहः, विघ्नः, अन्तरायः, बाधः.

LET LOOSE, p. p. मुक्तः -क्ता -क्तं, विमुक्तः -क्ता -क्तं, विमोचितः -ता -तं, विसृष्टः -ष्टा -ष्टं, शिथिलीकृतः -ता -तं, शिथिलितः -ता -तं, त्यक्तः -क्ता -क्तं, विस्रस्तः &c.

LETHAL, a. मारात्मकः -का -कं, प्राणनाशकः -का -कं, प्राणहरः -रा -रं, प्राणघातकः -का -कं, मृत्युजनकः -का -कं. See DEADLY.

LETHARGIC, a. निद्रालुः -लुः -लु, अतिनिद्रालुः &c., निद्रालसः -सा -सं, सुप्तबुद्धिः -द्धिः -द्धि, जडः -डा -डं, जडबुद्धिः &c., निद्राशीलः -ला -लं, स्वप्नशीलः -ला -लं, तैन्द्रः -न्द्री -न्द्रं, सुषुप्सुः -प्सुः -प्सु.

LETHARGICALLY, adv. निद्रालुवत्, निद्रालसवत्, जडवत्, सजाड्यं.

LETHARGICALNESS, LETHARGY, s. निद्रालुता, अतिनिद्रालुत्वं, निद्रालसता, निद्राशीलता, स्वप्नशीलता, जडता, जाड्यं, जडबुद्धित्वं, अलसता, आलस्यं, सुप्तबुद्धित्वं, शयालुता, तन्द्रा -न्द्रिः f., प्रमीला.—(Deep sleep) घोरनिद्रा, गाढनिद्रा, सुनिद्रा, निर्भरनिद्रा.

LETHE, s. विस्मृतिः f., अस्मृतिः f., स्मृतिनाशः, स्मृतिहानिः f.

LETHEAN, a. विस्मृतिजनकः -का -कं, विस्मृतिकारकः -का -कं.

LETHIFEROUS, a. मृत्युजनकः -का -कं, निधनावहः -हा -हं. See DEADLY.

LETTER, s. (Of the alphabet, character) अक्षरं, वर्णः -र्णं, मातृका, अभिनिधानः, वर्णः, कारः, the latter word is only used in naming any letter; as, 'the letter a,' अकारः, the letter r,' is called रेफः.—(Printing letter or type) मुद्राक्षरं, अक्षरमुद्रा; 'compound letter,' संयुक्ताक्षरं, सन्ध्यक्षरं, 'letter by letter,' प्रत्यक्षरं; 'beginning to learn the letters,' अक्षरारम्भः.—(Epistle) पत्रं, लेखः, लेख्यं, पत्रिका, पत्री, पत्रकं, लिखितं, सन्देशपत्रं, लिपिः f.; 'by letter,' पत्रद्वारा, पत्रद्वारेण; 'on sight of the letter,' पत्रदर्शनात्; 'a letter from an inferior to a superior,' निवेदनपत्रं, आवेदनपत्रं, विज्ञापनपत्रं; 'from a superior officer,' आज्ञापत्रं; 'a letter to a son, daughter, &c.,' आशीर्वादपत्रं.—(The literal meaning, verbal expression) शब्दार्थः, अक्षरार्थः, वाच्यार्थः, प्रथमार्थः, पदार्थः, स्वार्थः, अभिधार्थः; 'in the spirit and in the letter,' अर्थतो ग्रन्थतश्च, अर्थतो वचनतश्च.—(Letters, literature) अक्षरं, विद्या, शास्त्रं; 'a man of letters,' शिक्षिताक्षरः, साक्षरजनः, कृतविद्यः.—(Dead letter) निरर्थकविधिः m.

To LETTER, v. a. अक्षराङ्कितं -तां कृ, अक्षरमुद्रितं -तां कृ, अक्षरैः अङ्क् (c. 10. अङ्कयति -यितुं) or मुद्र् (nom. मुद्रयति -यितुं) or मुद्रीकृ, चिह्न् (nom. चिह्नयति -यितुं), अक्षरचिह्नितं -तां कृ, अक्षरयुक्तं -क्तां कृ.

LETTER-CARRIER, s. पत्रवाहः -हकः, पत्रवाही m. (न्), लेखहारः -रकः, लेखहारी m. (न्), लेखनिकः.

LETTERED, p. p. (Stamped with letters) अक्षराङ्कितः -ता -तं, अक्षरमुद्रितः -ता -तं, अक्षरचिह्नितः -ता -तं, अक्षरयुक्तः -क्ता -क्तं; 'well lettered,' शुद्धवर्णः -र्णा -र्णं, शुद्धाक्षरः -रा -रं.—(Versed in literature) शिक्षिताक्षरः -रा -रं, साक्षरः -रा -रं, कृतविद्यः -द्या -द्यं, गृहीतविद्यः &c., कृतबुद्धिः -द्धिः -द्धि.

LETTER-PRESS, s. अक्षरमुद्रा, मुद्राक्षरं, मुद्रिताक्षरं, अक्षरं.

LETTER-WRITER, s. पत्रलेखकः, पत्रलिपिकारः, पत्रलिखनकृत्.

LETTUCE, s. शाकभेदः, हरितकं, शिग्रुः m.

LEUCOPHLEGMACY, s. कफोदरं, कफशोथः, जलोदरं, दकोदरं, आध्मानं.

LEUCOPHLEGMATIC, a. कफोदरी -रिणी -रि (न्), कफशोथरोगी -गिणी -गि (न्).

LEVANT, a. पूर्वदेशीयः -या -यं, पूर्वदिश्यः -श्या -श्यं, पूर्वदिक्स्थः -स्था -स्थं, पूर्वदेशजः -जा -जं, पूर्वदेशसम्बन्धी -न्धिनी &c., सूर्योदयदेशसम्बन्धी &c.

LEVANT, s. पूर्वदेशः, प्राग्देशः, प्राचीनदेशः, सूर्योदयदेशः.

LEVEE, s. राजदर्शनं, राजसभा, सभा, दर्शनं, प्रातःसभा.

LEVEL, a. (Even, flat) समः -मा -मं, समतलः -ला -लं, समस्थः -स्था -स्थं, सपाटः -टा -टं, समरेखः -खा -खं.—(Horizontal) क्षितिजसमसूत्रः -त्रा -त्रं.—(On the same plane or line with) समरेखः -खा -खं, समसूत्रः -त्रा -त्रं, समदेशस्थः -स्था -स्थं, समभूमिस्थः &c.; 'level ground,' समभूमिः f., समस्थलं -ली, प्रस्थः, पादः, आलिः f.; 'level surface,' समपृष्ठं, समतलं.

LEVEL, s. (Even surface) समं, समस्थलं -ली, समभूमिः f., समतलं, समपृष्ठं, समदेशः, प्रस्थः, पादः; 'liquids always find their own level,' द्रवपदार्थाः सदा समानपृष्ठा भवन्ति; 'the water in the tube rises to a level with the water in the vessel,' नलस्थजलं प्रांशुभवेन पात्रस्थजलसमं भवति.—(State of equality, equal elevation) समता, समानता, साम्यं, तुल्यता, समप्रमाणता.—(Line of direction in which a weapon is aimed) लक्ष्यं, लक्ष्यदेशः, लक्ष्यसूत्रं, सन्धानं, अभिसन्धानं.—(Instrument for finding the level) सूत्रं.—(Rule, plan) नियमः, सूत्रं.

To LEVEL, v. a. (Make even) समीकृ, समानीकृ, समं -मां -मं कृ.—(Reduce to an even surface) समस्थलीकृ, समपृष्ठीकृ, समतलीकृ.—(Aim) अभिसन्धा (c. 3. -दधाति -धातुं), प्रतिसन्धा, लक्ष्यीकृ.—(Direct at) उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्.

LEVELED, p. p. (Made even) समीकृतः -ता -तं, समानीकृतः -ता -तं.—(Reduced to an even surface) समस्थलीकृतः -ता -तं.—(Aimed) प्रतिसंहितः -ता -तं, अभिसंहितः -ता -तं, उद्दिष्टः -ष्टा -ष्टं.

LEVELER, s. समकारी m. (न्), समानकारी m.—(One who destroys distinctions) पदनाशकः, पदघातकः, भावविघातकः.

LEVELING, s. समीकरणं, समानीकरणं, समस्थलीकरणं, तुल्यीकरणं.

LEVELNESS, s. समता, साम्यं, समानता -त्वं, समभूमिस्थभावः, समस्थलस्थभावः, तुल्यता.

L 'R उत्तोलनदण्ड &c. उत्तोलनदारु m उत्तोलनी लौहदण्ड उत्तोलनयन्त्र use h a e लौहदण्डेन दारुणा उत्तल् 0 तोलयति पितु)

Rel. s. शशशावकः, शशबालः, शशशिशुः m., ...

Leviathan, s. तिमिः m., तिमिङ्गिलः, मीनरः, समुद्रराक्षः m.

To levigate, v. a. (Grind to a fine powder) चूर्ण् (c. 10 चूर्णयति पितुं), चूर्णीकृ.—(Polish, make smooth) परिष्कृ, श्लक्ष्णीकृ, स्निग्धीकृ.

Levigation, s. चूर्णीकरणं, पेषणं, क्षोदीकरणं, परिष्कारः, श्लक्ष्णीकरणं.

Levite, s. लेवीवंशाख्यो यिहुदीयानां पुरोहितः or याजकः.

Levitical, a. पौरोहितः -ती -तं, याजकीयः -या -यं, पूर्व्वोक्तयाजकसम्बन्धी -न्धिनी -न्धि (न्), धर्म्मोपदेशविषयः -या -यं.

Levity, s. (Lightness) लघुता, लाघवं, लघिमा m. (न्), अगुरुता.—(Unsteadiness) चञ्चलत्वं, चाञ्चल्यं, चपलता, चापल्यं, चापलं, लोलता, लौल्यं, मनोलौल्यं, अस्थिरता, अस्थैर्य्यं, अनवस्थितिः f., अधृतिः f.—(Want of seriousness) अगुरुता, गौरवहीनता.

To levy, v. a. (Raise troops) योद्धृमध्ये समारोप्य सैन्यान् समूहीकृ or व्यूहीकृ or समूह् (c. 1. -ऊहते -हितुं) or समाहृ (c. 1. -हरति -हर्त्तुं), सेना or पताकिनी युज् (c. 10. योजयति -यितुं), सैन्यसमूहं कृ, सैन्यसमाहारं कृ, सैन्यपरिसंख्यां कृ, शस्त्राणि or अस्त्राणि ग्रह् in caus. (ग्राहयति -यितुं), युद्धकर्म्मणि प्रवृत् (c. 10. -वर्त्तयति -यितुं), सैन्यमध्ये अभिलिख् (c. 6 -लिखति -लेखितुं) or समारुह् in caus. (-रोपयति -यितुं) or आरुह्.—(Levy a tax) करं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or आदा (c. 3. -ददाति -दातुं) or दा in caus. (दापयति -यितुं) or अवहृ (c. 10. -हारयति -यितुं), शुल्कग्रहणं कृ.—(Levy contributions) एकैकस्मात् किञ्चिद्धनग्रहणं or धनोत्तोलनं कृ.

Levy, s. (Act of collecting troops) सैन्यसमाहारः, सैन्यसमाहरणं, सैन्याभिलेखनं, सैन्यव्यूहकरणं.—(Troops raised) सैन्यसमूहः, सैन्यसमुदायः.—(Of taxes) करग्रहणं, शुल्कग्रहणं.—(Of money) धनोत्तोलनं, एकैकस्मात् किञ्चिद्धनग्रहणं.

Lewd, a. कामुकः -का -कं, कामी -मिनी -मि (न्), रतार्थी -र्थिनी &c., सुरतार्थी &c., व्यवायी -यिनी &c., व्यवायपरः -रा -रं, कामासक्तः -क्ता -क्तं, सम्भोगार्थी &c., तरलः -ला -लं, स्त्रीलम्पटः, लम्पटः, स्त्रीव्यसनी m.—(Wicked) दुष्टः -ष्टा -ष्टं, दुराचारः -रा -रं, दुरात्मा -त्मा -त्म (न्), पापी -पिनी -पि (न्).

Lewdly, adv. कामुकवत्, लम्पटवत्, कामुकं, सकामं, दुष्टवत्.

Lewdness, s. कामुकत्वं, लम्पटता, लाम्पट्यं, रतार्थित्वं, रतासक्तिः f., सकामता, सम्भोगार्थित्वं, व्यवायः -यित्वं, वैयात्यं, वियातता, हेला, स्त्रीव्यसनं.—(Wickedness) दुष्टता, दुराचारता, अधमाचारता, कुसृतिः f.

Lexicographer, s. कौशिकः, कोशकारः, कोशरचकः, अभिधानकर्त्ता m. (र्तृ).

Lexicographical, a. कौशिकः -की -कं, कोषरचनासम्बन्धी -न्धिनी -न्धि (न्).

Lexicography, s. शब्दकोशरचना, शब्दकोशकरणं, कोषरचना.

Lexicon, s. कोषः, कोशः, शब्दकोषः, शब्दकोशः, शब्दसमूहः, अभिधानं, शब्दग्रन्थः, शब्दजालं, निर्वचनं, निघण्टुः m.

Liable, a. (Subject to) अधीनः -ना -नं, योग्यः -ग्या -ग्यं, अर्हः -र्हा -र्हं, वशः -शा -शं, शीलः -ला -लं in comp., 'liable to be punished,' दण्डयोग्यः &c.; 'liable to death,' मरणाधीनः -ना -नं, 'liable to disease,' रोगाधीनः -ना -नं, 'not liable,' अनधीनः -ना -नं.—(Responsible, amenable) आज्ञाधीनः -ना -नं, अभियोज्यः -ज्या -ज्यं, अभियोज्यः -ज्या -ज्यं, अभियोक्तुराज्ञाधीनः -ना -नं, व्यवहार्य्यः -र्य्या -र्य्यं, व्यवहर्त्तव्यः -व्या -व्यं; 'liable for the debt,' उत्तमर्णाज्ञाधीनः -ना -नं, धनिकाज्ञाधीनः &c.; 'he is liable to pa दातुम् अर्हति Some m s ab may be p d by h ffix आलु ab to f पतयालु &c.

Liableness, Liability, s. अधीनता, योग्यता, त्व शीलता b to d as दोषाधीनता ab y d पतनशीलता पतयालुता.—(Responsibility) आज्ञाधीनता, अभियोज्यता, अनुयोगाधीनता, व्यवहार्य्यता; 'for debt,' उत्तमर्णाज्ञाधीनता, धनिकाज्ञाधीनता.—(Debt) ऋणं.

Liaison, s. सम्बन्धः, संयोगः, प्रेमबन्धः, प्रेमसम्बन्धः.

Liar, s. असत्यवादी m. -दिनी f. (न्), मिथ्यावादी -दिनी, मृषावादी -दिनी, असत्यवक्ता m., -क्त्री f. (क्तृ), मिथ्याभाषी -षिणी (न्), अनृतभाषी &c., अनृतवादी &c., अनृतवाक् m f (च्), अनृतवदनशीलः, असत्यवदनशीलः, अनृती m (न्), अतथ्यवादी &c., अलीकवाक् m., द्विजिह्वः, अनेकजिह्वः, असत्यप्रलापिः m.

Libation, s. (The act) उदकतर्पणं, उदकदानं, उदकक्रिया, उदकनिषेकः, उदकपातनं, देवतोद्देशकः पेयनिषेकः or पानीयनिषेकः or मद्यनिषेकः or पेयत्यागः, पात्रस्थरसनिषेकः.—(The liquor poured out) तर्पणोदकं, तर्पणरसः, तर्पणद्रव्यं, निषिक्तरसं, पातितरसः; 'to make libations,' उदकादिदानेन or उदकादिनिषेकेण तृप् (c. 10. तर्पयति -यितुं), देवतामुद्दिश्य पात्रस्थरसं पत् (c. 10. पातयति -यितुं) or पात्रस्थरसं निषिच् (c. 6. -षिञ्चति -षेक्तुं) or अवसिच्.

Libel, s. अपवादपत्रं, अपवादलेखः, अपवादलेख्यं, परिवादलेख्यं, निन्दापत्रं, निन्दालेखः, अभिशापपत्रं, अमुकोद्देशकं पिशुनलेख्यं, कलङ्कसूचकपत्रं, अख्यातिसूचकपत्रं.

To libel, v. a. अपवादपत्रेण निन्द् (c. 1. निन्दति -न्दितुं), निन्दापत्रेण अपवद् (c. 1. -वदति -दितुं) or परिवद् or कलङ्क् (nom. कलङ्कयति -यितुं) or कौर्त्तिकलङ्कं कृ, अमुकजनमुद्दिश्य अपवादपत्रं लिख् (c. 6. लिखति, लेखितुं) or निन्दापत्रं लिख्.

Libelled, p. p. पत्रापवादितः -ता -तं, पत्रनिन्दितः -ता -तं, पत्राभिशप्तः -प्ता -प्तं, लेखनिन्दितः &c., पत्रकलङ्कितः -ता -तं.

Libeller, s. पत्रापवादी m. (न्), पत्राभिशापकः, अपवादपत्रलेखकः, निन्दापत्रलेखकः, कलङ्ककारः, अभ्यसूयकः.

Libellous, a. अपवादकः -का -कं, अभिशापकः -का -कं, कलङ्ककारः -री -रं, अकीर्त्तिकरः -री -रं, अपयशस्करः -री -रं, गुणापवादकः -का -कं, निन्दकः -का -कं, पिशुनः -ना -नं, अभ्यसूयकः -का -कं.

Liberal, a. उदारः -रा -रं, दानशीलः -ला -लं, बहुदः -दा -दं, बहुप्रदः -दा -दं, अतिदाता -त्री -तृ (तृ), दायकः -का -कं, बहुदायकः -का -कं, दानरतः -ता -तं, त्यागशीलः -ला -लं, वदान्यः -न्या -न्यं, स्थूललक्षः -क्षा -क्षं, स्थूललक्ष्यः -क्ष्या -क्ष्यं, मुक्तहस्तः -स्ता -स्तं, बहुत्यागी -गिनी -गि (न्), दात्यः -त्या -त्यं, दाश्वान् -श्वती -श्वत् (त्), दारुः -रु -रु, व्ययशीलः -ला -लं, उदारहस्तः &c., उदात्तः -त्ता -त्तं, मुकलः -ला -लं, अकृपणः -णा -णं, परिनिर्विंशः -शा -शं.—(Liberal-minded) उदारचेताः -ताः -तः (स्), उदारधीः -धीः -धि, उदारचरितः -ता -तं, महाशयः -या -यं, महात्मा -त्मा -त्म (न्), महामनाः -नाः -नः (स्), महानुभावः -वा -वं, महेच्छः -च्छा -च्छं, महाशयः -या -यं.—(Of good birth) महाकुलः -ला -लं, सत्कुलीनः -ना -नं.—(Exuberant) बहुलः -ला -लं, प्रचुरः -रा -रं, परिपूर्णः -र्णा -र्णं, उद्रिक्तः -क्ता -क्तं, अतिरिक्तः -क्ता -क्तं, पुष्कलः -ला -लं, विपुलः -ला -लं.—(Liberal arts) चतुःषष्टिकला, अलङ्कारविद्या, कला.

Liberality, s. उदारता, औदार्य्यं, दानशीलता, त्यागशीलता, त्यागिता, त्यागः, दानं, अतिदानं, दातृत्वं -ता, अतिदातृत्वं, अतिसर्ज्जनं, बहुप्रदत्वं, वदान्यता, स्थूललक्षता, व्ययशीलता, मुक्तहस्तत्वं, विश्राणनं, प्रदानं,

साधुवृत्ति, प्रीतिनिमित्तक —(of mind) चाहात्म्यं, उदार चित्तत्वं; 'act of pious liberality,' पूर्त्तं.

LIBERALLY, *adv.* बाहुल्येन, अकार्पण्येन, अतिमात्रेण, अतिदानेन, मुक्तहस्तेन वदान्यवत्, उदारवत्, बहुशस्, अतिशयेन, स्थूललक्षवत्.

To LIBERATE, *v. a.* मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, निर्मुच्, मोक्ष् (c. 10 मोक्षयति -यितुं), विमोक्ष्, विसृज् (c 6 सृजति -स्रष्टुं, c. 10. -सर्जयति -यितुं), निस्तृ (c. 10. -तारयति -यितुं), उद्धृ (c. 1. -हरति -हर्तुं), त्रै (c. 1. त्रायते, त्रातुं), परित्रै, मुक्तिं कृ, विमोचनं कृ.—(From confinement) बन्धनात् or बन्धनालयाद् मुच्.

LIBERATED, *p. p.* मुक्तः -क्ता -क्तं. मोचितः -ता -तं, विमोचितः -ता -तं, विमुक्तः -क्ता -क्तं, मोक्षितः -ता -तं, विसृष्टः -ष्टा -ष्टं, उद्धृतः -ता -तं, समुद्धृतः -ता -तं, त्रातः -ता -तं, त्राणः -णा -णं, बन्धनमुक्तः -क्ता -क्तं.

LIBERATION, *s.* मुक्तिः *f.*, विमुक्तिः *f*, वैमुक्तं, मोचनं, विमोचनं, मोक्षः -क्षणं, विमोक्षः -क्षणं, परिमोक्षणं, त्राणं, परित्राणं, निस्तारः, निस्तरणं, उद्धारः, उद्धरणं, समुद्धरणं, विसर्जनं, विसृष्टिः *f.*, मुक्तिदानं.

LIBERATOR, *s.* मोचकः, विमोचकः, मोक्षकः, मुक्तिदाता *m.* (तृ), उद्धर्त्ता *m.* (र्तृ) समुद्धर्त्ता *m.*, निस्तारकः, निस्तारयिता *m.* (तृ), तारकः, त्रायकः.

LIBERTINE, *a.* व्यसनी -निनी -नि (न्), व्यसनीयः -या -यं, व्यभिचारी -रिणी -रि (न्), विषयासक्तः -क्ता -क्तं, विषयी -यिणी &c., विषयानुरागी -गिणी &c., कामासक्तः -क्ता -क्तं भोगासक्तः -क्ता -क्तं, कामुकः -का -कं, तरलः -ला -लं, अनवस्थः -स्था -स्थं, अमर्य्यादः -दा -दं, निर्मर्य्यादः -दा -दं, दुराचारः -रा -रं, कामवृत्तः -त्ता -त्तं.

LIBERTINE, *s.* लम्पटः, स्त्रीलम्पटः, स्त्रीव्यसनी *m.* (न्), स्त्रीसेवी *m.* (न्), स्त्रीपरः, स्त्रीरतः, स्त्रीव्यासङ्गी *m.* (न्), नागरः, नागरीटः, विटः

LIBERTINISM, *s.* व्यसनिता -त्वं, व्यसनं, व्यभिचारः, व्यतिक्रमः, लम्पटता, लाम्पट्यं, अनवस्थितिः *f.*, अनवस्थता, विषयासक्तिः *f.*, विषयानुरागः, कामासक्तिः *f.*, भोगासक्तिः, कामुकत्वं, स्त्रीसेवा, स्त्रीप्रसङ्गः, स्त्रीव्यसनं, स्त्रीव्यासङ्गः, दुर्वृत्तता, दुराचारत्व, अमर्य्यादा, इन्द्रियासंयमः, वनितोपभोग नारीप्रसङ्गः

LIBERTY, *s.* (Freedom from restraint or servitude) स्वतन्त्रता, स्वातन्त्र्यं, स्वाधीनता, अनधीनता, स्वच्छन्दता, स्वाच्छन्द्यं, आत्माधीनता, अपराधीनता, स्ववशत्वं, अपरवशत्वं, अवशत्वं, विवशत्वं, अपारतन्त्र्यं, अनायत्तता, अपरायत्तता, स्वायत्तता, स्वेच्छाचारता, अदास्यं, अदासत्वं, अपरप्रेष्यत्वं, दास्याभावः, सेवाभावः, अयन्त्रणं, निर्यन्त्रणं, अयन्त्रितत्व —(Freedom of the will) स्वेच्छा, स्वच्छन्दता, स्वकामः, यदृच्छा.—(Ability to act) क्षमता, शक्तिः *f.*—(Freedom in general) मुक्तिः *f.*, विमुक्तिः *f.*, मोक्षः, विमोक्षः, परिमोक्षणं, मोचनं, विमोचनं, वैमुक्तं, बन्धनाभावः, बन्धनराहित्यं.—(Leave) अनुज्ञा, अनुमतिः *f.*, अभ्यनुज्ञा.—(Exemption from) मुक्तिः *f.*, विरहः, राहित्यं, शून्यता, अभावः, मोक्षः.—(Freedom from necessity) भवितव्यानधीनता, दैवानधीनता, कर्म्मावशता, दैवावशता.—(Breach of decorum) अविनयः, अमर्य्यादा, विनयातिक्रमः, मर्य्यादातिक्रमः, मर्य्यादातिवर्त्तनं, मर्य्यादातिचारः, विनयोल्लंघनं, 'to set at liberty,' मुच् (c. 6. मुञ्चति, मोक्तुं), विमुच्, मोक्ष (c. 10. मोक्षयति -यितुं), विमोक्ष्, निस्तृ (c. 10. -तारयति -यितुं); 'at liberty,' अनियतः -ता -तं, अयन्त्रितः -ता -तं, निर्यन्त्रितः -ता -तं, निरवग्रहः -हा -हं, क्षमः -मा -मं. *See* FREE.

LIBIDINOUS, *a.* कामुकः -का -कं, कामी -मिनी -मि (न्), कामातः -ता -तं, कामलः -ला -लं, कामात्मा -त्मा -त्म (न्), कमनः -ना -नं, कामकेलिः -लि -लि, कमिता -त्री -तृ (तृ), रतार्थी -र्थिनी -र्थि (न्), सुरतार्थी &c., व्यवायी -यिनी -यि (न्), कामासक्तः -क्ता -क्तं, तरलः -ला -लं, सकामः -मा -मं, कामवृद्धिः -द्धिः -द्धि, कामप्रवणः -णा -णं, कामशीलः -ला -लं, कामवृत्तिः -त्तिः -त्ति, अश्लीलः -ला -लं, अशुचः -चा -चं. *See* LECHEROUS, LUSTFUL, LEWD, &c.

LIBIDINOUSLY, *adv.* सकामं, कामुकवत्, कामुकं, लम्पटवत्, तरलवत्

LIBIDINOUSNESS, *s.* सकामता, कामुकता -त्वं, कामित्वं, कामात्मता, कामासक्तिः *f.*, रतार्थिता *f.*, व्यवायित्वं, वैयात्यं, रतार्थित्वं, हेला -हेलनं.

LIBRA, *s.* (Sign of the zodiac) तुला, तुलाधारः, घटः.

LIBRARIAN, *s.* पुस्तकशालाध्यक्षः, पुस्तकशालाधिकारी *m.* (न्), पुस्तकाध्यक्ष ग्रन्थाध्यक्षः, पुस्तकागाररक्षकः, पुस्तकागारपालकः.

LIBRARY, *s.* (Collection of books) पुस्तकसङ्ग्रहः, पुस्तकसमूहः, ग्रन्थसङ्ग्रहः.—(Edifice or room for holding it) पुस्तकशाला पुस्तकालयः, पुस्तकागारं, पुस्तकाधारः, ग्रन्थगृहं, ग्रन्थसङ्ग्रहशाला, ग्रन्थकुटी

To LIBRATE, *v. a.* तुल् (c. 10. तुलयति -यितु), समतोलीकृ, तुल्यभारीकृ

LIBRATION, *s.* तोलनं, समतोलीकरणं, भारतुल्यता, तुल्यबलता, तुल्यता

LICE, *s. pl.* यूकाः *m. f. pl.*, केशकीटाः *m. pl.*, षट्पदाः *m. pl.*

LICENSE, *s* (Leave, permission) अनुज्ञा, अनुमतिः *f.*, अनुज्ञानं अभ्यनुज्ञा, समनुज्ञानं, क्षमता, आज्ञा, 'written license,' अनुज्ञापत्रं आज्ञापत्रं.—(Excess of liberty) मर्य्यादातिक्रमः, व्यतिक्रमः, अनर्गलता उत्क्रमः, विधिव्यतिक्रमः, विधिनिषेधातीतता.

To LICENSE, *v. a* अनुज्ञापत्रेण अनुमन् (c 4 -मन्यते -मन्तुं), अनुज्ञा (c. 9 -जानाति -नीते -ज्ञातुं), अनुज्ञां दा अनुज्ञापत्रं दा, आज्ञापत्रं दा

LICENSED, *p. p.* अनुज्ञातः -ता -तं, पत्रानुज्ञातः -ता -तं, गृहीतानुज्ञः -ज्ञा -ज्ञं अभ्यनुज्ञातः -ता -तं, अनुमतः -ता -तं.

LICENSER, *s.* अनुज्ञादाता *m.* (तृ) अनुमतिदाता *m.*, अनुज्ञापत्रप्रकाशकः

LICENTIATE, *s.* गृहीतानुज्ञः, सानुज्ञः, अधिकारयुक्तः, अधिकारी *m.* (न्)

LICENTIOUS, *a.* (Exceeding the limits of law or propriety) निर्मर्य्यादः -दा -दं, मर्य्यादातिवर्त्ती -र्त्तिनी -र्त्ति (न्), मर्य्यादातिक्रमी -मिणी &c., अतिक्रान्तमर्य्यादः -दा -दं, अतिक्रान्तमर्य्यादः &c., उत्क्रान्तमर्य्यादः &c., अमर्य्यादः &c., व्यभिचारी -रिणी &c., दुराचारी &c., दुराचारः -रा -रं अनाचारी &c., स्वेच्छाचारी &c., यथेष्टाचारी &c., कामाचारी &c. कामवृत्तः -त्ता -त्तं, उच्छृङ्खलः -ला -लं, अशिष्टः -ष्टा -ष्टं, अशिष्टाचारः &c. धर्म्मभ्रष्टः -ष्टा -ष्टं, त्यक्तधर्म्मा -र्म्मा -र्म्म (न्), अत्याचारी &c., अबद्धः -द्धा -द्धं, अनर्गलः -ला -लं —(Profligate, dissolute) व्यसनी -निनी &c., व्यसनीयः -या -यं, व्यसनासक्तः -क्ता -क्तं, विषयासक्तः &c., विषयी -यिणी &c., विषयानुरागी -गिणी &c., भोगासक्तः &c., कामुकः -का -कं, अनवस्थः -स्था -स्थं, दुष्टः -ष्टा -ष्टं, पापीयान् -यसी -यः (स्), पापिष्ठः -ष्ठा -ष्ठं, दुर्वृत्तः -त्ता -त्तं, लम्पटः, स्त्रीलम्पटः, स्त्रीव्यसनी, व्यवायपरः -रा -रं

LICENTIOUSLY, *adv.* अशिष्टवत्, उच्छृङ्खलं, व्यभिचारेण, लम्पटवत्, कामुकवत्, कामुकवत्, विषयानुरागात्, दुष्टवत्, पापिष्ठवत्

LICENTIOUSNESS, *s* व्यभिचारः, व्यतिक्रमः, मर्य्यादातिक्रमः, मर्य्यादातिवर्त्तनं नियमातिक्रमः, अशिष्टता, उच्छृङ्खलत्वं, दुराचारत्वं, अनाचारः, अत्याचारः आचारभ्रष्टता, दुर्वृत्तता, व्यसनिता, अनवस्थितिः *f.*, अनवस्थता, पापिष्ठत्वं लम्पटता, लाम्पट्यं, कामुकत्वं, इन्द्रियासंयमः, स्त्रीप्रसङ्गः, स्त्रीसेवा स्त्रीव्यसनं, भोगासक्तिः *f.*

LICHEN, *s.* शिलावल्का, सूकरी, शूकरी, शूकराक्रान्ता, वराहक्रान्ता

To LICK, *v. a* लिह् (c. 2. लेढि, लीढे, लेढुं), आलिह्, अवलिह्, परिलिह्, संलिह्, परिसंलिह्, जिह्वालेहनं कृ, अवलेहनं कृ —(Lick up devour) ग्रस् (c 1. ग्रसते -सितुं), भक्ष् (c 10. भक्षयति -यितु) सम्भक्ष्, गृ (c. 6 गिरति, गरितुं -रीतुं), निगॄ, संगॄ.—(Beat) तड् (c 10. ताडयति -यितुं), प्रहृ (c. 1. -हरति -हर्तुं), वेत्राघातं कृ, दण्डाघातं कृ

LICK, *s.* लेहः -हनं.—(A blow) आघातः, प्रहारः, ताडनं, दण्डाघातः

LICKED, *p. p.* लीढः -ढा -ढं, आलीढः -ढा -ढं, अवलीढः -ढा -ढं.

LICKERISH, a. (Dainty) सुरसः -सा -सं, रसिकः -का -कं, स्वादुः -द्वी -दु, मिष्टः -ष्टा -ष्टं.—(Eager to taste) प्राशनोत्सुकः -का -कं, लेहनोत्सुकः &c., भोगोत्सुकः &c.

LICKERISHNESS, s. रसिकत्वं, सरसता, सौरस्यं, मिष्टता, स्वादुता, लालित्यं.

LICKING, s. (With the tongue) लेहः -हनं, अवलेहः -हनं, जिह्वालेहनं, जिह्वास्वादः.—(Beating) ताडनं, आघातः, दण्डः, दण्डप्रहारः, वेत्राघातः.

LICORICE, s. यष्टिमधु n. -धुका, मधुयष्टिका, मधुकं, मधूली, क्लीतकं, यष्टिकः, तिक्तपर्णी f. (न्).

LICTOR, s. पूर्व्वकाले काष्ठदण्डयुक्तपरशुधारी धर्म्माध्यक्षपरिचरः.

LID, s. पिधानं, शरावः, शरवः, मुद्रः, आच्छादनं, छादनं, आवरणं, पटलं, छद -दनं, पुटः -टी -टं, वर्द्धमानकः, उद्घनं, कूर्म्मपृष्ठकं, कपाटः, मार्त्तिकः, 'opening of a lid,' शरावोद्घाटनं; 'a box having a lid' सपिधानं भाजनं, समुद्रं करण्डकं, सम्पुटकः, 'lid of the eye,' नेत्रच्छदः, नयनच्छदः, अक्षिपुटः, नेत्रकपाटः.

LIE, s. (Falsehood) अनृतं, असत्यं, वितथं, अतथ्यं, अलीकं, अनृतवाक्यं, मृषावाक्यं, मृषोक्तिः f., मृषोद्यं, मिथ्योक्तिः f., मिथ्यावादः, मृषावादः, मिथ्याभाषणं, असत्यवादः, असत्यभाषणं, अनृतोक्तिः f., मिथ्यावचनं, असत्यवचनं, मृषाभिधानं.

To LIE, v. n. (Utter a falsehood) असत्यं or अनृतं वद् (c. 1. वदति -दितुं), अनृतवाक्यं वद्, मृषा or मिथ्या वद्, मिथ्यावादं कृ, मृषावादं कृ, मृषाभिधानं कृ.

To LIE, v. n. (Down to rest, lie horizontally) शी (c. 2. शेते, शयितुं), शयनं कृ, संविश् (c. 6. -विशति -वेष्टुं), उपविश्, पत् (c. 1. पतति -तितुं); 'he lies on the ground,' भूमौ शेते; 'he lies on the bed,' खट्वायां शेते; 'to lie down upon,' अधिशी with acc. c. as, 'he lies down upon the couch,' शय्याम् अधिशेते.—(Lean, rest upon) अवलम्ब् (c. 1. -लम्बते -म्बितुं), समालम्ब्, संश्रि (c. 1. -श्रयति -ते -यितुं), समाश्रि, उपाश्रि, निली (c. 4. -लीयते -लेतुं), अवलम्बनं कृ.—(Remain, be situated, be) वृत् (c. 1. वर्त्तते -र्त्तितुं), स्था (c. 1. तिष्ठति, स्थातुं), आस् (c. 2. आस्ते, आसितुं); 'to lie near,' समीपस्थः -स्था -स्थं भू or अस्, 'to lie towards the east,' पूर्व्वदिक्स्थः -स्था -स्थं भू or अस्.—(Lie by, rest) विश्रम् (c. 4. -श्राम्यति -श्रमितुं), कार्य्यात् निवृत् (c. 1. -वर्त्तते -र्त्तितुं), कार्य्यविच्छेदं कृ.—(Lie in the way) रुध् (c. 7. रुणद्धि, रोद्धुं), अन्तरायो भू.—(Lie hard upon) पीड् (c. 10. पीडयति -यितुं), अभिपीड्, निपीड्.—(Lie in wait) गुप्तं or निभृतं स्था.—(Lie up, keep in the house) गृहावस्थितः -ता -तं भू.—(Lie to, as a ship) रुद्धगतिः -तिः -ति भू.—(Lie on, be a matter of obligation). *See* INCUMBENT. (Lie in, be in childbed) प्रसवकालस्था भू, प्रसवावस्था भू.—(Lie with, carnally) सङ्गम् (c. 1. -गच्छति -गन्तुं), अभिगम्, सम्भोगं कृ.

LIEF, adv. कामं, प्रकामं, सकामं, कामतस्, इच्छातस्, यथेप्सितं.

LIEGE, a. (Bound to be loyal) भक्तः -क्ता -क्तं, भक्तिबद्धः -द्धा -द्धं, सेवाबद्धः &c., प्रभुभक्तः &c., स्वामिभक्तः &c., ईश्वराधीनः -ना -नं, ईश्वरायत्तः -त्ता -त्तं, प्रभुवशः -शा -शं.

LIEGE, s. (Lord) स्वामी m. (न्), प्रभुः m., ईश्वरः, पतिः m.

LIEGE-MAN, s. (Vassal) भक्तः, सेवाबद्धः, प्रभुसेवी m. (न्).

LIENTERIC, a. आमातिसारी -रिणी -रि (न्), आमातिसारसम्बन्धी &c.

LIENTERY, s. आमातिसारः, अतिसारः, सारणः, आमरक्तः.

LIEU, s. स्थानं, भूमिः f., स्थलं; 'in lieu of,' स्थाने, भूमौ, प्रति with abl. c., विनिमयात् -येन.

LIEUTENANCY, s. प्रतिनिधित्वं, सेनायां प्रतिनिधिः or प्रतिपुरुषस्य पदं or अवस्था or अधिकारः.

LIEUTENANT, s. सैन्याधिपतिप्रतिनिधिः m., सैन्याध्यक्षप्रतिनिधिः m., प्रतिनिधिः m., प्रतिपुरुषः, नियोगी m. (न्); 'lord-lieutenant,' राज्ञः प्रतिनिधिः m.

LIFE, s. (Existence) जीवनं, जीवितं, जीवः -वा, प्राणनं, प्राणाः, प्राणपरिग्रहः, सत्त्वं, सत्ता, जन्म n. (न्), जीवातुः m., जीवथः, जीवदशा, उक्थं.—(Vitality, principle of life) प्राणः -णाः m. pl., जीवात्मा m. (न्), आत्मा m., जीवः -वितं, जीवित्वं, चेतना, चैतन्यं, प्राणवायुः m., प्राणात्मा m., भूतात्मा m., पञ्चप्राणाः m. pl.—(Possession of breath) असुधारणं, प्राणधारणं, प्राणपरिग्रहः.—(Drawing breath) श्वासप्रश्वासं, श्वासनिःश्वासं, निःश्वसनप्रश्वसनं, 'endowed with life,' जीवी -विनी -वि (न्), जीवभूतः -ता -तं, सजीवः -वा -वं, प्राणी -णिनी &c., प्राणभृत् m. f. n., सचेतनः -ना -नं; 'giving life,' प्राणदः -दा -दं, प्राणप्रदः -दा -दं, जीवदः -दा -दं, 'destroying life,' प्राणहरः -रा -रं, प्राणहारी -रिणी &c., जीवितहारी &c., प्राणान्तिकः -की -कं; 'the giving or saving of life,' प्राणदानं, जीवदानं; 'abandonment of life,' जीवोत्सर्गः, प्राणत्यागः, प्राणोत्सर्गः, जीवितत्यागः, प्राणपरित्यागः, देहत्यागः, देहन्यासः; 'fear of losing life,' जीवितसंशयः; 'peril of life,' प्राणबाधः; 'love of life,' जीविताशा, जिजीविषा, प्राणिधिषा; 'wishing for life,' जिजीविषुः -षुः -षु; प्राणिधिषुः -षुः -षु; 'dread of life, impatience of life,' जीवनत्रासः, जीवनद्वेषः, मुमूर्षा; 'impatient of life,' मुमूर्षुः -र्षुः -र्षु; 'deprived of life,' हतप्राणः -णा -णं, हतजीवितः -ता -तं, नष्टप्राणः -णा -णं, नष्टजीवितः -ता -तं, 'support or maintenance of life,' प्राणयात्रा, प्राणधारणं, प्राणरक्षणं; 'reckless of life,' जीवितव्ययी -यिनी &c., प्राणव्ययी &c.; 'recklessness of life,' जीवितव्ययः; 'the end or object of life,' जीवनहेतुः m.; 'means of life,' जीवनोपायः; 'a happy life,' सुजीवितं.—(Age, duration of life, term of life) आयुस् n., आयुः -युः m. n., वयस् n., परमायुस्, जीवितकालः, जन्म n. (न्), जन्मकालः, आयुःपरिमाणं, जीवपरिमाणं, आयुर्म्मर्य्यादा, कालविशेषावच्छिन्नं जीवनं; 'advanced in life,' गतायुः -युः -यु (स्), प्रवयाः -याः -यः (स्); 'conferring long life,' आयुष्यः -ष्या -ष्यं, आयुष्करः -रा -री -रं, 'end of life,' आयुःशेषः, 'for life, during life, all one's life,' यावज्जीवं, जीवनपर्य्यन्तं, आमरणात्, यावज्जन्म, जन्मपर्य्यन्तं, यावद्देहं; 'in all one's life,' जन्मतःप्रभृति, जन्मतः आरभ्य, जन्मारभ्य, जन्मावधि, आजन्मतः, जन्मतः; 'lasting all one's life,' यावज्जीविकः -का -कं, आमरणान्तिकः -का -कं.—(Life in the world, the present life) इहलोकवासः, इहलोकवर्त्तनं, भूलोकवासः, इहकालः, इहजन्म n. (न्), संसारः, संसरणं, संसृतिः f., गृहाश्रमाभ्यासः; 'active or secular life,' प्रवृत्तिः f., प्रवृत्तिमार्गः, संसारमार्गः, लोकव्यवहारः, प्रवर्त्तनं; 'retired life,' निवृत्तिः f., निवृत्तिमार्गः, 'engaging in public life,' लोकव्यवहारप्रवृत्तिः f., 'in this life,' इह, इहकाले, इहलोके; 'the vicissitudes of life,' संसारचक्रं, कालचक्रं, कालावृत्तिः f.—(Conduct, manner of living) वृत्तिः f., व्यवहारः, आचारः, आचरणं, रीतिः f., स्थितिः f., चेष्टितं, चर्य्या, प्रवृत्तिः f., स्थितिः f.; 'virtuous life,' धर्म्माचरणं.—(Vivacity) तेजस् n., रसः, रसिकत्वं, तीक्ष्णता, शौर्य्यं, वीर्य्यं.—(Narrative of a life, memoir) चरित्रं, चरितं, चरितपुस्तकं, चरिताख्यानं, आख्यानं.—(State, condition) अवस्था, दशा, भावः, स्थितिः f., वृत्तिः f., गतिः f.; 'the two states of life,' अवस्थाद्वयं,

h e s, सावदशा nd n
मावस्था स्वदशा ta f
tl k g म मदवस्था d m g
p

LIFE-GIVING, *a.* जीवदः -दा -दं, जीवदायकः -का -कं, जीवदाता -त्री -तृ (तृ), तेजस्करः -री -रं, तेजोवर्धकः -का -कं, वीर्य्यदः -दा -दं.

LIFE-GUARD, *s.* राजशरीररक्षकः, राजदेहरक्षी *m.* (न्), राजपरिचरः, राजपरिस्थितः

LIFELESS, *a.* निर्जीवः -वा -वं, अजीवः -वा -वं, अप्राणी -णिनी -णि (न्), प्राणहीनः -ना -नं, गतप्राणः -णा -णं, नष्टप्राणः -णा -णं, निःप्राणः -णा -णं, प्राणरहितः -ता -तं, प्राणविरहितः -ता -तं, अचेतनः -ना -नं, विचेतनः -ना -नं, चैतन्यरहितः -ता -तं, व्यसुः -सुः -सु, गतासुः -सुः -सु, अचेष्टः -ष्टा -ष्टं.—(Spiritless) निस्तेजाः -जाः -जः (स्), तेजोहीनः -ना -नं, विरसः -सा -सं, रसहीनः -ना -नं, निःसत्त्वः -त्त्वा -त्त्वं, सत्त्वहीनः -ना -नं.

LIFETIME, *s.* जीवितकालः, आयुस् *n.*, वयस् *n.*, जन्मकालः, आयुष्यं, 'during life-time,' यावज्जीवं, जीवपर्य्यन्तं, जन्मपर्य्यन्तं.

To LIFT, *v. a.* (Raise) उत्तुल् (c. 10. -तोलयति -यितुं), उच्छ्रि (c. 1. -श्रयति -यितुं, rt. श्रि), समुच्छ्रि, प्रोच्छ्रि, उन्नम् (c. 10. -नमयति -यितुं), उद्यम् (c. 1. -यच्छति -यन्तुं), उत्था in caus. (-थापयति -यितुं, rt. स्था), उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), समुत्क्षिप्, उद्धन् (c. 2. -हन्ति -न्तुं), उन्नी (c. 1. -नयति -नेतुं), उत्कृष् (c. 1. -कर्षति -क्रष्टुं), उद्धृ (c. 1. -हरति -हर्त्तुं), उद्बृह् (c. 6. -बृहति -बर्हितुं), उत्तोलनं कृ, ऊर्द्ध्वीकृ.—(Raise in rank) पदवृद्धिं कृ, उत्कृष्टपदे प्रतिपद् (c. 10. -पादयति -यितुं), संवृध् (c. 10. -वर्धयति -यितुं), प्रतिपत्तिं कृ or दा.—(Fill with pride or joy) दृप् (c. 10. दर्पयति -यितुं), उल्लस् (c. 10. -लासयति -यितुं), उद्धतं ता कृ; 'to be lifted up with pride,' दृप् (c. 4. दृप्यति, दर्प्तुं), उद्धतीभू, उद्धतचित्तः -त्ता -त्तं भू.

LIFT, *s.* उत्तोलनं, उत्थापनं, उन्नमनं, उद्यामः, उन्नयनं, उच्छ्रयः, समुच्छ्रयः, उत्कर्षः.—(Help) साहाय्यं, उपकारः, उपकृतं.

LIFTED, *p. p.* उत्तोलितः -ता -तं, उत्थापितः -ता -तं, उच्छ्रितः -ता -तं, समुच्छ्रितः -ता -तं, उन्नतः -ता -तं, उद्यतः -ता -तं, उद्धृतः -ता -तं, समुद्धृतः -ता -तं, उद्धतः -ता -तं, उत्कर्षितः -ता -तं, उद्बर्हितः -ता -तं, उत्क्षिप्तः -प्ता -प्तं, उद्गृहीतः -ता -तं; 'having the hands lifted up,' समुच्छ्रितपाणिः -णिः -णि, उत्थितहस्तः -स्ता -स्तं; 'having his weapon lifted up,' उद्यतायुधः -धा -धं, 'having the arms lifted up,' ऊर्द्ध्वबाहुः -हुः -हु.

LIGAMENT, *s.* (Any thing that unites or ties) बन्धनं, बन्धः, योक्त्रं, सेतुः, सन्धानं, पाशः, निगडः, शृङ्खला -लं, धारः, प्रसितिः *f.*—(In anatomy) सन्धिबन्धनं, अस्थिबन्धः, ग्रन्थिबन्धनं, अस्थिबन्धनं.

LIGATURE, *s.* बन्धः -न्धनं, पट्टः, पट्टकः, आवेष्टनं, परिवेष्टनं, वेष्टनं, रज्जुः *m. f.*, कवलिका.

LIGHT, *s.* द्युतिः *f.*, दीप्तिः *f.*, तेजस्, ज्योतिस् *n.*, ज्योतिः *f.*, प्रभा, प्रकाशः, आभा, छविः *f.*, आलोकः, रुचिः *f.*, रुक् *f.* (च्), कान्तिः *f.*, छटा, विभा, भा, भास् *f.*, निभा, छाया, त्विषा, त्विट् *f.* (ष्), शोचिस् *n.*, शोभा, वर्चस् *n.*, महस् *n.*, द्योतः, दृशानं, मरीचिः *m. f.*, कलिका; 'light of the moon or stars,' ज्योत्स्ना, कौमुदी, दीपिका; 'shining by its own light,' स्वप्रकाशः -शा -शं, स्वयंज्योतिः -तिः -ति, 'day-light,' सूर्य्यप्रकाशः, सूर्य्यरश्मिः *m.*, दिनालोकः.—(Any thing that gives light, candle) दीपः -पकः, प्रदीपः, दीपिका.—(Knowledge) ज्ञानं, बोधः, अवगमः, प्रकाशः.—(Public notice) प्रकाशः, प्रकाशता, प्राकट्यं, प्रसिद्धिः *f.*, लोकप्रसिद्धिः *f.*, लौकिकं, प्रख्यातिः *f.*

(L h a p ctu प्रकाशविकाश चित्रस्य प्रकाशितभाग चित्रस्य प्रकाशितस्थलं.—(P n दृष्टि *f.* लक्ष्यं दृष्टिमार्ग दृष्टिपातमार्गे दृष्टिपातपथ लक्ष्यसूच w upon प्रकाश काशयति यितु विकाश ing h pon प्रकाशकः -का -कं, 'to bring to light,' प्रकटीकृ, प्रकाशीकृ, स्पष्टीकृ, आविष्कृ, प्रादुष्कृ, विवृ (c. 5. -वृणोति -वरितुं -रीतुं); 'to come to light,' आविर्भू, प्रादुर्भू, प्रकाशीभू, प्रसिद्धिं गम् (c. 1. गच्छति, गन्तुं). In scientific treatises 'light' is called प्रकाशः

LIGHT, *a.* (Having little weight) लघुः -घुः -घ्वी -घु, अगुरुः -रुः -र्वी -रु, अल्पभारः -रा -रं, लघुभारः -रा -रं, अल्पप्रमाणः -णा -णं, लघुप्रमाणः -णा -णं, गौरवहीनः -ना -नं, सुवहः -हा -हं, सुवाह्यः -ह्या -ह्यं, सुखवाह्यः -ह्या -ह्यं.—(Not oppressive, easy to be endured) लघुः -घ्वी -घु, सुसहः -हा -हं, सुसहनीयः -या -यं, अक्लेशकः -का -कं, अल्पक्लेशकरः -री -रं, 'very light,' लघिष्ठः -ष्ठा -ष्ठं.—(Easy) सुखः -खा -खं, सुकरः -रा -री -रं, निरायासः -सा -सं, सुगमः -मा -मं, अकष्टः -ष्टा -ष्टं, अकठिनः -ना -नं, अविषमः -मा -मं, सुसाध्यः -ध्या -ध्यं, लघु &c.—(Easy of digestion) सुपाक्यः -क्या -क्यं, सुपचनीयः -या -यं, सुपचः -चा -चं, सुखपच्यः -च्या -च्यं.—(Active, nimble) चपलः -ला -लं, लघुशरीरः -रा -रं, लघुगतिः -तिः -ति.—(Not dense) अस्थूलः -ला -लं, अघनः -ना -नं, शिथिलावयवः -वा -वं, विरलावयवः -वा -वं.—(Not steady, gay, airy) लघुचित्तः -त्ता -त्तं, लघुचेताः -ताः -तः (स्), लघुस्वभावः -वा -वं, चञ्चलः -ला -लं, चपलः -ला -लं, प्रकृतितरलः -ला -लं, अस्थिरः -रा -रं, लोलः -ला -लं, अनवस्थः -स्था -स्थं, गौरवहीनः -ना -नं, गाम्भीर्य्यहीनः -ना -नं.—(Trivial, inconsiderable) लघुः &c., लघुप्रभावः -वा -वं, अल्पप्रभावः &c., लघ्वर्थः -र्था -र्थं, अल्पार्थः -र्था -र्थं, तुच्छः -च्छा -च्छं, अगण्यः -ण्या -ण्यं, तृणप्रायः -या -यं.—(Light in color) पाण्डुः -ण्डुः -ण्डु, श्वेतः -ता -तं or expressed by ईषत्, आ prefixed, 'light red,' श्वेतरक्तः -क्ता -क्तं, ईषद्रक्तः -क्ता -क्तं; 'light blue,' आनीलः -ला -लं; 'light brown,' श्वेतपिङ्गः -ङ्गा -ङ्गं; 'light blue,' श्वेतनीलः -ला -लं.—(Bright, not dark) दीप्तिमान् -मती -मत् (त्), द्युतिमान् &c., प्रभावान् &c., दीप्रः -प्रा -प्रं, सप्रकाशः -शा -शं, प्रकाशमयः -यी -यं, तेजोमयः &c., तैजसः -सी -सं, प्रकाशयुक्तः -क्ता -क्तं, रुचिरः -रा -रं, शोभनः -ना -नं; 'the light half of the month when the moon increases,' शुक्लः, शुक्लपक्षः, शुद्धपक्षः.—(To make light of) लघूकृ, तुच्छीकृ, तृणाय मन् (c. 4. मन्यते, मन्तुं).

LIGHT, *adv.* लघु, लाघवेन, सलाघवं, अगुरु, लघु prefixed in comp

To LIGHT, *v. a.* (Make light, illuminate) प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, द्युत् (c. 10. द्योतयति -यितुं), प्रद्युत्, विद्युत्, दीप् (c. 10. दीपयति -यितुं), उद्दीप्, प्रदीप्, विदीप्, प्रकाशितं -तां कृ, द्योतितं तां कृ, सप्रकाशं -शां कृ.—(Give light) प्रकाशं दा, प्रकाशनं कृ, द्योतनं कृ, तेजः कृ or दा.—(Kindle, set on fire) ज्वल् (c. 10. ज्वलयति, ज्वालयति -यितुं), प्रज्वल्, उज्ज्वल्, संज्वल्, अभीन्ध् (c. 7. -इन्द्धे -इन्धितुं), सन्धुक्ष् (c. 10. -धुक्षयति -यितुं), तप् (c. 10. तापयति -यितुं), आतप्, दीप्, प्रदीप्, उद्दीप्, आदीप्.

To LIGHT, *v. n.* (Fall on) आपत् (c. 1. -पतति -तितुं), निपत्, आसद् (c. 10. -सादयति -यितुं), अकस्मात् आसद् or उपस्था (c. 1. -तिष्ठति -स्थातुं) or आगम् (c. 1. -गच्छति -गन्तुं) or अवगम्.—(Descend) अवरुह् (c. 1. -रोहति -रोढुं), अवतॄ (c. 1. -तरति -रितुं -रीतुं), अवया (c. 2. -याति -तुं), अधो गम्, अवपत्.—(Settle, rest upon) अध्यास् (c. 2. -आस्ते -आसितुं), निली (c. 4. -लीयते -लेतुं), निषद् (c. 1. -सीः

दृति -मृ), अधिवस् (c. 1 -वसति -वस्तुं), अवस्था, संस्था, सद्मीनं कृ. —(Kindle) समिन्ध् in pass. (-इध्यते). ज्वल् (c. 1. ज्वलति -लितुं).

LIGHT-ARMED, *a.* लघ्वायुधः -धा -धं, लघुशस्त्री -स्त्रिणी -स्त्रि (न्), लघ्वस्त्रधारी -रिणी -रि, लघुशस्त्रभृत् *m.f.n.*

LIGHTED, *p.p.* इद्धः -द्धा -द्धं, समिद्धः -द्धा -द्धं, ज्वलितः -ता -तं, सन्धुक्षितः -ता -तं, प्रज्वालितः -ता -तं —(Lighted up, illuminated) प्रकाशितः -ता -तं, विकाशितः -ता -तं, द्योतितः -ता -तं, प्रद्योतितः -ता -तं, उद्द्योतितः -ता -तं, उद्दीपितः -ता -तं, भासितः -ता -तं, विभासितः -ता -तं, उद्भासितः -ता -तं, उज्ज्वलितः -ता -तं.

To LIGHTEN, *v.n.* (Flash, as lightning) स्फुर् (c. 6. स्फुरति -रितुं), विद्युत् (c. 1. -द्योतते -तितुं), अकस्मात् प्रकाश् (c. 1. -काशते -शितुं) or ज्वल् (c. 1. ज्वलति -लितुं) or उज्ज्वल्, विद्युद्वत् कम्प् (c. 1 कम्पते -म्पितुं)

To LIGHTEN, *v.a.* (Make bright) प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, द्युत् (c. 10. द्योतयति -यितुं), दीप् (c. 10. दीपयति -यितुं), विदीप्. —(Make less heavy) लघूकृ, लघ (nom लघयति -यितुं), न्यूनभारं रां -रं कृ, अल्पभारीकृ, भारन्यूनतां कृ.—(Alleviate) शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, लघूकृ.

LIGHTENED, *p.p.* (Made less heavy) लघूकृतः -ता -तं, न्यूनभारः -रा -रं, शमितः -ता -तं, प्रशमितः -ता -तं.

LIGHTER, *s.* (More light) लघुतरः -रा -रं, लघीयान् -यसी -यः (स्), न्यूनभारः -रा -रं.—(One that lights or kindles) प्रकाशकः, प्रकाशदः, दीपकः, उद्दीपकः, द्युतिदः, द्युतिकरः, अग्निदः.—(Large, flat-bottomed boat) तरालुः *m.*, तरान्धुः *m.*, तरणिः -णी *f.*, वहित्रं, उडुपः -पं

LIGHTERMAN, *s.* नाविकः, पोतवाहः, तरिकः, पृथ्वीकृतनौकाकर्णधारः.

LIGHT-FINGERED, *a.* लघुहस्तः -स्ता -स्तं, चपलहस्तः &c., पाणिचपलः -ला -लं.

LIGHT-FOOTED, *a.* लघुपादः -दा -दं, लघुगतिः -तिः -ति, द्रुतगतिः -तिः -ति.

LIGHT-HEADED, *a.* (Delirious) रोगोपहतज्ञानः -ना -नं, रोगोपहतत्वाद् भ्रान्तचित्तः -त्ता -त्तं or भ्रान्तबुद्धिः -द्धिः -द्धि or विक्षिप्तबुद्धिः -द्धिः -द्धि or क्षिप्तचित्तः &c., बुद्धिविभ्रमात् प्रलापकारी -रिणी &c.—(Thoughtless, volatile) चपलचित्तः &c., लघुचित्तः &c.

LIGHT-HEADEDNESS, *s.* चित्तविभ्रमः, ज्ञानभ्रान्तिः *f.*, बुद्धिभ्रान्तिः, बुद्धिविभ्रमः.

LIGHT-HEARTED, *a.* लघुचित्तः -त्ता -त्तं, लघुचेताः -ताः -तः (स्), हृष्टचित्तः &c., हृष्टहृदयः -या -यं, हृष्टमानसः -सी -सं, उल्लसः -सा -सं, आनन्दी -न्दिनी -न्दि (न्), सुमनस्कः -स्का -स्कं.

LIGHT-HOUSE, *s.* दीपस्तम्भः, दीपगृहं, आकाशदीपः, समुद्रयायिनां पथदर्शनार्थं समुद्रभूभागे निर्मितं दीपगृहं.

LIGHTING, *part.* प्रकाशयन् -यन्ती -यत् (त्), प्रज्वालयन् -यन्ती -यत् (त्), द्योतयमानः -ना -नं, उद्दीपकः -का -कं, प्रदीपकः -का -कं—(Resting on) निषण्णः -ण्णा -ण्णं, निलीयमानः -ना -नं, सन्निपतमानः -ना -नं.

LIGHTLESS, *a.* निष्प्रभः -भा -भं, अप्रकाशः -शा -शं, निरालोकः -का -कं.

LIGHTLY, *adv.* (With little weight) लघु, लाघवेन, सलाघवं, अगुरु, अल्पभारेण, अल्पप्रयत्नेन.—(Easily) सुखेन, अनायासेन, सहजेन, अक्लेशेन, अयत्नेन.—(Without reason) हेतुना विना, कारणेन विना. —(Nimbly) लघुगत्या, चपलं.—(With levity) लघुचेतसा, चपलं, चञ्चलवत्, अस्थिरं; 'to think lightly of,' लघूकृ, तुच्छीकृ.

LIGHTNESS, *s.* (Want of weight) लघुता -त्वं, लाघवं, लघिमा *m.* (न्), अगुरुता, गौरवहीनता, भारलघुता, भारहीनता, अल्पभारत्वं, भाराभावः, भारराहित्यं.—(Easiness) सुकरत्वं, अनायासः, निरायासता, सुखसाध्यता, सुकरता, लघुता, सहजत्वं, अकष्टत्वं, अक्लेशत्वं —(State of being easy to be borne) लघुता, सुसह्यता, सुसहनीयता —(Nimbleness) शरीरलघुता, लघुशरीरत्वं, लघुगतित्वं, द्रुतत्वं.—(Levity) चञ्चलत्वं, चापल्यं, चपलता, चापल्यं, लोलता, लौल्यं, अस्थिरता अस्थैर्यं, अनवस्थितिः *f.*, अगुरुता, अगौरवं.—(Trivialness) लघुता लाघवं, लघ्वर्थता, अल्पप्रभावत्वं, तुच्छता, 'lightness of hand, हस्तलाघवं, हस्तचापल्यं

LIGHTNING, *s.* विद्युत् *f.*, तडित् *f.*, सौदामिनी, सौदाम्नी, सौदामनी मेघज्योतिस् *n.*, मेघवह्निः *m.*, मेघदीपः, घनज्वाला, क्षणप्रभा, अचिरप्रभा क्षणद्युतिः *f.*, ह्रादिनी, ह्रदिनी, शतह्रदा, शम्पा, सम्पा, चपला, चञ्चला क्षणिका, आकालिकी, चला, ऐरावती, छटाभा, रोहिणी, अशुभा, सुभ्रुभा, वज्रस्फुलिङ्गः -ङ्गं, घनवल्लिका, दीप्ता, महोल्का, अक्षिभीः *m.*, वद्गुला हक् *f* (च्) नीलाञ्जना; 'forked lightning,' विद्युल्लता, तडिल्लता छटा; 'flash of lightning,' विद्युत्प्रकाशः, विद्युत्स्फुरणं, सौदामिनीस्फुरणं, विद्युत्कम्पः, विद्युद्दाम *n.* (न्), विद्युज्ज्वाला; 'the falling of lightning,' विद्युत्पातः, 'struck by lightning,' वज्रहतः -ता -तं, विद्युत्पातोपहतः &c.; 'relating to lightning,' वैद्युतः -ती -तं

LIGHTS, *s.pl.* पुस्फुसः, पुप्फुसः, फुप्फुसः, रक्तफेनजः.

LIGHTSOME, *a.* (Not dark, luminous) दीप्तिमान् -मती -मत् (त्) तेजोमयः -यी -यं, सप्रकाशः -शा -शं, प्रकाशमयः -यी -यं, सुप्रकाशः -शा -शं, तेजस्वी -स्विनी -स्वि (न्), प्रभावान् &c., सुप्रभः -भा -भं — (Cheerful, gay) उल्लसः -सा -सं, हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, सानन्दः -न्दा -न्दं, आनन्दी -न्दिनी &c., आनन्ददः -दा -दं, हर्षदः -दा -दं

LIGHTSOMENESS, *s.* (Brightness) सप्रकाशता, दीप्तिमत्त्वं, दीप्तता — (Cheerfulness) उल्लसता, उल्लासः, सानन्दता, हृष्टता, प्रहर्षः

LIGHT-SPIRITED, *a.* लघुहृदयः -या -यं, हृष्टहृदयः -या -यं, हृष्टचित्तः -त्ता -त्तं

LIGNEOUS, *a.* काष्ठी -ष्ठिनी -ष्ठि (न्), काष्ठमयः -यी -यं, दारुमयः &c. दारवः -वी -वं, काष्ठरूपः -पा -पं, दारुरूपः -पा -पं, काष्ठघटितः -ता -तं

LIGNIFEROUS, *a.* काष्ठदः -दा -दं, काष्ठदायकः -का -कं, काष्ठोत्पादकः -का -कं

LIGNIFORM, *a.* काष्ठरूपः -पा -पं, काष्ठाकारः -रा -रं, काष्ठाकृतिः -तिः -ति

To LIGNIFY, *v.a.* काष्ठसात्कृ, दारुसात्कृ, काष्ठरूपीकृ, दारुरूपीकृ

LIKE, *a.* (Resembling) सदृशः -शी -शं, सदृक्षः -क्षा -क्षं, सदृक् *m.f.n.* (श्), तुल्यः -ल्या -ल्यं, समः -मा -मं, समीपः -पा -पं, समानः -ना -नं सन्निभः -भा -भं, अनुकारी -रिणी -रि (न्), निर्विशेषः -षा -षं, प्रातिभासिकः -की -कं. The following can only be used in comp at the end of a word उपमः -मा -मं, निभः -भा -भं, प्रतिमः -मा -मं, उपमितः -ता -तं, प्रख्यः -ख्या -ख्यं, सङ्काशः -शा -शं, रूपः -पा -पं विधः -धा -धं, नीकाशः -शा -शं, निकाशः -शा -शं, प्रतीकाशः &c. प्रतिकाशः &c., प्रतिकासः &c., प्रतीकासः &c., भूतः -ता -तं; 'like the moon,' चन्द्रनिभः -भा -भं, चन्द्रोपमः -मा -मं; 'like, but with a degree of inferiority,' कल्पः -ल्पा -ल्पं. The propositions स and अनु are often used indifferently with सम, समान and तुल्य to express 'like', as, 'of like form,' सरूपः -पा -पी पं अनुरूपः -पा -पं, समरूपः -पा -पं, तुल्यरूपः &c., तुल्याकृतिः -तिः -ति तुल्याकारः -रा &c., 'of like properties or qualities,' सगुणः -णा -णं, अनुगुणः -णा -णं, समगुणः -णा -णं, तुल्यगुणः &c., समानगुणः &c सधर्म्मा -र्म्मा -र्म्म (न्), अनुधर्म्मा &c., समानधर्म्मा &c., सभावः -वी -वं, 'of like tribe, class, or kind,' सजातिः -तिः -ति, सजातीयः -या -यं, समानजातिः &c., समानजातीयः &c., सवर्णः -र्णा -र्णं, तुल्यवर्णः &c., सविधः -धा -धं, सवर्गः -र्गा -र्गं, सवर्गीणः -णा -णं, सवर्गीयः -या -यं; 'like this or that,' ईदृशः -शी -शं, ईदृक् *m.f.n.* (श्), ईदृक्षः -क्षा -क्षं, एतादृशः &c., एतादृक् &c., एतादृक्षः &c., तादृशः &c.,

सादृक् &c., सादृक्षः &c.; 'like what?' कीदृशः &c., कीदृक् &c., कीदृक्षः &c.; 'like which,' यादृशः &c., यादृक् &c., यादृक्षः &c.; 'like me,' मादृशः &c., मादृक् &c., मादृक्षः &c.; 'like thee,' त्वादृशः &c., त्वादृक् &c., त्वादृक्षः &c.; 'like your honor,' भवादृशः &c., भवादृक् &c., भवादृक्षः &c. 'To be like,' अनुकृ, सदृशः -शी -शं भू, तुल्यः -ल्या -ल्यं भू, सदृशीभू, तुल्यीभू. The *following examples illustrate the use and construction of some of the above words.* 'The son is very like the father,' पुत्रो बहुधा पितुर् अनुकरोति *or* पुत्रः पितृरूपो भवति; 'like another son,' पुत्रनिर्विशेषः -षा -षं; 'there never has been, nor ever will be, any one like him,' अनेन सदृशो न भूतो न भविष्यति; 'there is nobody like him,' तेन सदृशः कश्चिदपि नास्ति or न तस्य तुल्यः कश्चन or न कोपि तस्य समः; 'like the sun,' आदित्यसदृशः -शी -शं, आदित्येन तुल्यः &c.; 'a crime like that of Brahmanicide,' ब्रह्महत्यासमं पापं; 'like me,' मम समः *or* मम तुल्यः or मम अनुरूपः or मद्रूपः &c. or मद्विधः -धा -धं. —(Probable) सत्यसङ्काशः -शा -शं, सम्भाव्यः -व्या -व्यं.

LIKE, *s.* (Match, equal) तुल्यः -ल्या, तुल्यगुणः -णा, सदृशः -शी, तुल्यरूपः -पी, समानगुणः -णा, समकः -का, युग्मकः -का; '*his like* will never be again,' अनेन सदृशो न कदाचिद् भविष्यति.—(Likes and dislikes) प्रियाप्रियाणि *n. pl.*, प्रियाप्रियं.

LIKE, *adv.* (In the same manner) वत् affixed, इव, यथा, तथा, निर्विशेषं -षेण; 'like a dream,' स्वप्नवत्; 'like the moon,' चन्द्रवत्, चन्द्र इव, चन्द्रो यथा; 'cherished like another son,' पुत्रनिर्विशेषं पालितः; 'like king, like people,' यथा राजा तथा प्रजा; '*in like manner*,' तथैव, तद्वत्, तथा, एवं, एवम्प्रकारेण, तथाविधेन एवंविधेन, एवमेव; '*to act like*,' अनुकृ.

TO LIKE, *v. a.* (Approve of, be pleased with) रुच् (c. 1. रोचते रोचितुं) used impersonally, रुच् (c. 10. रोचयति -यितुं), अनुरुच्, अभिरुच्, अभिमन् (c. 4. -मन्यते -मन्तुं), अनुमन्, सम्मन्, मन्, अभिनन्द् (c. 1. -नन्दति -न्दितुं), प्रतिनन्द्, नन्द्, अनुमुद् (c. 1. -मोदते -दितुं), अनुरुध् (c. 4. -रुध्यते -ति -रोद्धुं), प्रशंस् (c. 1. शंसति -सितुं), प्री (c. 4. प्रीयते), जुष् (c. 6. जुषते, जोषितुं), तुष् (c. 4. तुष्यति, तोष्टुं), सन्तुष्, परितुष्, दृप् (c. 1. दर्पते -र्पितुं), अनुरञ्ज् (c. 4. -रज्यते), स्निह् (c. 4. स्निह्यति, स्नेहितुं), प्रियः -या -यं भू or अस्, अभिमतः -ता -तं भू, इष्टः -ष्टा -ष्टं भू, प्रीतः -ता -तं भू, दयितः -ता -तं भू. OBS. *Since some* of the above verbs have a neuter sense, and some of these again are susceptible of an active sense if used in other forms, the construction of the sentence must vary accordingly; thus, 'I like that,' तद् मह्यं or मम रोचते or अहं तद् रोचयामि or तद् मया प्रशस्यते or अहं तद् अनुमन्ये or तद् मया अनुमतं or तद् मम अभिमतं; 'he does not like the gift,' दानं नाभिनन्दति or दानेन न तुष्यति; 'they like their king,' स्वराजानम् अनुरुध्यन्ते; '*he likes his brother's wife*,' भ्रातुर् भार्यायाम् अनुरज्यते; 'women like everybody,' सर्वे स्त्रीणां प्रियाः.

TO LIKE, *v. n.* रुच् (c. 1. रोचते -चितुं), इष् (c. 6. इच्छति, एषितुं), अभिलष् (c. 1. -लषति, c. 4. -लष्यति -षितुं); 'as you like,' यथा भवते रोचते, यथाकामं; 'doing what one likes,' कामकारी -रिणी -रि (न्), कामचारः -रा -रं; 'going where one likes,' कामगामी -मिनी &c.; 'eating what one likes,' कामभक्षः -क्षा -क्षं; 'taking what form one likes,' कामरूपः -पा -पं.

LIKED, *p. p.* अभिमतः -ता -तं, अनुमतः -ता -तं, यथाभिमतः -ता -तं, अनुमोदितः -ता -तं, प्रियः -या -यं, प्रीतः -ता -तं, इष्टः -ष्टा -ष्टं, मनोभिमतः -ता -तं, दयितः -ता -तं, अनुरक्तः -क्ता -क्तं, मतः -ता -तं.

LIKELIHOOD, LIKELINESS, *s.* सम्भाव्यता -त्वं, सम्भावनीयता, योग्यता -त्वं, सम्भावना, सम्भवः, अभ्युपगम्यता, अभ्युपगमः, अनुमेयता -त्वं, सत्यसादृश्यं, सत्यसङ्काशत्वं -ता, आभासः.

LIKELY, *a.* सम्भाव्यः -व्या -व्यं, सम्भावनीयः -या -यं, सम्भावितः -ता -तं, योग्यः -ग्या -ग्यं, सत्यसङ्काशः -शा -शं, सत्यसन्निभः -भा -भं, सत्यसदृशः -शी -शं, अनुमेयः -या -यं, अभ्युपगम्यः -म्या -म्यं; 'it is likely,' युज्यते, उपपद्यते.

LIKELY, *adv.* सम्भावनीयं, यथायोग्यं, यथासम्भवं, प्रायस्, प्रायशस्.

LIKEMINDED, *a.* समानशीलः -ला -लं, समस्वभावः -वा -वं, समभावः -वा -वं.

To LIKEN, *v. a.* उपमा (c. 2. -माति, c. 3. -मिमीते -मातुं), सदृशीकृ, समीकृ, तुल्यीकृ, समानीकृ, समान (nom. समानयति -यितुं); 'to whom shall I liken him,' केन तम् उपमास्यामि.

LIKENED, *p. p.* उपमितः -ता -तं, उपमेयः -या -यं, समीकृतः -ता -तं.

LIKENESS, *s.* (Resemblance) सादृश्यं, सदृशता -त्वं, सारूप्यं, सरूपता, समरूपता, अनुरूपता, आनुरूप्यं, समता, साम्यं, समानता, तुल्यता -त्वं, तुला, सौल्यं, औपम्यं, उपमा, उपमानं -नता, उपमितिः *f.*, प्रतिमानं -नता, प्रतिमता, आनुगुण्यं, अनुकारः, अनुहारः, आनुयन्त्र्यं, रूपसमता, स्वभावसमता.—(Form, appearance) आकृतिः *f.*, आकारः, रूपं मूर्त्तिः *f.*, संस्कारः.—(A picture or image resembling a person or thing) उपमा, उपमितिः *f.*, उपमानं, प्रतिमा, प्रतिमानं, प्रतिरूपं -पकं, प्रतिकृतिः *f.*, प्रतिमूर्त्तिः *f.*, प्रतिकायः, प्रतिनिधिः *m.*, प्रतिच्छन्दः प्रतियातना, प्रतिबिम्बं, चित्रं, आकृतिः *f.*; 'a speaking likeness,' आकृतिः संवादिनी.

LIKEWISE, *adv.* (In like manner) तथा, तथैव, तद्वत्, एवं, एवमेव.—(Moreover) अपिच, अपरञ्च, किञ्च, चैव, तथा, एवं.

LIKING, *s.* (Fondness for, delight in, pleasure) रुचिः *f.*, अभिरुचिः *f.*, सन्तोषः, तोषः, तुष्टिः *f.*, सन्तुष्टिः *f.*, परितोषः, अनुराग अनुरक्तिः *f.*, अभिमतता, अनुमतिः *f.*, अनुलोदनं, इच्छा, अभिलाष अभिलषितं, प्रियता, प्रीतिः *f.*, छन्दं, छन्दस् *n.*; 'that husband was not to her liking,' स भर्त्ता तस्याः मनोवाञ्छ नाभवत्; 'likings and dislikings,' प्रियाप्रियाणि.—(State of body) शरीरस्थितिः *f.* देहस्थितिः *f.*, शरीरभावः.

LILAC, *s.* लैलकाख्यः पारसीकदेशीयो गुल्मभेदः.

LILY, *s.* पद्मः -द्मं, पद्मिनी, उत्पलं, कमलं, कुमुदं, नलिनं, पङ्कजं, कुवलयं इन्दीवरं, सौगन्धिकं, अम्बुजं, नीलाम्बुजन्म *n.* (न्), राजहंसकं, हल्लकं कैरवं. These names properly apply to the water lily *See* LOTUS.

LIMATION, *s.* लोहमार्जनेन घर्षणं or परिष्कारः or परिष्करणं, मार्जनं.

LIMATURE, *s.* (Filings) लोहचूर्णं, कृष्णचूर्णं, लोहजं, लोहकिट्टं.

LIMB, *s.* अङ्गं, अवयवः, गात्रं, अपघनः, प्रतीकः; 'limb by limb,' अवयवशस्, गात्रं गात्रं; 'over every limb,' सर्वाङ्गीणः -णा -णं, प्रत्यङ्गं; 'having large limbs,' बृहदङ्गः -ङ्गी -ङ्गं; 'kneading of the limbs,' गात्रसंवाहः -हनं, अङ्गमर्द्दनं.—(Edge, border) कोटिः *f.*, प्रान्तः, सीमा.

To LIMB, *v. a.* अङ्गाद् अङ्गम् अपच्छिद् (c. 7. -छिनत्ति -छेत्तुं), अवयवशो निकृत् (c. 6. -कृन्तति -कर्त्तितुं), गात्राणि पृथक्कृ, व्यङ्गीकृ.

LIMBED, *a.* अङ्गी -ङ्गिनी -ङ्गि (न्), साङ्गः -ङ्गा -ङ्गं, अवयवी -विनी -वि (न्), सावयवः -वा -वं; 'large-limbed,' बृहदङ्गः -ङ्गी -ङ्गं, बृहदवयवः -वा -वं, महाङ्गः -ङ्गा -ङ्गं; 'slender-limbed,' कृशाङ्गः -ङ्गी -ङ्गं.

[illegible] &c. [illegible]

L[illegible] [illegible] मृदुः -द्वी -दु, शिथिलः -ला -लं, कोमलः -ला -लं, [illegible] [illegible] [illegible] -म्यः -म्या -म्यं, नम्यः -म्या -म्यं, [illegible]

Lim[illegible] [illegible] a cannon) युद्धयन्त्रवाहनं, युद्धयन्त्रधुरा.

Limberness, s. शैथिल्यं, शिथिलता -त्वं, मृदुता, कोमलता, नम्यता.

Limbless, a. निरवयवः -वा -वं, अनङ्गः -ङ्गा -ङ्गं, निरङ्गः -ङ्गा -ङ्गं, अङ्गहीनः -ना -नं, अङ्गशून्यः -न्या -न्यं, अवयवहीनः -ना -नं.

Limbmeal, adv. अवयवशस्, गात्रं गात्रं, अङ्गशस्, अङ्गं अङ्गं.

Limbo, s. (Hell) नरकः, निरयः.—(Prison) कारागारं, बन्धनागारं.

Lime, s. (Calcareous earth used for mortar) चूर्णं, कर्करः -रं, सुधा, चुरा, लेपः, विलेपः; 'nodule of lime,' चूर्णखण्डः, कर्करखण्डः.—(Bird-lime) पक्षिबन्धनलेपः, अतिश्यानद्रव्यं येन पक्षिणो बध्यन्ते, अद्रपेषविशेषः.—(Lime-tree, citrus acida) जम्बीरः, गुरुवर्च्चसः, वक्त्रशोधी -धनः m.

To lime, v. a. चूर्णीक्षयाणद्रव्येण लिप् (c. 6. लिम्पति, लेप्तुं) or विलिप्.

Lime-burner, s. चूर्णकारः, चूर्णकर्त्ता m. (र्तृ), चूर्णदाहकः, चूर्णदाहकृत्.

Lime-kiln, s. चूर्णदहनस्थानं, चूर्णपचनस्थानं, चूर्णपाकः.

Lime-stone, s. चूर्णखण्डः -ण्डं, कर्करखण्डः, कर्करं, चूर्णफलः, कर्करोपलः.

Lime-water, s. चूर्णसंसृष्टं जलं, चूर्णजलं, कर्करजलं.

Limit, s. सीमा f., सीमा m. (न्), परिसीमा f. m., अवधिः m., अन्तः -न्तं, पर्यन्तः -न्तं, समन्तः, प्रान्तः, मर्य्यादा, परिच्छेदः, अवच्छेदः, वेला, नेमः, मर्य्यादिः f., परिमाणं, परिमितिः f., अवसानं, पर्य्यवसानं, परिसरः, शेषः, आधारः, चक्रवाटः, बन्ट -रं. 'that forms a limit,' अवधिभूतः -ता -तं.

To limit, v. a. (Bound) प्रान्त (nom. प्रान्तयति -यितुं), समन्त (nom. समन्तयति -यितुं) or पर्यन्त, परिच्छिद् (c. 7. -छिनत्ति -छेत्तुं), अवच्छिद्, परिच्छेदं कृ, आवधिकं -कां कृ, सोपाधिकं -कां कृ, समर्य्यादं -दां कृ, ससीमं -मां कृ.—(Confine within certain bounds, circumscribe) परिमा (c. 2. -माति, c. 3. -मिमीते -मातुं), परिमितं -तां कृ, मितं -तां कृ, सपरिमाणं -णां कृ, संयम् (c. 1. -यच्छति -यन्तुं), नियम्, निग्रह् (c. 9. गृह्णाति -ग्रहीतुं), संहृ (c. 1. -हरति -हर्त्तुं), निबन्ध् (c. 9. -बध्नाति -बन्द्धुं), निरूप् (c. 10. -रूपयति -यितुं).

Limitable, a. परिमेयः -या -यं, परिच्छेदनीयः -या -यं, निरूपणीयः -या -यं.

Limitation, s. (The act of bounding) सीमाकरणं, मर्य्यादाकरणं, आवधिकरणं, मर्य्यादाकरणं, परिच्छेदः -दनं, अवच्छेदः -दनं, परिमाणकरणं.—(A state of restriction) परिमितता -त्वं, आवधिकता, समर्य्यादत्वं, सोपाधिकत्वं, ससीमत्वं, अवधिता, अवधिः m., पर्य्यन्तं -न्तत्वं, अव्यापित्वं, निबन्धनं, बन्धः -न्धनं.

Limited, p. p. परिमितः -ता -तं, मितः -ता -तं, समर्य्यादः -दा -दं, आवधिकः -का -कं, सोपाधिकः -का -कं, ससीमः -मा -मं, सपरिमाणः -णा -णं, परिच्छिन्नः -न्ना -न्नं, नियतः -ता -तं, संयतः -ता -तं, निबद्धः -द्धा -द्धं, बद्धः -द्धा -द्धं, संवृतः -ता -तं, सव्याधः -धा -धं, अव्यापकः -का -कं, अव्यापी -पिनी -पि (न्), सङ्कुचितः -ता -तं, सबाधः -धा -धं, 'of limited meaning,' मितार्थः -र्था -र्थं.

Limiter, s. मर्य्यादाकारी m. (न्), सीमाकर्त्ता m. (र्तृ), परिच्छेदकः, अवधिकृत्.

Limitless, a. अपरिमितः -ता -तं, अमितः -ता -तं, अनन्तः -न्ता -न्तं, निरवधिः -धिः -धि.

To limn, v. a. लिख् (c. 6. लिखति, लेखितुं), आलिख्, विलिख्, अभिलिख्, चित्रं लिख्, चित्र् (c. 10. चित्रयति -यितुं).

Limner, s. चित्रकरः, चित्रकारः, चित्रलिख् m. (ख्), चित्रकर्म्मविद् m.

Limous, a. पङ्किलः -ला -लं, पङ्की -ङ्किनी -ङ्कि (न्), सकर्दमः -मा -मं.

To limp, v. n. लङ्ग् (c. 1. लङ्गति -ङ्गितुं), खञ्ज् (c. 1. खञ्जति -ञ्जितुं),

[illegible] [illegible] -रितुं, खोड् [illegible] खोडति -डितुं, खोड् [illegible] खोडयति -यितुं, खोड् [illegible] खोडति -डितुं, [illegible] [illegible] खुडति -डितुं, वञ्च् [illegible] वञ्चति -ञ्चितुं).

Limp, s. लङ्गः, खञ्जनं, लङ्गगतिः f., खञ्जगतिः f.

Limp, a. मृदुः -द्वी -दु, शिथिलः -ला -लं, कोमलः -ला -लं.

Limper, s. लङ्गगतिः m., लङ्गगामी m. (न्), खञ्जगतिः m., खञ्जः.

Limpid, a. स्वच्छः -च्छा -च्छं, स्वच्छजलः -ला -लं, अच्छः -च्छा -च्छं, निर्म्मलः -ला -लं, विमलः -ला -लं, अमलः -ला -लं, निर्म्मलजलः -ला -लं, सुजलः -ला -लं.

Limpidness, limpidity, s. स्वच्छता, निर्म्मलता, विमलता, अमलता, जलनैर्म्मल्यं.

Limping, part. or a. खञ्जः -ञ्जा -ञ्जं, पङ्गुः -ङ्गुः -ङ्गु, खोरः -रा -रं, खोलः -ला -लं, खोडः -डा -डं, लङ्गगतिः -तिः -ति, खञ्जगतिः &c., लङ्गगामी -मिनी -मि (न्), विकलगतिः &c.

Limpingly, adv. खञ्जवत्, पङ्गुवत्, खञ्जं, लङ्गगत्या, खञ्जगत्या.

Limsy, limpsy, a. शिथिलः -ला -लं, मृदुः -द्वी -दु, कोमलः -ला -लं.

Limy, a. चूर्णमयः -यी -यं, सचूर्णः -र्णा -र्णं, कर्करीयः -या -यं, प्रचुरचूर्णः -र्णा -र्णं, कर्करमयः -यी -यं.—(Viscous) सान्द्रः -न्द्रा -न्द्रं, श्यानः -ना -नं, चूर्णगुणः -णा -णं, चूर्णोपमः -मा -मं.

Lin, s. (Flax) अतसी, उमा, क्षुमा, क्षौमी, शणं.

Linch-pin, s. अक्षाग्रकीलः -लकः, अक्षाग्रशङ्कुः m., अक्षाग्रशलाका, अणिः m., आणिः m. f., उद्दूषः.

Linctus, s. (Medicine) अवलेहः, अवलेह्यं, लेह्यं, अवलेह्यौषधं.

Line, s. रेखा, लेखा, सरणिः -णी, धारणी, राजिः -जिका f., राजी, पंक्तिः f., पद्धतिः f., आलिः -ली f., आवलिः -ली f., पालिः -ली f., ततिः f., श्रेणिः -णी m. f.—(Ruled line) वर्त्तिः f., रेखा, लेखा, अङ्कः.—(Row, range) पंक्तिः f., श्रेणिः -णी, राजिः -जी f., पद्धतिः f., आवलिः -ली f., माला, हारः; 'in a line,' पंक्तिक्रमेण; 'in the same line,' समरेखः -खा -खं, एकरेखः &c.—(Line of troops) दण्डः, पंक्तिः f., व्यूहः, विन्यासः, सैन्यपंक्तिः f., बलविन्यासः; 'an array of troops in line,' दण्डव्यूहः; 'line of infantry,' पत्तिपंक्तिः f., पत्तिश्रेणी.—(String, cord) सूत्रं, रज्जुः m. f., गुणः, तन्तुः m.—(Cord extended to direct any operation) सूत्रं; 'by line and rule,' यथासूत्रं.—(Line of the face, &c.) मुखरेखा, वदनरेखा, रेखा, 'a lucky line,' आयुष्यरेखा, भद्ररेखा, स्वस्तिकः.—(Line of print, &c.) पंक्तिः f.—(Line of a stanza) पदं.—(Outline) बाह्यरेखा, बहिर्लेखा.—(Contour) आकारः, आकृतिः f., परिधिः m.—(Rampart, trench) प्राकारः, वप्रः, दुर्गवप्रः, परिखा, परिकूटं.—(Method, disposition) क्रमः, अनुक्रमः, पर्य्यायः, मार्गः, परम्परा, विन्यासः, परिपाटिः -टी f.—(Series) श्रेणी -णिः m. f., पंक्तिः f., परम्परा, पारम्पर्य्यं, आवलिः -ली f., माला, आनुपूर्व्यं; 'in regular line,' क्रमशस्, अनुक्रमशस्, अनुपूर्वशस्, पारम्पर्य्येण.—(Line of a family) वंशावलिः f., वंशपरम्परा, वंशपारम्पर्य्यं, कुलपरम्परा.—(Line of conduct) मार्गः, पथः, व्यवहारः, रीतिः f., वृत्तिः f.; 'correct line of conduct,' सुमार्गः, सुपथः; 'incorrect line,' उन्मार्गः, विमार्गः, विपथः, कुपथः, कुवृत्तिः f.—(Line of study) अध्ययनमार्गः, अध्ययनक्रमः.—(Department) देशः, विषयः, अङ्गं.—(Direction, course) दिक् f. (श्), पथः, मार्गः; 'line of direction in mechanics,' गुरुत्वलम्बः; 'it goes in a different line,' भिन्नदिशं गच्छति.—(Fishing-line) मत्स्यग्राहः, बडिशसूत्रं, मत्स्यबन्धनसूत्रं.—(Equator) विषुवरेखा, विषुवमण्डलं, विषुवद्वृत्तं, विषुवद्वृत्तं, विषुवरेखा, नाडीवृत्तं, नाडीमण्डलं, भूगोलरेखा, भूपरिधिः m., भूमध्यं, भूमध्यरेखा.—(To draw lines) लिख् (c. 6.

लिखति लिखितुं or लिख प्रोल्लिख रेखां कृ d a w n
h gr u d रेखादिना भूमिम् उल्लिख अङ्क् अङ्कयति यित
a d g n रेखाकरणं प्रोल्लेखनं उल्लिखनं d... -
ng n उल्लिखत् लेखी -खत् (त्), प्रोल्लिखत् &c.

To line, *v. a.* (Cover on the inside) अन्तर् *or* अन्तर्भागे छद् (c. 10. छादयति -यितुं) or आछद्, अन्तश्छादनं कृ, अभ्यन्तरे छद्, अन्तःपटलं कृ, अन्तःपुटं कृ.—(Place in a line) पङ्क्तिक्रमेण स्था in caus. (स्थापयति -यितुं).

Lineage, *s.* अन्वयः, वंशः, सन्ततिः *f.*, सन्तानः, कुलं, अन्ववायः, गोत्रं, वंशविततिः *f.*, वंशपरम्परा, आवली -लिः *f.*, वंशावलिः, परम्परा, जातिः *f.*, जननं, अभिजनः; 'of royal lineage,' राजवंश्यः -श्या -श्यं: 'of high lineage,' महाकुलः -ला -लं.

Lineal, *a.* (Compound of lines) रेखामयः -यी -यं, रेखारूपः -पा -पं, अङ्कितः -ता -तं.—(*Derived from ancestors in a direct line*) परम्परागतः -ता -तं, परम्परायातः -ता -तं, परम्पराप्राप्तः -प्ता -प्तं, क्रमागतः -ता -तं, क्रमायातः -ता -तं, क्रमप्राप्तः -प्ता -प्तं, वंशक्रमागतः -ता -तं, पारम्परीणः -णा -णं, पारम्परिकः -की -कं; 'a lineal descendant,' सन्तानः, सन्ततिः *f.*; 'lineal descent,' क्रमागमः, वंशक्रमागमः, क्रमागतत्वं, अन्वयागमः.

Lineally, *adv.* क्रमागमेन, वंशक्रमेण, पारम्पर्येण, परम्परातस्; 'lineally descended,' वंशक्रमागतः -ता -तं, वंशक्रमायातः -ता -तं, अन्वयागतः -ता -तं, कुलक्रमायातः -ता -तं.

Lineament, *s.* (Feature) रेखा, वदनरेखा, मुखरेखा, वदनाकृतिः *f.*, वदनाकारः, मुखावयवः, रूपचिह्नं, रूपलक्षणं, अङ्गचिह्नं, अङ्गलक्षणं.—(Outline) परिलेखा, बाह्यरेखा, वस्तु *n.*, वस्तुमात्रं; 'of just lineaments,' सुरेखः -खा -खं.

Linear, *a.* पाङ्क्तः -क्ती -क्तं, पाङ्क्तेयः -यी -यं, पङ्क्तिरूपः -पा -पं, पङ्क्तिमयः -यी -यं, रेखामयः -यी -यं, रेखारूपः &c., रेखासम्बन्धी -न्धिनी -न्धि (न्).

Lined, *p. p.* अन्तर्भागे छादितः -ता -तं, अन्तराच्छादितः -ता -तं, अन्तरावृतः &c.

Linen, *a.* (Made of flax or hemp) क्षौमः -मी -मं, क्षौमः -मी -मं, क्षौमकः -की -कं, शाणः -णी -णं, अतसीमयः -यी -यं, शाणमयः &c.

Linen, *s.* क्षौमवस्त्रं, क्षौमपटः, शाणवस्त्रं, शाणपटः, क्षौमी, क्षौमवस्त्रं, क्षौमपटः, क्षौमावरं.

Linen-draper, *s.* क्षौमवस्त्रविक्रेता *m.* (तृ), क्षौमपटविक्रयी *m.* (न्), वस्त्रविक्रयोपजीवी *m.* (न्), वस्त्रक्रयविक्रयिकः, वस्त्रवाणिज्यकारी *m.* (न्).

Ling, *s.* (Plant) मङ्गल्यतृणं दूर्वा, मङ्गल्यदोही तृणभेदः.

To linger, *v. n.* विलम्ब् (c. 1. -लम्बते -म्बितुं), मन्द (nom. मन्दायते), चिर (nom. चिरयति, चिरायति), अवस्था (c. 1. -तिष्ठति -स्थातुं), कालं क्षिप् (c. 6. क्षिपति, क्षेप्तुं), विलम्बनं कृ, कालक्षेपं कृ.—(Hesitate) विकल्प् (c. 1. -कल्पते -ल्पितुं, c. 10. -कल्पयति -यितुं), विचर् (c. 10. -चारयति -यितुं), विकल्पं कृ, विचारणं कृ.—(Remain long in any state) चिरेण *or* चिरं or चिरकालं or दीर्घकालं स्था or अवस्था or वृत् (c. 1. -वर्त्तते -र्त्तितुं), सुचिरं स्था; 'on a bed of sickness,' चिररोगी -गिणी भू.—(Proceed slowly) *मन्दं मन्दं* चल् (c. 1. चलति -लितुं) or चर् (c. 1. चरति -रितुं).

Lingerer, *s.* विलम्बी *m.* (न्), विलम्बकारी *m.*, मन्दगामी *m.* (न्), मन्दगतिः *m.*, चिरक्रियः, कालक्षेपकः, कालयापकः, दीर्घसूत्री *m.* (न्).

Lingering, *part.* मन्दायमानः -ना -नं, मन्दयमानः -ना -नं, विलम्बी -म्बिनी -म्बि (न्), विलम्बितः -ता -तं, चिरायमाणः -णा -णं.—(Remaining long) चिरस्थः -स्था -स्थं, चिरस्थायी -यिनी -यि (न्), चिरस्थितः -ता -तं, चिरकालस्थः -स्था -स्थं, दीर्घकालीनः -ना -नं, चिरकालीनः -ना -नं.

L... *adv.* विलम्बेन विलम्बात सविलम्बं मन्दं मन्दं मन्दगत्या कालक्षेपेण सकालक्षय दीर्घसूत्रवत्, दीर्घसूत्रतया.

Linget, *s.* (Mass of metal) धातुपिण्डः, लोहपिण्डः.

Linguadental, *a.* जिह्वादन्त्यः -न्त्या -न्त्यं, जिह्वादन्तीयः -यी -यं.

Lingual, *a.* जिह्वासम्बन्धी -न्धिनी -न्धि (न्), जैह्विकः -की -कं, जिह्वा in comp.

Linguiform, *a.* जिह्वारूपः -पा -पं, जिह्वाकारः -रा -रं, जिह्वाकृतिः -तिः -ति.

Linguist, *s.* भाषाज्ञः, बहुभाषाज्ञः, नानाभाषाज्ञः, अनेकभाषाज्ञः, बहुभाषावेत्ता *m.* (तृ), नानाभाषानिपुणः, शाब्दिकः, शब्दवृन्दकः, बहुभाषावादी *m.* (न्), उच्चारणज्ञः.

Liniment, *s.* लेपनं, उपदेहः, लेपः, आलेपः, प्रलेपः, विलेपनं, अनुलेपनं अभ्यङ्गः, अभ्यञ्जनं, मर्दनौषधं.

Lining, *s.* अन्तश्छादनं, अन्तराच्छादनं, अन्तर्वेष्टनं, अन्तःपटलं, अन्तःपुटः -टं, आस्तरः -रणं, अन्तरास्तरणं.

Link, *s.* (Of a chain) शृङ्खलासन्धिः *m.*, शृङ्खलसन्धिः, शृङ्खलाग्रन्थिः *m.*—(A chain, any thing connecting) शृङ्खलः -ला, सन्धिः *m.*, बन्धनं, पाशः, संयोगः, सम्बन्धः.—(*Part of a connected series*) अन्वयः, समन्वयः, प्रबन्धः.—(Torch) उल्का, अलातं, ज्वलत्काष्ठं, अग्निकाष्ठं.

To link, *v. a.* सन्धा (c. 3. -दधाति -धत्ते -धातुं), संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), सम्बन्ध् (c. 9. -बध्नाति -बन्धुं), संश्लिष् (c. 10. -श्लेषयति -यितुं), शृङ्खल (nom. शृङ्खलयति -यितुं), ग्रन्थ् (c. 9. ग्रथ्नाति, ग्रन्थितुं), शृङ्खलारूपेण सन्धा.

Link-boy, *s.* उल्काभृत्, उल्काधारी *m.* (न्), ज्वलत्काष्ठभृत्.

Linked, *p. p.* सन्धितः -ता -तं, संयुक्तः -क्ता -क्तं, सम्बद्धः -द्धा -द्धं, अनुबद्धः &c., अनुबद्धः &c., सन्धितः -ता -तं, समन्वितः -ता -तं, सान्वयः -या -यं.

Linnet, *s.* क्षुद्रतनुर्मधुरस्वरविशिष्टः क्षुद्रपक्षी.

Linseed, *s.* अतसीबीजं, उमाबीजं, क्षुमाबीजं, अतसी, उमा, क्षुमा, मसीना, मसृणा, पार्वती, सुवर्चला, मालिका.

Linsey-woolsey, *a.* क्षौमौर्णः -र्णा -र्णं, क्षौमौर्णः &c., शाणौर्णः &c.

Linstock, *s.* अग्निदयष्टिः *m.*, अग्निदकाष्ठं, अग्निदशलाका, अग्निदण्डः, ज्वलनदण्डः, ज्वलनकाष्ठं, शलाका.

Lint, *s.* विकेशिका, व्रणशोधनार्थं क्षौमपटखण्डः or क्षौमपटखण्डः or शाणपटखण्डः.

Lintel, *s.* द्वारोपरिस्थकाष्ठं, द्वारोपरिस्थदारु *m.*, द्वारोपरिस्थितं काष्ठं, द्वारधकाष्ठं.

Lion, *s.* सिंहः, केसरी *m.* (न्), केशरी *m.*, हरिः *m.*, मृगेन्द्रः, मृगराजः, मृगराट् *m.* (ज्), मृगपतिः *m.*, पशुराजः, पशुपतिः *m.*, वनराजः, मृगरिपुः *m.*, मृगारिः *m.*, गजारिः *m.*, कुञ्जरारातिः *m.*, द्विरदान्तकः, हस्तिकक्ष्यः, भीमनादः, भीमविक्रमः, भारिः *m.*, हरित् *m.*, हर्यक्षः, पञ्चास्यः, पञ्चमुखः, पञ्चाननः, पञ्चवक्त्रः, पञ्चशिखः, शार्दूलः, नखायुधः; 'a lion's mane,' केशरः, केसरः, सिंहकेशरः; 'lion's mouth,' सिंहमुखं, मृगेन्द्रमुखं; 'lion's roar,' सिंहनादः -दकः, सिंहध्वनिः *m.*; 'abounding with lions,' सिंहवान् -वती -वत्: 'he plays the lion,' सिंहायते.—(Sign in the zodiac) सिंहः. *See* Leo. (Object of curiosity) कौतुकं.

Lioness, *s.* सिंही, केशरिणी, केसरिणी, मृगेन्द्राणी, हर्यक्षी.

Lion-like, lionly, *a.* सैंहः -ही -हं, सैंहिकः -की -कं, सिंहस्वभावः -वा -वं.

Lip, *s.* ओष्ठः, अधरः, दशनच्छदः, रदनच्छदः, रदच्छदः, दन्तच्छदः, दच्छदः, दशनवासस् *n.*, वाग्दलं, ओष्ठपल्लवं, अधरपुटं, ओष्ठपुटः -टं; 'the upper lip,' is properly ओष्ठः; 'the lower lip,' अधरः—

(The lips) ओष्ठाधरौ *m.* du., ओष्ठौ *m.* du., अधरौ du., दन्तच्छदौ, रदनच्छदौ, दशनच्छदौ, दशनवाससी *n.* du.; 'red or cherry lip,' बिम्बोष्ठ or बिम्बौष्ठः, बिम्बाधरः; 'having red lips,' बिम्बोष्ठः -ष्ठा -ष्ठं or बिम्बौष्ठः; 'nectar of the lips,' अधरामृतं; 'drinking the nectar of the lips,' अधरपानं; 'to bite the lips,' ओष्ठं or अधरं or ओष्ठाधरौ दंश् (c. 1. दशति, दंष्टुं) or सन्दंश्, दन्तैः ओष्ठं खाद् (c. 1. खादति -दितुं), अधरावलोपं कृ, ओष्ठदंशनं कृ; 'biting the lips,' सन्दष्टौष्ठः -ष्ठा -ष्ठं, दष्टदच्छदः -दा -दं, सन्दष्टौष्ठपुटः -टा -टं.—(Edge of a cup, &c.) पात्रकण्ठः, पात्रमुखं, पात्रधारः, पात्रकर्णः, पात्रपार्श्वः.

Lip-devotion, *s.* ओष्ठभक्तिः *f.*, अधरभक्तिः *f.*, ओष्ठपूजा, अधरपूजा.

Lipless, *a.* ओष्ठहीनः -ना -नं, अधरहीनः -ना -नं, निरोष्ठः -ष्ठा -ष्ठं.

Lipothymous, *a.* मूर्छितः -ता -तं, मूर्छालुः -लुः -लु, नष्टचेतनः -ना -नं.

Lipothymy, *s.* मूर्छा -र्छनं -ना, मोहः, सम्मोहः, प्रमोहः, प्रलयः, चैतन्यहानिः *f.*, चैतन्यहानिः *f.*, चैतन्यनाशः.

Lipped, *a.* ओष्ठवान् -वती -वत् (त्), ओष्ठी -ष्ठिनी -ष्ठि (न्), ओष्ठ or अधर in comp.; as, 'red lipped,' बिम्बोष्ठः -ष्ठा -ष्ठं or बिम्बौष्ठः &c., बिम्बाधरः -रा -रं.

Lippitude, *s.* चुल्लत्वं, पिल्लत्वं, पिच्चटत्वं, क्लिन्नाक्षता, नयनक्लिन्नता.

Lip-salve, *s.* ओष्ठलेपः, ओष्ठप्रलेपः, ओष्ठस्नेहनं, अधराञ्जनं.

Liquefaction, *s.* (The act) द्रावः -वणं, विद्रावः -वणं, द्रवीकरणं, विलयः -यनं, लयः -यनं, गलनं, गालनं, परिगलनं, विगलनं, क्षरणं, जलसात्करणं.—(The state) द्रवत्वं, द्रावितत्वं, विलीनता, गलितत्वं, द्रुतत्वं, विद्रुतता.

Liquefiable, liquable, *a.* द्राव्यः -व्या -व्यं, विद्राव्यः -व्या -व्यं, विलयनीयः -या -यं, गलनीयः -या -यं, द्रवणीयः -या -यं or द्रावणीयः लुविलयः -या -यं, विलयनशीलः -ला -लं, द्रावणार्हः -र्हा -र्हं, द्रवार्हः -र्हा -र्हं, क्षरणीयः -या -यं, क्षरणाय -या -यं, द्राव्यः -व्या -व्यं.

Liquefied, *p. p.* द्रुतः -ता -तं, विद्रुतः -ता -तं, द्रावितः -ता -तं, विद्रावितः -ता -तं, द्रवीकृतः -ता -तं, द्रवीभूतः -ता -तं, लीनः -ना -नं, विलीनः -ना -नं, विलीनः -ना -नं, गलितः -ता -तं, गालितः -ता -तं, परिगलितः -ता -तं, विगलितः -ता -तं.

To liquefy, *v. a.* विली in caus. (-लाययति -लापयति -यितुं), विद्रु (c. 10. -द्रावयति -यितुं), द्रु, द्रवीकृ, गल् (c. 10. गालयति -यितुं), विगल्, गलितीकृ, विलीनीकृ, जलसात्कृ, आर्द्रीकृ.

To liquefy, *v. n.* विली (c. 4. -लीयते -लेतुं), प्रविली, प्रली, द्रु (c. 1. द्रवति, द्रोतुं), विद्रु, गल् (c. 1. गलति -लितुं), विगल्, क्षर् (c. 1. क्षरति -रितुं), द्रवीभू, विलीनीभू, जलसाद्भू.

Liquid, *a.* द्रवः -वा -वं, द्रुतः -ता -तं, द्रवरूपः -पा -पं, सद्रवः -वा -वं, विद्रुतः -ता -तं, विलीनः -ना -नं, लीनः -ना -नं, गलितः -ता -तं, तरलः -ला -लं, विह्वलः -ला -लं, प्रवाही -हिणी -हि (न्), प्रवाहधर्मकः -का -कं, पयस्यः -स्या -स्यं.

Liquid, *s.* द्रवः, द्रवद्रव्यं, द्रवपदार्थः, द्रवतस्तु *n.*, सद्रवपदार्थः, रसः, आर्द्रद्रव्यं, आर्द्रवस्तु *n.*, जलं, वारि *n.*, पयस् *n.*

To liquidate, *v. a.* शुध् (c. 10. शोधयति -यितुं), परिशुध्, मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विमृष् (c. 6. -मृषति मर्षुं, c. 10. -मर्षयति -यितुं), निस्तॄ (c. 10. -तारयति -यितुं), अपनी (c. 1. -नयति -नेतुं), विनी, अपवृज् (c. 10. -वर्जयति -यितुं), अपाकृ, साध् (c. 10. साधयति -यितुं); 'settle a debt,' ऋणं शुध् or अपनी or विनी or अपाकृ or अपवृज् or साध्, ऋणशोधनं कृ, ऋणसिद्धिं कृ, ऋणमुक्तिं कृ.

Liquidated, *p. p.* शोधितः -ता -तं, परिशोधितः -ता -तं, परिशुद्धः -द्धा -द्धं, सिद्धः -द्धा -द्धं, साधितः -ता -तं, ऋणमुक्तः -क्ता -क्तं, ऋणमोचितः -ता -तं, अपाकृतः -ता -तं, विगमितः -ता -तं, निस्तारितः -ता -तं, उत्तीर्णः -र्णा -र्णं.

Liquidation, *s.* शोधनं, परिशोधनं, शुद्धिः *f.*, परिशुद्धिः *f.*, शुद्धि *f.* विमुक्तिः *f.*, मोक्षः -क्षणं, परिमोक्षणं, निस्तारः, उत्तरणं, अपाकरणं सिद्धिः *f.*, साधनं, अपनयनं, 'of a debt,' ऋणशोधनं, ऋणसिद्धिः *f.* ऋणापाकरणं, ऋणमुक्तिः *f.*, ऋणापनयनं, ऋणापनोदनं, विगमनं, निरादेशः.

Liquidity, liquidness, *s.* द्रवत्वं -ता, द्रावत्वं -ता, विद्रुतत्वं, विलीनता, गलितत्वं, द्रवभावः, रसता, प्रवाहधर्मः.

Liquor, *s.* (Fluid) द्रवः, द्रवद्रव्यं, द्रवपदार्थः, सद्रवपदार्थः, द्रववस्तु *n.* रसः, जलं.—(Drink) पेयं, पानीयं, पेयद्रव्यं.—(Spirituous liquor) मद्यं, मदिरा, मदः, सुरा -री, वारुणी, शुक्ता, शीधुः *m.* -धु, सीधु *m.* हाला, आसवं, कल्यं -ल्या, कश्यं; 'drinker of spirituous liquor' सुरापः -पी *f.*, मद्यपः -पी *f.*, शीधुपः -पी *f.*, शुक्तापायी *m.* -यिनी *f.*

Liquor-shop, *s.* मदिरागृहं, मद्यविक्रयस्थानं, शुक्तापानं.

Liquorice, *s.* मधुयष्टिका, यष्टिमधु *n.*, मधुकं, मधूली. *See* Licorice

To lisp, *v. a.* or *n.* गद्गद (nom. गद्गदयति), गद्गदवाचा वद् (c. 1. वदति -दितुं), बालकवद् उच्चर् (c. 10. -चारयति -यितुं), भग्नदन्तैर् इव उच्चर भग्नदन्तोच्चारणं कृ, भग्नस्वरेण or भिन्नस्वरेण वद् or उच्चर, अस्पष्टवाचा or अस्फुटवाचा उच्चर, अस्पष्टोच्चारणं कृ, अस्फुटोच्चारणं कृ, जल्प् (c. 1. जल्पति -ल्पितुं).

Lisp, lisping, *s.* गद्गदः, गद्गदवाक् *f.* (च्), गद्गदपदं, गद्गदवाक्यं, भग्नदन्तोच्चारणं, भग्नस्वरोच्चारणं, भिन्नस्वरोच्चारणं, अस्फुटोच्चारणं, अस्पष्टोच्चारणं, बालकवद् उच्चारणं.

Lisped, *p. p.* भग्नदन्तोच्चारितः -ता -तं, अस्पष्टोच्चारितः -ता -तं.

Lisper, lisping, *a.* अस्फुटवाक् *m. f. n.* (च्), अस्पष्टवाक् *m. f. n.*, गद्गदवाक् *m. f. n.*, अस्फुटजल्पः -ल्पा -ल्पं, विकलजल्पः &c., लोहलः -ला -लं, भग्नदन्तोच्चारणकृत्.

Lispingly, *adv.* अस्फुटवाचा, अस्पष्टवाचा, गद्गदवाचा, बालकवत्.

List, *s.* (Catalogue) आवलिः -ली *f.*, अनुक्रमणिका, परिसंख्या, परिसंख्यापत्रं, परिगणना, सूचिः -ची *f.*, सूचिपत्रं; 'a list of names नामावलिः -ली *f.*, नामावलिपत्रं, नामपरिसंख्यापत्रं, 'list of errata' शुद्धिपत्रं.—(Strip of cloth) पट्टः -ट्टकः, पटखण्डः, वस्त्रखण्डः.—(Border or edge of cloth) वस्त्रधारः, वस्त्रप्रान्तः, वसनप्रान्तः वस्त्रान्तः, वसनान्तः, वस्तिः *m.*, तरी, दशा.—(Ground enclosed as a field of combat) रङ्गभूमिः *f.*, रणभूमिः, रङ्गाङ्गनं, रङ्गः, युद्धभूमिः *f.*, युद्धक्षेत्रं, रणाजिरं, मल्लभूमिः *f.*, मल्लभूः *f.*—(Liking desire) इच्छा, रुचिः *f.*, अभिरुचिः *f.*, स्पृहा.

To list, *v. a.* (Enroll) नामावलिपत्रे or नामपरिसंख्यापत्रे नामानि समारुह् in caus. (-रोपयति -यितुं) or आरुह् or अभिलिख् (c. 6. -लिखति -लेखितुं) or लिख्.—(Cover with strips of cloth) पट्टेन or पटखण्डेन छद् (c. 10. छादयति -यितुं) or आछद्, पट्टबन्धनं कृ.—(Sew together strips of cloth) पटखण्डान् संसिव् (c. 4. -सीव्यति, सेवितुं) or निषिव्.—(Hearken) आकर्ण् (c. 10. -कर्णयति -यितुं), कर्णं दा.

To list, *v. n.* (Desire, choose) इष् (c. 6. इच्छति, एषितुं), अभिलष् (c. 1. -लषति -षितुं), रुच् (c. 1. रोचते) used impersonally 'doing as one lists,' कामचारी -रिणी -रि (न्), कामचारः -री -रं 'going as one lists,' कामगामी -मिनी &c., कामगः -गा -गं, 'as one lists,' कामतस्, कामचारतस्. *See* Like.

To listen, *v. n.* आकर्ण् (c. 10. -कर्णयति -यितुं), श्रु (c. 5. शृणोति,

बोद्धुं), धातु अवधृ, निशम् (c. 10. -शामयति -यितुं), कर्णं दा (c. 3 ददाति, दातुं), श्रवणं भृ —(Heed, lend the mind) अवधा (c. 3 -धत्ते -धातुं), मनो धा, सावधानः -ना -नं भू, अवहितः -ता -तं भू or अस्, अवधानं कृ, 'listen,' शृणु, कर्णं देहि, वचनीयता —(Obey, follow admonition) श्रु in des. (शुश्रूषते -षितुं), अनुनिशा in pass. (-धीयते), अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं).

Listener, s. श्रोता m. -त्री f. (तृ), श्रवणकर्त्ता m. -र्त्री f. (र्तृ), निशमनकारी m. -रिणी f. (न्).

Listless, a. अनुत्सुकः -का -कं, निरुत्सुकः -का -कं, अनिच्छुः -च्छुः -च्छु, अनिच्छुकः -का -कं, निरिच्छः -च्छा -च्छं, निःस्पृहः -हा -हं, निरीहः -हा -हं, उदासीनः -ना -नं, उदासी -सिनी -सि (न्), निरपेक्षः -क्षा -क्षं, विरक्तः -क्ता -क्तं, वीतरागः -गा -गं, निष्कौतुकः -का -कं, अनभिलाषः -षा -षं, अनवधानः -ना -नं, अनवहितः -ता -तं, निरुद्योगः -गा -गं, निरुद्यमः -मा -मं, अप्रयत्नः -त्ना -त्नं, अप्रयत्नशीलः -ला -लं, अनास्थः -स्था -स्थं, आस्थाहीनः -ना -नं, मन्दबुद्धिः -द्धिः -द्धि, जडः -डा -डं, जडबुद्धिः &c., अलसः -सा -सं, निरुत्कः -त्का -त्कं, म्लानः -ना -नं, प्रमादी -दिनी &c. See Languid.

Listlessly, adv. अनुत्सुकं, निरुत्सुकं, अनिच्छया, अनौत्सुक्येन, उदासीनवत्, अनभिलाषेण, अनवधानेन, अनवहितं, अनपेक्षया, जडवत्, अलसं. See Languidly.

Listlessness, s. अनुत्सुकता, अनौत्सुक्यं, निरुत्सुकता, अनिच्छा, अनीहा, निरीहता -त्वं, अस्पृहा, निःस्पृहता, अनभिलाषः, उदासीनता, औदास्यं, विरक्तिः f., विरक्तता, वैराग्यं, अननुरागः, अनपेक्षा, अनवेक्षा, अनुत्साहः, अनुद्योगः, अप्रयत्नः -त्नता, अनास्था, आस्थाहीनता, मन्दबुद्धित्वं, जडता, जाड्यं, अलसता, आलस्यं, म्लानिः f. See Languor.

Litany, s. ख्रीष्टीयमतधारिभिर् व्यवहृताः प्रार्थनामार्गाः, ख्रीष्टीयसमाजव्यवहारिता प्रार्थना.

Literal, a. (Not figurative) मूलार्थकः -का -कं, मुख्यार्थकः -का -कं, मुख्यः -ख्या -ख्यं, वाचकः -का -कं, अव्यभिचारकः -का -कं, विवक्षितः -ता -तं, प्रकृतः -ता -तं; 'literal occupation,' मुख्यार्थः, मुख्यार्थः, मूलार्थः, प्रकृतार्थः.—(Following the letter or exact words) मूलशब्दानुसारी -रिणी -रि (न्), मूलशब्दानुसारी -रिणी &c., मूलपदानुसारी &c., शब्दार्थानुसारी &c., अक्षरार्थानुसारी &c., शब्दानुसारी &c., यथाक्षरः -रा -रं, शाब्दिकः -की -कं.—(Consisting of letters) अक्षरी -रिणी &c., अक्षरमयः -यी -यं.

Literality, s. मुख्यत्वं -ता, मुख्यार्थत्वं, मूलार्थत्वं, मुख्यार्थः, मूलार्थः, प्रकृतार्थः, शब्दार्थः, वाच्यत्वं -ता, वाच्यार्थः.

Literally, adv. (Not figuratively) मूलार्थानुसारेण, मुख्यार्थानुसारेण, मूलार्थतस्.—(Close to the letter or exact words) शब्दतस्, अक्षरतस्, यथाशब्दं, शब्दानुसारेण -रतस्, मूलशब्दानुसारेण, मूलपदानुसारात्, शब्दार्थतस्.—(Letter by letter) अक्षरशस्.

Literary, a. (Pertaining to literature) विद्यासम्बन्धी -न्धिनी -न्धि (न्), विद्याविषयः -या -यं, अक्षरसम्बन्धी &c., शास्त्रिकः -की -कं, शास्त्रीयः -या -यं, विद्याप्रकरणसम्बन्धी &c., साहित्यसम्बन्धी &c.—(Versed in literature, fond of it) विद्यावान् -वती -वत् (त्), शास्त्राभिज्ञः -ज्ञा -ज्ञं, विद्याप्रियः -या -यं, विद्यासेवी -विनी &c., विद्यानुसेवी &c., विद्यानुरागी -गिणी &c., विद्याव्यवसायी -यिनी &c., विद्यानुपाठी -ठिनी &c., विद्याविशिष्टः -ष्टा -ष्टं, विद्यासम्पन्नः -न्ना -न्नं.

Literate, a. पण्डितः -ता -तं, विद्यावान् -वती -वत् (त्), विद्यासम्पन्नः -न्ना -न्नं, कृतविद्यः -द्या -द्यं, विद्वान् -दुषी -द्वत् (स्), विपश्चित् m. f. n., साक्षरः -रा -रं.

Literati, s. pl. पण्डितमण्डली -लं, पण्डितसमाजः, विद्वत्समाजः, पण्डितगणाः, पण्डितवर्गः, पण्डितसमूहः, विद्वद्वृन्दं.

Literature, s. (Learning) विद्या, शास्त्रं, शास्त्रविद्या, अक्षरं, साहित्यं वाङ्मयं.—(Collective body of literary productions) शास्त्रसमुदायः, शास्त्रसमवायः, शास्त्रसमूहः, often expressible by शास्त्र in the sing. number; as, 'poetical literature,' काव्यशास्त्रं 'branch of literature,' अङ्गं, उपशास्त्रं.

Lithe, a. शिथिलः -ला -लं, मृदुः -दुः -द्वी -दु, सुनमनीयः -या -यं.

Litheness, s. शिथिलता, शैथिल्यं, सुनमनीयता, मृदुता, कोमलता.

To lithograph, v. a. प्रस्तरोपरि or शिलोपरि लिख् (c. 6. लिखति लेखितुं) or आलिख्, प्रस्तरे रेखादिना मुद्रीकृ or मुद्र् (nom. मुद्रयति -यितुं) or अङ्क् (c. 10. अङ्कयति -यितुं).

Lithograph, s. प्रस्तरमुद्रा, शिलामुद्रा, पाषाणमुद्रा, प्रस्तरालेख्यं, मुद्रा.

Lithographer, s. प्रस्तरलेखकः, प्रस्तरलिख् m. (ख्), प्रस्तरमुद्राकृत् शिलामुद्राकृत्, शिलालेखकः, प्रस्तरालेख्यकृत्.

Lithography, s. प्रस्तरलिखनविद्या, प्रस्तरमुद्राङ्कनविद्या, शिलालिखनविद्या, शिलामुद्राङ्कनं, पाषाणलिखनं.

Lithontriptic, lithontryptic, lithonthryptic, a. अश्मरीघ्नः -घ्नी -घ्नं, अश्मरीहरः -रा -रं, मूत्रकृच्छ्रघ्नः -घ्ना -घ्नं.

Lithotomy, s. मूत्राश्मोच्छेदः, वस्तिस्थशर्कराच्छेदः, छेदनद्वारा मूत्राश्मनिष्कर्षः, वस्तिच्छेदनं, मूत्राधारच्छेदः.

Lithotripsy, s. अश्मरीघर्षणं, अश्मरीचूर्णनं, अश्मरीखण्डनं, अश्मरीभेदः.

Litigant, a. विवादी -दिनी -दि (न्), विवदमानः -ना -नं, विवादार्थी -र्थिनी -र्थि (न्), व्यवहारी -रिणी &c., व्यावहारिकः -की -कं, व्यवहारिकः &c., कार्यवान् -वती -वत् (त्), कार्यी -र्यिणी &c., विवदन् -दन्ती -दत् (त्).

Litigant, s. व्यवहर्त्ता m. (र्तृ), विवादी m. (न्), विवादार्थी, वादी m., अर्थी m., कार्यवान् m. (त्), कार्यी m.

To litigate, v. n. विवद् (c. 1. -वदते -दितुं), व्यवहृ (c. 1. -हरति -ते -हर्त्तुं), विवादं कृ, विवादार्थी -र्थिनी भू or अस्.

To litigate, v. a. विवादास्पदीकृ, व्यवहारास्पदीकृ, वादग्रस्तं -स्तां कृ.

Litigated, p. p. विवादास्पदीकृतः -ता -तं, विवादास्पदीभूतः -ता -तं, विवादानुगतः -ता -तं, वादानुगतः -ता -तं, वादग्रस्तः -स्ता -स्तं, विवादग्रस्तः -स्ता -स्तं.

Litigation, s. विवादः, विवादकरणं, वादः, वादकरणं, व्यवहारः, व्यवहारकरणं, रिक्थं; 'under litigation,' विवादास्पदीभूतः -ता -तं, वादग्रस्तः -स्ता -स्तं. See Litigated.

Litigious, a. विवादी -दिनी -दि (न्), विवादशीलः -ला -लं, विवादप्रियः -या -यं, विवादार्थी -र्थिनी &c., वादप्रियः -या -यं, विवादप्रवणः -णा -णं, विवादबुद्धिः -द्धिः -द्धि, विवादरतः -ता -तं, विवादपरः -रा -रं.

Litigiousness, s. विवादशीलता, विवादप्रियता, विवादार्थित्वं, विवादबुद्धिः f.

Litter, s. (Bed borne on the shoulders) शिबिका, याप्ययानं, डयनं, प्रवहणं, प्रवहणं, डुला, शिविका.—(Bed of straw) तृणशय्या, तृणशयनं, तृणसंस्तरः, तृणास्तरणं.—(Brood of young animals) शावकगणः, यः शावकगणः एकदा जायते, शावकसमूहः; 'of pigs,' शूकरशावकगणः.—(Shreds scattered about) इतस्ततो विकीर्णं वस्तुखण्डः.—(Confusion of things scattered about) द्रव्यविक्षिप्तता, द्रव्यविपर्यस्तता, द्रव्यव्यस्तता, द्रव्यसंकरः, वाकुलं, अव्यवस्था.

To litter, v. a. (Bring forth a number of young ones) शावकगणं सु (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसु or जन् (c. 10. जनयति -यितुं) or प्रजन् (c. 4. -जायते -जनितुं) or प्रसू (c. 10. -सावयति

पिन प्रसवं कृ —(Co w th s aw तृणावृत ता कृ तृणास्तीर्ण
णा क तृणास्तृत ता कृ स्तृण णा कृ तृणास्तरणं कृ S a
ab confu d y इतस्ततो विकृ 6 किरति करितुं रीतु
व्याकृ or विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अस्तव्यस्तीकृ.

LITTERED, *p. p.* (Covered with straw) तृणावृतः -ता -तं, तृणास्तीर्णः -र्णा -र्णं, तृणास्तृतः -ता -तं.—(Scattered about) इतस्ततो विकीर्णः -र्णा -र्णं or व्याकीर्णः -र्णा -र्णं, अस्तव्यस्तः -स्ता -स्तं, बहुधा विक्षिप्तः -प्ता -प्तं, बहुधास्तीर्णः -र्णा -र्णं.

LITTLE, *a.* (Small in size or extent, not great) अल्पः -ल्पा -ल्पं, क्षुद्रः -द्रा -द्रं, अल्पकः -का -कं, क्षुद्रकः -का -कं, अल्पपरिमाणः -णा -णं, क्षुद्रपरिमाणः -णा -णं, सूक्ष्मः -क्ष्मा -क्ष्मं, तनुः -नुः -नु, स्तोकः -का -कं, लघुः -घुः -घु, लघुपरिमाणः -णा -णं, ह्रस्वः -स्वा -स्वं, क्षुल्लकः -का -कं, श्लक्ष्णः -क्ष्णा -क्ष्णं, कृशः -शा -शं, दभ्रः -भ्रा -भ्रं, कणीकः -का -कं, अणुकः -का -कं, अणुः -ण्वी -णु, कणः, लेशः, लवः, मात्रा *f.*, त्रुटिः -टी *f.*—(Small in body) अल्पतनुः -नुः -नु, अल्पशरीरः -रा -रं, क्षुद्रतनुः &c., ह्रस्वशरीरः -रा -रं, स्तोककायः -या -यं, अल्पमूर्त्तिः -र्त्तिः -र्त्ति.—(Small in quantity, not much) अल्पः -ल्पा -ल्पं, अल्पमात्रः -त्रा -त्रं, स्तोकः -का -कं, अबहुः -हुः -ह्वी -हु, अबहुलः -ला -लं, अप्रचुरः -रा -रं, ईषत् in comp.—(Very little) अत्यल्पः -ल्पा -ल्पं, अत्याल्पः -ल्पा -ल्पं, अल्पीयान् -यसी -यः (स्), अल्पिष्ठः -ष्ठा -ष्ठं, कनीयान् &c., अणीयान् &c., क्षोदीयान् &c., क्षोदिष्ठः &c.; 'not a little,' अनल्पः -ल्पा -ल्पं; 'little finger,' कनिष्ठाङ्गुलिः -ली *f.*; a little wealth,' अल्पधनं, धनलेशः; 'having little wealth,' अल्पधनः -ना -नं, 'of little merit,' ईषद्गुणः -णा -णं, 'a little hot,' ईषदुष्णः -ष्णा -ष्णं; 'a little animal,' क्षुद्रजन्तुः *m.*; 'of little weight,' अल्पप्रभावः -वा -वं, अल्पप्रमाणः -णा -णं; 'for a little while,' किञ्चित्कालं, कियत्कालं.

LITTLE, *s.* (Small quantity) अल्पभागः, अल्पांशः, किञ्चित्, अल्पं, स्तोकं, ईषत् ind., अल्पिका, अल्पभाव, मात्रा, किञ्चिद्भागः, किञ्चन, सन, अबहुभागः, अबाहुल्यं, अप्राचुर्यं, 'little or much,' स्तोकं प्रचुरं वा, 'by little and little,' अल्पशस्, अल्पाल्पं, स्तोकशस्; 'desiring little,' अल्पाकांक्षी -क्षिणी -क्षि (न्); 'doing little,' ईषत्करः -री -रं.

LITTLE, *adv.* ईषत्, किञ्चित्, स्तोकं, मनाक्, अल्पमात्रं, अबहु, अभूयः, अभूरि, तावत्; 'a little distance, a little way,' कियद्दूरं, ईषद्दूरं, नातिदूरं -रे, कियत्पर्य्यन्तं; 'a little less,' किञ्चिन्न्यूनः -ना -नं, ईषदूनः -ना -नं; 'little drunk,' ईषत्पानः -ना -नं, ईषत्पीतः -ता -तं; little-minded,' कृपणबुद्धिः -द्धिः -द्धि, कृपणधीः -धीः -धि.

LITTLENESS, *s.* अल्पता -त्वं, क्षुद्रता -त्वं, सूक्ष्मता, सौक्ष्म्यं, तनुता, स्तोकता, लघुता, लाघवं, लघिमा *m.* (न्), ह्रस्वता.—(Of body) अल्पशरीरता, शरीरह्रस्वता, शरीरक्षुद्रता.—(Meanness) कृपणता, कार्पण्यं, तुच्छत्वं, हीनता, कदर्य्यता, अपकृष्टता; 'of mind,' बुद्धिकार्पण्यं.

LITTORAL, *a.* तीरस्थः -स्था -स्थं, तटस्थः -स्था -स्थं, तीरसम्बन्धी -न्धिनी &c.

LITURGICAL, *a.* समाजप्रार्थनापद्धतिसम्बन्धी -न्धिनी -न्धि (न्), प्रार्थनपद्धतिविषयः -या -यं, प्रार्थनाविधिसम्बन्धी &c.

LITURGY, *s.* ख्रीष्टीयसमाजप्रार्थनापद्धतिः *f.*, प्रार्थनापद्धतिः, सामाजिकप्रार्थनापद्धतिः, सामाजिकभक्तिमार्गः, प्रार्थनामार्गः, ख्रीष्टीयप्रार्थनाविधिः *m.*

To LIVE, *v. n.* (Have the vital principle) जीव् (c. 1. जीवति -वितुं), प्राण् (c. 2. प्राणिति -णितुं, rt. अन्), श्वस् (c. 2. श्वसिति -तुं), श्वासप्रश्वासं कृ.—(Exist, be in existence) वृत् (c. 1. वर्त्तते -र्त्तितुं), अनुवृत्, विद् in pass. (विद्यते), धृ in pass. (ध्रियते -ति); 'as long as you live,' यावद् शरीरपाते- यावत्ते प्राणा धरिष्यन्ति- यावज्जीवं —

Pa o m जीवनं कालं वृह् (c. 0 वर्त्तयति यतुं
वह् (वाहयति यितुं निर्वह् 0 गम् (0 गमयति
यितु नी नयति नेतु कालनिर्वाहं कृ जीवनिर्वाहं कृ
—(Dw em n) वस् वसति वस्तुं) निवस् अधिवस्
स्था (c. 1. तिष्ठति, स्थातुं), अधिष्ठा, वृत्, आस् (c 2. आस्ते सितुं)
वासं कृ.—(Subsist) उपजीव्, उपजीवनं कृ, निर्वह् (c. 1. वहति -वोढुं), निर्वाहं कृ, शरीरयात्रां कृ, प्राणयात्रां कृ, प्राणधारणं कृ, उदरनिर्वाहं कृ

LIVE, *a.* जीवी -विनी -वि (न्), जीवन् -वन्ती -वत् (त्). *See* LIVING *part*

LIVELIHOOD, *s.* जीविका, उपजीविका, उपजीवनं, उपजीव्यं, आजीवः -वनं, प्रजीवनं, जीवनं, जीवनोपायः, उपजीवनोपायः, वृत्तिः *f.*, वर्त्तन वार्त्ता, वृत्तिता, वृत्त्युपायः, जीवनवृत्तिः *f.*, जीवनसाधनं, जीवसाधनं उपजीवनसाधनं, जीवनार्थः, शरीरयात्रा, प्राणयात्रा; 'bare livelihood,' ग्रासाच्छादनं, अन्नाच्छादनं, अशनाच्छादनं -ने *n. du.*, अन्नोदक दिननिर्वाहः, दिनचर्य्या, 'obtaining a livelihood,' जीविकाप्राप्तः -प्ता -प्तं

LIVELINESS, *s.* तेजस् *n.*, तेजस्विता, तेजोविशिष्टं, उल्लसता, उल्लासः, प्रफुल्लता प्रहृष्टता, प्रहर्षः, सानन्दता, सत्त्वं, तीव्रता, सजीवत्वं, लघुता, लाघव क्षिप्रत्वं; 'of countenance, वदनप्रफुल्लता, मुखश्रीः *f.*

LIVELONG, *a.* दीर्घकालीनः -ना -नं, दीर्घकालिकः -की -कं, चिरकालीन &c

LIVELY, *a.* तेजोवान् -वती -वत् (त्), तेजस्वी -स्विनी -स्वि (न्), उल्लसः -सा -सं, उल्लासी -सिनी &c., प्रफुल्लः -ल्ला -ल्लं, प्रहृष्टः -ष्टा -ष्टं, सानन्दी -न्दिनी &c., सानन्दः -न्दा -न्दं, उल्लासवृत्तिः -त्तिः -त्ति, आनन्दवृत्ति &c., उत्साहपूर्णः -र्णा -र्णं, तीव्रः -व्रा -व्रं, तीक्ष्णः -क्ष्णा -क्ष्णं, बहुसत्त्व -त्त्वा -त्त्वं, ससत्त्वः &c.—(In countenance) प्रफुल्लवदनः -ना -नं हास्यमुखः -खी -खं, सुहृष्टाननः -ना -नं, हास्यवदनः &c., प्रसन्नमुख &c.—(Energetic) तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), उद्योगशीलः -ला -लं उत्साहशीलः -ला -लं.

LIVELY, LIVELILY, *adv.* तेजसा, तेजोपूर्व्वं, उल्लासेन, उल्लसवत्, प्रफुल्लवत्

LIVER, *s.* (One who lives) जीवी *m.* (न्), उपजीवी *m.*, जीवक *See* LIVING, *part* (The organ which secretes the bile) यकृत्, कालखण्डं, कालकं, कालिका, कालेयं, कालखञ्जनं, पित्ताशय पित्ताधारः; 'enlargement of the liver,' यकृद्गुल्मः.

LIVER-COLOR, *a.* यकृद्वर्णः -र्णा -र्णं, कालेयः -यी -यं, नीलरक्तः -क्ता क्तं

LIVERY, *s.* (Particular dress) वेषः, वेशः, कुलवेशः, कुलवेषः, कुलचिह्न —(Of a servant) सेवकवेषः, भृत्यवेशः, परिचारवेषः, कुलसेवकवेष —(Keeping a horse at a certain rate) निरूपितमूल्यमपेक्ष्य अश्वपोषणं or अश्वपालनं.

LIVERY-MAN, *s.* कुलवेशधारी *m.* (न्), कुलवेशभृत् *m.*—(Freeman) पौरवेशः, पौरलिङ्गी *m.* (न्), पौरलिङ्गधारी *m.* (न्).

LIVERY-STABLE, *s* अश्वपोषणशाला, अश्वपालनशाला, अश्वशाला.

LIVE-STOCK, *s.* जीवधनं, जीवत् *n.*

LIVID, *a.* नीलः -ला -लं, नीलवर्णः -र्णा -र्णं, नीलकृष्णः -ष्णा -ष्णं कृष्णवर्णः -र्णा -र्णं सीसकवर्णः &c., कालः -ला -लं, कालिकः -की -कं

LIVIDITY, LIVIDNESS, *s.* नीलता, नीलवर्णः, नीलिमा *m.* (न्), कृष्णता कृष्णिमा *m.*, सीसकवर्णः.

LIVING, *part.* or *a.* (Having life) जीवी -विनी -वि (न्), जीवन् -वन्ती -वत् (त्), सजीवः -वा -वं, जीवितः -ता -तं, जीवभूतः -ता -तं जीवन्तः -न्ती -न्तं, प्राणी -णिनी -णि (न्), प्राणवान् -वती -वत् (त्), प्राणभृत् *m. f. n.*, प्राणधारी -रिणी &c., प्राणमयः -यी -यं, सप्राणः -णा -णं, चेतनः -ना -नं, चेतनावान् -वती -वत् (त्), सचेष्टः -ष्टा -ष्टं, चेष्टित -ता -तं: 'a living being,' जन्तुः *m.*, प्राणी *m.* (न्), प्राणभृत् *m.*

जन्मी शरीरी n देही चेतन भूतं सत्त्व vin rea u प्राणिन p जीवन n pl. चतना a d f h g जीवलोक —(Ext n वर्त्तमान ना नं विद्यमान था ण विद्यमान मा न वर्त्तिष्णु ष्णु ष्णु वर्त्ती र्त्तिनी &c (Subsisting) उपजीवी -विनी &c., उपजीवकः -का -कं, आजीवी -विनी &c., आजीवः -वा -वं. 'living by agriculture,' कृष्युपजीवी &c., 'living by learning,' विद्योपजीवी -विनी &c.; 'living by arms,' शस्त्रोपजीवी &c, अस्त्राजीवः -वा -वं, 'living virtuously,' सद्वर्त्ती -र्त्तिनी &c., सद्वृत्तिः -त्तिः -त्ति, सद्वृत्तः -त्ता -त्तं. सद्व्यवहारः -रा -रं, 'living wickedly,' असद्वृत्तिः &c., कुवृत्तिः &c., कुवर्त्ती -र्त्तिनी &c.; 'a living sacrifice,' जीवोपहारः, 'a living death,' जीवितमरणं.

Living, *s.* (The act) जीवनं, प्राणधारणं, वर्त्तनं, धृतिः *f.*, वासः, निवासः. —(Subsistence, means of subsistence) उपजीविका, जीविका, उपजीवनं, उपजीव्यं, आजीवः -वनं, जीवनोपायः, उपजीवनोपायः, वृत्त्युपायः, वृत्तिः, वर्त्तनं, जीवसाधनं, प्राणयात्रा, यात्रा, शरीरयात्रा, प्राणस्थितिः *f.*, निर्वाहः, जीवनिर्वाहः, प्राणनिर्वाहः, उदरनिर्वाहः, 'living by learning,' विद्योपजीवनं, 'living by husbandry,' कृष्युपजीवनं, 'having a living,' वृत्तिमान् -मती -मत् (त्), 'good living,' सुभोजनं मिष्टभोजनं, परमान्नभोजनं, उत्तमान्नभोजनं, आप्यायनं; 'poor living,' कुभोजनं, कदन्नभोजनं —(Benefice) धर्म्मदायः, धर्म्माध्यापकवृत्तिः *f.*, धर्म्मशिक्षकवृत्तिः

Lixivial, lixivious, *a.* क्षारसुसंसृष्टः -ष्टा -ष्टं, क्षारव्याप्तः -प्ता -प्तं, क्षारविशिष्टः -ष्टा -ष्टं, क्षाराक्तः -क्ता -क्तं, लवणाक्तः &c.

Lixivium, *s.* क्षाराम्बु *n.*, क्षारजलं, क्षारसंसृष्टजलं, क्षारितजलं.

Lizard, *s.* सरटः, सरटुः *m.*, सरट् *m.*, कृकलासः, कृकवाकुः *m.*, कृकलासः, कृकलाशः, गोधा -धिका, प्रतिसूर्य्यः -र्य्यकः, पल्लिः -ल्लिका, लूतिका, शरटः, बहुरूपः, थलजः, क्रकचपाद् *m.*, शुष्काङ्गी, वेदारः, विहारः *m.*, साञ्जनः, साशयन्दकः, वृक्षशः, 'house-lizard,' गृहगोधा -धिका, गृहगोलिका, गृहालिका, मुसली, मुषली, मुशली, टक्नी, ज्येष्ठा -ष्ठी.

Lo! *exclam.* पश्य, पश्यत, प्रेक्षस्व

Load, *s.* भारः, धुरा, धूः *f.* (धुर्), वीवधः, पर्य्याहारः; 'a heavy load,' सुभारः, अतिभारः, दुर्भारः, गुरुभारः.—(Encumbrance, any thing grievous) बाधा, पीडा, कष्टं; 'bearing a load,' भारवाहनः -ना -नं, भारवाही -हिनी -हि (न्), भारवाहिकः -का -कं, भारवहः -हा -हं, धुरन्धरः -रा -रं, धुर्वहः -हा -हं, भारहरः -रा -रं, भारहारिकः -का -कं; 'the act of bearing a load,' भारवहनं, भारोद्वहनं, भारोद्धरणं.

To load, *v. a.* भारं न्यस् (c. 4. -अस्यति -असितुं) or निविश् (c. 10. वेशयति -यितुं) or निधा (c. 3. -दधाति -धातुं) or आरुह् in caus. (रोपयति -यितुं) or स्था in caus. (स्थापयति -यितुं), भारवन्तं -वतीं वत् कृ, भाराक्रान्तं -न्तां -न्तं कृ, सभारं -रां -रं कृ, भारेण पीड् (c. 10. पीडयति -यितुं), भारग्रस्तं -स्तां कृ —(With powder) आग्नेयचूर्णं निविश्, चूर्णगर्भं -र्भां कृ, आग्नेयचूर्णेन पृ (c. 10 पूरयति -यितुं).

Loaded, *p. p.* भारवान् -वती -वत् (त्), भारी -रिणी -रि (न्), सभारः -रा -रं, भाराक्रान्तः -न्ता -न्तं, भारग्रस्तः -स्ता -स्तं, अर्पितभारः -रा -रं, निवेशितभारः -रा -रं, आरोपितभारः -रा -रं, धुरीणः -णा -णं, गर्भः -र्भा -र्भं in comp.; 'loaded with powder,' चूर्णगर्भः -र्भा -र्भं, आग्नेयचूर्णपूरितः -ता -तं, दारुचूर्णपूर्णः -र्णा -र्णं; 'heavily loaded,' सुभारः -रा -रं, सुभारवान् &c., सुभारी &c., अतिभारी &c

Loader, *s.* भारवोढा *m.* (ढृ), भारदाता *m.* (तृ), भारारोपकः

L T भारार्पणं भारारोपणं —(Ca भार L लोहचुम्बकः चुम्बक चुम्बकमणिः लोह कान्त न्तं अयस्कान्त आकर्ष थिक महालोह कृष्णलोहं, द्रावकः, भ्रामरः, वैक्रान्तं.

Loaf, *s.* अपूपः, पूपः, पिण्डकः, दण्डेरकः, खोकुलः, पोलिका, आरम्भकः.—(A mass) पिण्डः.

Loam, *s.* पिच्छिलमृत्तिका, स्निग्धमृत्तिका, पङ्कवालुकापुञ्जो मृत्तिकाविशेषः पिच्छिलमृत्तिका, पङ्कः, चिक्किलः.

Loamy, *a.* पिच्छिलः -ला -लं, पिच्छिलमृत्तिकामयः -यी -यं.

Loan, *s.* (Of money) ऋणं, ऋणदानं, धनप्रयोगः, प्रयोगः, कुसीद कलान्तिः *f.* -न्तिका, निरूपितकालपर्य्यन्तं धनप्रयोगः —(Temporary use of any thing) निरूपितकालपर्य्यन्तं द्रव्यप्रयोजनं or द्रव्यप्रयोगः —(Something to be given back) प्रतिदेयं.

Loath, *a.* अनिच्छुः -च्छुः -च्छु, अनिच्छुकः -का -कं, अनिच्छन् -च्छन्ती -च्छत् (त्), विरक्तः -क्ता -क्तं, विमुखः -खा -खं, पराङ्मुखः -खा -खं विमतः -ता -तं, असम्मतः -ता -तं, अकामः -मा -मं, निष्कामः -मा -मं, निःस्पृहः -हा -हं

To loathe, *v. a.* अवमन्तं द्विष् (c. 2. द्वेष्टि -ष्टुं) or प्रद्विष्, अतिद्वेषं कृ गर्ह् (c. 1. गर्हते -र्हितुं), बाध् in des. (बीभत्सते -त्सितुं), घृण् (c. 1 घृणते -णितुं), घृणां कृ, बीभत्सां कृ.

Loathed, *p. p.* अतिद्विष्टः -ष्टा -ष्टं, गर्हितः -ता -तं, घृणितः -ता -तं

Loathful, *a.* अतिद्वेषी -षिणी -षि (न्), घृणाकारी -रिणी &c., बीभत्सकारी &c., बीभत्सः -त्सा -त्सं, बीभत्सजनकः -का -कं.

Loathing, *s.* बीभत्सः -त्सं, घृणा, गर्हा -र्हणं, अतिद्वेषः -षणं, अत्यन्तद्वेषः विकृतं, वैकृतं -त्यं, कुत्सा, विरक्तिः *f.*, निर्वेदः, न्यक्कारः.

Loathingly, *adv.* सबीभत्सं, बीभत्सपूर्व्वं, अतिद्वेषेण, घृणापूर्व्वं, कुत्सापूर्व्वं

Loathsome, *a.* बीभत्सजनकः -का -कं, घृणाजनकः -का -कं, घृणोत्पादकः -का -कं, अतिगर्हितः -ता -तं, गर्हितः -ता -तं, गर्हणीयः -या -यं गर्ह्यः -र्ह्या -र्ह्यं, कुत्सितः -ता -तं, घृणार्हः -र्हा -र्हं, द्वेष्यः -ष्या -ष्यं, अतिद्वेषणीयः -या -यं, विरक्तिजनकः &c.

Loathsomely, *adv.* गर्हितं, गर्हणीयं, अतिद्वेषणीयं, गर्ह्यप्रकारेण.

Loathsomeness, *s.* गर्ह्यता, गर्हणीयता, कुत्सितत्वं, कौत्सित्यं, घृणाजनकत्वं घृणार्हता, बीभत्सजनकता, द्वेष्यता.

Lob, lob-lock, *s.* स्थूलशरीरः, स्थूलकायः, स्थूलबुद्धिः *m.*, स्थूलजन

Lobby, *s.* सभोपशाला, सभोपगृहं, उपशाला, प्रशाला, गमनागमनशाला

Lobe, *s.* (Of the ear) कर्णलतिका, पालिका, कर्णपालिः *f.* -ली -लिका —(Of the lungs) फुप्फुसभागः, फुप्फुसलतिका.—(Of the liver) यकृद्भागः, यकृदंशः.—(Part, division) अंशः, भागः.

Lobed, *a.* पालिकाविशिष्टः -ष्टा -ष्टं, भागी -गिनी -गि (न्).

Lobster, *s.* कर्कटजातीयो दीर्घलाङ्गूलविशिष्टो मत्स्यभेदः.

Local, *a.* दैशिकः -की -कं, देश्यः -श्या -श्यं, देशी -शिनी -शि (न्), देशीयः -या -यं, स्थानिकः -की -कं, स्थानीयः -या -यं, देशस्थानिकः -की -कं, देशदेशिकः -की -कं, देश or स्थान in comp.; as, 'local usage,' देशव्यवहारः, देशाचारः; 'local law,' देशधर्म्मः.—(Relating to a place) देशसम्बन्धी -न्धिनी &c., स्थानसम्बन्धी -न्धिनी &c.—(Limited to a particular place) एकदेशिकः -की -कं, एकदेशीयः -या -यं, एकदेशी -शिनी &c, एकस्थानिकः -की -कं, विशेषदेशीयः -या -यं, विशेषस्थानिकः -की -कं.

Locality, *s.* स्थानं, देशः, प्रदेशः, स्थलं, आस्पदं, स्थानता, देशता देशसम्बन्धः, स्थानसम्बन्धः, स्थितिः *f.*

Locally, *adv.* स्थानविषये, स्थानतः, स्थानमधिकृत्य, देशमधिकृत्य, देशे

To [illegible] स्थापयति -यितुं अवस्था प्रतिष्ठा विन्यस (c. 4. -अस्यति -असितुं) निविश् [illegible] वेशयति -यितुं रुह् रोपयति -यितुं स्थापनं कृ.

L[illegible]D, p. p. स्थापितः -ता -तं, प्रतिष्ठापितः -ता -तं, अवस्थितः -ता -तं, निवेशितः -ता -तं, विनिवेशितः -ता -तं, रोपितः -ता -तं.

Location, s. (Act of placing) स्थापनं, प्रतिष्ठापनं, निवेशनं, रोपणं, विन्यासः.—(Situation) स्थानं, अवस्थानं, अवस्थितिः f., प्रतिष्ठा, प्रतिष्ठानं, स्थितिः f., साधिकारत्वं, साधिकरणं.—(In grammar) अधिकरणं, साधिकारत्वं.

Locative, s. (Case in grammar) अधिकरणं, सप्तमी विभक्तिः.

Loch, s. See Lake.

Lock, s. (Instrument for fastening doors, &c.) तालयन्त्रं, तालकं, तालः, अर्गलं, विताडः, द्वारयन्त्रं, द्वारकीलः.—(Of a gun) चूर्णाग्नि-ज्वलयन्त्रं, अग्निदयन्त्रं, अग्निजननयन्त्रं.—(Of hair) अलकः, केशपाशः -शी, जटा, शिरोरुहः, काकपक्षः; 'clotted lock of an ascetic,' जटा, सटा, शटा; 'lock left on the crown or sides of the head at tonsure,' चूडा, शिखा, शिखण्डः -ण्डकः, शिखण्डिका शिखाण्डकः, काकपक्षः, केशपाशी.—(In a river or canal) जलस्तम्भनी, जलप्रतिबन्धकं, जलबन्धनी, जलबन्धनयन्त्रं, महायन्त्रं.—(Hug) आलिङ्गनं, गाढालिङ्गनं, अङ्कग्रहः.

To lock, v. a. (Fasten with a lock) तालयन्त्रेण बन्ध् (c. 9. बध्नाति बन्द्धुं), कील् (c. 10. कीलयति -यितुं), तालकेन or अर्गलेन बन्ध्, तालबद्धं -द्धां कृ; 'lock a door,' द्वारं बन्ध् or रुध् (c. 7. रुणद्धि रोद्धुं), द्वाररोधं कृ.—(Close) पिधा (c. 3. -दधाति -धातुं), अपिधा, बन्ध्.—(Confine) रुध्, निरुध्.—(Embrace closely) गाढम् आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), गाढालिङ्गनं कृ.

To lock, v. n. (Be fastened) तालकेन बन्ध् in pass. (बध्यते) or बद्धीभू.—(Unite by mutual embrace) परस्पराश्लेषेण or परस्परालिङ्गनेन संलग्नीभू or सम्बद्धीभू, परस्परं संश्लिष्टः -ष्टा -ष्टं भू.

Locked, p. p. (Fastened by a lock) तालयन्त्रेण बद्धः -द्धा -द्धं, तालकबद्धः -द्धा -द्धं, अर्गलबद्धः &c., कीलितः -ता -तं.—(Confined) रुद्धः -द्धा -द्धं, निरुद्धः -द्धा -द्धं.—(Closely embraced) गाढालिङ्गितः -ता -तं, गाढाश्लिष्टः -ष्टा -ष्टं.

Locked-jaw, lock-jaw, s. हनुस्तम्भः, हनुग्रहः.

Locker, s. तालकयुक्तं कोष्ठकं, कोष्ठः, सम्पुटः -टकः, भाजनं.

Locket, s (Clasp, catch) कुडुपः.—(Ornament) स्वर्णालङ्कारभेदः.

Locksmith, s. तालककारः, तालककृत् m., तालयन्त्रकारी m. (न्).

Locomotion, s. (Act of moving from place to place) स्थानान्तरगमनं, स्थलान्तरगमनं, स्थानात् स्थानं गमनं, गमनागमनं, इतस्ततो गमनं or चलनं, स्थानान्तरकरणं, स्थलान्तरकरणं, स्थानान्तरं, स्थलान्तरं, रीढा.—(Power of moving from place to place) स्थानान्तरगमनशक्तिः f., चलनशक्तिः f., गमनागमनशक्तिः f.

Locomotive, a. जङ्गमः -मा -मं, चलः -ला -लं, चलनः -ना -नं, चलनशीलः -ला -लं, चलनधर्मकः -का -कं, चलनशक्तिकः -का -कं, चरः -रा -री -रं, चरिष्णुः -ष्णुः -ष्णु, सृमरः -रा -रं, गामुकः -का -कं, गतिमान् -मती -मत् (त्), गामरः -री -रं, गमनशक्तिविशिष्टः [illegible] -ष्टं, गत्वरः -रा -रं.

Locum-tenens, s. प्रतिनिधिः m., प्रतिपुरुषः, प्रतिहस्तकः.

Locus, s. (In astronomy or geometry) निधिः m.

Locust, s. शलभः, शरभः, शकुलिका, झिल्लिः m., पतङ्गः, शूककीटः.

Locution, s. उक्तिः f., वाक्यं, उक्तं, वाक् f. (च्), वाग्व्यापारः.

Lo[illegible] घातस्था घातयष्टिः [illegible] f.

L[illegible]D[illegible] S[illegible] L[illegible]DS.

Lo[illegible], s. (Tree the bark of which is used in dyeing) लोध्रः, तिल्वः, पट्टिका, पट्टी, क्रमुकः, लाक्षाप्रसादनः, गालवः, शाबरः, तिरीटः तिल्वकः, मार्जनः.

To lodge, v. a. (Furnish with a temporary habitation) वस् (c. 10. वासयति -यितुं), निवस्, वासस्थानं दा, आश्रयं दा, निरूपितकालपर्यन्तं वस्.—(Fix, set, place) स्था in caus. (स्थापयति -यितुं) न्यस् (c. 4. -अस्यति -असितुं), निधा (c. 3. -दधाति -धातुं), प्रतिधा, प्रतिनिधा, निविश् (c. 10. -वेशयति -यितुं), रुह् in caus. (रोपयति -यितुं), रुह् in caus. (रोपयति -यितुं).

To lodge, v. n. (Reside temporarily) वस् (c. 1. वसति, वस्तुं), निवस्, आवस्, प्रतिवस्, समावस्, अधिवस्, आश्रि (c. 1. -श्रयति -ते -यितुं), वासं कृ, निवासं कृ, आश्रयं कृ, निरूपितकालपर्यन्तं वस्; 'having lodged,' उषित्वा, उष्य, उष्य; 'having lodged for a night,' रात्रिम् एकाम् उषित्वा.—(Rest, remain) स्था (c. 1. तिष्ठति, स्थातुं) वृत् (c. 1. वर्त्तते -र्त्तितुं), निली (c. 4. -लीयते -लेतुं), संलग्.—(Become fixed, adhere) अनुबन्ध् (c. 9. -बध्नाति -बन्द्धुं or pass. -बध्यते) लग् (c. 1. लगति -गितुं).

Lodge, s. उटजगृहं, उटजाख्यगृहं, अप्रगृहं, उटजः, कुटीरः.

Lodged, p. p. वासितः -ता -तं, कृतवासः -सा -सं.—(Placed, fixed, deposited) स्थापितः -ता -तं, न्यस्तः -स्ता -स्तं, निहितः -ता -तं, प्रतिष्ठितः -ता -तं, अर्पितः -ता -तं, निवेशितः -ता -तं, निविष्टः -ष्टा -ष्टं, विहितः -ता -तं, निरूढः -ढा -ढं.

Lodger, s. (One who lies or boards in another's house at a settled rate) निरूपितमूल्येन परगृहे निवासी m. (न्) or भोजनशयनादिकारी m. (न्), निरूपितकालपर्यन्तं परगृहे वासी m. or वासकृत् m.

Lodging, s. वासः, निवासः, वासस्थानं, आवासः, आवासस्थानं, वसतिः f., निवसतिः f., निवेशनं, निकेतः -तनं, आयतनं, निलयः -यनं, आलयः, अवस्थानं, आवसथः, आश्रयः, संश्रयः, कृतावासः, वेश्म n. (न्), 'he asked a lodging,' आवासं प्रार्थितवान्.

Lodgment, s. (The act) स्थापनं, संस्थापनं -ना, निवेशनं, न्यासः -सनं.—(The state) स्थितिः f., अवस्थितिः f., संस्थितिः f.—(Encampment) निवेशनं, अभावासः.

Loft, s. उपरिकोष्ठः, उपरिस्थकोष्ठः, उपरिस्थः प्रकोष्ठः, अट्टः -ट्टालः.

Loftily, adv. (Haughtily) सदर्पं, सगर्वं, साटोपं, सावहेलं, सावलेपं, दर्पेण, गर्वेण, उद्धतं, औद्धत्येन.—(On high) उच्चैस्, उच्चकैस्, ऊर्द्ध्वं.

Loftiness, s. (Height) उच्चत्वं -ता, उन्नतिः f., समुन्नतिः f., उत्कर्षः, समुच्चता, तुङ्गता, उत्तुङ्गता, उच्छ्रयः, समुच्छ्रयः, उच्छ्रितिः f., उत्सेधः, समुत्सेधः, उच्चतरता, ऊर्द्धत्वं -ता, प्रोच्चता, प्रांशुता, औन्नत्यं.—(Haughtiness) उद्धतिः f., औद्धत्यं, चित्तसमुद्धतिः f., चित्तोन्नतिः f., आटोपत्वं, आटोपः, अभिमानं -निता, अवहेला, अवलेपः, अवलिप्तता, सावलेपत्वं, दर्पः, दृप्तता, गर्वः, शौटीर्यं, शौण्डीर्यं, प्रौढता, प्रगल्भता.

Lofty, a. (High) उच्चः -च्चा -च्चं, समुच्चः &c., प्रांशुः -शुः -शु, तुङ्गः -ङ्गा -ङ्गं, उत्तुङ्गः -ङ्गा -ङ्गं, उन्नतः -ता -तं, समुन्नतः -ता -तं, उच्छ्रितः -ता -तं, समुच्छ्रितः -ता -तं, अभ्युच्छ्रितः -ता -तं, उदग्रः -ग्रा -ग्रं, उदग्रः -ग्रा -ग्रं, ऊर्द्ध्वः -र्द्ध्वा -र्द्ध्वं, उत्कृष्टः -ष्टा -ष्टं, सोच्छ्रायः -या -यं, उन्नतः -ता -तं, विशालः -ला -लं, करालः -ला -लं, विलङ्घिताकाशः -शा -शं.—(Haughty) उद्धतः -ता -तं, समुद्धतः -ता -तं, गर्वोद्धतः -ता -तं, दर्पोद्धतः -ता -तं, दृप्तः -प्ता -प्तं, उन्नतचेताः -ताः -तः (स्), उच्चचेताः &c., उत्सिक्तः -क्ता -क्तं, गर्वी -र्विणी -र्वि (न्), गर्वितः -ता -तं, साटोपः -पा -पं, अवलिप्तः [illegible]

न मापयेल एरा लं. बहुद्दृष्टि -ष्टि: -ष्टि, मदोद्धतः -ता -तं, मदोद्यः -या -यं, शौण्डीरः -रा -रं, शौटीरः -रा -रं, प्रौढः -ढा -ढं.

LOG, *s.* (Shapeless or bulky piece of wood) स्थूलकाष्ठं, स्थूलदारु *n.*, काष्ठखण्डः -ण्डं, बृहत्काष्ठं, दारुखण्डः, बृहद्दारुखण्डः, काष्ठं.—(Machine for measuring the velocity of a *ship*) नौकागतिमापकयन्त्रं, परिमापककाष्ठं.

LOG-BOOK, *s.* नौकागतिविषयकं दैनिकविवरणपुस्तकं.

LOGARITHM, *s.* घातप्रमापकः, घातप्रमापकसंख्या, लाघवतारूपसंख्या, परिमाणं *n.* (न्).

LOGARITHMIC, *a.* घातप्रमापकसम्बन्धी -न्धिनी -न्धि (न्).

LOGGERHEAD, *s.* स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, मूढः, मूर्खः, जडः, जडबुद्धिः *m.*, जडमतिः *m.*, बर्बरः, बटुकः.

LOGGERHEADED, *a.* स्थूलबुद्धिः -द्धिः -द्धि, स्थूलधीः -धीः -धि, जडबुद्धिः.

LOGIC, *s.* तर्कः, तर्कविद्या, तर्कशास्त्रं, न्यायः, न्यायविद्या, न्यायशास्त्रं, विचारविद्या, ऊहः, मोहः, अभ्यूहः, निरूहः, ऊहः, वैशेषिकं, आन्वीक्षिकी, अनुमानोक्तिः *f.*, युवः. The न्याय school was instituted by the sage Gautama, the branch of it called वैशेषिकं was founded by Kaṇáda. The following are some of the terms of logic; 'universal pervadence or extension,' व्याप्तिः *f.*, अभिव्याप्तिः; 'extreme extension or conclusion unwarranted by the premises,' अतिव्याप्तिः; 'individual or particular extension,' अव्याप्तिः *f.*, अव्याप्यवृत्तिः *f.*; sign of the existence of an inherent property,' व्याप्तिलक्षणं, 'subject of an inference,' व्याप्यं. Other terms are उपलम्भहेतुः, उत्पत्त्याकांक्षा, प्रवृत्तिनिमित्तं, कैवल्यं, व्यापककोटिः *f.*, सिद्धसाधनदोषः.

LOGICAL, *a.* (Pertaining to logic) तार्किकः -की -कं, न्यायी -यिनी -यि (न्), नैयायिकः -की -कं, तर्कसम्बन्धी -न्धिनी &c., तर्कविद्यासम्बन्धी &c., तर्कविद्याविषयः -या -यं, तर्कशास्त्रविषयः &c., मोहः -हा -हं, ऊही -हिनी &c., यौक्तिकः -की -कं; 'logical conclusion,' विनिगमः, निगमनं.—(According to the rules of logic) तर्कशास्त्रसिद्धः -द्धा -द्धं, न्यायशास्त्रसिद्धः &c., युक्तिसिद्धः &c., तर्कानुसारी -रिणी &c., न्यायानुसारी &c., न्यायशास्त्रानुसारी &c., तर्कशास्त्रसम्मतः -ता -तं, न्यायशास्त्रसम्मतः -ता -तं, तर्कशास्त्रानुयायी -यिनी &c.

LOGICALLY, *adv.* न्यायतस्, यथान्यायं, तर्कानुसारेण, न्यायानुसारेण, तर्कशास्त्रानुसारेण, तर्कशास्त्रानुरूपेण, न्यायशास्त्रवत्.

LOGICIAN, *s.* तर्की *m.* (न्), तार्किकः, नैयायिकः, न्यायविद् *m.*, तर्कशास्त्रज्ञः, न्यायशास्त्रज्ञः, न्यायशास्त्रपण्डितः, न्यायशास्त्रवेत्ता *m.* (तृ), तर्कशास्त्री *m.*, (न्), न्यायशास्त्री *m.*, संवादिकः, ऊही *m.*; 'versed in the system of Gautama,' अक्षपादः, अक्षपादः, 'in that of Kanáda,' वैशेषिकः.

LOGOMACHY, *s.* वाग्युद्धं, वाक्कलहः -हं.—(Dispute about words) शब्दवादः, शब्दविवादः, शब्दयुद्धं.

LOGWOOD, *s.* (A kind of wood used in dyeing) पत्तङ्गः.

LOIN, *s.* श्रोणिः -णी *f.*, कटिः -टी *f.*, कटिदेशः, श्रोणिदेशः, श्रोणिफलकं, श्रोणितटं, कटीतटं, कटितटं, नितम्बः, जघनं, ककुद्मती, कलत्रं, प्रोथः, कटः, कटिशीर्षकं; 'girding the loins,' कटिबन्धनं; 'having the loins girded,' बद्धकटिः -टिः -टि; 'the cavities of the loins,' कुकुन्दरे *n.* du., ककुन्दरे *n.* du., कटीरे *n.* du., कटीरः, कटः; 'girdle worn round the loins,' कटिसूत्रं, कटिशृङ्खला, श्रोणिबिम्बं; 'sprung from one's loins,' अङ्गजः -जा -जं, अङ्गजातः -ता -तं.

To LOITER, *v. n.* विलम्ब् (c. 1. -लम्बते -म्बितुं), मन्दाय (nom. मन्दायते), विलम्बनं कृ, विलम्बं कृ, कालं क्षिप् (c. 6. क्षिपति, क्षेप्तुं), कालक्षेपं कृ, अवस्था (c. 1. -तिष्ठति -स्थातुं), चिर (nom. चिरयति, चिरायति) चिरं or चिरकालं स्था or अवस्था, मन्दं मन्दं चल् (c. 1. चलति -लितुं) or चर् (c. 1. चरति -रितुं), विलम्बेन गम् (c. 1. गच्छति, गन्तुं).

LOITERER, *s.* विलम्बी *m.* (न्), विलम्बकारी *m.*, विलम्बगतिः *m.*, विलम्बगामी *m.* (न्), मन्दगामी *m.*, मन्दगतिः *m.*, कालक्षेपकः.

LOITERING, *part.* मन्दायमानः -ना -नं, मन्दयमानः -ना -नं, विलम्बी -म्बिनी -म्बि (न्), विलम्बगामी -मिनी &c., चिरायमाणः -णा -णं.

LOITERING, *s.* विलम्बनं, विलम्बगमनं, मन्दगमनं, कालक्षेपः

To LOLL, *v. n.* (Recline lazily) आलस्येन शी (c. 2. शेते, शयितुं) or अवलम्ब् (c. 1. -लम्बते -म्बितुं) or संविश् (c. 6. -विशति -वेष्टुं), सुखेन शी or अवलम्ब्.—(Loll the tongue) जिह्वां लल् or लड् (c. 1. ललति, लडति, c. 10. लालयति, लडयति -यितुं), जिह्वाललनं कृ जिह्वां बहिष्कृ, 'one who lolls the tongue,' ललज्जिह्वः -ह्वा -ह्वं.

LOLLING, *s.* (Of the tongue) ललनं, जिह्वाललनं.—(Lolling and languishing as indicative of passion) लालित्यं, ललितं, लालनं

LONE, LONELY, *a.* (Solitary, unfrequented) निर्जनः -ना -नं, विजनः -ना -नं, विलोकः -का -कं, निर्मनुजः -जा -जं, निर्मनुष्यः -ष्या -ष्यं, एकान्तः -ना -न्तं, विविक्तः -क्ता -क्तं, निभृतः -ता -तं, जनानाकीर्णः -र्णा -र्णं, जनैरनाकीर्णः &c., निःशलाकः -का -कं, निश्शलाकः &c., न्यूनसञ्चारः -रा -रं, हीनसञ्चारः -रा -रं; 'a lonely place,' निर्जनस्थानं.—(Single, standing by itself) एकाकी -किनी -कि (न्), एकः -का -कं, असहायः -या -यं, असङ्गः -ङ्गा -ङ्गं, केवलः -ला -लं, केवली -लिनी &c.—(Fond of solitude) विविक्तप्रियः -या -यं, विविक्तसेवी -विनी &c., एकान्तप्रियः -या -यं, एकान्तसेवी &c.

LONELINESS, *s.* (Solitude, retirement) निर्जनता, विजनता, विविक्तता, विविक्तं, निर्मनुष्यता, निभृतता, एकान्तत्वं, निःशलाकता, सञ्चारहीनता, सञ्चारन्यूनता, एकाकिता -त्वं, असहायता, असङ्गता.—(Love of retirement) विविक्तसेवा, विविक्तप्रीतिः *f.*, विविक्तरुचिः *f.*, एकान्तप्रीतिः *f.*

LONESOME, *a.* निर्जनः -ना -नं, विजनः -ना -नं, दारुणः -णा -णं, निरानन्दः -न्दा -न्दं; 'a lonesome road,' प्रान्तरं.

LONESOMENESS, *s.* निर्जनता, विजनता, विविक्तता, निरानन्दता, दारुणता.

LONG, *a.* (In time or space) दीर्घः -र्घा -र्घं, द्राघिमवान् -वती -वत् (त्), आयतः -ता -तं, आयामी -मिनी -मि (न्), आयामवान् -वती &c., व्यायतः -ता -तं, आयतिमान् -मती &c., लम्बः -म्बा -म्बं, चिर in comp., this last is restricted to time. (Long in extent or size) दीर्घपरिमाणः -णा -णं, दीर्घाकारः -रा -रं, दीर्घाकृतिः -तिः -ति, दीर्घतनुः -नुः -नु.—(Extended) आयतः -ता -तं, समायतः -ता -तं, आयामितः -ता -तं, विस्तीर्णः -र्णा -र्णं, वितृतः -ता -तं, प्रसृतः -ता -तं.—(Tedious, dilatory) दीर्घसूत्रः -त्रा -त्रं, चिरकारी -रिणी &c., चिरक्रियः -या -यं, विलम्बकारी &c., विलम्बी -म्बिनी &c., दीर्घसूत्री -त्रिणी &c., मन्थरः -रा -रं.—(Continuing for a long time) दीर्घकालीनः -ना -नं, चिरकालीनः -ना -नं, दीर्घकालिकः -की -कं, चिरकालिकः &c., चिरस्थः -स्था -स्थं, चिरस्थायी -यिनी &c., चिरस्थितः -ता -तं, चिरन्तनः -नी -नं, चिरत्नः -त्नी -त्नं, दीर्घकालस्थायी -यिनी &c., चिरकालस्थायी -यिनी &c.—(Long, in the sense of distant) दूरः -रा -रं, विदूरः -रा -रं; 'going a long way,' दूरगः -गा -गं; 'a long way off,' दूरस्थः -स्था -स्थं, दूरस्थायी -यिनी &c.—(Extended to any measure) expressed by परिमाणः -णा -णं or परिमितः -ता -तं or मितः -ता -तं in comp.; as, 'a line an inch long,' अङ्गुलपरिमाणा or अङ्गुलपरिमिता or

सङ्कुलमिता रखा fing ng चतुरङ्गुल ली लं चतुर ङ्गुलपरिमित ता तं —(A p od) दीर्घकाल चिरकाल बहुकाल अनेककाल आयताथति f a ng m दीर्घकालं, चिरकालं, बहुकालं लात्, ... चिरं रेण रात् राय, चिरदिवसं, चिररात्रं -त्राय, दीर्घरात्रं, 'long absent,' चिरगतः ता तं, चिरप्रवासी -सिनी &c., 'long ill,' दीर्घरोगी -गिणी &c., दीर्घामयः -या -यं, चिररोगी &c ; 'long sought for,' चिरचेष्टितः ता तं, 'cherished for a long time,' चिरकालपालितः -ता -तं, चिरपालितः &c , 'accumulated after a long time,' चिरकालोपार्जितः -ता -तं, चिरलब्धः -ब्धा -ब्धं; 'living long,' दीर्घजीवी विनी &c., चिरजीवी &c.; 'a long life,' दीर्घजीवः; 'long since abandoned,' चिरोज्झितः -ता -तं, 'for a short time,' अल्पकालं, अल्पमात्रं, कियत्कालं, 'lasting for a short time,' क्षणस्थायी -यिनी &c , 'the long run,' आयतिः f., 'long-haired,' दीर्घकेशः -शी -शं; 'long-leaved,' दीर्घपत्रः -त्रा -त्रं, दीर्घपर्णः -र्णा र्णं 'long-tongued,' दीर्घजिह्वः -ह्वा -ह्वं, दीर्घरसनः -ना -नं, 'having a long line of ancestors,' दीर्घवंशः -शा -शं, 'a long journey,' दीर्घवर्त्म n. (न्), दीर्घाध्व n. (न्), 'a long vowel,' दीर्घस्वरः, 'the long sound of vowels, प्लवः, प्लुतः -तं, 'long syllable,' दीर्घाक्षरं, द्वारः

[Lo]ng, *adv.* (To a great extent in space) दूरं, विदूरं, दूरतस्, दूरपर्यन्तं दीर्घपर्यन्तं, दीर्घपरिमाणं -णेन.—(To a great extent in time, for a long period) दीर्घकालं, चिरकालं -लात्, बहुकालं लात्, अनेककालं, चिरं -रेण -राय -रात् -रस्य -रे, चिरदिवसं, चिररात्रं -त्राय, दीर्घरात्रं -त्राय, बहुकालपर्य्यन्तं, दीर्घकालपर्य्यन्तं; 'very long,' सुचिरं -रेण -रात्, 'how long?' कियत्कालं, कियन्तं कालं, कियता कालेन, कियत्कालपर्य्यन्तं, कियत्कालं यावत्, कतिकालं, 'how long?' कियच्चिरं -रेण -रात्, 'ere long,' अचिरेण -रात्; 'long ago,' प्रागेव, प्राक्काले, पूर्व्वं, पूर्व्वकाले, अतीतदीर्घकाले, गतदीर्घकाले, व्यवहितपूर्व्वकाले, 'not long ago,' अव्यवहितपूर्व्वकाले, 'as long,' यत्कालं, यावत्कालं, यत्क्षणं; 'so long,' तत्कालं, तावत्कालं, तत्क्षणं —(Through the whole extent or duration of) पर्य्यन्तं affixed, आ prefixed, यावत्: as, 'the whole year long,' वर्षपर्य्यन्तं, आवर्षान्तात्; 'whole life, as long as one lives,' यावज्जीवं, आमरणात्, मरणं यावत्; 'long-absent, long-ill, long-sought, &c' *See* under Long, *a.*

To long, *v. n.* (Desire eagerly) अत्यन्तम् अभिलष् (c. 1. -लषति, c. 4. -लष्यति -लषितुं) or वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं) or अभिवाञ्छ् or कांक्ष् (c. 1. कांक्षति -क्षितुं) or आकांक्ष् or अभिकांक्ष् or अनुकांक्ष्, अतिशयेन स्पृह् (c. 10. स्पृहयति -यितुं) or इष् (c. 6. इच्छति, एषितुं) or आप् in des. (ईप्सति -प्सितुं) or अवाप् or पर्य्याप् or लभ् in des. (लिप्सते -प्सितुं) or अभिलभ् or अभिरुच् (c. 10. -रोचयति -यितुं) or कम् (c. 10. कामयते -यितुं) or ईह् (c. 1. ईहते -हितुं) or समीह्, लुभ् (c. 4. लुभ्यति, लोब्धुं), गृध् (c. 4. गृध्यति, गर्धितुं), भुज् in des (बुभुक्षति -ते -क्षितुं), तृष् (c. 4. तृष्यति, तर्षितुं), आशंस् (c. 1. -शंसते -सितुं), आशास् (c. 2. -शास्ते, c. 1. -शासते -सितुं), अभिध्यानं कृ. —(As a pregnant woman) दौहृदं कृ, दोहदवती भू, दौहृदिनी भू.

Longanimity, *s.* सहनशीलता, चिरसहिष्णुता, क्षमा, क्षान्तिः *f.*

Long-armed, *a.* दीर्घबाहुः -हुः -हु, दीर्घभुजः -जा -जं, लम्बहस्तः -स्ता -स्तं.

Long-bellied, *a.* लम्बोदरः -रा -रं, लम्बजठरः -रा -रं, दीर्घोदरः -रा -रं.

[Long-boat], *s.* दीर्घनौका, बृहन्नौका, महानौका, जलनौका

Long-c[lawed], *a.* चिरनख[ः] [-खा] [-खं] ... [-खः -खा -खं]

L[ong-continued] ... चिरस्थितः -ता -तं, चिरकालस्थायी -यिनी -यि (न्)

Long-eared, *a.* लम्बकर्णः -र्णा -र्णं, दीर्घकर्णः -र्णा -र्णं, आयतकर्णः -र्णा -र्णं

L[ong-eyed] ... आयताक्षः -क्षी -क्षं, आयतनेत्रः -त्री -त्रं, दीर्घनयनः -नी -नं

Long-faced, *a.* दीर्घमुखः -खी -खं, दीर्घवक्त्रः -क्त्रा -क्त्रं, दीर्घाननः -ना -नं

LURE, s. (For hawks) श्येनामिषं.—(Any thing which entices, allurement) प्रलोभनं, विलोभनं, आकर्षणं, आकृष्टिः f, आमिषं, लोभः, आमिषदर्शनं.

To LURE, v. a (Call hawks by holding out a bait) आमिषदर्शनेन श्येनादीन् आकृष् (c. 1. -कर्षति -क्रष्टुं), आमिषं दर्शयित्वा श्येनान् आह्वे (c. 1 -ह्वयति -ह्वातुं) or श्येनाह्वानं कृ.—(Allure) प्रलुभ् (c. 10. -लोभयति -यितुं), लुभ्, आकृष्, मुह् (c. 10. मोहयति -यितुं), लल् (c. 10. लालयति -यितुं).

LURED, p. p. आकृष्टः -ष्टा -ष्टं, प्रलोभितः -ता -तं, लालितः -ता -तं.

LURID, a मलिनमुखः -खा -खी -खं, मलिनप्रभः -भा -भं, मलिनः -ना -नं, मलिनतेजाः -जाः -जः (स्), तमोवृतः -ता -तं, उग्रदर्शनः -ना -नं, घोररूपः -पा -पं, दुर्निरीक्ष्यः -क्ष्या -क्ष्यं.

To LURK, v. n निभृते or निभृतं or सुनिभृतं or प्रच्छन्नं स्था (c. 1 तिष्ठति, स्थातुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं), गुप्तः -प्ता -प्तं वृत् or भू, गुप् in pass. (गुप्यते).

LURKER, s. निभृतवर्त्ती m. (न्), प्रच्छन्नस्थायी m. (न्), निभृते स्थायी m.

LURKING-PLACE, s. गुप्तिः f., गुप्तिस्थानं, गोपनस्थानं, निभृतस्थानं, गूढस्थानं.

LUSCIOUS, a. अतिमधुरः -रा -रं, अतिमिष्टः -ष्टा -ष्टं, अतिस्वादुः -दुः -द्वी -दु, स्वादिष्टः -ष्टा -ष्टं, सुमधुरः -रा -रं, सुस्वादुः &c., मधुमयः -यी -यं, मधुमान् -मती -मत् (त्) अतितृप्तिजनकः -का -कं, अतितुष्टिजनकः -का -कं.

LUSCIOUSLY, adv. अतिमधुरं, अतिमिष्टं, अतिमाधुर्य्येण, सुमधुरं.

LUSCIOUSNESS, s. अतिमाधुर्य्यं, सुमाधुर्य्यं, अतिमधुरता, अतिमिष्टता, अतिस्वादुता, माधुर्य्यं, तृप्तिजनकत्वं.

LUSORY, a. विनोदी -दिनी -दि (न्), सविनोदः -दा -दं, लीलायितः -ता -तं, सलीलः -ला -लं, लीलाखेलः -ला -लं, सकौतुकः -का -कं, क्रीडा in comp.

LUST, s. (Carnal desire) कामः, कामिता, कामुकत्वं, कामना, कामाग्निः m., कामानलः, रत्यर्थित्वं, मैथुनार्थित्वं, मैथुनेच्छा, मदनः, मदनेच्छा, रत्यभिलाषः, रमणेच्छा, विषयाभिलाषः.—(Eager desire) लालसा, अत्यभिलाषः, अतिस्पृहा, अतिशयेच्छा, अतीच्छा, लोभः, अतिलोभः, वाञ्छा, आकांक्षा, कांक्षा, लिप्सा, तृष्णा, अतिलिप्सा.—(Depraved affections) दुष्टवासना, दुर्वासना, कुवासना, असद्वासना. 'inflamed with lust,' कामाग्निसन्दीप्तः -प्ता -प्तं.

To LUST, v. n. (Have carnal desire) कामार्त्तः -र्त्ता -र्त्तं भू, कामुकः -का -कं भू, रत्यर्थी -र्थिनी -र्थि भू, मैथुनार्थी &c. भू, मैथुनाभिलाषी -षिणी -षि भू, मैथुनम् अभिलष् (c. 1. -लषति -षितुं), कम् (c. 10. कामयते -यितुं), अभिकम्, विषयाभिलाषी भू; 'to lust after a woman,' कामतः स्त्रीसङ्गम् अभिलष्.—(Desire eagerly) अत्यन्तम् अभिलष् or इष् (c. 6. इच्छति, एषितुं) or वाञ्छ् (c. 1. वाञ्छति -छितुं) or अभिवाञ्छ्, अतिशयेन स्पृह् (c. 10. स्पृहयति -यितुं) or कांक्ष् (c. 1 कांक्षति -क्षितुं) or आकांक्ष् or अभिकांक्ष् or लभ् in des. (लिप्सते -प्सितुं), लुभ् (c. 4. लुभ्यति, लोब्धुं).

LUSTFUL, a. कामुकः -का -कं, कामी -मिनी -मि (न्), कामवृत्तिः -त्तिः -त्ति, कामपरवशः -शा -शं, कामासक्तः -क्ता -क्तं, सकामः -मा -मं, कामनः -ना -नं, कमनः -ना -नं, कमः -मा -मं, कमिता -त्री -तृ (तृ), कामयिता &c., रत्यर्थी -र्थिनी &c., मैथुनार्थी &c., सुरतार्थी &c., मैथुनाभिलाषी -षिणी &c., सम्भोगाभिलाषी &c., रत्यभिलाषी &c., मैथुनेच्छुः -च्छुः -च्छु, व्यवायी -यिनी &c., अनुकः -का -कं, अभीकः -का -कं, अभिकः -का -कं, लाघुकः -का -कं, अभिलाषुकः -का -कं, व्यवायपरायणः -णा -णं, लम्पटः, स्त्रीलम्पटः, स्त्रीव्यसनी m. (न्), स्त्रीसङ्गाभिलाषी &c., स्त्रीसम्भोगाभिलाषी, स्त्रीरतः, स्त्रीपरः.—(Under the influence of lust) कामार्त्तः -र्त्ता -र्त्तं, कामातुरः -रा -रं, कामान्धः -न्धा -न्धं, कामान्वितः -ता -तं, कामाविष्टः -ष्टा -ष्टं, कामग्रस्तः -स्ता -स्तं, कामाधीनः -ना -नं, कामयुक्तः -क्ता -क्तं, कामाक्रान्तः -न्ता -न्तं, कामजितः -ता -तं, जातकामः -मा -मं, कामोपहतः -ता -तं.

LUSTFULLY, adv. सकामं, कामुकवत्, कामपूर्व्वं, कामतस्, लम्पटवत्.

LUSTFULNESS, s कामुकत्वं -ता, कामिता, सकामता, रत्यर्थित्वं, मैथुनार्थित्वं.

LUSTILY, adv. बलवत्, महाबलेन, सवीर्य्यं, ससत्त्वं, वीर्य्येण, मांसलवत्, हृष्टपुष्टवत्, तेजसा, पौरुषेण, सपौरुषं.

LUSTINESS, s. बलवत्त्वं, सबलता, मांसलता, दृढाङ्गता, शरीरदृढता, ससत्त्वता, वीर्य्यवत्त्वं, वीर्य्यं, सत्त्वं, अंसलता, पृथुशरीरता, पक्वदेहत्वं, व्यूढोरस्कत्वं, शरीरपृथुता, हृष्टपुष्टता.

LUSTRAL, a. शुद्धिकरः -रा -रं, शुचिकरः -रा -रं, शोधकः -का -कं, पावकः -का -कं, पावनः -ना -नं, 'lustral water,' शान्त्युदं -दकं, पावनोदकं, पावनं; 'vessel containing it,' शान्त्युदकुम्भः.

To LUSTRATE, v. a शुध् (c. 10 शोधयति -यितुं), परिशुध्, विशुध्, पू (c. 9. पुनाति, पवितुं), परिपू, विपू, पवित्रीकृ, शोधनं कृ.

LUSTRATION, s. शुद्धिकरणं, शोधनं, शुचिकरणं, शुद्धिः f., पावनं, पवित्रीकरणं, मलापकर्षणं; 'lustration of arms, a ceremony performed by a king before taking the field,' लोहाभिहारः, लोहाभिसारः, नीराजनं -ना.

LUSTRE, s. तेजस् n., द्युतिः f., प्रभा, शोभा, रुचिः f., ओजस् n., ओजस्विता, प्रतापः, बृहद्युतिः f., उज्ज्वलता, उद्द्योतः, छविः f., कान्तिः f., दीप्तिः f., रुच् f. (च्), भास् f., प्रकाशः -शनं, राढा, 'of metal or a gem,' ओजस् n., तेजस् n.

LUSTROUS, a. तेजस्वी -स्विनी -स्वि (न्), सुप्रभः -भा -भं, कान्तिमान् -मती -मत् (त्), द्युतिमान् &c., दीप्तिमान् &c., ओजस्वी &c., प्रतापी -पिनी &c., प्रतापवान् &c., शोभनः -ना -नं, प्रभावान् &c., उज्ज्वलः -ला -लं.

LUSTRUM, s. युगं, वर्षपञ्चकं, वत्सरपञ्चकं, अब्दपञ्चकं.

LUSTY, a मांसलः -ला -लं, दृढाङ्गः -ङ्गा -ङ्गं, दृढशरीरः -रा -रं, पृथुशरीरः -रा -रं, बलवान् -वती -वत् (त्), महाबलः -ला -लं, महाबाहुः -हुः -हु, अंसलः -ला -लं, मांसलः -ला -लं, पक्वदेहः -हा -हं, व्यूढोरस्कः -स्का -स्कं, महाकायः -या -यं, स्थूलशरीरः -रा -रं मेदस्वी -स्विनी -स्वि (न्), वीर्य्यवान् -वती &c., सवीर्य्यः -र्य्या -र्य्यं, ससत्त्वः -त्त्वा -त्त्वं, हृष्टपुष्टः -ष्टा -ष्टं, बृहदङ्गः -ङ्गा -ङ्गं, बृहच्छरीरः &c.

LUTANIST, s. वैणिकः, वीणावादः -दकः, वीणावादी m.

LUTANOUS, a (Living in mud) पङ्कस्थः -स्था -स्थं, कर्द्दमस्थः -स्था -स्थं.

पङ्कवासी -सिनी &c. पङ्कज -जा -जं. P rt. n ng पङ्किल -ला -लं पङ्की ङ्किनी &c. कार्दम -मी -मं O u m d पङ्कवर्णी -र्णा -र्णं

L F वीणा, वल्लकी, विपञ्ची -ञ्चिका, तन्त्री m. (न्), कुट्टी, षड्गुणः, सारङ्गी, शारङ्गी, पिनाकी; 'with seven strings,' परिवादिनी. 'the wire of a lute,' तन्त्री, तन्त्रं; 'the neck,' वीणादण्डः, प्रवालः, 'a piece of wood under the neck called the belly,' ककुभः, प्रसेवकः; 'the tie,' उपनाहः, वीणानुबन्धः, निबन्धनं; 'the whole body of the lute, comprising the gourd, neck, and belly,' कोलम्बकः; 'the quill or bow,' कोणः, परिवादः, शारिका, दण्डः.

To LUTE, *v. a.* पङ्केन लिप् (c. 6. लिम्पति, लेप्तुं), पङ्कलेपेन संलग्नीकृ.

LUTER, LUTIST, *s.* वीणावादः -दकः. *See* LUTANIST.

LUTE-STRING, *s.* वीणातन्त्वं, तन्त्री, वीणातारः -रा.

LUTULENT, *a.* पङ्किलः -ला -लं, पङ्की -ङ्किनी -ङ्कि (न्), कार्दमः -मी -मं.

To LUXATE, *v. a.* विसन्धीकृ, सन्धिचोटनं कृ, अस्थिसन्धिं or सन्धिग्रन्थिं चुट् (c. 10. चोटयति -यितुं) or विसन्धा (c. 3. -दधाति -धातुं) or भञ्ज् (c. 7. भनक्ति, भंक्तुं), सन्धिभङ्गं कृ, सन्धिविश्लेषं कृ, सन्धिच्युतिं कृ.

LUXATED, *p. p.* विसन्धितः -ता -तं, त्रुटितसन्धिः -न्धिः -न्धि, च्युतसन्धिः &c., सन्धिच्युतः -ता -तं, सन्धिविश्लिष्टः -ष्टा -ष्टं, स्थानभ्रष्टः -ष्टा -ष्टं.

LUXATION, *s.* सन्धिचोटनं, सन्धिविश्लेषः, सन्धिच्युतिः *f.*, विसन्धीकरणं.

LUXURIANCE, LUXURIANCY, *s.* अतिवृद्धिः *f.*, अधिकवृद्धिः *f.*, अतिवर्धनं, अत्यन्तवर्धनं, विशालवृद्धिः *f.*, वृद्धिबाहुल्यं, समृद्धिः *f.*, सामृद्ध्यं, वृद्ध्याधिक्यं, अतिस्फीतिः *f.*, अतिस्फातिः *f.*, उद्रेकः, उत्सेकः, आप्यायनं.

LUXURIANT, *a.* अतिवर्धिष्णुः -ष्णुः -ष्णु, अतिवर्धमानः -ना -नं, अतिवर्धितः -ता -तं, अतिवर्धी -र्धिनी -र्धि (न्), अतिवर्धनः -नी -नं, अतिस्फीतः -ता -तं, अतिपीनः -ना -नं, अतिसमृद्धः -द्धा -द्धं, अतिपुष्कलः -ला -लं, अतिबहुलः -ला -लं, अतिप्रचुरः -रा -रं, अतिसिक्तः -क्ता -क्तं, उद्रिक्तः -क्ता -क्तं, अतिरिक्तः -क्ता -क्तं.

LUXURIANTLY, *adv.* अतिवृद्ध्या, अतिवृद्धिपूर्वं, बाहुल्येन, अतिबहुलं, अतिबहुशस्, अतिप्रचुरं, अतिप्राचुर्येण, अतिपुष्कलं, अतिरिक्तं, उद्रेकेण.

To LUXURIATE, *v. n.* (Grow exuberantly) अत्यर्थं वृध् (c. 1. वर्धते -र्धितुं) or ऋध् (c. 5. ऋध्नोति, c. 4. ऋध्यति, अर्धितुं) or समृध् or प्यै (c. 1. प्यायते, प्यातुं) or आप्यै or स्फाय् (c. 1. स्फायते -यितुं), अतिबहुलीभू, अतिप्रचुरीभू, अतिवृद्धिम् इ (c. 2. एति -तुं), अतिस्फीतिम् इ. —(Live or feed luxuriously) अतिविलासेन or अतिसुखेन or सुखोपभोगेन वृत् (c. 1. वर्त्तते -र्त्तितुं) or चर् (c. 1. चरति -रितुं) or विहृ (c. 1. -हरति -हर्तुं) or भ्रम् (c. 4. भ्राम्यति, भ्रमितुं).

LUXURIOUS, *a.* (Contributing to luxury, furnished with luxuries) सुखभोगवान् -वती -वत् (त्), सुखभोगकरः -री -रं, सुखभोगावहः -हा -हं, अतिसुखावहः -हा -हं, अतिसुखी -खिनी -खि (न्), सुखभोगसाधकः -का -कं, सुखभोगमयः -यी -यं, अतिसुखमयः &c., सुखोपभोगदः -दा -दं, सविलासः -सा -सं, विलासी -सिनी &c., विलासमयः &c., विलासयुक्तः -क्ता -क्तं, विलाससुखमयः &c. —(Indulging in luxury) विलासी -सिनी &c., विलासासक्तः -क्ता -क्तं, भोगासक्तः -क्ता -क्तं, सुखभोगासक्तः &c., सुखभोगपरायणः -णा -णं, विषयासक्तः -क्ता -क्तं, विषयोपभोगपरः -रा -रं, वैषयिकः -की -कं, देहम्भरः -रा -रं, आत्मम्भरिः -रिः -रि, विषयोपसेवी -विनी &c., सुखसेवी &c.

LUXURIOUSLY, *adv.* विलासेन, सुखेन, अतिसुखेन, अतिविलासपूर्वं, सविलासं, सुखोपभोगेन, सुखोपभोगपूर्वं, सुखासक्तवत्, परमोपभोगेन.

LUXURIOUSNESS, *s.* विलासित्वं -ता, सविलासत्वं, सुखोपभोगः, सुखभोगः, अतिसुखिता, सुखासक्तिः *f.*, सुखभोगासक्तिः *f.*, भोगासक्तिः *f.*, विषयभोगासक्तिः, विषयभोगः, विषयसेवा, विषयोपसेवा, सुखसेवा, सुखासक्ता.

L R विलासः, विलासित्वं &c. *See* LUXURIOUSNESS. (That which gratifies the senses or appetite) सुखं, सुखसाधनं, भोगः, भोगसाधनं, सौख्यं, सुखसाहित्यं, विषयसुखं, विषयसुखसाहित्यं, आमिषं. —(Dainty) स्वाद्वन्नं, पक्वान्नं, विशिष्टान्नं, उत्तमान्नं, मिष्टान्नं, भोजनविशेषः, विशिष्टभोजनं, विशिष्टामिषं.

LYE, *s.* क्षारोदकं, क्षारजलं, क्षारितजलं, क्षारसंसृष्टं जलं.

LYING, *part.* (Reclining) शायी -यिनी -यि (न्), शयः -या -यं, शयानः -ना -नं, शयितः -ता -तं, पतन् -तन्ती -तत् (त्), पतितः -ता -तं, संविष्टः -ष्टा -ष्टं, उपविष्टः -ष्टा -ष्टं; 'lying on a bed,' शयने संविष्टः -ष्टा -ष्टं; 'lying prostrate,' अवमूर्धशयः -या -यं, क्षितिदेहः -हा -हं; 'lying with the face upwards,' उत्तानशयः -या -यं. —(Act of lying) शयनं, पतनं, संवेशः. —(Lying in) प्रसवकालः, प्रसवावस्था, सूतिकालः, प्रसूतिकालः; 'lying-in chamber,' सूतिकागृहं, सूतिगृहं, सूतिकाभवनं, सूतिगृहं, सूतीगृहं, अरिष्टशय्या, अरिष्टं, गर्भः, अपवरकः.

LYING, *s.* (Telling falsehood) मृषावादः, मिथ्यावादः, मिथ्याभाषणं, मिथ्याकथनं, असत्यभाषणं, मृषाभाषिता -षणं, मृषाभिधानं, मिथ्योक्तिः *f.*, असत्योक्तिः *f.*, अनृतवादः.

LYING, *part.* or *a.* (Addicted to falsehood) मिथ्यावादी -दिनी -दि (न्), मृषावादी &c., असत्यवादी &c., अनृतवादी &c., असत्यभाषी -षिणी &c., अनृतभाषी &c., अनृतवाक् *m. f. n.* (च्), असत्यः -त्या -त्यं, निःसत्यः -त्या -त्यं.

LYMPH, *s.* मेदस् *n.*, वसा, चर्म्माम्भस् *n.*, त्वगम्भस् *n.*, त्वगुदकं, चर्म्मोदकं, चर्म्मसारः, त्वक्सारः, असृक्करः, उदकधातुः *m.*

LYMPHATE, LYMPHATED, *a.* उन्मत्तः -त्ता -त्तं, वातुलः -ला -लं.

LYMPHATIC, *s.* मेदोवहं, मेदोवाहिनी, चर्म्माम्भोवाहिनी, त्वक्सारवाहिनी, शरीरान्तर्गतजलवाहिनी.

LYNX, *s.* वनविडालः, वनमार्जारः, सूक्ष्मदृष्टिः क्षुद्रप्राणिविशेषः.

LYRE, *s.* वल्लकी, वीणा, विपञ्ची -ञ्चिका, तन्त्री. *See* LUTE.

LYRIC, LYRICAL, *a.* वैणिकः -की -कं, वीणावादनसहितः -ता -तं.

LYRIST, *s.* वल्लकीवादकः, वल्लकीपाणिः *m.*, वैणिकः.

LYTHRUM, *s.* (A plant) अग्निज्वाला, सुभिक्षा, धातकी, धातुपुष्पिका.

M

MACAROON, *s.* बादामनिर्म्मितः मिष्टपिष्टकविशेषः.

MACAW, MACAO, *s.* शुकः, कीरः, वक्रचञ्चुः *m.*, रक्ततुण्डः.

MACE, *s.* (Club, ensign of authority) वेत्रं, गदा, यष्टिः *m. f.*, यष्टिका, दण्डः -ण्डं, मुषलः, मुसलः, लगुडः, लगुरः, मुद्गरः, वातशिः *m.* —(The spice) जातीकोशं, जातिकोशं, जातीकोषं, जातिकोषं, जातिः -ती *f.*, जातिफलं, जातीफलं, फलं, जातीपत्री, जातिपत्रं, जातिपुष्पं, गुडत्वचं, राजभोग्यं.

MACE BEARER, *s.* वेत्रधरः, वेत्रधारी *m.* (न्), वेत्री *m.* (न्), वेत्रपाणिः *m.*, गदाधरः, गदी *m.* (न्), गदापाणिः *m.*, गदाहस्तः, दण्डधरः, दण्डी *m.* (न्), यष्टिहस्तः, लगुडहस्तः, दण्डधारी *m.*, दण्डिकः, दण्डभृत् *m.*, यष्टिग्रहः, याष्टीकः.

To MACERATE, *v. a.* (Make lean, waste) कृश (nom. कृशयति -यितुं), कृशीकृ, परिकृशीकृ, क्षि in caus. (क्षपयति -यितुं), क्षीणं -णां -णं कृ, क्षीणीकृ, ग्लै in caus. (ग्लपयति -यितुं), मांसक्षयं कृ. —(Steep) जलसेकेन or जलप्लावनेन कोमलीकृ, चिरकालं जलेन समाप्लु (c. 10. -प्लावयति -यितुं) or जलसमाप्लुतं -तां कृ or जलसिक्तं -क्तां कृ or आर्द्रीकृ, 'macerate indigo,' नीलसन्धानं कृ, नीलपचनं कृ.

Macerated, *p.p.* (Made lean) कृशीकृतः -ता -तं, परिकृशः -शा -शं, क्षीणः -णा -णं.—(Steeped) जलसेकेन कोमलीकृतः -ता -तं or मृदूकृतः -ता -तं.

Maceration, *s.* (Making thin, mortification) कृशीकरणं, क्षीणकरणं, कर्शनं, क्लेशकरणं, क्लेशदानं, मांसक्षयः, मांसशोषणं, शरीरपाकः, शरीरशोषः, कायक्लेशः, क्लेशः, कायकृच्छ्रं.—(*Steeping*) जलसेकेन कोमलीकरणं, आर्द्रीकरणं; 'of indigo,' नीलसन्धानं, नीलधावनं

To machinate, *v. a.* परिक्लृप् (c. 10. -कल्पयति -यितुं), उपायं क्लृप् or घट् (c. 1. घटते -टितुं) or विधा (c. 3. -दधाति -धातुं) or अनुसन्धा or संविधा, मन्त्र् (c. 10. मन्त्रयति -यितुं), सन्धृ (c. 10. -धारयति -यितुं), कल्पनां कृ, परिकल्पनां कृ, अनुसन्धानं कृ.—(Plot) द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं), कपटप्रबन्धं कृ, कपटप्रबन्धेन द्रोहं कृ

Machination, *s.* कल्पना, परिकल्पना -नं, कुमतिः *f.*, मन्त्रणा, कुकल्पना, कुमन्त्रणा, कुयुक्तिः *f.*, कुप्रयुक्तिः *f.*, कुसृष्टिः *f.*, कुसङ्कल्पः, कपटप्रयोगः, कपटप्रबन्धः, घटनं -ना, कुघटना, विधानं, संविधानं, अनुसन्धानं, दुष्कार्य्यसाधनार्थम् उपायचिन्तनं, द्रोहचिन्तनं; 'against the king,' राजद्रोहः, राजशरीराभिद्रोहः.

Machinator, *s.* परिकल्पकः, परिकल्पनाकृत् *m.*, कुमन्त्रणाकृत्, कुकल्पनाकारी *m.* (न्), घटकः, उपायचिन्तकः, द्रोहचिन्तकः.

Machine, *s.* यन्त्रं, उपकरणं, चिलाल्लः, साधनं, साधनयन्त्रं.

Machinery, (Collective mechanism) यन्त्रसाहित्यं, यन्त्रशक्तिसाहित्यं, यान्त्रं, यान्त्रिकं, यन्त्रत्वं.—(Machines in general) यन्त्रसामग्री, यन्त्रसमूहः, यन्त्रसमुदायः, यान्त्रं, यन्त्रविद्या.

Machinist, *s.* यन्त्रकारः -रकः, यन्त्रकृत् *m.*, यन्त्रनिर्म्माणशिल्पज्ञः, यन्त्रविद्यानिपुणः, यन्त्रविद्, कलाज्ञः.

Maciency, *s.* कृशता, कार्श्यं, कृशाङ्गता, क्षीणता, क्षामता, मांसक्षीणता.

Macilent, *a.* कृशः -शा -शं, क्षीणः -णा -णं, क्षीणमांसः -सा -सं.

Macrocosm, *s.* जगत्सर्वं, जगत्कृत्स्नं, विश्वजगत् *n.*, विश्वं, त्रिभुवनं.

Macrology, *s.* दीर्घसूत्रता, अतिविस्तीर्णवाक्यं, अतिविस्तरः

Mactation, *s.* उपहारार्थं घातनं or निहननं or प्रमापणं, विशसनं.

Macula, *s.* कलङ्कः, लाञ्छनं, चिह्नं, बिन्दुः *m.*, कलुषं, पङ्कः

To maculate, *v. a.* कलङ्क (nom. कलङ्कयति -यितुं), मलिन (nom. मलिनयति -यितुं), कलुष (*nom.* कलुषयति -यितुं), चिह्न (nom. चिह्नयति -यितुं), लाञ्छ् (c. 1. लाञ्छति -ञ्छितुं).

Maculate, maculated, *a.* कलङ्कितः -ता -तं, कलङ्की -ङ्किनी -ङ्कि (न्), कलुषितः -ता -तं, लाञ्छितः -ता -तं, चिह्नितः -ता -तं.

Mad, *a.* उन्मत्तः -त्ता -त्तं, उन्मादः -दा -दं, उन्मादवान् -वती -वत् (त्), उन्मादी -दिनी -दि (न्), सोन्मादः -दा -दं, उन्मदः -दा -दं, उन्मदिष्णुः -ष्णुः -ष्णु, मत्तः -त्ता -त्तं, वातुलः -ला -लं, वातूलः -ला -लं, प्रमदः -दा -दं, सुन्मदः -दा -दं, सुन्मादः -दा -दं, हतबुद्धिः -द्धिः -द्धि, नष्टबुद्धिः &c., विक्षिप्तबुद्धिः &c., भ्रष्टबुद्धिः &c., बुद्धिभ्रष्टः -ष्टा -ष्टं, हतज्ञानः -ना -नं, विप्लुतचित्तः -त्ता -त्तं, भ्रान्तचित्तः -त्ता -त्तं, विक्षिप्तमतिः -तिः -ति, विक्षिप्तः -प्ता -प्तं, मूढचेताः -ताः -तः (स्), नष्टेन्द्रियः -या -यं.—(Proceeding from madness) उन्मादप्रयुक्तः -क्ता -क्तं, उन्मादसूचकः -का -कं, बुद्धिभ्रंशसूचकः -का -कं.—(Furious) मदोत्कटः -टा -टं, मदोद्धतः -ता -तं, कोपाकुलः -ला -लं, संरब्धः -ब्धा -ब्धं; 'a mad dog,' अलर्कः, अलर्कः; 'a mad fellow,' प्रमदजनः; '*to go mad*,' उन्मद् (c. 4. -माद्यति -मदितुं), उन्मत्तीभू; 'drive mad,' उन्मद् (c. 10. -मादयति -यितुं).

Madam, *s.* आर्य्या, आर्य्यिका, आर्य्यका, भवती, भाविनी.—(As a complimentary title) आर्य्ये voc. c., भवति voc. c.

Mad-brain, mad-brained, *a.* विक्षिप्तबुद्धिः -द्धिः -द्धि, विप्लुतबुद्धिः &c.

Mad-cap, *s.* प्रमदजनः, उन्मत्तजनः, साहसिकः, साहसकर्म्मी *m.* (न्)

To madden, *v. a.* उन्मद् (c. 10. -मादयति -यितुं) मद्, उन्मत्तीकृ, मत्तीकृ

To madden, *v. n.* उन्मद् (c. 4. -माद्यति -मदितुं), उन्मत्तीभू, मत्तीभू, मद्

Maddened, *p. p.* उन्मादितः -ता -तं, उन्मत्तीकृतः -ता -तं, संरब्धः -ब्धा -ब्धं

Maddening, *a.* उन्मादकः -का -कं, उन्मादजनकः -का -कं, उन्मादनः -ना -नं

Madder, *s.* (The plant) मञ्जिष्ठा, विकसा, विकषा, मण्डूकपर्णी, ताम्रवल्ली, योजनवल्ली, योजनपर्णी, भण्डीरी, भण्डिरी, भण्डी, जिङ्गी, समङ्गा, कालमेषिका, चित्राङ्गी, कालमाषिका.

Made, *p. p.* कृतः -ता -तं, निर्म्मितः -ता -तं, कल्पितः -ता -तं, प्रकल्पितः -ता -तं, रचितः -ता -तं, विरचितः -ता -तं, घटितः -ता -तं, विहितः -ता -तं; 'made of,' मयः -यी -यं, निर्म्मितः -ता -तं, घटितः -ता -तं in comp.; as, 'made of wood,' काष्ठमयः -यी -यं, काष्ठघटितः -ता -तं, काष्ठनिर्म्मितः -ता -तं; 'made known,' निवेदितः -ता -तं, आवेदितः -ता -तं, सूचितः -ता -तं, आख्यातः -ता -तं, ज्ञापितः -ता -तं, विज्ञापितः -ता -तं; 'made ready,' सज्जीकृतः -ता -तं; 'made favorable,' प्रसादीकृतः -ता -तं; 'made up, as the mind,' स्थिरीकृतः -ता -तं, स्थिरः -रा -रं; 'made up, reconciled,' सन्धितः -ता -तं, शान्तविवादः -दा -दं; 'made up, settled,' सिद्धः -द्धा -द्धं, साधितः -ता -तं, निष्पन्नः -न्ना -न्नं; 'made over,' सङ्क्रामितः -ता -तं, समर्पितः -ता -तं, प्रतिपादितः -ता -तं; '*made light of*,' लघूकृतः -ता -तं; 'made good,' साधितः -ता -तं; '*made to do any thing*,' expressed by the caus. pass. part.; as, '*made to pay*,' दापितः -ता -तं; 'made to go,' गमितः -ता -तं; 'made to know,' ज्ञापितः -ता -तं; '*one* who has made an agreement,' कृतसङ्केतः -ता -तं.

Madefaction, *s.* आर्द्रीकरणं, क्लेदनं, संक्लेदनं, समुन्दनं, क्लिन्नीकरणं.

To madefy, *v. a.* आर्द्रीकृ, क्लिद् (c. 10. क्लेदयति -यितुं), संक्लिद्, परिक्लिद्.

Madhouse, *s.* उन्मत्तालयः, उन्मत्तपालनगृहं, उन्मत्तस्थानं.

Madly, *adv.* उन्मत्तवत्, सोन्मादं, मत्तवत्, वातुलवत्, चित्तविभ्रमात्, चित्तविप्लवात्, उन्मादेन, प्रमादात्, प्रमदजनवत्.

Madman, *s.* उन्मत्तजनः, मत्तजनः, प्रमदजनः, उन्मादकः, वातुलः.

Madness, *s.* उन्मत्तता, उन्मादः, सोन्मादता, मत्तता, वातुलता, विक्षिप्तता, बुद्धिविक्षिप्तता, बुद्धिविक्षेपः, बुद्धिभ्रमः, मतिभ्रमः, चित्तविभ्रमः, चित्तविप्लवः, बुद्धिनाशः, बुद्धिभ्रंशः, मतिभ्रंशः, मदः, प्रमदता, प्रमादः, उन्मादवायुः *m.*

Mænorrhagia, *s.* (A disease) योन्यर्शस् *n.*, प्रदरः, प्रदरामयः.

Magazine, *s.* (Storehouse) भाण्डागारं, भाण्डगृहं, कोषागारं.—(Of arms, ammunition, &c.) युद्धद्रव्यागारं, शस्त्रागारं, अस्त्रागारं, युद्धभाण्डागारं, आयुधागारं.—(A miscellany published periodically) काले काले प्रकाशितो नानाविषयसङ्ग्रहः or नानावस्तुविषयको ग्रन्थः.

Maggot, *s.* कीटः, कृमिः *m.*, अलिः *m.*, कीटाण्डजं.

Maggoty, *s.* कीटपूर्णः -र्णा -र्णं, कृमिपूर्णः -र्णा -र्णं, कृमिमयः -यी -यं.

Magi, magians, *s. pl.* पूर्वदेशीयपण्डिताः *m. pl.*, प्राग्देशीयविद्वज्जनाः.

Magic, *s.* अभिचारः, अभिचारविद्या, माया, मायाविद्या, योगः, सम्प्रयोगः, वशक्रिया, मूलकर्म्म *n.* (न्), चित्रकर्म्म *n.*, जालं, जालकर्म्म *n.*, इन्द्रजालं, अभिमन्त्रणं, कार्म्मणं, कार्म्मणत्वं, पिशाचविद्या, कुविद्या, मोहः, कुहकः, कुसृतिः *f.*, संवदनं -ना, मन्त्रः, मन्त्रमोहनं.

Magic, magical, *a.* आभिचारिकः -की -कं, अभिचारिकः -की -कं, अभिचारी -रिणी -रि (न्), मायामयः -यी -यं, मायी -यिनी -यि (न्), मायावी -विनी &c., मायिकः -की -कं, ऐन्द्रजालिकः -की -कं, मोही -हिनी &c., कौसृतिकः -की -कं.

Magically, *adv.* अभिचारेण, अभिचारविद्यानुसारात्, मायया, योगप्रभावात्

… अभिचारविद् m. अभिचारविद्याज्ञः, मायाकारः, मायाकृत् m., मायी m. (न्), मायिकः, मायावी m. (न्), मायाजीवी m. (न्), विद्याभिज्ञः, अभिचारी m. (न्), चित्रकर्म्मविद् m., मूलकर्म्मविद् m., इन्द्रजालिकः, ऐन्द्रजालिकः, इन्द्रियमोही m. (न्), कुहकः, कुहककारः, कुहकजीवी m., योगी m. (न्), योगेश्वरः, सम्प्रयोगी m., कौसृतिकः, सिद्धः, चित्रकर्मा m. (न्)

Magisterial, a. (Pertaining to a magistrate or magistracy) धर्म्माधिकारसम्बन्धी -न्धिनी &c., धर्म्माध्यक्षसम्बन्धी &c., दण्डनीतिसम्बन्धी &c., आधिकारिकः -की -कं, वैनयिकः -की -कं —(Pertaining to a master) प्रभुसम्बन्धी &c., स्वामिसम्बन्धी &c., प्रभुत्वविशिष्टः -ष्टा -ष्टं, आधिकारिकः -की -कं —(Imperious) आज्ञापकः -का -कं, आदेशकः -का -कं, धृष्टः -ष्टा -ष्टं, शासनरूपः -पा -पं.

Magisterially, adv. धर्म्माध्यक्षवत्, दण्डनायकवत्, अधिकारेण, शासनरूपेण.

Magistracy, s. (Office of a magistrate) धर्म्माधिकारः -रित्वं, धर्म्माधिकरणं, धर्म्माधिपत्यं, धर्म्माध्यक्षता, न्यायाधिकारः, न्यायाधीशता —(Body of magistrates) धर्म्माधिकारिणः m. pl., धर्म्माधिकारिगणः, धर्म्माध्यक्षगणः, धर्म्माध्यक्षसमूहः, न्यायाधीशगणः, न्यायाधीशमण्डलं

Magistrate, s. धर्म्माध्यक्षः, धर्म्माधिकारी m. (न्), न्यायाध्यक्षः, न्यायाधीशः, न्यायाधिपतिः m., दण्डनायकः, प्राड्विवाकः, दण्डप्रणेता m. (तृ), नीतिशास्ता m. (स्तृ), विचारकर्त्ता m. (र्तृ), अक्षदर्शकः, आक्षपाटिकः.

Magnanimity, s. माहात्म्यं, महात्मता -त्वं, माहात्मिकता, मनोमहत्त्वं, मतिमहत्त्वं, मनोमहिमा m. (न्), औदार्य्यं, उदारता, चित्तोदारता, उदारचित्तता, महेच्छा, महानुभावः, महाशयत्वं, मनःप्रौढता, महापुरुषत्वं, शौर्य्यं, वीरत्वं, प्रभावः, महिमा m.

Magnanimous, a. महात्मा -त्मा -त्म (न्), महामनाः -नाः -नः (स्), महामनस्कः -स्का -स्कं, माहात्मिकः -की -कं, महामतिः -तिः -ति, उदारचेताः -ताः -तः (स्), उदारमतिः -तिः -ति, उदारः -रा -रं, महानुभावः -वा -वं, महाशयः -या -यं, महेच्छः -च्छा -च्छं, उन्नतमनाः &c., शूरः -रा -रं.—(Proceeding from magnanimity) माहात्म्यपूर्व्वः -र्व्वा -र्व्वं, औदार्य्यपुरःसरः -रा -रं, माहात्म्ययोग्यः -ग्या -ग्यं

Magnanimously, adv. औदार्य्येण, उदारवत्, माहात्म्येन, समाहात्म्यं, मनोमहत्त्वात्, मनोमहिम्ना, महानुभावात्, उदारचित्तत्वात्, महेच्छया, शूरवत्, महाशयवत्, उदारचेतसा.

Magnate, s. उत्कृष्टपदस्थः, उच्चपदस्थः, महाकुलीनः, राजन्यः.

Magnesia, s. अम्लपित्तनाशकं शुक्लचूर्णं or चूर्णाकारं मृत्तिकाभस्म n. (न्).

Magnet, s. लोहचुम्बकः, लोहकान्तः -न्तं, अयस्कान्तः, चुम्बकः, चुम्बकप्रस्तरः, चुम्बकमणिः m., अयस्कान्तमणिः m., अयस्कान्तमणिशलाका, आकर्षः -र्षकः, आकर्षकमणिः m., चैम्बकं, लोहाकर्षकप्रस्तरः

Magnetic, magnetical, a. आकर्षिकः -की -कं, आकर्षकः &c., आकर्षणगुणः -णा -णं, आकर्षणधर्म्मकः -का -कं, लोहचुम्बनशीलः -ला -लं, लोहचुम्बनधर्म्मकः -का -कं, लोहचुम्बकसम्बन्धी -न्धिनी -न्धि (न्), लोहचुम्बकविषयः -या -यं: 'magnetic attraction,' आकर्षः.

Magnetically, adv. आकर्षणशक्तिद्वारेण, आकर्षणपूर्व्वं, लोहचुम्बनशक्त्या.

Magnetism, s. आकर्षणशक्तिः f., लोहचुम्बनशक्तिः f., लोहचुम्बनधर्म्मः, लोहचुम्बकगुणः, अयस्कान्तगुणः, अयस्कान्तमणिधर्म्मः.

To Magnetize, v. a. आकर्षणशक्तिं or लोहचुम्बनशक्तिं दा (c. 3. ददाति, दातुं).

Magnific, magnifical, a. महाप्रतापः -पा -पं. See Magnificent

Magnificence, s. प्रतापः, महाप्रतापः, महान् प्रतापः, अतिप्रतापः, सुप्रतापः, तेजस् n., अतितेजस् n., महातेजस् n., विभूतिः f., वैभवं, विभवः, ऐश्वर्य्यं, अतिशोभा, अतिकान्तिः f., महादीप्तिः f., महती शोभा, बृहद्दीप्तिः f., अतिप्रभा, ओजस्विता, उज्ज्वलता, श्रीः f., महिमा m. (न्), महत्त्वं.

Magnificent, a. महाप्रतापः -पा -पं, प्रतापवान् -वती -वत् (त्), महातेजाः -जाः -जः (स्), प्रतापी -पिनी -पि (न्), अतिप्रतापी &c., तेजस्वी -स्विनी &c., अतितेजाः -जाः -जः, शोभनः -ना -नं, अतिशोभनः -ना -नं, शुभ्रः -भ्रा -भ्रं, अतिकान्तिमान् -मती &c., ओजस्वी -स्विनी &c., उज्ज्वलः -ला -लं, महाप्रभः -भा -भं, दीप्यमानः -ना -नं, विभूतिमान् -मती &c.

Magnificently, adv. महाप्रतापेन, सुप्रतापेन, अतिप्रतापेन, अतितेजसा महातेजसा, सप्रतापं, विभूत्या, अतिशोभापूर्व्वं, ऐश्वर्य्येण.

Magnified, p. p. अधिकीकृतः -ता -तं, विपुलीकृतः -ता -तं, वर्धितः -ता -तं, उपचितः -ता -तं, विशालीकृतः -ता -तं, करालीकृतः -ता -तं, करालितः -ता -तं, अत्युक्तिपूर्व्वं वर्णितः -ता -तं, बहुलीकृतः -ता -तं, कीर्त्तितः -ता -तं

Magnifier, s. वर्धकः, वृद्धिकर्त्ता m. (र्तृ), वर्धनकृत् m., आधिक्यकृत्.—(Optical instrument) विपुलदर्शककाचः.

To magnify, v. a. (Make great or greater) अधिकीकृ, विपुलीकृ, विशालीकृ, वृध् (c. 10. वर्धयति -यितुं), महत्तरं -रां कृ, विपुलतरं -रां कृ, आधिक्यं कृ —(Amplify) अत्युक्त्या or अतिशयोक्त्या वृध् or विस्तृ (c. 10. -स्तारयति -यितुं), वाग्विस्तारेण वृध् or अधिकीकृ, अतिशयोक्तिं कृ, अत्युक्तिं कृ —(Extol) अतिशयेन कृत् (c. 10. कीर्त्तयति -यितुं) or वर्ण् (c. 10. वर्णयति -यितुं), अतिवर्णनं कृ.

Magnifying, part. or a. वर्धी -र्धिनी -र्धि (न्), वर्धकः -का -कं, अधिककारी -रिणी &c., विपुलकारी &c., विपुलदर्शकः -का -कं.—(Glass) विपुलदर्शककाचखण्डः -ण्डं

Magniloquence, s. अत्युक्तिः f., अतिशयोक्तिः f., अतिभाषणं, प्रगल्भभाषणं, प्रौढभाषणं, विकत्थनं, गर्व्वितवाक्यं, गर्व्वोक्तिः f., शब्दगर्वः.

Magniloquent, a. प्रौढभाषी -षिणी -षि (न्), प्रगल्भभाषी &c., विकत्थभाषी &c., गर्व्वितवाक्यकारी -रिणी &c.

Magnitude, s. (Size, extent) परिमाणं, परिमितिः f., प्रमाणं, मानं, आकारपरिमाणं, आकृतिपरिमाणं, रूपपरिमाणं, आकारमानं, महत्त्वपरिमाणं, मात्रं; 'of the magnitude of an egg,' अण्डपरिमाणः -णा -णं, 'of the same magnitude,' समभाक्रः -क्रा -क्रं, समपरिमाणः -णा -णं.—(Bulk) भारमानं, भारपरिमाणं.—(Greatness) महत्त्वं, बृहत्त्वं, स्थूलता, स्थौल्यं, विपुलता, वैपुल्यं, विशालता, पृथुता -त्वं, प्रथिमा m. (न्), महिमा m. (न्), उरुता -त्वं, विकटता, वैकट्यं, विस्तीर्णता

Magpie, s. चाषः, किकिः m., किकिदिविः m., किकीदिवः, किकीदीविः m.

Mahogany, s. नन्दिकः, तुन्नः, तुणिः m.

Mahommedan, a. यावनः -नी -नं, यवनदेशीयः -या -यं. See Mohammedan

Mahratta, s. (Country) महाराष्ट्रं.—(Dialect) महाराष्ट्री

Maid, maiden, s. कन्या, कुमारी, तरुणी, युवती, बालिका, बाला, कन्यिका, कन्यका, कुमारिका, गौरी, गौरिका, धीदा, रोहिणी, नग्निका, कनी. Some of these words refer to particular ages; as, 'a maid of eight,' गौरी -रिका; 'of nine,' कन्या, रोहिणी; 'of ten,' नग्निका, नयिका; 'of from ten to twelve,' कुमारी -रिका; 'of from sixteen to thirty,' तरुणी, 'of the age of puberty,' मध्या, मध्यमा, मुग्धा.—(Unmarried woman, virgin) अनूढा, अविवाहिता, अपरिणीता, निवरा, अवरा, अदत्ता, अप्रत्ता, अक्षता, अक्षतयोनिः f., अविद्धयोनिः f., पुरुषास्पृष्टा.—(Female servant) दासी -सिका, चेटी, परिचारिका, सहचारिणी, कर्म्मकरी, सैरन्ध्री, सैरिन्ध्री.

Maiden, a. (Pertaining to a maid) कौमारः -री -रं, कुमारिकासम्बन्धी -न्धिनी -न्धि (न्), कन्यासम्बन्धी &c., कुमारिकाविषयः -या -यं, कन्याविषयः -या -यं.—(Consisting of maids) … यी -यं कुमा-

पौर्वः -र्वी -र्वं.—(Fresh, unused) नवः -वा -वं, अभिनवः -वा -वं, अपूर्वः -र्वा -र्वं, अकृतोपभोगः -गा -गं, अनुपभुक्तः -क्ता -क्तं, अक्षतः -ता -तं, अक्षयः -या -यं.

MAIDENHEAD, MAIDENHOOD, s. कौमारं, कौमार्य्यं, कुमारीत्वं, कन्यात्वं, कुमारभावः, कुमारीदशा, कुमारिकाभावः.—(Freshness) नवत्वं -ता, अक्षतत्वं, अक्षतता.

MAIDENLIKE, MAIDENLY, a. कुमारीयोग्यः -ग्या -ग्यं, कुमारीसदृशः -शी -शं, कन्यायोग्यः -ग्या -ग्यं, कुमारीकोचितः -ता -तं, कन्योचितः -ता -तं, कुमारिकानुरूपः -पा -पं, कुमारीतुल्यः -ल्या -ल्यं.

MAID-SERVANT, s. दासी -सिका, चेटी, प्रेष्या, कर्म्मकारी, प्रेष्यवधूः f., प्रतीहारी, परिचारिका, सेवकी.

MAIL, s. (Armour) कवचः -चं, तनुत्रं, वर्म्म n. (न्), लौहवर्म्म n., लोहवर्म्म n., कञ्चुकः, तनुत्रं, तनुत्राणं, सज्जा, युद्धसज्जा, दंशनं, दंसनं, उरश्छदः, कङ्कटकः, कङ्कटः, जागरः, जगरः, कायत्राणं, उरस्त्राणं, वारवाणः, वारबाणः -णं.—(Post) पत्रवाहनं, पत्रवाहनं, राजनियोगिभृत पत्रकोषः, राजधावकभृतो लेख्यकोषः.

MAILED, p. p. वर्म्मितः -ता -तं, संवर्म्मितः -ता -तं, सन्नद्धः -द्धा -द्धं, दंशितः -ता -तं, परिदंशितः -ता -तं, कवची -चिनी -चि (न्), सकवचः -चा -चं, कृतसन्नाहः -हा -हं, सज्जः -ज्जा -ज्जं, सज्जितः -ता -तं, सज्जीकृतः -ता -तं, कञ्चुकी -किनी &c., व्यूढकङ्कटः -टा -टं, ऊढकङ्कटः -टा -टं.

TO MAIM, v. a. विकल (nom. विकलयति -यितुं) विकलीकृ, विकलाङ्गीकृ, व्यङ्गीकृ, न्यूनाङ्गीकृ, हीनाङ्गीकृ, अङ्गं छिद् (c. 7. छिनत्ति, छेत्तुं) or लू (c. 9. लुनाति, लवितुं) or वृश्च (c. 6. वृश्चति, व्रश्चितुं) or खण्ड् (c. 10. खण्डयति -यितुं).

MAIM, s. अङ्गवैकल्यं, वैकल्यं, विकलीकरणं, व्यङ्गीकरणं, अङ्गच्छेदः.

MAIMED, p. p. विकलाङ्गः -ङ्गा -ङ्गं, विकलीकृतः -ता -तं, विकलः -ला -लं, छिन्नाङ्गः &c., हीनाङ्गः &c., लूनाङ्गः &c., खण्डिताङ्गः &c., व्यङ्गः &c., अपाङ्गः &c., अङ्गविकलः -ला -लं, अङ्गहीनः -ना -नं, विकलीकृतः -ता -तं, छिन्नविक्षतः -ता -तं.

MAIMING, s. विकलीकरणं, व्यङ्गीकरणं, अङ्गच्छेदनं, अङ्गखण्डनं.

MAIN, a. (Principal) मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, प्रधानः -ना -नं, परमः -मा -मं, परः -रा -रं, अग्रः -ग्रा -ग्रं, अग्र्यः -ग्र्या -ग्र्यं, श्रेष्ठः -ष्ठा -ष्ठं, उत्तमः -मा -मं, प्रवरः -रा -रं, विशिष्टः -ष्टा -ष्टं, मौलिकः -की -कं.—(Most important) गुरुतमः -मा -मं, गरिष्ठः -ष्ठा -ष्ठं, परमः -मा -मं; 'main evil,' प्रधानदूषणं, गुरुदूषणं; 'main matter,' गुरुकार्य्यं, गुरुकं; 'main entrance,' सिंहद्वारं; 'main stock,' मूलद्रव्यं.

MAIN, s. (The bulk, gross) प्रधानभागः, प्रधानांशः, अधिकभागः, मुख्यभागः, मुख्यांशः, बहुतरभागः, स्थूलांशः, बाहुल्यं, साकल्यं, समुदायः, सामान्यं; 'in the main,' बाहुल्येन, बहुशस्, साकल्येन, सामान्यतस्, भूयिष्ठं.—(Force, strength) बलं, शक्तिः f.; 'with might and main,' सर्व्वबलेन, सकलबलेन, प्रसभं, प्रसह्य.—(The ocean) समुद्रः, महासागरः, महोदधिः m., महार्णवः.—(Continent) महाद्वीपः, प्रधानद्वीपः.—(At cock-fighting) समाह्वयः, आह्वयः, प्राणिद्यूतं.

MAINLAND, s. महाद्वीपः, मुख्यभूमिः f., प्रधानभूमिः, मूलभूमिः, मध्यस्थलं, स्थलं -ली, भूखण्डः, पृथ्वीखण्डः, द्वीपः, प्रधानद्वीपः, अविच्छिन्नभूमिः.

MAINLY, adv. मुख्यशस्, मुख्यतस्, प्रधानतस्, प्राधान्यतस्, प्राधान्येन, विशेषतस्, विशेषेण, बाहुल्येन, बहुशस्, भूयिष्ठं, बहुतर, सामान्यतस्, साकल्येन, परं.

MAIN-MAST, s. महाकूपकः, महागुणवृक्षकः, प्रधानकूपकः, मध्यकूपकः.

MAINPRIZE, s. दण्डप्रतिभाव्यपत्रं, प्रतिभूवचनमोक्षणं.

MAINSAIL, s. महाकूपकसम्बन्धि यानवसनं, महाकूपकवसनं.

TO MAINTAIN, v. a. (Hold) धृ (c. 1. धरति, धर्त्तुं, c. 10. धारयति -यितुं) मन्थ्.—(Support) भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्त्तुं), सम्भृ, आलम्ब् (c. 1. -लम्बते, c. 10. -लम्बयति -यितुं), अवलम्ब्, समवलम्ब्, उत्तम्भ् (c. 10. -स्तम्भयति -यितुं, rt. स्तम्भ्), संस्तम्भ्, विष्टम्भ्, सङ्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), वृध् (c. 10. वर्धयति -यितुं), संवृध्, भरणं कृ.—(Keep) पाल् (c. 10. पालयति -यितुं), अनुपाल्, रक्ष् (c. 1. रक्षति -क्षितुं), संरक्ष्, पालनं कृ, रक्षणं कृ, संरक्षणं कृ.—(Support with food) भृ, सम्भृ, भरणं कृ, भृतिं दा, पुष् (c. 10. पोषयति -यितुं), पोषणं कृ, ग्रासं दा, अन्नाच्छादनं दा, योगक्षेमं कृ; 'maintain a family,' कुटुम्बभरणं कृ; 'maintain one's self,' निर्व्वाहं कृ, उदरनिर्व्वाहं कृ.—(Vindicate, make good) प्रतिपद् (c. 10. -पादयति -यितुं), प्रतिपादनं कृ, व्यवस्था in caus. (-स्थापयति -यितुं), व्यवस्थापनं कृ, अनुपाल्, अनुपालनं कृ, प्रतिपालनं कृ, समर्थनं कृ, पक्षपातं कृ.—(Affirm) निश्चयेन वद् (c. 1. वदति -दितुं), दार्ढ्येन वद्.

MAINTAINABLE, a. भरणीयः -या -यं, भर्त्तव्यः -व्या -व्यं, भार्य्यः -र्य्या -र्य्यं, सम्भार्य्यः -र्य्या -र्य्यं, भरण्यः -ण्या -ण्यं, धर्त्तव्यः -व्या -व्यं, धार्य्यः -र्य्या -र्य्यं, धरणीयः -या -यं, पालनीयः -या -यं, रक्षणीयः -या -यं, पोषणीयः -या -यं, वर्धनीयः -या -यं, पोष्यः -ष्या -ष्यं.

MAINTAINED, p. p. भृतः -ता -तं, सम्भृतः -ता -तं, धृतः -ता -तं, धारितः -ता -तं, आलम्बितः -ता -तं, पालितः -ता -तं, पोषितः -ता -तं, पुष्टः -ष्टा -ष्टं, रक्षितः -ता -तं, वर्धितः -ता -तं, भरणीयः -या -यं; 'being maintained,' ध्रियमाणः -णा -णं.

MAINTAINER, s. भर्त्ता m. (र्त्तृ), भरः, भरणकृत् m., धर्त्ता m. (र्त्तृ), धरः, पालकः, पोषकः, पोष्टा m. (ष्टृ), भृतिदाता m. (तृ), प्रतिपालकः, रक्षिता m. (तृ), पालयिता m. (तृ); 'of a family,' कुटुम्बी m.

MAINTENANCE, s. (Support) भृतिः f., भरणं, सम्भृतिः f., धारणं, धृतिः f., भृत्या, पालनं, पोषणं, परिपालनं, प्रतिपालनं, रक्षणं, संरक्षणं, वर्धनं, संवर्धनं.—(Means of support, subsistence) जीवनोपायः, वृत्त्युपायः, उपजीवनं, जीविका, उपजीविका, वृत्तिः f., वर्त्तनं, निर्व्वाहः, उदरनिर्व्वाहः, प्राणधारणं, प्राणयात्रा, शरीरधारणं, शरीरयात्रा, योगक्षेमः.—(Food and clothing) अन्नवस्त्रं, अन्नाच्छादनं, ग्रासाच्छादनं, अन्नवस्त्रं, कशिपुः m. du.—(Defence, vindication) रक्षणं, प्रतिपादनं, व्यवस्थापनं, स्थापनं -ना.

MAIN-TOP, s. महाकूपकाग्रं, प्रधानकूपकाग्रं, मध्यकूपकाग्रं.

MAIZE, s. शस्यं, स्तम्बकरिः m., शस्यविशेषः.

MAJESTIC, MAJESTICAL, a. राजश्रीयुक्तः -क्ता -क्तं, राजश्रीमान् -मती -मत् (त्), राजयोग्यः -ग्या -ग्यं, राजसदृशः -शी -शं, राजतुल्यः -ल्या -ल्यं, राजतेजोमयः -यी -यं, राजतेजोरूपः -पा -पं, राजतेजोवान् -वती &c., प्रतापवान् -वती &c., राजप्रतापी -पिनी &c., राजप्रतापयुक्तः &c., गौरवयुक्तः &c., ऐश्वरः -री -रं, ऐश्वर्य्यवान् -वती &c., राजैश्वर्य्यवान् &c., महामहिमा -मा -म (न्), ऐशिकः -की -कं, सम्राजीयः -या -यं, राजकीयः -या -यं, विभूतिमान् &c., प्रभाववान् &c., प्रभावी -विणी &c., राजप्रभावी &c., प्रभविष्णुः -ष्णुः -ष्णु, माहात्मिकः -की -कं.

MAJESTICALLY, adv. राजतेजसा, राजप्रतापेन, सप्रतापं, सप्रभावं, राजैश्वर्य्येण, महामहिम्ना, विभूत्या, राजप्रभावेण, राजयोग्यं, राजसदृशं, राजवत्, राजवैभवेन, सगौरवं.

MAJESTY, s. राजश्रीः f., राजतेजस् n., राजप्रतापः, तेजस् n., प्रतापः, प्रभावः, राजप्रभावः, ऐश्वर्य्यं, राजैश्वर्य्यं, महिमा m. (न्), राजमहिमा, महामहिमा, राजसायुज्यं, विभूतिः f., राजविभूतिः f., वैभवं, विभवः, राजविभवः, राजप्रभवः, भूतिः f., माहात्म्यं, राजत्वं, राज्यं, प्रभुता, राजगौरवं; 'your majesty,' देव voc. c., श्रीमद्देव voc. c., आयुष्मन् voc. c., राजन् voc. c.; 'he speaks ill of your majesty,'

देवपाहार अधिविषयपति h m s भवी n कृ भव m
अमात्य n यु स्वामी न्) महाराज भवान् m त कामवान् m
गजभद्र m प्रभविष्णु a. h m j ty बलवती —बलवती
देवी re a m... ...ty. प्रकृतिः f.

MAJOR, a. (Greater in number) अधिकः -का -कं, अधिकतरः -रा -रं, अधिकसंख्यः -ख्या -ख्यं, अधिकपरिमाणः -णा -णं, भूयान् -यसी -यः (स्), भूयिष्ठः -ष्ठा -ष्ठं, बहुतरः -रा -रं.—(Greater in dignity) मुख्यः -ख्या -ख्यं, प्रधानः -ना -नं, प्रमुखः -खा -खं, श्रेयान् -यसी &c., श्रेष्ठः -ष्ठा -ष्ठं, गुरुः -र्वी -रु, गरीयान् -यसी &c.—(Major premiss) पूर्वपक्षः, पूर्वपक्षः.

MAJOR, s. (Person of full age) प्राप्तव्यवहारः, व्यवहारप्राप्तः, प्राप्तव्यवहारः, प्राप्तव्यवहारः, व्यवहारज्ञः, व्यवहारयोग्यः, व्यवहारक्षमः, व्यवहारार्हः, व्यवहाराधिकारी m. (न्), षोडशवर्षः.—(Military officer) सैन्यदलाध्यक्षः, गुल्मपतिः m., सैन्याधिपतिः m.

MAJOR-DOMO, s. गृहाधिकृतः, गृहकार्याधीशः, गृहकर्माध्यक्षः, कार्याधीशः.

MAJORITY, s. (Greater number) अर्द्धाधिकं, अर्द्धाधिक्यं, अर्द्धाधिकसंख्या, अर्द्धाधिकपक्षः, अधिकपक्षः, अधिकसंख्या, अधिकभागः, बहुतरभागः, बहुतरपक्षः, पराद्धे, भूयिष्ठं.—(State of being greater) आधिक्यं, अधिकत्वं -ता.—(Full age) व्यवहारः, व्यवहारप्राप्तिः f., व्यवहारक्षमता, व्यवहारज्ञत्वं, व्यवहार्यवयस् n., व्यवहार्यता, व्यवहार्यावस्था, प्राप्तव्यवहारत्वं, प्राप्तव्यवहारत्वं, व्यवहारयोग्यता, षोडशवयस्, 'one who has attained his majority,' प्राप्तव्यवहारः. See MAJOR.

To MAKE, v. a. (Form, create) कृ (c. 8. करोति, कुरुते, कर्त्तुं), संस्कृ, अभिकृ, निर्मा (c. 2. -माति, c. 3. -मिमीते, c. 4. -मायते -मातुं), विनिर्मा, कॢप् (c. 10. कल्पयति -यितुं), संकॢप्, विधा (c. 3. -दधाति -धातुं), रच् (c. 10. रचयति -यितुं), विरच्, घट् (c. 10. घटयति -यितुं), उत्पद् (c. 10. -पादयति -यितुं), जन् (c. 10. जनयति -यितुं), सृज्.—(Do, perform) कृ, संस्कृ, विधा, अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आचर् (c. 1. -चरति -रितुं), समाचर्.—(Constitute, compose) निर्मा, कॢप्, घट्, संस्था in caus. (-स्थापयति -यितुं) or expressed by निर्मितः -ता -तं, मयः -यी -यं, घटितः -ता -तं, रूपः -पा -पं, आत्मकः -का -कं, सम्भृतः -ता -तं in comp. See CONSTITUTED, consisting of, made of.—(Effect) साध् (c. 10. साधयति -यितुं), सम्पद् (c. 10. -पादयति -यितुं), निष्पद्, सम्पद्, जन् (c. 10. जनयति -यितुं), कल्प् (c. 10. कल्पयति -यितुं), निर्मा, कृ.—(Produce) उत्पद्, जन्, प्रजन्.—(Cause to be) कृ, or expressed by the caus. form, as, 'good fortune makes a man proud,' श्रीः पुरुषं दर्पयति.—(Compel, force) expressed by the causal form usually in conjunction with बलात् or बलेन. See To FORCE. 'He is made to perform that action' कार्यते तत् कर्म्म.—(Gain) आप् (c. 5. आप्नोति -आप्तुं), लभ् (c. 1. लभते, लब्धुं), उत्पद्.—(Adjust, arrange) रच्, विरच्, विन्यस् (c. 4. -अस्यति -असितुं), परिकॢप्; 'to make a bed,' शय्यां विन्यस्.—(Make amends) निष्कृतिं दा, निस्तारं कृ, पारितोषिकं दा, प्रतिफलं दा, क्षतिपूरणं कृ.—(Make account of) मन् (c. 10. मानयति -यितुं), सम्मन्, अपेक्ष् (c. 1. -ईक्षते -क्षितुं), प्रतीक्ष्.—(Make away) व्यापद् (c. 10. -पादयति -यितुं), हन् (c. 2. हन्ति हन्तुं, c. 10. घातयति -यितुं), वधं कृ.—(Make good, fulfil) निष्पद्, सम्पद्, सम्पूर् (c. 10. -पूरयति -यितुं), सिद्धीकृ, साध्.—(Make good a loss) क्षतिपूरणं कृ, प्रत्युपकृ, अपाकृ, निष्कृ, प्रतिकृ, निष्कृतिं दा, प्रतिदा.—(Make known) ज्ञा in caus. (ज्ञापयति -यितुं), निविद् (c. 10. -वेदयति -यितुं), सूच् (c. 10. सूचयति -यितुं). See KNOWN.—(Make light of) लघूकृ, तुच्छीकृ.—(Make love) विवाहार्थं प्रेम

कृ.—(Make merry) उत्सवं कृ.—(M... ...au... ...मद मत (Make ...) ...यत्नो ... यत्किञ्चित् कृत् ... ...n..., -अर्पयति -यितुं) ...आदरं स्वार्थेन कृ or यत्नतः कृ or यत्नेन प्रतिपद् (c. 10. -पादयति -यितुं), यत्नमर्द्धं कृ.—(Make out) निरूप् (c. 10. -रूपयति -यितुं), अवगम्, अवगाह् (c. 1. -गाहते -गाढुं), ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), ज्ञा (c. 9. जानाति -ज्ञातुं) बुध्.—(Make out, prove) प्रमाणीकृ, साध्, युज्.—(Make up, collect) समानी (c. 1. -नयति -नेतुं), समूह् (c. 1. -ऊहति -ऊहितुं), समाहृ, एकीकृ, एकत्रीकृ, सङ्गृह्.—(Make up, reconcile) सन्धा, समाधा, निर्णयं नय् (c. 10. नाययति -यितुं), विवादशान्तिं कृ.—(Make up, settle) साध्, सिद्धीकृ, निर्णी.—(Make up one's mind) निश्चयं कृ, निर्णयं कृ, दृढसङ्कल्पं कृ.—(Make water) मूत्रं कृ, मूत्रोत्सर्गं कृ, मूत्रत्यागं कृ.

To MAKE, v. n. (Move towards) अभिया (c. 2. -याति -तुं), अभिमुखं याप, उपया, अभिगम् प्रतिगम् (c. 1. -गच्छति -गन्तुं), अभिगम्, अभ्यागम्, उपसृ (c. 1. -सर्पति -सर्तुं), आक्रम् (c. 1. -क्रामति -क्रमितुं) उपक्रम्, अभिक्रम्, अभिसृ (c. 1. -सरति -सर्तुं), अभिसृ.—(Contribute, conduce) आवह् (c. 1. -वहति -वोढुं), आनी (c. 1. -नयति -नेतुं) सम्पद् (c. 10. -पादयति -यितुं); 'to make for one's advantage' आत्महिताय भू, आत्महितसाधने भू.—(Make as if) प्रतिभा (c. 2. -भाति -तुं), छल्.—(Make off) पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, अपधाव् (c. 1. -धावति -वितुं), अपक्रम्, अपसृप्, अपया, अपगम्, अपगच्छ्, चल् (c. 1. चलति -लितुं), प्रचल्.—(Make up, be reconciled) सन्धा (c. 3. -धत्ते -धातुं), अविवादी -दी -दि भू.

MAKE, s. आकारः, आकृतिः f., संस्कारः, रूपं, संस्थानं, विग्रहः, मूर्त्तिः f., वपुस् n., निर्माणं, निर्मितिः f., गठनं.

MAKE-BATE, s. कलहकारी m. (न्), द्वन्द्वकारी m. (न्), कलिकारकः, भेदकरः.

MAKE-PEACE, s. सन्धाता m. (तृ), सन्धानकर्त्ता m. (र्त्तृ), सन्धिकृत् m.

MAKER, s. कर्त्ता m. (र्त्तृ), कारः -रकः, कारी m. (न्), कृत् m., कारुः m., निर्माता m. (तृ), निर्माणकृत् m., निर्माणकर्त्ता, विधाता m. (तृ), विधायी m. (न्), कल्पकः, परिकल्पकः, रचकः, घटकः, उत्पादकः.—(Creator) स्रष्टा m. (ष्टृ), विधाता m., धाता m., सृक् m. (ज्), सृष्टिकर्त्ता m., जनकः, जनिता m. (तृ), जनयिष्णु m.—(Of the world) जगत्कर्त्ता m., जगत्स्रष्टा m. (ष्टृ), विश्वसृक् m., विश्वविधायी m., विश्वकृत् m., लोककृत् m.

MAKING, s. करणं, निर्माणं, निर्मितिः f., कल्पनं -ना, विधानं, रचनं -ना, घटनं -ना, जननं, उत्पादनं, सृष्टिः f., सर्जनं.

MAL, as a prefix is expressed by अ, दुर्, वि, कु, अप, असत्, अयथा.

MALABAR, s. (The country) मलयः, मलयदेशः, केरलः.

MAL-ADMINISTRATION, s. अयथापालनं, दुर्नीतिः f., दुर्नयः, दुःशासनं, कुनीतिः f., अनीतिः f., दुर्णीतं, दुर्निर्वाहः.

MALADY, s. रोगः, व्याधिः m., आमयः, विकारः, विकृतिः f., पीडा, दुःखं, रुक् f., (ज्), रुजा, गदः, तापः, उपतापः, अस्वास्थ्यं, अस्वस्थता, बाधा, क्लेशः, आर्त्तिः f., अर्दं.

MALAPERT, a. अविनीतः -ता -तं, दुर्विनीतः -ता -तं, अविनयः -या -यं, धृष्टः -ष्टा -ष्टं, धर्षितः -ता -तं, प्रगल्भः -ल्भा -ल्भं, प्रतिभानवान् -वती -वत् (त्).

MALAPERTLY, adv. दुर्विनीतवत्, अविनयेन, दुर्विनयात्, धृष्टवत्, प्रगल्भं.

MALAPERTNESS, s. अविनयः, दुर्विनयः, अविनीतता, दुर्विनीतता, धृष्टता, प्रगल्भता, प्रागल्भ्यं, प्रतिभा -भानं, दुर्वृत्तता.

MALAPROPOS, adv. अस्थाने, अकाले, अयोग्यं, असमयेन, अनवसरेण, असमञ्जसवत्, अप्रसङ्गेन, अप्रस्तुतं, अप्रासङ्गिकः -की -कं.

MALARIA, s. पूतिवातः, दुर्वायुः m., दुर्वातः, रोगजनकः कुवायुः m., भूमिबाष्पः, मारकबाष्पः, दूषकबाष्पः.

Malcontent, malcontented, a. (Discontented) असन्तुष्टः -ष्टा -ष्टं, अतुष्टः -ष्टा -ष्टं.—(With the government) राज्यव्यापारासन्तुष्टः -ष्टा -ष्टं, राजनीतिविरुद्धः -द्धा -द्धं, राज्यविरुद्धः &c.

Male, s. पुमान् m. (पुंस् or पुमस्), पुरुषः, पूरुषः, नरः, ना m. (नृ), मानुषः, मनुष्यः, मानवः, मनुजः, पुंव्यक्तिः m., पुरुषप्राणी m., पञ्चजनः; 'duties of the male,' पुन्धर्मः, नृधर्मः; 'male and female,' स्त्रीपुरुषौ m. du., मिथुनं, युग्मं, द्वन्द्वं.—(In botany) पुरुषः.—(Screw) नरः.

Male, a. पुं in comp., पुरुष in comp., पौरुषेयः -यी -यं, पुरुषजातीयः -या -यं, पुन्नागीयः -या -यं, पुरुषजातिसम्बन्धी -न्धिनी -न्धि (न्), नर in comp., 'male species,' पुंजातिः f., पुरुषजातिः f., 'male offspring,' पुत्रपुत्र, पुंसन्तानं, पुमन्वयः, अन्वयः, 'the male organ,' पुंलिङ्गं, पुंचिह्नं; 'a male tiger,' पुंव्याघ्रः, 'male attire,' पुरुषवेशः, नरवेशः, नृवेशः.

Maledicted, a. शप्तः -प्ता -प्तं, अभिशप्तः -प्ता -प्तं, आक्रुष्टः -ष्टा -ष्टं.

Malediction, s. शापः, अभिशापः, शपः -पनं, शपथः, परिशापः, आक्रोशः -शनं, अवक्रोशः, उपक्रोशः, भर्त्सनं, अभिषङ्गः, दुर्वाक्यं, अमङ्गलवचनं, अकल्याणवचनं, अमङ्गलेच्छा, अौक्षर्य.

Maledictory, a. अभिशापकः -का -कं, आक्रोशकः -का -कं, कुशापी -पिनी -पि (न्), अनिष्टप्रार्थकः -का -कं, अमङ्गलाशंसकः -का -कं, दुर्वाक्यमयः -यी -यं.

Malefactor, s. अपराधी m. (न्), पापी m. (न्), पातकी m. (न्), महापातकी m., कुकर्म्मी m. (न्), पापकर्म्मा m., दुष्कृती m. (न्), पापकारी m. (न्), कुकार्य्यकारी m., दुष्कर्म्मी m., दुष्कृतकर्म्मा m., अन्यायी m. (न्), एनस्वी m. (न्), दोषी m., कृतापराधः, कृतागाः m. (स्), कुत्सितकर्म्मा m., असत्कर्म्मा m.

[illegible] दुष्टबुद्धिः f., द्रोहबुद्धिः f., दुर्बुद्धिः f., [illegible] कुभावः, कुबुद्धिः f., द्रोहचिन्तनं, द्रोहः, असूया, अभ्यसूया, दौरात्म्यं, अहितत्वं, अप्रीतिः f., मात्सर्य्यं, पापदर्शित्वं, अहितेच्छा, अहितेप्सा, अहितैषा, अपकारेच्छा, अनिष्टेच्छा, पुरोभागिता.

Malevolent, a. दुष्टबुद्धिः -द्धिः -द्धि, दुष्टभावः -वा -वं, द्रोहबुद्धिः &c., द्वेषबुद्धिः &c., कुबुद्धिः &c., दुर्बुद्धिः &c., कुभावः -वा -वं, अहितबुद्धिः &c., असूयः -या -यं, अभ्यसूयः -या -यं, मत्सरः -रा -रं -री -रिणी -रि (न्), दुरात्मा -त्मा -त्म (न्), दुष्टात्मा &c., दुष्टचेताः -ताः -तः (स्), दुष्टमतिः -तिः -ति, पापदर्शी -र्शिनी -र्शि (न्), दौर्भिकट्टक (श), द्रोहचिन्तकः -का -कं, अनिष्टचिन्तकः &c., अपकारार्थी -र्थिनी &c., अनिष्टार्थी &c., अहितकामः -मा -मं, अहितेप्सुः -प्सुः -प्सु, अहितैषी -षिणी &c., अहितः -ता -तं, दुःशीलः -ला -लं, हिंसाशीलः &c., अपकारशीलः &c., दुःशीलः &c., दुर्हृदयः -या -यं, विषहृदयः -या -यं, पुरोभागी -गिनी &c.

Malevolently, adv. दुष्टभावेन -वात्, दुष्टबुद्धित्वात्, द्रोहबुद्ध्या, अहितबुद्ध्या, मात्सर्य्येण, मात्सर्य्यात्, सासूयं, साभ्यसूयं, दुष्टचेतसा, अहितेच्छया, दुःशीलत्वात्.

Malice, s. दुष्टभावः, द्रोहः, द्रोहबुद्धिः f., द्रोहचिन्ता -न्तनं, द्वेषभावः, द्वेषः, दीर्घद्वेषः, असूया, अभ्यसूया, ईर्ष्या, मात्सर्य्यं, मत्सरता, हिंसाबुद्धिः f., हिंसाशीलता, नृशंस्यं, नृशंसता, दंशः, दौर्जन्यं, दुष्टशीलता, दुःशीलता, अपकारेच्छा, अहितेच्छा, अनिष्टेच्छा, मानसहिंसा, दौरात्म्यं, दुरात्मता, हिंसा, परिहिंसा, खलता, 'malice prepense,' द्रोहचिन्तनं, व्यापादः; 'secret malice,' मानसद्वेषः, मानसद्रोहः; 'bearing malice,' दीर्घद्वेषी -षिणी -षि (न्).

Malicious, a. द्रोहबुद्धिः -द्धिः -द्धि, द्रोही -हिणी -हि (न्), दुष्टभावः -वा -वं, मत्सरः -रा -रं, मत्सरी -रिणी &c., नृशंसः -सा -सं, हिंसाशीलः -ला -लं, हिंसात्मकः -का -कं, हिंसालुः -लुः -लु, द्रोहशीलः &c., परिहिंसाशीलः &c., हिंसारुचिः -चिः -चि, द्वेषी -षिणी &c., अतिद्वेषी &c., अतिद्वेषकः -का -कं, अतिद्वेष्टा -ष्ट्री -ष्टृ (ष्टृ), कुबुद्धिः &c., कुमेधाः -धाः -धः (स्), दंशी -शिनी &c., आभ्यसूयः -या -यं, सासूयः &c., दुर्जनः -ना -नं, खलः -ला -लं, पिशुनः -ना -नं, खिद्वः -द्वा -द्वं. See Malevolent.—(Proceeding from malice) द्वेषमूलकः -का -कं, मात्सर्य्यहेतुकः -का -कं, द्रोहमूलः -ला -लं, दौर्जन्यहेतुकः -का -कं.

Maliciously, adv. द्रोहबुद्ध्या, द्रोहशीलत्वात्, दुष्टभावेन, अपकारेच्छया, सद्वेषं, द्रोहचिन्तापूर्वं, समात्सर्य्यं; 'maliciously intentioned,' द्रोहबुद्धिः -द्धिः -द्धि.

Maliciousness, s. द्रोहबुद्धित्वं, हिंसाशीलता, कौटिल्यं. See Malice.

Malign, a. अतिदुष्टः -ष्टा -ष्टं, विषपूर्णः -र्णा -र्णं. See Malignant.

To malign, v. a. अपवद् (c. 1. -वदति -दितुं), परिवद्, अभिशंस् (c. 1. -शंसति -सितुं), कलङ्क (nom. कलङ्कयति -यितुं), असूय (nom. असूयति -यितुं), मुखरीकृ.

Malignant, a. (Malicious) द्रोहबुद्धिः -द्धिः -द्धि, दुष्टबुद्धिः &c., दुर्बुद्धि &c., दुष्टमतिः -तिः -ति, दुर्मतिः &c., दुराशयः -या -यं, अहितः -ता -तं, नृशंसः -सा -सं, विषहृदयः -या -यं. See Malicious, malevolent.—(Virulent, acrimonious) उग्रः -ग्रा -ग्रं, अत्युग्रः &c., अतिकटुः -टुः -टु, अरुन्तुदः -दा -दं, अतितिग्मः -ग्मा -ग्मं, अतिदुष्टः -ष्टा -ष्टं, बहुविषः -षा -षं, विषालुः -लुः -लु, विषपूर्णः -र्णा -र्णं, 'a malignant ulcer,' दुष्टव्रणः.—(Dangerous to life, difficult to be cured) मारात्मकः -का -कं, प्राणनाशकः -का -कं, शरीरनाशकः -का -कं, साङ्घातिकः -की -कं, दुश्चिकित्स्यः -त्स्या -त्स्यं, दुश्चिकित्सः -त्सा -त्सं, दुःसाध्यः -ध्या -ध्यं, दुःशमनीयः -या -यं, सान्निपातिकः -की -कं, काल in comp., 'malignant fever,' कालज्वरः, सन्निपातज्वरः, मारकः, मरकः.—(Unpropitious in astrology) अनिष्टः -ष्टा -ष्टं, अनिष्टसूचकः -का -कं, अमङ्गलः -ला -लं, अकल्याणः -णा -णं.

Malignantly, adv. सद्रोहं, अतिदुष्टं, अत्युग्रं, अतितिग्मं, दुष्टभावात्, सविषं.

Maligned, p. p. मिथ्याभिशस्तः -स्ता -स्तं, मिथ्याभियुक्तः -क्ता -क्तं, कलङ्कितः &c.

Maligner, s. अपवादी m. (न्), अभिशंसकः, असूयकः, गुह्यघाती m.

Malignity, malignancy, s. (Maliciousness) दुष्टबुद्धित्वं, बुद्धिदुष्टता, भावदुष्टता, दुर्बुद्धित्वं, द्रोहः, द्रोहबुद्धित्वं, अतिदुष्टता, द्वेषः, अतिद्वेषः, दुर्मतिः f. -तित्वं, पैशुन्यं. See Malice, maliciousness.—(Virulence) उग्रता, अत्युग्रता, अतिकटुता, अतितिग्मता, अतिदुष्टता, सविषत्वं, विषपूर्णता, बहुविषत्वं.—(Destructive tendency) मारात्मकत्वं -ता, प्राणनाशकता, साङ्घातिकता, दुश्चिकित्स्यता.

Malkin, s. (Mop) मार्जनी, सम्मार्जनी.—(Drab) नीचस्त्री, अशुद्धा.

Mall, s. (Heavy hammer) बृहन्मुद्गरः, काष्ठमुद्गरः, घनः.—(Public walk) जनाकीर्णमार्गः, लोकाकीर्णमार्गः, लोकमार्गः, लोकपथः, सर्व्वसामान्यपथः.

Malleability, s. आघातवर्धनीयता, ताडनवर्धनीयता, मुद्गराघातवर्धनीयत्वं, घनवर्धनीयत्वं, घनवर्धिष्णुता, उद्वर्त्तनक्षमता, उद्वर्त्तनीयता.

Malleable, a. आघातवर्धनीयः -या -यं, ताडनवर्धनीयः -या -यं, मुद्गराघातवर्धनीयः -या -यं, उद्वर्त्तनक्षमः -मा -मं, घनवर्धनीयः -या -यं, घनवर्धिष्णुः -ष्णुः -ष्णु.

To malleate, v. a. मुद्गराघातेन उद्वर्त्तनं कृ or उद्वृत् (c. 10. -वर्त्तयति -यितुं).

Malleation, s. मुद्गराघातवर्धनं, घनवर्धनं, ताडनवर्धनं, उद्वर्त्तनं.

Mallet, s. मुद्गरः, काष्ठमुद्गरः, घनः, काष्ठघनः, द्रुघणः.

Mal-practice, s. कुचर्य्या, कुचरितं, कुचेष्टितं, दुश्चरितं, दुश्चेष्टितं, दुराचारः.

Malt, s. चिरकालेन जलस्थितं यवबीजं, ईषदङ्कुरत् or ईषदङ्कुरवत् यवबीजं,

MALT-DRINK, MALT-LIQUOR, *s.* यवसुरा, यवरसः, यवजं, यवपानीयं

MALT-HOUSE, *s.* यवपाचनगृहं, यवसन्धानस्थानं, यववीजगृहं

To MALTREAT, *v. a.* अपकृ, अपकारं कृ, असुवद् आचर् (c. 1. -चरति -रितुं).

MALTREATED, *p. p.* अपकृतः -ता -तं, कृतापकारः -रा -रं, दुराचरितः -ता -तं.

MALTREATMENT, *s.* अपकारः, अपक्रिया, अपकृतिः *f.*, निकारः, पीडा

MALVERSATION, *s.* दुराचरितं, अनुचिताचारः, धूर्त्तता, शाठ्यं, खलता, कुमतिः *f.*

MÁLWÁ, *s.* (Province) मालवः, दाशेरकः; 'the people of Málwa,' मालवाः *m. pl.*, माळव्याः *m. pl.*, मालवी *f. sing.*

MAM, MAMMA, *s.* मा, माता *f.* (तृ), अम्बा, अम्बिका, अम्बालिका

MAMMALIA, *s. pl.* स्तनपाः *m. pl.*, स्तनविशिष्टो जन्तुगणः, स्तनजातिः *f.*

MAMMARY, *a.* स्तनसम्बन्धी -न्धिनी -न्धि (न्), कुचसम्बन्धी &c.

MAMMET, *s.* पुत्तली -लिका, पुत्रिका, पाञ्चाली -लिका, पाञ्चालिका.

MAMMIFER, MAMMIFEROUS, *a.* सस्तनः -ना -नं, स्तनवान् -वती -वत् (त्)

MAMMIFORM, *a.* स्तनाकारः -रा -रं, स्तनाकृतिः -तिः -ति, कुचाकारः -रा -रं.

MAMMILLARY, *a.* स्तनसम्बन्धी -न्धिनी -न्धि (न्), स्तनाकारः -रा -रं

MAMMON, *s.* धनं, धनेश्वरः, लक्ष्मीः *f.*; 'serving mammon,' धनसेवनं, लक्ष्मीपूजनं, धनसम्पादनं, अर्थसेवा, अर्थपरता

MAMMOTH, *s.* मेमथसंज्ञकः प्राचीनकालिको हस्ती.

MAN, *s.* (A male of the human race) पुरुषः, नरः, मनुष्यः, मानुषः, मानवः, मनुजः, जनः, पुमान् *m.* (पुंस् or पुमस्), मर्त्यः, पूरुषः, मनुः *m.*, पञ्चजनः, मनुभूः *m.*, पुंव्यक्तिः *m.*, वीरः, मर्त्तः, वृथमानः, वृधसानुः *m.*, चर्षणिः *m.*, भूस्पृक् *m.* (श्). 'an eminent man,' पुरुषसिंहः, पुरुषव्याघ्रः, पुरुषर्षभः, पुरुषशार्दूलः, पुरुषपुङ्गवः, पुरुषोत्तमः, पुरुषचन्द्रः, पुरुषपुण्डरीकः, नरसिंहः, नृसिंहः; 'a low man,' पुरुषाधमः; 'a man of truth,' सत्यवीरः.—(Mankind) मनुष्यजातिः *f.*, पुरुषजातिः *f.*, मानुष्यं, पूरुषाः *m. pl.*, मानुषाः *m. pl.*, मानवाः *m. pl.*, नराः *m. pl.*, लोकः, मनुष्यलोकः, मनुभूः *m.*; 'the fear of man,' पुरुषभीतिः *f.*, जनभीतिः *f.*; 'the measure or stature of a man,' पौरुषं, पुरुषपरिमाणं.—(Person) जनः, व्यक्तिः *f.*—(Male servant) सेवकः, प्रेष्यः, किङ्करः, दासजनः.—(Man at chess, &c.) नरः, सारः, शारः, शारिः *m.*, सारिः -री -रिका, जतुपुत्रकः, नयः.—(Adult) प्रौढवयस्कः, मानुष्यप्राप्तः.

To MAN, *v. a.* मनुष्ययुक्तं नौ कृ, समनुष्य -ष्यां कृ, सैन्यान् प्रविश् (c. 10. -वेशयति -यितुं) or निविश्, पुरुषप्रवेशनात् सज्जीकृ

MANACLE, *s.* हस्तबन्धनं, करबन्धनं, हस्तपाशः, पाणिबन्धः.

To MANACLE, *v. a.* हस्तौ पाशेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), पाणिबन्धनं कृ, करसंयमनं कृ, करयन्त्रणं कृ

MANACLED, *p. p.* बद्धहस्तः -स्ता -स्तं, संयमितकरः -रा -रं, यन्त्रितकरः &c.

To MANAGE, *v. a.* (Conduct, carry on) प्रणी (c. 1. -णयति -णेतुं) सम्प्रणी, विधा (c. 3. -दधाति -धातुं), वह् (c. 10. वाहयति -यितुं), निर्वह्, आचर् (c. 1. -चरति -रितुं), घट् (c. 1. घटते -टितुं), प्रवृत् (c. 10. -वर्त्तयति -यितुं), धृत्, कृ.—(Direct, control) शास् (c. 2. शास्ति -सितुं), नियन्त्र्, वशीकृ, अनुशास्, समनुशास्, नियम् (c. 1. -यच्छति -यन्तुं), विनियम्, सन्नियम्, यन्त्र् (c. 10. यन्त्रयति -यितुं).—(Train) विनी, शिक्ष् (c. 10. शिक्षयति -यितुं), अनुशिक्ष्; 'let it be managed,' विधीयतां.

To MANAGE, *v. n.* निर्वाहं कृ, प्रयत्नं कृ, उपायप्रयोगं कृ, प्रयोगं कृ.

MANAGEABLE, *a.* विधेयः -या -यं, प्रणेयः -या -यं, विनेयः -या -यं, सुविधेयः -या -यं, गृह्यकः -का -कं, वश्यः -श्या -श्यं, सुकरः -रा -रं, साध्यः -ध्या -ध्यं, शासनीयः -या -यं, विनीतः -ता -तं.

MANAGED, *p. p.* प्रणीतः -ता -तं, विहितः -ता -तं, निर्वाहितः -ता -तं, निर्व्यूढः -ढा -ढं, वाहितः -ता -तं, घटितः -ता -तं, प्रवर्त्तितः -ता -तं, वर्त्तितः -ता -तं, आचरितः -ता -तं, नियतः -ता -तं, विनियतः -ता -तं, प्रयुक्तः -क्ता -क्तं; 'well managed,' सुघटितः -ता -तं, सुप्रयुक्तः -क्ता -क्तं, सुनीतः -ता -तं; 'badly managed,' दुर्घटितः -ता -तं, असम्यक्चेष्टितः -ता -तं.

MANAGEMENT, *s.* (Conduct, carrying on) प्रणयनं, सम्प्रणयनं, नीतिः *f.*, नयः, प्रणीतिः *f.*, न्यायः, नेतृत्वं, निर्वाहः, निर्वहणं, निर्वाहणं, व्यवहर्तृत्वं, आचरणं, सम्पादनं, विधानं, घटनं -ना, प्रयोगः, प्रवर्त्तनं, प्रवृत्तिः *f.*, करणं; 'of affairs,' कर्म्मनिर्वाहः.—(Control) अधिकारः, प्रभुत्वं, अधिष्ठातृत्वं, शासनं, अनुशासनं, विनियमः.—(Contrivance) उपायः, प्रयोगः, उपायप्रयोगः, युक्तिः *f.*, युक्तिप्रयुक्तिः *f.*, उपायज्ञता; 'good management,' सुनयः, सुनीतिः *f.*; 'bad management,' दुर्णयः, दुर्नीतिः; 'management of a drama,' स्थापना.

MANAGER, *s.* नायकः, नेता *m.* (तृ), प्रणेता *m.*, सम्प्रणेता *m.*, निर्वाहकः, वाहकः, सम्पादकः, व्यवहर्त्ता *m.* (र्तृ), घटकः, अधिष्ठाता *m.* (तृ), प्रवर्त्तकः, प्रयोजकः, चालकः, अधिकारी *m.* (न्), अधिकृतः, कर्त्ता *m.* (र्तृ), कारकः; 'manager of affairs,' कर्म्मनिर्वाहकः, कार्य्याध्यक्षः, कार्य्यद्रष्टा (ष्टृ), कार्य्याधिष्ठाता *m.* (तृ), कर्म्माधिकारी *m.*; 'manager of the treasury,' कोषाध्यक्षः, धनाधिकारी *m.*, अर्थाधिकारी.—(Stage manager) सूत्रधारः -री *m.* (न्), मारिषः, स्थापकः, सूचकः.—(Expert in the use of means) उपायज्ञः, युक्तिमान् *m.* (त्), विदग्धः.—(Economical) परिमितव्ययी *m.* (न्), परिमितव्ययकारी *m.*

MANAGING, *a.* उपायज्ञः -ज्ञा -ज्ञं, उपायकुशलः -ला -लं, विदग्धः -ग्धा -ग्धं.

To MANCIPATE, *v. a.* दासीकृ, वशीकृ, करतलीकृ, बन्ध् (c. 9. बध्नाति, बन्द्धुं).

MANCIPATION, *s.* दास्यं, दासत्वं, दासीकरणं, वशीकरणं, परप्रेष्यत्वं, बन्धनं

MANCIPLE, *s.* भोजनाधिकारी *m.* (न्), भोजनादिपरिकल्पकः

MANDATE, *s.* आज्ञा, आदेशः, निदेशः, निर्देशः, नियोगः, शासनं, शास्तिः *f.*, नियमः, चोदना -नं, विधिः *m.*, विधानं; 'written,' आज्ञापत्रं, शासनपत्रं, पट्टं.

MANDATORY, *a.* आदेशकः -का -कं, आदेशी -शिनी -शि (न्), निर्देशकः -का -कं, आज्ञापकः -का -कं, आज्ञासूचकः -का -कं, आज्ञाबोधकः -का -कं, शासकः -का -कं.

MANDIBLE, *s.* हनुः *m. f.*—(Lower jaw) घोणं, कुञ्जः, चिबुकं

MANDRAKE, *s.* (A plant) लक्ष्मणा, पुत्रदात्री, पुत्रदा, दूरमूलं

To MANDUCATE, *v. a.* चर्व् (c. 1. चर्वति -र्वितुं, c. 10. चर्वयति -यितुं), चर्वणं कृ

MANDUCATION, *s.* चर्वणं -णा, दन्तपेषणं, रोमन्थः, भक्षणं, भोजनं.

MINISTRATION, *s.* (Service) उपचारः, उपचारकरणं, उपासनं -ना, पर्य्युपासनं, सेवा -वनं, उपसेवा -वनं, परिचर्य्या, उपकारः, शुश्रूषा.—(Office of a minister) मन्त्राधिकारः, मन्त्रकर्म्म *n.* (न्), मन्त्रकरणं.—(Sacerdotal) उपाध्यायाधिकारः, उपाध्यायकर्म्म *n.* (न्), उपाध्यायवृत्तिः *f.*

MINISTRY, *s.* (Office of minister) मन्त्रित्वं, साचिव्यं, मन्त्राधिकारः -रिता, अमात्यत्वं, अधिकारः -रिता -त्वं; 'office of a prime minister' मुख्यमन्त्रित्वं, प्रधानमन्त्रित्वं, महाधिकारः.—(Office of an agent) नियोगिता -त्वं, नियोगः, नियोगिपदं, अधिकारः.—(Agency, instrumentality) कारणत्वं, कारकत्वं -ता, साधकत्वं, कर्त्तृत्वं -ता, कर्त्तृकत्वं, प्रयोजकत्वं.—(Office of a minister of religion) उपाध्यायत्वं, उपाध्यायपदं, पौरोहित्यं.—(Body of ministers of state) मन्त्रिसमाजः, मन्त्रिगणः, मन्त्रिसमूहः, मन्त्रिणः *m. pl.*, अमात्यगणः, सचिवसमाजः, अमात्याः *m. pl.*, राज्यधुर्य्याः *m. pl.*—(Service). *See* MINISTRATION.

MINIUM, *s.* सिन्दूरं -रिका, नागजं, नागरक्तं, रक्तचूर्णं, रक्तवालुकं. *See* LEAD.

MINOR, *a.* (Less) अवरः -रा -रं, अल्पतरः -रा -रं, अल्पीयान् -यसी -यः (स्), कनीयान् &c., लघीयान् &c., न्यूनः -ना -नं.—(Secondary) अप्रधानः -ना -नं, अमुख्यः -ख्या -ख्यं, गौणः -णी -णं; 'minor' in *these senses* is very commonly expressed by the preposition उप; *as*, 'a *minor* member of the body,' उपाङ्गं, प्रत्यङ्गं; 'a minor veda,' उपवेदः; '*minor science*,' उपविद्या; 'a minor offence,' उपपातकं; 'minor offender,' उपपातकी *m.* (न्); 'minor planet,' उपग्रहः; 'minor deity,' उपदेवता; 'minor duty,' उपधर्म्मः; 'minor disease,' क्षुद्ररोगः.—(Inconsiderable) लघुः -घुः -घु, स्वल्पः -ल्पा -ल्पं, क्षुद्रः -द्रा -द्रं.

MINOR, *s.* (Person under age) अप्राप्तव्यवहारः, अप्राप्तव्यवहारकालः, अजातव्यवहारः, व्यवहारायोग्यः, बालः, शिशुः *m.*, अप्राप्तषोडशवर्षः किशोरः, अज्ञातव्यवहारः, अप्राप्तकालः.—(Premise, in logic) अवरपक्षः, लघुपक्षः.

MINORITY, *s.* (State of being under age) बाल्यं, बालदशा, बालावस्था, बालत्वं, बाल्यभावः, बाल्यकालः, शैशवं, शिशुभावः, शिशुकालः, अप्राप्तव्यवहारत्वं, अप्राप्तव्यवहारदशा.—(Smaller number lessness) न्यूनपक्षः, अल्पपक्षः, अवरपक्षः, न्यूनता -त्वं; 'in the minority,' न्यूनपक्षपाती *m.* (न्), न्यूनपक्षग्राही *m.* (न्), न्यूनपक्षाश्रितः.

MINOTAUR, *s.* नरवृषभः, नरवृषः, नृवृषभः, कश्चित्कल्पितोऽर्द्धेन पुरुषोऽर्द्धेन वृषभो जन्तुविशेषः.

MINSTREL, *s.* मागधः, मगधः, वैतालिकः, वादित्रगायकः, गीतवादनकुशलः, सङ्गीतविद्, सङ्गीतकुशलः, गायकः, बन्दी *m.* (न्), मधुकः, भाविकः; 'celestial,' गन्धर्वः.

MINSTRELSY, *s.* मागधवृत्तिः *f.*, गन्धर्ववृत्तिः *f.*, गीतवादनं, गीतवादनकर्म्म *n.* (न्), गान्धर्व्वं, सङ्गीतव्यापारः, सङ्गीतं, सङ्गीतिः *f.*

MINT, *s.* (Place where money is coined) टङ्कशाला, टङ्ककशाला, मुद्राङ्किता, मुद्राङ्कनशाला, रूप्याकरः; 'master of it,' टङ्कपतिः *m.*, टङ्ककपतिः, रूप्याध्यक्षः, नैष्किकः.—(Plant) पोदिना, पुदिना.

To MINT, *v. a.* मुद्राङ्कनं कृ, मुद्राभिः अङ्क् (c. 10. अङ्कयति -यितुं), मुद्रीकृ, मुद् (*nom.* मुद्रयति -यितुं).

MINTAGE, *s.* मुद्राङ्कनं, अङ्कनं.—(That which is coined) मुद्रा, मुद्रिकरूप्यं, मुद्राङ्कितरूप्यं.

MINTER, *s.* मुद्राङ्ककः, टङ्काङ्कयिता *m.* (तृ), मुद्राकारः -रकः.

MINT-MASTER, *s.* टङ्कपतिः *m.*, टङ्ककपतिः *m.*, रूप्याध्यक्षः, नैष्किकः.

MINUET, *s.* (Kind of dance) मन्दगतिः *f.*, मन्दनृत्यविशेषः.

MINUS, *s.* (Less) न्यूनः -ना -नं, ऊनः -ना -नं; 'minus something,' किञ्चिन्न्यूनः -ना -नं; 'minus a hand,' हस्तन्यूनः -ना -नं.—(In algebra) ऋणं, क्षयः; 'a thousand minus one,' एकहान्या सहस्रं.

MINUTE, *a.* (Very small) सूक्ष्मः -क्ष्मा -क्ष्मं, अतिसूक्ष्मः -क्ष्मा -क्ष्मं, अल्पतमः -मा -मं, अल्पिष्ठः -ष्ठा -ष्ठं, अणुकः -का -कं, आणुकः -की -कं, अणीकः -का -कं, अणीयान् -यसी -यः (स्), अणुः -ण्वी -णु, अल्पकः -का -कं, क्षुद्रः -द्रा -द्रं, श्लक्ष्णः -क्ष्णा -क्ष्णं, अल्पाल्पः -ल्पा -ल्पं, क्षोदिष्ठः -ष्ठा -ष्ठं, तनुः -नुः -न्वी -नु, प्रतनुः -नुः -नु, क्षीणः -णा -णं, तनीयान् -यसी &c., तनिष्ठः -ष्ठा -ष्ठं, क्षोदक्षमः -मा -मं, कृशः -शा -शं.—(Attending to small things) सूक्ष्मदृष्टिः -ष्टिः -ष्टि, सूक्ष्मदर्शी -र्शिनी &c.; 'minute description,' प्रत्यवयववर्णना.

MINUTE, *s.* (Sixtieth part of an hour) षष्टिभागपादाः *m. pl.*, क्षणपादः, क्षणचतुर्थांशः, सार्द्धद्विपलं; 'half a minute,' त्रिंशत्पादः. *According to the* Hindu reckoning a दण्डः or hour contains 24 minutes, and a पलं is equal to the 60th part of a दण्डः, therefore 2½ palas *are equal to* a *minute.* A क्षणः is equal to 30 कला or 4 minutes. When, however, the word minute is used generally for a small portion of *time* it *may* be expressed by क्षणः, पलं, विपलं, त्रुटिः *f.*, निमिषः, निमेषः, as, 'a minute's delay,' क्षणक्षेपः; 'for a minute,' क्षणं -णात् -णेन; 'in a minute,' निमेषमात्रेण; 'a minute afterwards,' क्षणान्तरं -रे.—(In geometry, the sixtieth part of a degree) कला.—(Note, memorandum) स्मरणलेखः, स्मरणार्थलिखितं, लेखः, लिखितं, स्मरणचिह्नं.

To MINUTE, *v. a.* स्मरणार्थं किञ्चिद् लिख् (c. 6. लिखति, लेखितुं), अभिलिख.

MINUTELY, *adv.* सूक्ष्मं सौक्ष्म्येण सर्वसौक्ष्म्यं सूक्ष्मत्वेन सूक्ष्मतया अति सूक्ष्मतया क्रमशस् कणशस्.

MINUTENESS, s. अतिसूक्ष्मता, सूक्ष्मता, सूक्ष्मत्वं, सौक्ष्म्यं, अतिसौक्ष्म्यं, अल्पता, अणिमता, क्षुद्रता, क्षोदिमा m. (न्), अणिमा m. (न्), तनुता, अतितनुता, अतितानवं, तलिमता, क्षीणता. —(Attention to small things) सूक्ष्मदृष्टित्वं, सूक्ष्मदर्शनं, सूक्ष्मदर्शित्वं.

MINUTIÆ, s. pl. सूक्ष्मावयवाः m. pl., सूक्ष्मांशाः m. pl., सूक्ष्मविषयाः.

MINX, s. अविनीता, दुर्विनीता, धृष्टा, प्रगल्भा, धर्षणी, निर्लज्जा.

MIRACLE, s. आश्चर्यकर्म्म n. (न्), अद्भुतकर्म्म n., अतिमानुषकर्म्म n., अमानुषकर्म्म, अमानुषचेष्टाकर्म्म n., अनातिगकर्म्म n., अद्भुतक्रिया, चमत्कारः, अद्भुतं, दैवकर्म्म n., दिव्यकर्म्म n., निसर्गातिगकर्म्म n., प्रकृत्यतीतकर्म्म n., दिव्यशक्तिसाधितकर्म्म n., विभूतिसाधितकर्म्म n.

MIRACULOUS, a. आश्चर्यः -र्या -र्य्यं, अद्भुतः -ता -तं, अतिमानुषः -षा -षं, अनातिगः -गा -गं, पुरुषातिगः -गा -गं, अतिमर्त्यः -र्त्या -र्त्यं, अपौरुषेयः -यी -यं, अमानुषशक्तिसाध्यः -ध्या -ध्यं, अपुरुषशक्तिसाधितः -ता -तं, दिव्यशक्तिसाधितः -ता -तं, विभूतिसाधितः -ता -तं, निसर्गातिगः -गा -गं, प्रकृत्यतिगः -गा -गं.—(Having miraculous powers) अद्भुतशक्तिमान् -मती -मत् (त्), अतिमानुषशक्तिकः -का -कं, अद्भुतकारी -रिणी -रि (न्), अमानुषकर्म्मकारी &c., अलौकिकशक्तिः -क्तिः -क्ति.

MIRACULOUSLY, adv. अतिमानुषशक्तिपूर्व्वं, आश्चर्यशक्त्या, अद्भुतशक्त्या, अमानुषशक्त्या, दिव्यशक्त्या, अनातिगशक्त्या, अलौकिकशक्त्या.

MIRAGE, s. मृगतृष्णा -ष्णिका, मृगतृषा, मृगतृट् f. (ष्), मृगजलं, मरीचिका.

MIRE, s. पङ्कः, कर्द्दमः, जम्बालः -लं, जलकल्कः, कलुषं, मलं.

To MIRE, v. a. पङ्केन दुष् (c. 10. दूषयति -यितुं), पङ्कस्थं -स्थां कृ.

MIRINESS, s. सपङ्कता, पङ्किलत्वं, सकर्द्दमता, कलुषत्वं, कालुष्यं.

MIRROR, s. दर्पणः -णं, आदर्शः, मुकुरः, मकुरः, मङ्कुरः, आत्मदर्शः, करतलकं, प्रतिबिम्बकः, सम्मुखी m. (न्), दर्शनं, चन्द्रः, कर्करः, 'the surface of a mirror,' आदर्शतलं; 'mirror-like,' आदर्शतलोपमः -मा -मं. —(Exemplar) आदर्शः, प्रतिमा.

To MIRROR, v. a. दर्पणे बिम्ब (nom. बिम्बयति -यितुं), प्रतिबिम्ब.

MIRRORED, p. p. बिम्बितः -ता -तं, प्रतिबिम्बितः -ता -तं, दर्पणगतः -ता -तं.

MIRTH, s. हास्यं, हासः, प्रहसनं, परिहासः, परीहासः, हसिका, उल्लासः, उल्लसता, मुदा, कौतुकं, हर्षः, प्रहर्षः, हास्यक्रीडा, हास्यविनोदः, मुदितं, प्रमोदः, मुद् f., विश्रम्भणं.

MIRTHFUL, a. हासी -सिनी -सि (न्), हास्यवृत्तिः -त्तिः -त्ति, हास्यमुखः -खी -खं, सुहसाननः -ना -नं, उल्लासी -सिनी &c., उल्लसः -सा -सं, उल्लासितः -ता -तं, मुदान्वितः -ता -तं, प्रमोदी -दिनी &c., मुदितः -ता -तं, हृष्टचित्तः -त्ता -त्तं, कौतुकी -किनी &c., आनन्दी &c.

MIRTHFULLY, adv. सहासं, सहास्यं, सहसितं, परिहासेन, उल्लासेन.

MIRY, a. पङ्किलः -ला -लं, पङ्की -ङ्किनी -ङ्कि (न्), पङ्कमयः -यी -यं, पङ्कक्लिन्नः -न्ना -न्नं, सपङ्कः -ङ्का -ङ्कं, सकर्द्दमः -मा -मं, कार्द्दमः -मी -मं, कर्द्दमितः -ता -तं, सजम्बालः -ला -लं, कलुषः -षा -षं, पङ्कदूषितः -ता -तं; 'a miry road,' पङ्कवर्त्म n. (न्).

MISACCEPTATION, s. विपरीतग्रहणं, अन्यथाग्रहणं, विपरीतार्थग्रहणं.

MISADVENTURE, s. अनिष्टापातः, अनिष्टं, विपद् f., विपत्तिः f., आपद् f., दुर्गतिः.

MISADVENTURED, a. दुर्गतः -ता -तं, दुर्भाग्यः -ग्या -ग्यं, दुर्दैवग्रस्तः &c.

MIS-ADVISED, a. कुमन्त्रितः -ता -तं, कूपदिष्टः -ष्टा -ष्टं, कुपरामृष्टः -ष्टा -ष्टं.

MIS-AFFECTED, a. अहितः -ता -तं, विरक्तः -क्ता -क्तं, अननुरक्तः &c.

To MIS-ALLEDGE, v. a. अन्यथा वद् (c. 1. वदति -दितुं), मिथ्या वद्.

MIS-ALLEGATION, s. अन्यथाकथनं, अन्यथावादः, मिथ्यावादः, मिथ्याकथनं.

MISANTHROPE, MISANTHROPIST, s. पुरुषद्वेषी m. (न्), पुरुषद्वेष्टा m. (तृ), जनद्वेषी &c., लोकद्वेषी, पुरुषशत्रुः m., जनशत्रुः, जनवैरी m. (न्), विश्वशत्रुः m., विश्वद्रोही m. (न्), सर्व्वाभिशङ्ककः, सर्व्वाभिशङ्की m. (न्).

MISANTHROPIC, MISANTHROPICAL, a. पुरुषद्वेषी -षिणी -षि (न्), जनद्वेषी &c., सर्व्वद्वेषी &c., विश्वद्वेषी &c., जनवैरी -रिणी &c., अपरिचयी -यिनी &c., अपरिचयशीलः -ला -लं, अपरिचेयः -या -यं.

MISANTHROPY, s. पुरुषद्वेषः, जनद्वेषः, सर्व्वलोकद्वेषः, जनवैरिता, जनशत्रुता, सर्व्वलोकशत्रुता, लोकवैरत्वं, अपरिचयशीलता, जनद्रोहः, मनुष्यत्रासः, जनापकारबुद्धिः f.

MISAPPLICATION, s. कुप्रयोगः, असत्प्रयोगः, अन्यथाप्रयोगः.—(Of money) असद्व्ययः, कुव्ययः, अन्यथाव्ययः.

To MISAPPLY, v. a. कुप्रयोगं कृ, कुविनियोगं कृ, अन्यथा or मिथ्या प्रयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं) or विनियुज्.

To MISAPPREHEND, v. a. अन्यथा ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or बुध् (c. 1. बोधति -धितुं) or अवगम् (c. 1. -गच्छति -गन्तुं), विपरीतार्थं ग्रह्, विपरीतम् उपलभ् (c. 1. -लभते -लब्धुं), विपरीतार्थग्रहणं कृ.

MISAPPREHENSION, s. अन्यथाग्रहणं, विपरीतग्रहणं, अन्यथाबोधः, विपरीतबोधः, अन्यथार्थबोधः, अर्थविपर्य्यासकरणं, विपरीतार्थग्रहणं, विपरीतार्थबोधः, भ्रमः, मिथ्यामतिः f.

To MISBECOME, v. a. न युज् in pass. (युज्यते), न उपपद् (c. 4. -पद्यते).

MISBECOMING, a. अयोग्यः -ग्या -ग्यं, अयुक्तः -क्ता -क्तं, अनुचितः -ता -तं.

MISBEGOT, MISBEGOTTEN, a. विजातः -ता -तं, विजनितः &c., कुजातः &c.

To MISBEHAVE, v. n. अयुक्तं or असम्यक् चर् (c. 1. चरति -रितुं) or आचर् or वृत् (c. 1. वर्त्तते -र्त्तितुं), दुराचारः -रा -रं भू, दुराचारं कृ, व्यभिचारं कृ, मर्य्यादातिक्रमं कृ, दुर्वृत्तः -त्ता -त्तं भू.

MISBEHAVED, a. दुर्विनीतः -ता -तं, अविनीतः -ता -तं, दुश्चरितः -ता -तं, दुश्चेष्टितः -ता -तं, दुर्वृत्तः -त्ता -त्तं, कुशीलः -ला -लं, असुशीलः -ला -लं. See ILL-BRED.

MISBEHAVIOUR, s. दुर्विनीतता, अविनयः, कुनीतिः f., दुश्चेष्टितं, कुचेष्टितं, दुर्वृत्तिः f., कुनीतिः f., कुचरितं, कुचर्य्या, व्यभिचारः, दुराचारः, मर्य्यादातिक्रमः.

MISBELIEF, s. अन्यथाश्रद्धा, कुप्रत्ययः, कुश्रद्धा, मिथ्याविश्वासः.

To MISCALCULATE, v. a. अन्यथा or मिथ्या or असम्यग् गण् (c. 10. गणयति -यितुं) or विगण् or संख्या (c. 2. -ख्याति -तुं), मिथ्यागणनां कृ.

MISCALCULATED, p. p. मिथ्यागणितः -ता -तं, अन्यथागणितः &c., असम्यग्गणितः &c.

MISCALCULATION, s. मिथ्यागणना -नं, असम्यग्गणना, अन्यथागणना, दुर्गणना, कुगणना, कुपरिसंख्या.

To MISCALL, v. a. मिथ्याभिधानं कृ or दा, मिथ्या or अन्यथा आख्या (c. 2. -ख्याति -तुं) or अभिधा (c. 3. -दधाति -धातुं), मिथ्यानाम कृ.

MISCALLED, p. p. मिथ्याभिहितः -ता -तं, मिथ्याख्यातः -ता -तं.

MISCARRIAGE, s. (Failure) असिद्धिः f., विपत्तिः f., कार्य्यविपत्तिः f., असम्पत्तिः f., अनुपपत्तिः f., अप्रतिपत्तिः f., भङ्गः, अकरणिः f., असङ्गतिः f., दुर्गतिः f., वैफल्यं, असत्फलं, अशुभफलं, अशुभगतिः f.—(Ill-conduct) कुनीतिः f., अनीतिः f., अविनयः, दुर्वृत्तिः f., कुचर्य्या, दुराचरणं, कुचेष्टितं.—(Bringing forth before the time) गर्भस्रावः, गर्भपातः, गर्भपतनं, गर्भस्रवः, गर्भप्रस्रवणं, गर्भच्युतिः f., गर्भविध्वंसनं, गर्भस्पन्दनं, असम्प्राप्तकालगर्भनिःसरणं, पिण्डपतनं, स्रवः, स्रावः. When it takes place before the fourth month it is called गर्भस्रावः, after that गर्भपातः, 'to cause miscarriage,' गर्भं पत् (c. 10. पातयति -यितुं), or च्यु (c. 10. च्यावयति -यितुं) or स्रु (c. 10. स्रावयति -यितुं); 'causing it,' गर्भपाती -तिनी &c., गर्भपातकः -का -कं, गर्भस्रावी &c.

To MISCARRY, v. n. (Not to succeed) न सिध् (c. 4. सिध्यति सेद्धुं)

न सम्पद् (c. 4. -पद्यते -पत्तुं), न उपपद्, प्रतिहन् in pass. (-हन्यते), विफलीभू, निष्फलीभू, वृथाभू, मोघीभू, भग्नः -ग्ना -ग्नं भू, सिद्धिं न प्राप् (c. 5. -आप्नोति -आप्तुं), असिद्धः -द्धा -द्धं भू.—(Bring forth before the time) अपगर्भा भू, पातगर्भा भू, अप्राप्तकाले च्युतगर्भा or निःसृतगर्भा भू or गर्भच्युता भू.

Miscellaneous, *a.* नानाजातीयः -या -यं, अनेकजातीयः -या -यं, नानाप्रकारः -रा -रं, भिन्नजातीयः &c., विजातीयः &c., नानाविधः -धा -धं, अनेकविधः -धा -धं, प्रकीर्णः -र्णा -र्णं, सङ्कीर्णः -र्णा -र्णं. सान्निपातिकः -की -कं. नानाविषयकः -का -कं. विविधः -धा -धं. सवर्गीयः -या -यं, सम्पर्की -र्किणी -र्कि (न्), प्रकीर्णभाक्तिः -क्तिः -क्ति.

Miscellaneously, *adv.* प्रकीर्णं, सङ्कीर्णं, नानाविधं, नानाप्रकारैः. सन्निपाततस्.

Miscellaneousness, *s.* प्रकीर्णता, सङ्कीर्णता, जातिप्रकीर्णता, नानाजातित्वं.

Miscellany, *s* नानाद्रव्यसङ्ग्रहः, नानाविषयसङ्ग्रहः, नानावस्तुसमूहः, नानाद्रव्यसन्निपातः, सम्मिश्रद्रव्यसमूहः, प्रकीर्णद्रव्यसङ्ग्रहः, सङ्कीर्णवस्तुसमूहः, प्रकीर्णकं. सन्निपातः.—(Book, pamphlet) नानाविषयग्रन्थः, प्रकीर्णग्रन्थः, प्रकीर्णकं, प्रकीर्णं

Mischance, *s.* विपद् *f.*, विपत्तिः *f.*, आपद् *f*, दुर्दैवं, दुर्गतिः *f.*, अपायः.

Mischief, *s.* (Injury, harm) हिंसा, अपकारः, अपकृतं -तिः *f.*, अपक्रिया, अपायः, द्रोहः, अभिद्रोहः, घातः, अर्दना, दूषणं, अनिष्टं, अरिष्टं, खलता, खलीकारः.—(Damage) क्षतिः *f.*, क्षतं, परिक्षतिः *f.*, परिक्षतं, अपायः, नाशः, हानिः *f.*, अपकृतं, अपचयः, अपचितिः *f*, ध्वंसः, बाधः, दुःखं, दोषः, व्यसनं, कष्टं; 'loving mischief,' अपकारप्रियः -या -यं, कदनप्रियः -या -यं.

Mischief-maker, *s* उपजापकः, कर्णेजपः, भेदकरः, भेदजनकः, सुहृद्भेदकरः, मित्रभेदकः, भेदकः, वैरकरः, कलिकारकः, पिशुनः, दुर्जनः, खलः.

Mischief-making, *s.* उपजापः, कर्णेजापः, सुहृद्भेदनं, मित्रभेदनं, वैरकरणं, पैशुन्यं, दौर्जन्यं, खलता, कलिकरणं.

Mischievous, *a.* (Injurious) हिंस्रः -स्रा -स्रं, हिंसकः -का -कं, हिंसात्मकः -का -कं, हिंसालुः -लुः -लु, अपकारी -रिणी -रि (न्), अपकारकः -का -कं, अपकरः -री -रं, हिंसाशीलः -ला -लं, परहिंसाशीलः -ला -लं, हिंसारतः -ता -तं, क्षतिकरः -रा -रं, अनिष्टकरः -री -रं, नृशंसः -सा -सं, नृशंसवृत्तः -त्ता -त्तं, द्रोही -हिणी &c., घातुकः -का -कं, उपघातकः -का -कं, बाधकः -का -कं, अहितकारी &c., क्षतिकरः -री -रं, भीकरः -री -रं.—(Inclined to do harm) अपकारबुद्धिः -द्धिः -द्धि, क्षतिकरणशीलः -ला -लं, हिंसारुचिः -चिः -चि, बाधनशीलः &c., अपायशीलः &c., दूषणशीलः &c., दुष्टबुद्धिः &c., पापः -पा -पं.—(Noxious) आरुकः -का -कं, आरारुः -रुः -रु, दूषकः -का -कं, सबाधः -धा -धं, अहितः -ता -तं.—(Full of mischievous pranks) छान्दसः -सी -सं, कुचेष्टाप्रियः -या -यं, कुचेष्टितः -ता -तं, दुश्चेष्टितः -ता -तं, कितवः -वा -वं, व्यसनी -निनी &c., दुर्गुणी &c.; 'mischievous tricks,' कुचेष्टा, कुचेष्टितं, छन्दस् *n.*; 'mischievous person,' लोककण्टकः, पंक्तिदूषकः

Mischievously, *adv.* हिंसया, सापकारं, अपकारेण, सापायं, क्षतिपूर्वं, सक्षतं, अपकारबुद्ध्या, अपकारशीलत्वात्, दुष्टबुद्ध्या, सबाधं.

Mischievousness, *s.* हिंस्रता, हिंसाशीलता, परहिंसाशीलता, हिंसारुचिता, हिंसालुता, क्षतिकारिता, अपकारशीलता, अपकारः, अपकृतिः *f.*, अपकारिता, बाधकत्वं, द्रोहबुद्धित्वं, दूषकता, कैतवं, कैतवप्रयोगः

Miscible, *a.* मिश्रणीयः -या -यं, मिश्रणयोग्यः -ग्या -ग्यं, मिश्रणार्हः -र्हा -र्हं, योजनीयः -या -यं, याव्यः -व्या -व्यं.

Miscomputation, *s.* मिथ्यागणना, असम्यग्गणनं, अन्यथागणनं, कुगणना.

To misconceive, *v. a.* or *n.* अन्यथा or मिथ्या बुध् (c. 1. बोधति -धितुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or उपलभ् (c. 1. -लभते -लब्धुं) or अवगम् (c. 1. -गच्छति -गन्तुं), अन्यथार्थं ग्रह्, विपरीतार्थं ग्रह्, विपरीतबोधनं कृ. विपरीतार्थग्रहणं कृ, अर्थविपर्यासं कृ.

Misconception, *s.* अन्यथाग्रहणं, मिथ्याग्रहणं, मिथ्यामतिः *f.*, मिथ्याबुद्धिः *f.* विपरीतग्रहः -हणं, अन्यथाबोधः, अन्यथार्थबोधः, विपरीतबोधः, विपरीतार्थबोधः, विपरीतार्थग्रहणं. भ्रमः, भ्रान्तिः *f.*, अर्थविपर्यासः

Misconduct, *s* (Ill-behaviour) दुश्चरितं, दुश्चेष्टितं, कुचेष्टितं, कुचरितं, अविनयः, अविनीतता, कुचर्य्या, कुचरितं, कुचेष्टितं, दुर्नीतं, दुर्नीतिः *f.* दुर्णयः, दुराचारः, दुराचरणं, असदाचारः, असदाचरणं, कदाचारः. कुव्यवहारः, असद्व्यवहारः, कुकर्म्म *n.* (न्), कुकृत्यं, व्यभिचारः, अन्यथाचारः, अन्यथाचरणं, अपचारः, कुशीलता, अमर्य्यादा, मर्य्यादातिक्रमः.—(Ill management) दुर्णयः -यनं, दुर्निर्वाहः, असन्निर्वाहः.

To misconduct, *v. a.* (Conduct badly) अन्यथा or अयुक्तं or दुष्टु or असम्यग् निर्वह् (c. 10. -वाहयति -यितुं) or प्रणी (c. 1. -णयति -णेतुं) or सम्पादि or प्रवृत् (c. 10.-वर्त्तयति -यितुं), दुर्निर्वाहं कृ, असन्निर्वाहं कृ दुर्णयनं कृ.—(Misconduct one's self) अयुक्तं or असम्यक् चर् (c. 1. चरति -रितुं) or आचर् or वृत् (c. 1. वर्त्तते -र्त्तितुं), व्यभिचारं कृ मर्य्यादातिक्रमं कृ.

Misconducted, *a* दुर्विनीतः -ता -तं, दुश्चरितः -ता -तं. *See* Misbehaved

Misconjecture, *s.* मिथ्यानुमानं, अन्यथानुमानं, मिथ्यावितर्कः.

To misconjecture, *v. n* मिथ्या or अन्यथा अनुमा (c. 2. -माति -तुं) or तर्क् (c. 10. तर्कयति -यितुं) or वितर्क्, मिथ्यानुमानं कृ.

Misconstruction, *s.* अन्यथाग्रहणं, मिथ्याग्रहणं, विपरीतबोधनं, मिथ्याबोधनं, अयथार्थबोधनं, अन्यथाबोधनं, विपरीतग्रहणं, विपरीतार्थबोधः अन्यथार्थबोधः, विपरीतार्थकरणं, अन्यथार्थकरणं, मिथ्यार्थव्याख्या.

To misconstrue, *v. a.* अन्यथा or मिथ्या अर्थं बुध् (c. 1. बोधति -धितुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or उपलभ् (c. 1. -लभते -लब्धुं), मिथ्या अर्थं व्याख्या (c. 2. -ख्याति -तुं), विपरीतार्थं ग्रह्, विपरीतबोधनं कृ विपरीतार्थग्रहणं कृ.

Miscreant, *a.* (Infidel) नास्तिकः.—(Vile wretch) पापीयान् *m.* (स्), पापिष्ठः, पापः, दुर्जनः, दुरात्मा *m.* (न्), दुर्वृत्तः, जाल्मः, खलः नराधमः; 'daring miscreant,' साहसिकः.

Misdeed, *s.* कुकर्म्म *n.* (न्), दुष्कृतं, दुष्कर्म्म *n.*, अपकर्म्म *n.*, दुष्कृतिः *f.* कुकृत्यं, असत्कर्म्म *n.*, कुक्रिया, पापकर्म्म *n.*, दुश्चरितं, कुचरितं, कुचेष्टितं, अपचारः

To misdemean. *See* To misconduct, misbehave.

Misdemeanor, *s.* *See* Misconduct. (Minor offence) उपपातकं

To misdirect, *v. a.* (Put in the wrong road) विमार्गं or विपरीतमार्गं दृश् (c. 10. दर्शयति -यितुं), विपथं प्रदृश्, अन्यथा मार्गं दृश् or उद्दिश् (c. 6. -दिशति -देष्टुं), विपरीतपथं प्रदिश्. विमार्गप्रदर्शनं कृ.—(A letter) अन्यथा पत्रसंज्ञां लिख् (c. 6. लिखति, लेखितुं) or कृ

Misdirection, *s.* विमार्गप्रदर्शनं, विपरीतमार्गदर्शनं, मिथ्योद्देशः.

Misdoer, *s.* कुकर्म्मकारी *m.* (न्), कुकर्म्मा *m.* (न्), पापकारी *m.* (न्) पापकर्त्ता *m.* (र्तृ), पापकरः, पापकृत् *m.*, पापकर्म्मा *m.*, असत्कर्म्मा *m.*, अन्यायकारी *m.*, अन्यथाचारी *m.*, मन्दचरित्रः.

Misdoing, *s.* दुष्कृतं. कुकर्म्म *n.* (न्), पापं, अपराधः. *See* Misdeed.

To misemploy, *v. a.* कुप्रयोगं कृ, कुविनियोगं कृ, असत्प्रयोगं कृ, अन्यथा or असम्यक् प्रयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं) or विनियुज्.

Misemployed *p. p.* कुप्रयुक्तः -क्ता -क्तं, कुविनियुक्तः &c., असम्यक्प्रयुक्तः &c.

Misemployment, *s* कुप्रयोगः, कुविनियोगः, असत्प्रयोगः, असम्यक्प्रयोगः

अन्यथाप्रयोग असम्यक्प्रयोग कुव्यापार कुव्यय असद्व्यय'

A ...er ... कृपण न्द्रमुष्टि m गाढमुष्टि दानशत्रु दानविमुख व्ययनाशशील अत्यागशील अस्वव्ययी m न् अस्य दाता m. (तृ), अदाता m., मितव्ययः, किम्पचः, कदर्य्यः, मत्सरी m. (न्), व्ययशङ्कितः, व्ययपराङ्मुखः, अर्थपरः, धनलाभपरः.

MISERABLE, *a* (Very unhappy) अतिदुःखी -खिनी -खि (न्), गाढदुःखान्वितः -ता -तं, अतिदुःखितः -ता -तं, अतिक्लेशी -शिनी &c., अतिक्लेशितः &c., अतिदुःखार्त्तः -र्त्ता -र्त्तं, अतिशोकार्त्तः -र्त्ता -र्त्तं, निरानन्दः -न्दा -न्दं, अतिदीनः -ना -नं. अतिखिन्नः -न्ना -न्नं, अतिनिर्वेदः -दा -दं, making one's self miserable,' आत्मद्रोही &c.—(Very poor or mean) अतिकृपणः -णा -णं, कृपणः -णा -णं, कुत्सितः -ता -तं, तुच्छः -च्छा -च्छं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं.—(Unfortunate) आपद्ग्रस्तः -स्ता -स्तं, विपद्ग्रस्तः &c., विपन्नः -न्ना -न्नं, आपन्नः -न्ना -न्नं दुःखापन्नः &c., दुर्दशाग्रस्तः &c., मन्दभाग्यः -ग्या -ग्यं, दुर्भाग्यः &c., दैवोपहतः -ता -तं, आपत्प्राप्तः -प्ता -प्तं; 'miserable wretch,' तपस्वी m. (न्).

MISERABLENESS, *s.* अतिदुःखिता, अतिदीनता, कृपणता, अतिकार्पण्यं.

MISERABLY, *adv* कृपणं, अतिकृपणं, अतिकार्पण्येन. अतिदुःखितवत्.

MISERLY, *a* कृपणः -णा -णं, कदर्य्यः -र्य्या -र्य्यं, दानविमुखः -खा -खं, दानपराङ्मुखः &c., दृढमुष्टिः -ष्टिः -ष्टि, गाढमुष्टिः -ष्टिः -ष्टि, अदानशीलः -ला -लं, अस्वव्ययी -यिनी -यि (न्), व्ययपराङ्मुखः -खा -खं, व्ययशङ्कितः -ता -तं. मितव्ययः -या -यं, किम्पचः -चा -चं, किम्पचानः -ना -नं, अत्यागशीलः -ला -लं, अदाता -त्री -तृ (तृ), अनुदारः -रा -रं. मत्सरी -रिणी &c., अर्थपरः -रा -रं, धनलाभपरः -रा -रं, क्षुद्रः -द्रा -द्रं, कीकटः -टी -टं.

MISERY, *s.* (Great unhappiness, distress) अतिदुःखं, अतिशयदुःखं, दुःखं, क्लेशः, अतिक्लेशः, अतिशयक्लेशः. दुःखावस्था. दुःखदुःखं, गाढदुःखं, शोकः, गाढशोकः, दैन्यं, दीनता, अतिदीनता, विखिन्न -ता, आनिर्वृतिः *f.*—(Extreme pain) अतिबाधा, अतिव्यथा, अतिशयतापः, परितापः, सन्तापः, अतिकृच्छ्रं, अतिवेदना.—(Calamity) दुःखं, व्यसनं, विपत्तिः *f.*, आपद् *f.*, विपद् *f.*, दुर्गतिः *f.*, दुर्दशा, दौर्गत्यं, दुरवस्था, अपायः, अनिष्टं, अरिष्टं, निर्ऋतिः *f.*, व्यतिकरः.

MISFORTUNE, *s.* (Ill-fortune) दुर्दैवं, दुर्भाग्यं, दौर्भाग्यं, कुभाग्यं, दुर्गतिः *f.*, दौर्गत्यं, अशुभं, अकुशलं, अभद्रं, अमङ्गलं, दुरदृष्टं, दुर्नीतं, अश्रीकं, अनयः, अनर्थः, आलक्षण्यं, निर्ऋतिः *f.*—(Calamity, disaster) आपद् *f*, विपद्, विपत्तिः *f.*. व्यापद् *f.*, व्यसनं, अनिष्टं, अनिष्टपातः, अनिष्टापातः, अपायः, दुर्घटना, उत्पातः, अनयः, दुःखं, कष्टं, दुर्दशा, दुरवस्था.—(Misfortune personified) अलक्ष्मीः *f.*, अवलक्ष्मीः *f.*, महामाया; 'fallen into misfortune,' आपद्गतः -ता -तं, विपद्गतः -ता -तं. आपत्प्राप्तः -प्ता -प्तं, आपद्ग्रस्तः -स्ता -स्तं, अनयङ्गतः -ता -तं.

To MISGIVE, *v. a.* (Used in English with heart and the reciprocal pronoun, and expressed in Sanskrit by) शङ्क् (c. 1. शङ्कते -ङ्कितुं), आशङ्क्, विशङ्क्, उद्विज् (c. 6. -विजते -जितुं), वेप् (c. 1. वेपते -पितुं), प्रवेप्, न विश्वस् (c. 2. -श्वसिति -तुं), न प्रती (c. 2 प्रत्येति -तुं rt. इ), सन्देहं कृ, संशयं कृ, विकॢप् (c. 1. -कल्पते -ल्पितुं, c. 10. -कल्पयति -यितुं); 'my heart misgives me,' वेपते मे हृदयं, उद्विजते मे हृदयं.

MISGIVING, *s* शङ्का, आशङ्का, सन्देहः, संशयः, विकल्पः, विकल्पितं, अविश्वासः, अप्रत्ययः, अप्रतीतिः *f.*, 'having misgivings,' साशङ्कः -ङ्का -ङ्कं, आशङ्कान्वितः -ता -तं, शङ्काशीलः -ला -लं.

a ... -ता -तं ... &c., दुर्विनयविहितः &c.

To MISGOVERN, *v. a.* असम्यक् पाल् ... (c. 10. पालयति -यितुं) ... शास् (c. 2 शास्ति -सितुं), असम्यक्पालनं कृ, कुशासनं कृ, असम्यक्शासनं कृ, असत्पालनं कृ.

MISGOVERNED, *p. p.* असम्यक्पालितः -ता -तं, कुशासितः -ता -तं.

MISGOVERNMENT, MISGOVERNANCE, *s.* असम्यक्पालनं, असम्यक्शासनं, कुशासनं, कुशास्तिः *f.*, असत्पालनं, अन्यथाशासनं.

To MISGUIDE, *v. a.* विमार्गेण or उन्मार्गेण or कुमार्गेण नी (c. 1. नयति नेतुं), विमार्गं दृश् (c. 10. दर्शयति -यितुं) or उद्दिश् (c. 6 -दिशति -देष्टुं), अन्यथा नी.

MISGUIDED, *a.* असम्यगुपदिष्टः -ष्टा -ष्टं, कुमन्त्रितः -ता -तं. कुशिक्षितः -ता -तं, दुर्विनीतः &c, सत्पथभ्रष्टः -ष्टा -ष्टं, सन्मार्गभ्रष्टः &c, मार्गभ्रष्टः &c.

MISHAP, *s.* विपद् *f.*, आपद् *f.*, विपत्तिः *f*, दुर्गतिः *f.*, दौर्गत्यं, अनिष्टपातः, अनिष्टापातः, दुर्घटना, व्यसनं, दुर्नीतं. *See* MISFORTUNE.

To MISINFER, *v a.* मिथ्या or अन्यथा अनुमा (c. 2. -माति -तुं), मिथ्यानुमानं कृ.

To MISINFORM, *v. a.* अयथार्थं or अन्यथा in caus. (ज्ञापयति, ज्ञपयति -यितुं), मिथ्या or मृषा बुध् (c. 10 बोधयति -यितुं), असम्यग् अर्थं ख्या (c. 2. ख्याति -तुं) or आख्या.

MISINFORMED, *p p.* मिथ्याज्ञप्तः -प्ता -प्तं, मिथ्याबोधितः &c, अयथार्थज्ञप्तः &c.

To MISINTERPRET, *v. a* अयथार्थं or अन्यथा व्याख्या (c. 2. -ख्याति -तुं), अन्यथार्थं व्याख्या —(Understand in a wrong sense) अन्यथा or मिथ्या अर्थं बुध् (c. 1. बोधति -धितुं) or ग्रह् (c. 9 गृह्णाति, ग्रहीतुं) विपरीतार्थं ग्रह्, विपरीतार्थबोधनं कृ.

MISINTERPRETATION, *s* अयथार्थव्याख्यानं, अन्यथार्थव्याख्यानं, अयथार्थबोधः, मिथ्याबोधनं, विपरीतबोधनं, अन्यथाग्रहणं.

MISINTERPRETED, *p. p.* अन्यथाव्याख्यातः -ता -तं, अन्यथाबोधितः -ता -तं.

To MISJUDGE, *v. a.* अन्यथा or मिथ्या विचर् (c. 10. -चारयति -यितुं) or विभावनं कृ.

MISJUDGEMENT, *s.* मिथ्याविचारः, अन्यथाविचारः, कुविवेचना, कुनिश्चितिः *f.*

MISLAID, *p. p.* स्थानभ्रष्टः -ष्टा -ष्टं, स्थानप्रभ्रष्टः -ष्टा -ष्टं, अस्थानवर्त्ती -र्त्तिनी -र्त्ति (न्), अस्थाने -स्ता -स्तं, नष्टः -ष्टा -ष्टं. 'a thing mislaid,' नष्टं ...

To MISLAY, *v. a.* अस्थानीकृ, विस्थानीकृ, अपस्थानीकृ, अस्थाने कृ or धा (c. 3. दधाति, धातुं), अस्थाने धृ (c. 1. धरति, धर्त्तुं), नश् (c. 10. नाशयति -यितुं).

To MISLEAD, *v. a.* विमार्गेण or उन्मार्गेण नी (c. 1 नयति, नेतुं) विमार्गं or विपथं दृश् (c. 10. दर्शयति -यितुं) or उद्दिश् (c. 6 दिशति देष्टुं) or प्रदिश्, अन्यथा or अयथार्थम् उपदिश् or निर्दिश् or आदिश् or शिक्ष् (c. 10. शिक्षयति -यितुं), कुशिक्षां कृ, कुनिर्देशं कृ, भ्रम् (c. 1 भ्रमयति -यितुं), भ्रान्तिं जन् (c. 10. जनयति -यितुं), विमार्गनयनं कृ विमार्गप्रदर्शनं कृ.

MISLED, *p. p.* भ्रान्तः -न्ता -न्तं, विमार्गगामी -मिनी -मि (न्), उन्मार्गगामी &c. सत्पथभ्रष्टः -ष्टा -ष्टं, सन्मार्गभ्रष्टः &c., उत्पथगामी &c., कुमार्गप्रवृत्तः -त्ता -त्तं, कुशिक्षितः -ता -तं, दुर्विनीतः -ता -तं.

To MISLIKE, *v. a.* *See* *To* DISLIKE.

To MISMANAGE, *v. a.* अन्यथा or अयुक्तं or असम्यग् निर्वह् (c. 10 -वाहयति -यितुं) or प्रणी (c. 1. -णयति -णेतुं) or सम्प्रणी or प्रवृत् (c. 10. -वर्त्तयति -यितुं) दुर्निर्वाहं कृ, असन्निर्वाहं कृ, दुर्णयनं कृ दुर्णीतिं कृ, असन्नयनं कृ, दुराचरणं कृ.

MISMANAGED, *p. p.* दुर्णीतः -ता -तं, असम्यङ्नीतः -ता -तं, दुर्निर्वाहितः -ता -तं, कुनिर्वाहितः -ता -तं, कुप्रणीतः -ता -तं, कुप्रवर्त्तितः -ता -तं दुर्वर्त्तितः -ता -तं, दुराचरितः -ता -तं.

s. दुर्व्यवहारः, दुर्णीतिः *f.*, कुनीतिः *f.*, कुनयनं ...

वाहः, दुर्निर्वाहः, दुर्निर्वहणं, दुर्णीतं, असन्निर्वाहः, कुप्रणयनं, कुप्रवर्त्तनं, दुराचरणं, अन्यथाचरणं, दुर्णीतत्वं, असत्क्रिया.

To MISNAME, *v. a.* मिथ्यानाम कृ or दा, अन्यथानाम कृ. *See* MISCALL.

MISNOMER, *s.* मिथ्यानाम *n.* (न्), मिथ्याभिधानं, अन्यथानाम *n.*, अयोग्यनाम *n.*, अयुक्तनाम *n.*, अनुपयुक्तनाम *n.*, अनुपयुक्तसंज्ञा.

MISOGAMIST, *s.* विवाहद्वेषी *m.* -षिणी *f.*, उद्वाहद्वेषी &c., विवाहनिन्दकः.

MISOGAMY, *s.* विवाहद्वेषः, उद्वाहद्वेषः, विवाहनिन्दा, उद्वाहशत्रुता.

MISOGYNIST, *s.* स्त्रीद्वेषी *m.* (न्), स्त्रीद्वेष्टा *m.* (ष्टृ), स्त्रीनिन्दकः.

MISOGYNY, *s.* स्त्रीद्वेषः, स्त्रीनिन्दा, स्त्रीवैरं, स्त्रीशत्रुता.

To MISPLACE, *v. a.* अस्थानीकृ, विस्थानीकृ, अस्थाने कृ or धा (c. 3. दधाति, धातुं) or निधा, अनुपयुक्तपदे स्था in caus. (स्थापयति -यितुं), अन्यथा स्था, असम्यक् स्था or निधा (c. 3. -दधाति -धातुं) or प्रयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं).

MISPLACED, *p. p.* अस्थानः -ना -नं, अस्थानीकृतः -ता -तं, अस्थाने निहितः -ता -तं or विहितः -ता -तं, अनुपयुक्तपदे स्थापितः -ता -तं.

MISPRINT, *s.* अशुद्धं, अशुद्धिः *f.*, अशोधनं, अशुद्धमुद्रा, पुस्तकमुद्राङ्कने दोषः, मुद्राङ्कनदोषः.

To MISPRINT, *v. a.* अशुद्धमुद्रां कृ, अशुद्धमुद्राङ्कनं कृ, मुद्राङ्कनदोषं कृ, अशुद्धमुद्रया अङ्क् (c. 10. अङ्कयति -यितुं), अशुद्धमुद्रीकृ.

MISPRINTED, *p. p.* अशुद्धमुद्राङ्कितः -ता -तं, अशुद्धमुद्रीकृतः -ता -तं.

MISPRISION, *s.* अपराधगोपनं.—(Of treason) राजाभिद्रोहगोपनं.

To MISPRONOUNCE, *v. a.* अशुद्धोच्चारणं कृ, अशुद्धम् उच्चर् (c. 10. -चारयति -यितुं).

MISPRONUNCIATION, *s.* अशुद्धोच्चारणं, असदुच्चारणं, अन्यथोच्चारणं.

MISPROPORTIONED, *a.* विषमप्रमाणः -णा -णं, असमप्रमाणकः -का -कं.

MISQUOTATION, *s.* मिथ्यावतरणं, अन्यथावतरणं, अयथार्थोद्धारः.

To MISQUOTE, *v. a.* अन्यथा or अयथार्थम् अवतॄ (c. 10. -तारयति -यितुं), अयथार्थतो वाक्यम् उद्धृ (c. 1. -हरति -हर्त्तुं), अयथार्थवाक्यम् उपन्यस् (c. 4. -अस्यति -असितुं).

MISREPORT, *s.* मिथ्याकथनं, मिथ्यानिवेदनं, अन्यथानिवेदनं, अयथार्थाख्यानं, मिथ्याख्यापनं, मृषाकथा.

To MISREPORT, *v. a.* मिथ्या or अन्यथा कथ् (c. 10. कथयति -यितुं) or निविद् (c. 10. -वेदयति -यितुं), अयथार्थेन आख्या (c. 2. -ख्याति -तुं, caus. -ख्यापयति -यितुं).

To MISREPRESENT, *v. a.* मिथ्या or अन्यथा or मृषा कथ् (c. 10. कथयति -यितुं) or आविद् (c. 10. -वेदयति -यितुं) or निविद्, अयथार्थतः ख्या (c. 2. -ख्याति -तुं, caus. ख्यापयति -यितुं), असम्यक् कथ्, असत्यं वर्ण् (c. 10. वर्णयति -यितुं) or विवृ (c. 5. -वृणोति -वरितुं -रीतुं), अर्थं साचीकृ or वक्रीकृ.

MISREPRESENTATION, *s.* मिथ्याकथनं, अन्यथाकथनं, अन्यथाख्यापनं, अन्यथानिवेदनं, मिथ्यानिवेदनं, अयथार्थख्यापनं, मिथ्यावादः, मृषावादः, अन्यथाविवरणं, मिथ्यावर्णनं, असत्यवर्णना, साचीकरणं, साचीकृतं, अर्थवक्रीकरणं.

MISRULE, *s.* असम्यक्पालनं, असम्यक्शासनं, कुशासनं, कुशास्तिः *f.*, असत्पालनं, दुःशासनं, दुर्णीतिः *f.*

To MISS, *v. a.* (Fail of reaching, not to hit) लक्ष्यम् अभिसन्धाय अपराध् (c. 4. -राध्यति, c. 5. -राध्नोति -राद्धुं) or अपराधं कृ or भ्रान्तिं कृ, भ्रमं कृ: 'one who misses the mark in archery,' अपराद्धपृषत्कः, लक्ष्यच्युतसायकः.—(Fail of finding, miss the way) भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), मार्गात् or पथात् प्रभ्रंश् (c. 4. -भ्रश्यति -भ्रंशितुं) or भ्रंश्, मार्गाद् विचल् (c. 1. -चलति -लितुं), मार्गभ्रंशं कृ.—(Fail of obtaining) न प्राप् (c. 5. -आप्नोति -आप्तुं), न लभ् (c. 1. लभते, लब्धुं), न आसद् (c. 10. -आसादयति -यितुं), अपराध्.—(Discover to be wanting or lost) नष्ट or स्थानभ्रष्टं किञ्चिद् ज्ञा (c. 9. जानाति ज्ञातुं), नष्टं मन् (c. 4. मन्यते, मन्तुं), नाशं or अभावं or अदर्शनं ज्ञा.—(Feel the want of, regret the absence of) उत्कण्ठ् (c. 1. -कण्ठते -ण्ठितुं), उत्सुक (nom. उत्सुकायते), उन्मनस् (nom. उन्मनायते), उत्कण्ठां कृ, उत्कलिकां कृ.—(Omit) हा (c. 3. जहाति, हातुं), अपाहा, अपहा, विहा, त्यज् (c. 1. त्यजति, त्यक्तुं), अपास् (c. 4. -अस्यति -असितुं), विसृज् (c. 6. -सृजति -स्रष्टुं), वृज् (c. 10. वर्जयति -यितुं), परिवृज्.—(Lose) हा in pass. (हीयते) with instr. or abl. c., भ्रंश् with abl. c. *See* To LOSE.

To MISS, *v. n.* अपराध् (c. 4. -राध्यति -ते -राद्धुं), भ्रम् (c. 4. भ्राम्यति भ्रमितुं), अपराद्धः -द्धा -द्धं भू, अपराधं कृ, भ्रमं कृ.—(Not to succeed, miscarry) न सिध् (c. 4. सिध्यति, सेद्धुं), न सम्पद् (c. 4. -पद्यते -पत्तुं) सिद्धिं न प्राप् (c. 5. -आप्नोति -आप्तुं) or गम् (c. 1. गच्छति, गन्तुं), असिद्धः -द्धा -द्धं भू.

MISS, *s.* (Error) भ्रमः, भ्रान्तिः *f.*, अपराधः, भ्रंशः, दोषः, भ्रेषः, उत्क्रमः: 'a miss is as good as a mile,' अन्तरं महदन्तरं.—(Loss, want) नाशः, हानिः *f.*, अभावः, असम्भवः, अविषयः, अदर्शनं, विरहः.—(Young girl) कुलकन्या, कुलीनकन्या, कुलकुमारी.

MISSED, *p. p.* अपराद्धः -द्धा -द्धं, कृतापराधः -धा -धं, भ्रान्तः -न्ता -न्तं.

To MIS-SEND, *v. a.* अन्यथा or वृथा प्रेर् (c. 10. प्रेरयति -यितुं) or प्रेष् (c. 10. प्रेषयति -यितुं).

MIS-SHAPED, MIS-SHAPEN, *a.* विरूपः -पा -पी -पं, अपरूपः &c., कुरूपः &c., अरूपः &c., विकृताकारः -रा -रं, विकृताङ्गः -ङ्गी -ङ्गं, विकृताकृतिः -तिः -ति, व्यङ्गः -ङ्गी -ङ्गं, व्याकारः &c.

MISSILE, *a.* क्षेपणीयः -या -यं, हस्तक्षेपणीयः &c., हस्तक्षेप्यः -प्या -प्यं, पाणिमोक्षणीयः -या -यं, क्षिप्रगुः -गुः -गु, दूरात् क्षेपणीयः &c., दूरवेधी -धिनी -धि (न्).

MISSILE, *s.* (Weapon) अस्त्रं, क्षिपणिः *m.*, करमुक्तं, पाणिमुक्तं, मुक्तं, क्षेप्यायुधं.—(Circular one) चक्रं.

MISSING, *part.* or *a.* (Regretting the absence of) उत्कण्ठितः -ता -तं, उत्सुकः -का -कं, उन्मनाः -नाः -नः (स्), उत्कलितः -ता -तं.—(Lost, stray, absent from its place) नष्टः -ष्टा -ष्टं, भ्रष्टः -ष्टा -ष्टं, स्थानभ्रष्टः &c., प्रभ्रष्टः &c., स्थानप्रभ्रष्टः &c., स्थानच्युतः -ता -तं, प्रच्युतः &c., तिरोहितः -ता -तं, अदृष्टः -ष्टा -ष्टं.

MISSION, *s.* (Sending, commission) प्रेरणं, प्रेषणं, नियोजनं, प्रयोजनं: 'sending on a message,' प्रतिशासनं.—(Body of persons sent) प्रेरितसमूहः, प्रेरितजनसमूहः, प्रेरितगणः, नियुक्तजनसमूहः: 'for religious purposes,' धर्म्मप्रचारणार्थं प्रेरितजनाः *m. pl.*—(State of being sent) प्रेरितत्वं, प्रेषितत्वं, दूतत्वं, दौत्यं.

MISSIONARY, *s.* धर्म्मसन्देशहरः, धर्म्मसंवादकथकः, धर्म्मप्रचारणार्थं प्रेरितः, ख्रीष्टधर्म्मबोधनार्थं प्रेरितः.

MISSIVE, *a.* (Sent) प्रेरितः -ता -तं, प्रेषितः -ता -तं.—(Thrown) क्षिप्तः -प्ता -प्तं, अस्तः -स्ता -स्तं, मुक्तः -क्ता -क्तं: 'weapon,' क्षिपणिः *m.*, पाणिमुक्तं.—(Messenger) सन्देशहरः, वार्त्ताहरः, सञ्चारकः.—(Message) सन्देशः, दूत्यं, दौत्यं.

To MIS-SPEAK, *v. a.* or *n.* मिथ्या or अन्यथा वद् (c. 1. वदति -दितुं), अयथार्थं वद्.

To MIS-SPELL, *v. a.* अक्षरव्यत्ययं कृ, अक्षरव्यत्यासं कृ, अक्षरविपर्य्यासं कृ.

MIS-SPELLING, *s.* अक्षरव्यत्ययः, अक्षरव्यत्यासः, अक्षरविपर्य्यासः, अवाचारे

To MIS-SPEND, *v. a.* अकार्ये or अकाले व्यय् (c. 10. व्ययति, c. 10. व्ययति -यितुं, rt. इ) or व्यर्थं कृ or विनियुज् (c. 7. -युंक्ते -योक्तुं), कुव्ययं कृ, असद्व्ययं कृ, अन्यथाव्ययं कृ, अपात्रव्ययं कृ, कुविनियोगं कृ, अयुक्तव्ययं कृ, दुर्व्ययं कृ.

MIS-SPENT, *p. p.* दुर्व्ययितः -ता -तं, कुव्ययितः -ता -तं, अन्यथाव्ययितः &c., अपव्ययितः &c., कुविनियुक्तः -क्ता -क्तं, अपव्ययितः -ता -तं.

To MIS-STATE, *v. a.* मिथ्या or अन्यथा कथ् (c. 10. कथयति -यितुं) or ज्ञा (c. 10. ज्ञापयति, ज्ञपयति -यितुं) or विज्ञा or आविद् (c. 10. -वेदयति -यितु), अयथार्थतः ख्या (c. 2. ख्याति -तुं) or विवृ (c. 5. -वृणोति -वरितुं -रीतुं), अर्थं साचीकृ or वक्रीकृ.

MIS-STATED, *p. p.* मिथ्याकथितः -ता -तं, मिथ्याख्यातः -ता -तं, साचीकृतः -ता -तं.

MIS-STATEMENT, *s.* मिथ्याकथनं, मिथ्यावादः, मिथ्योक्तिः *f.* अन्यथाकथनं, अन्यथानिवेदनं, मिथ्याविज्ञप्तिः *f.*, अयथार्थविज्ञापनं, मिथ्याविवरणं, साचीकरणं, साचीकृतं.

MIST, *s.* धूमिका, धूपिका, धूलिका, शीकरः, तुषारः, अवाष्पः, मृगतृष्णा -ष्णिका -तृषा, मृगतृट् *f.* (ष्), कुज्झटिका, कुज्झटिः *f.* -टी -टिका, हिमझतिः *f.*, कुहेडिका, कुहेडी, कुहेलिका, कुहेली, कुहा, मेघधूमः, रुभटिः *f.*, धूमहिषी.

To MISTAKE, *v. a.* (Take wrong, misunderstand) मिथ्या or अन्यथा ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), विपरीतं ग्रह् or उपलभ् (c. 1. -लभते -लब्धुं), विपरीतार्थं ग्रह्, अन्यथा or मिथ्या बुध् (c. 1. बोधति -धितुं), मिथ्या ज्ञा (c. 9. जानाति, ज्ञातुं) or मन् (c. 4. मन्यते, मन्तुं).

To MISTAKE, *v. n.* (Err, make a mistake) भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), विभ्रम्, भ्रमं कृ, भ्रान्तिं कृ, अपराध् (c. 4. -राध्यति, c. 5. -राध्नोति -राद्धुं), अपराधं कृ, प्रमद् (c. 4. -माद्यति -मदितुं), प्रमादं कृ, दोषं कृ, मुह् (c. 4. मुह्यति, मोहितुं), मिथ्यामतिं कृ.

MISTAKE, *s.* भ्रमः, भ्रान्तिः *f.*, मतिभ्रमः, मतिभ्रान्तिः *f.*, मिथ्यामतिः *f.*, मिथ्याबुद्धिः *f.*, विभ्रमः, मतिविभ्रमः, अपराधः, प्रमादः, दोषः, मोहः, व्यामोहः, परिभ्रमः, भ्रामः, विकल्पः, अनवधानता, विपर्ययः, विचिकित्सा.

MISTAKEN, *p. p.* (In error) भ्रान्तः -न्ता -न्तं, भ्रान्तिमान् -मती -मत् (त्), अपराद्धः -द्धा -द्धं, सापराधः -धा -धं, प्रमादी -दिनी -दि (न्), प्रमादवान् &c., सन्दिग्धः -ग्धा -ग्धं.—(Erroneous) अयथार्थः -र्था -र्थं, अशुद्धः -द्धा -द्धं, मिथ्या or मृषा in comp., 'a mistaken opinion,' मिथ्यामतिः *f.*

MISTER, *s.* (Title of gentlemen) आर्यः; or expressed by श्री prefixed

MIS-TIMED, *a.* अकालिकः -की -कं. *See* ILL-TIMED.

MISTINESS, *s.* सशीकरता, सतुषारता, तुषारव्याप्तिः *f.*, शीकरव्याप्तता.

MISTION, *s.* मिश्रणं, सम्मिश्रणं, संसर्गः, सम्पर्कः, योगः.

To MISTLE, *v. n.* शीकर (nom. शीकरायते), शीक् (c. 1. शीकते -कितुं).

MISTLETOE, *s.* वृक्षरुहा, तरुरुहा, तरुभुक् *f.* (ज्), वृक्षादनी, वृक्षाश्रया.

To MISTRANSLATE, *v. a.* अयथार्थभाषान्तरं कृ, अन्यथा भाषान्तरं कृ.

MISTRANSLATION, *s.* अयथार्थभाषान्तरं, मिथ्याभाषान्तरं

MISTRESS, *s.* (Opposed to servant, a woman who governs) स्वामिनी, सेव्या, अधिष्ठात्री, ईश्वरी, शासित्री, शास्त्री, अध्यक्षा, कर्त्री.—(Of a family or house) गृहिणी, गेहिनी, गृहस्वामिनी, कुटुम्बिनी, कौटुम्बिकी.—(Proprietress) स्वामिनी, ईश्वरी, अधिकारिणी.—(Female teacher) अध्यापिका, उपदेशिनी, उपदेशिका, उपदेष्ट्री, शिक्षिका, आचार्या.—(Woman beloved, sweetheart) प्रिया, प्रियतमा, वल्लभा, कान्ता, दयिता, कामिनी, नायिका, वनिता, प्रमदा; 'an offended mistress,' मानिनी.—(Concubine) उपपत्नी, भोग्या स्त्री, भुजिष्या दासी अवरुद्धा.—(Well-skilled) कुशला, निपुणा, वेत्त्री

MISTRUST, *s.* अविश्वासः, अप्रत्ययः, अप्रतीतिः *f.*, शङ्का, आशङ्का, सन्देहः, निह्नवः, विश्वासाभावः.

To MISTRUST, *v. a.* शङ्क् (c. 1. शङ्कते -ङ्कितुं), आशङ्क्, अभिशङ्क्, परिशङ्क्, न विश्वस् (c. 2. -श्वसिति -तुं), न प्रती (c. 2. प्रत्येति -तुं).

MISTRUSTFUL, *a.* अविश्वासी -सिनी -सि (न्), अप्रत्ययी -यिनी &c., शङ्की -ङ्किनी &c., शङ्कान्वितः -ता -तं, साशङ्कः -ङ्का -ङ्कं, शङ्काशीलः -ला -लं, आशङ्की &c., शङ्कितः -ता -तं, आशङ्कितः -ता -तं, सन्देही &c., संशयी &c.

MISTRUSTFULLY, *adv.* अविश्वासेन, शङ्कया, सशङ्कं, साशङ्कं, शङ्कापूर्वं

MISTRUSTFULNESS, *s.* अविश्वासित्वं, अप्रतीतिः *f.*, सशङ्कत्वं, आशङ्का

MISTY, *a.* सशीकरः -रा -रं, सतुषारः -रा -रं, शीकरीयः -या -यं, शीकरीयः -या -यं, शीकरव्याप्तः -प्ता -प्तं, तुषारव्याप्तः -प्ता -प्तं, तुषारमयः -यी -यं, सधूमिकः -का -कं, धूमिकावृतः -ता -तं, शीकरावृतः -ता -तं

To MISUNDERSTAND, *v. a.* अन्यथा ग्रह् (c. 9. गृह्णाति -ग्रहीतुं) or बुध् (c. 1. बोधति -धितुं), मिथ्या or मृषा or विपरीतम् अर्थं ग्रह् or उपलभ् (c. 1. लभते -लब्धुं) or अवगम् (c. 1. -गच्छति -गन्तुं), विपरीतार्थं ग्रह्, अयथार्थतो ज्ञा (c. 9. जानाति, ज्ञातुं) or विज्ञा, अर्थविपर्यासं कृ

MISUNDERSTANDING, *s.* (Mistake of the meaning) मिथ्याग्रहणं, अन्यथाग्रहणं, विपरीतग्रहणं, अन्यथार्थग्रहणं, विपरीतार्थग्रहणं, अन्यथाबोधः, मिथ्याबोधः, मिथ्यामतिः *f.*, मिथ्योपलब्धिः *f.*, विपरीतबुद्धिः *f.*, अयथार्थबोधः, अयथार्थग्रहणं, भ्रमः, भ्रान्तिः *f.*, मतिभ्रमः.—(Disagreement) वैमत्यं, विमतिः *f.*, मतिभेदः, असम्मतिः *f.*, विसंवादः, द्वैधं, विप्रयोगः, वैमनस्यं, मतिविपर्ययः.

MISUNDERSTOOD, *p. p.* मिथ्यावगतः -ता -तं, मिथ्योपलब्धः -ब्धा -ब्धं, मिथ्यामतः -ता -तं.

MISUSAGE, MISUSE, *s.* कुव्यवहारः, दुर्व्यवहारः, कुप्रयोगः, मिथ्याप्रयोगः, असत्प्रयोगः, असम्यक्प्रयोगः, अन्यथाप्रयोगः, असदुपयोगः, कुव्यापारः, असदुपभोगः, कुविनियोगः, असद्विनियोगः, असाधुविनियोगः, व्यर्थीकरणं, असदभ्यासः, अयुक्तव्यवहारः.

To MISUSE, *v. a.* अन्यथा or मिथ्या or मृषा or असम्यक् प्रयुज् (c. 7. -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं) or उपयुज् or विनियुज्, कुप्रयोगं कृ, असत्प्रयोगं कृ, अयुक्तं व्यवहृ (c. 10. -हारयति -यितुं), कुव्यवहारं कृ, दुर्व्यवहारं कृ, अनुचितम् अभ्यस् (c. 4. -अस्यति -असितुं), कुव्यापारं कृ, व्यर्थीकृ, कदर्थीकृ, वृथाकृ

MISUSED, *p. p.* कुप्रयुक्तः -क्ता -क्तं, कुविनियुक्तः &c., असम्यगुपयोजितः -ता -तं, कुव्यवहृतः -ता -तं, कुव्यवहारितः -ता -तं, मिथ्याप्रयुक्तः &c., कदर्थीकृतः &c.

MITE, *s.* (Small piece of money) कपर्दकः, कपर्दिका, काकिणी काकिनी, वराटकः, धनलवः, धनलेशः.—(Particle of any thing) कणः, कणिका, लवः, लेशः.

MITER, *s.* धर्माधिपतिकिरीटः, महाधर्माध्यक्षमुकुटं

MITHRIDATE, *s.* विषभञ्जनं, विषनाशनं, विषघ्नं, विषापहारकं.

MITIGABLE, *a.* शमनीयः -या -यं, प्रशमनीयः -या -यं, शाम्यः -म्या -म्यं

MITIGANT, *a.* शमकः -का -कं, प्रशमनः -ना -नं, शान्तिकः -की -कं, शान्तिदः -दा -दं, शान्तिकरः -रा -रं, उपशायी -यिनी -यि (न्).

To MITIGATE, *v. a.* शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, शान्तिं दा, सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), उपसान्त्व्, परिशान्त्व्, अभिशान्त्व्.—(Alleviate pain) दुःखं हृ (c. 1. हरति, हर्तुं) or शम्.—(Lighten) लघ (nom. लघयति -यितुं), लघूकृ, मृदूकृ.—(Diminish) न्यूनीकृ, अल्पीकृ, तन (nom. तनयति -यितुं).

p p शान्त -न्ता -न्तं शमित -ता -तं प्रशमित &c. उपशामित &c. मन्दीकृत -ता -तं लघूकृत -ता -तं ... b m g ted शम शाम्यति शमित

MITIGATION, *s.* शान्ति *f* शमनं प्रशमनं उपशान्ति प्रशान्ति *f* उपशमनं शमः, उपशमः, मृदूकरणं, लघूकरणं, लाघवं, न्यूनीकरणं, न्यूनता सान्त्वनं -ना, 'of a curse,' उद्धारः.

MITIGATIVE, MITIGATOR *See* MITIGANT

MITRE. *See* MITER, *s*

To MIX, *v. a.* मिश्र् (c. 10. मिश्रयति -यितुं), सम्मिश्र्, व्यामिश्र्, विमिश्र्, मिश्रीकृ, सम्मिश्रीकृ, संयुज् (c. 7. -युनक्ति -योक्तुं -योजयति -यितुं), संसृज् (c. 6. -सृजति -स्रष्टुं), सम्पृच् (c. 7. -पृणक्ति -पर्चितुं), सङ्कॄ (c. 6 -किरति -करितुं -रीतुं), एकीकृ, एकत्र कृ, संसर्गं कृ, संसृष्टं -ष्टां कृ, व्यतिकरं कृ, सम्मेलनं कृ.—(Mix confusedly) सङ्करीकृ, सङ्कुलीकृ, सङ्कीर्णीकृ, सङ्कॄ, 'mix ingredients,' योगं कृ, संस्कारं कृ, प्रक्षेपं कृ.

To MIX, *v. n.* मिश्रीभू, सम्मिश्रीभू, व्यामिश्रीभू, मिल् (c. 6. मिलति, मेलितुं), सम्मिल्, सङ्कॄ in pass. (-कीर्य्यते), संयुज् in pass., (-युज्यते) संसृज् in pass. (-सृज्यते), संसृष्टीभू, एकीभू, संयोगं इ (c. 2. एति -तुं), सम्पर्कम् इ, संसर्गम् इ, सङ्करीभू.

MIXABLE, *a* मिश्रणीयः -या -यं, योजनीयः -या -यं, याव्यः -व्या -व्यं.

MIXED, *p.p.* मिश्रितः -ता -तं, सम्मिश्रितः -ता -तं, मिश्रः -श्रा -श्रं, सम्मिश्रः &c., मिश्रीकृतः -ता -तं, व्यामिश्रः -श्रा -श्रं, संयुक्तः -क्ता -क्तं, संयुतः -ता -तं, संसृष्टः -ष्टा -ष्टं, सङ्कीर्णः -र्णा -र्णं, सम्पृक्तः -क्ता -क्तं, मिलितः -ता -तं, सम्मिलितः &c., सङ्कुलितः &c., संघटितः &c., सन्निपतितः &c., समवेतः &c., सङ्करीकृतः &c., एकीकृतः &c., आविद्धः &c., व्यतिकरितः &c., सवलः -ला -लं, सम्पर्की -र्किणी -र्कि (न्), संसर्गी &c., कुशितः -ता -तं; 'mixed with water,' जलमिश्रितः &c., जलसंसृष्टः &c.

MIXEN, *s.* पुरीषादिराशिः *m.*; 'mixen-grown,' विड्भवः -वा -वं.

MIXER, *s* मिश्रकः, सम्मिश्रकः, मिश्रणकृत्, संयोगकारी *m.* (न्).

MIXTURE, MIXTION, MIXING, *s.* (Act) मिश्रणं, सम्मिश्रणं, मिश्रीकरणं, संयोगः, संयोजनं, सम्मेलनं, संसर्गः, सम्पर्कः, सङ्कलनं, सङ्किरणं, एकीकरणं, सङ्करीकरणं.—(State) मिश्रता, सम्मिश्रता, मिश्रीभावः, संसृष्टता, संसर्गः, संयुक्तता, संयोगः, सम्पर्कः, सङ्कीर्णता, साङ्कर्य्यं.—(Mixed mass) सन्निपातः, नानाद्रव्यसमूहः, सम्मिश्रद्रव्यसमूहः, नानावस्तुसमुदायः, समूहः, सङ्घः, सङ्करः; 'mixture with water,' जलसंसर्गः.

MIZZEN, *s.* (Sail) पश्चिमकूपकसम्बन्धि वातवसनं.

MIZZEN-MAST, *s.* पश्चिमकूपकः, नौपश्चाद्भागस्थः कूपकः.

MIZZLE, *s.* शीकरः, सीकरः, तुषारः. *See To* MISTLE, DRIZZLE.

MNEMONIC, *a.* स्मृतिसहायः -या -यं, स्मृतिप्रवर्धकः -का -कं, स्मृत्युपकारकः &c.

MNEMONICS, *s.* स्मरणविद्या, स्मृत्युपकारणविद्या, स्मरणशास्त्रं.

To MOAN, *v. n.* खेदलोपहतत्वाद् दीर्घनादं कृ or दीर्घरावं कृ, विलप् (c. 1. लपति -पितुं), प्रलप्, लप्, परिदेव् (c. 1. -देवते -वितुं), क्रन्द् (c. 1. क्रन्दति -न्दितुं), आक्रन्द्, रुद् (c. 2. रोदिति -तुं), प्ररुद्, क्रुश् (c 1. क्रोशति, क्रोष्टुं), स्तन् (c. 1 स्तनति -नितुं), विस्तन्, दीर्घं निःश्वस् or निश्वस् (c. 2. -श्वसिति -तुं), दीर्घं रु (c. 2 रौति, रवितुं), दीर्घनिश्वासं कृ, दीर्घनिश्वासं कृ, गम्भीरनादं कृ, गम्भीरनिश्वासं कृ, आर्त्तनादं कृ, आर्त्तरावं कृ, हाहाशब्दं कृ, हाहाकारं कृ, वाश् (c. 1. वाशते, c 4. वाश्यते -शितुं).

MOAN, *s.* आर्त्तनादः, आर्त्तरावः, दुःखार्त्तस्य दीर्घनादः or दीर्घरावः or दीर्घनिश्वासः or गम्भीरनादः, दीर्घनिश्वासः, दीर्घनिःश्वासः, विलपितं, विलपनं, विलापः, परिदेवनं -ना, परिदेवितं, स्तनितं, क्रन्दितं, क्रुष्टं, हाहाकारः.

MOANFUL, *a* विलापकारी -रिणी -रि (न्), परिदेवी -विनी &c., आर्त्तनादकारी &c., दीर्घनिश्वासी &c., हाहाकारी &c.

MOANFULLY, *adv* विलापेन, सविलपितं, ... दीर्घनिश्वासपूर्वं

MOANING, ... विलपनं, परिदेवनं, आर्त्तनादः, ... स्तननं

MOAT, *s.* परिखा, खातं, खेयं, खातकं, खातभूः *f.*, खातभूमिः *f.*, प्रतिकूप उपकुल्या, कुल्या, खल्लः.

MOATED, *a.* परिखावेष्टितः -ता -तं, परिखावृतः &c., परिखान्वितः &c.

MOB, *s.* अधमजनसमूहः, नीचजनसम्मर्दः, प्राकृतजनसम्मर्दः, बहुजनसमूहः बहुजनमेलकः, जनसम्मर्दः, लोकसङ्घः, जनसङ्कुलं, जनौघः, जनता अव्यवस्थितसभा.

To MOB, *v. a.* बहुजनाकीर्णे स्थाने वपुषा संघृष् (c. 1. -घर्षति -र्षितुं) or सम्मृद् (c 9 मृद्नाति -मर्दितुं) or सम्बाध् (c. 1. -बाधते -धितुं).

MOBBISH, *a.* लौकिकः -की -कं, सामान्यलोकयोग्यः -ग्या -ग्यं

MOBILE, MOBILITY, *s.* (Mob, common people) सामान्यलोकः साधारणलोकः, प्राकृतलोकः, असभ्यलोकः, अन्त्यलोकः, अधमलोकः पृथग्जनाः *m pl.*

MOBILITY, *s.* (Aptitude to motion) गमनयोग्यता, गतियोग्यता, गमनशीलता, चरिष्णुता, जङ्गमता, अस्थिरता, चाञ्चल्यं.

To MOCK, *v. a* (Deride) अवहस् (c. 1. -हसति -सितुं), अपहस्, उपहस्, प्रहस्, विहस्, अवहासभूमिं कृ, उपहासास्पदं कृ, अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), गर्ह् (c 1. गर्हते -र्हितुं), अवगर्ह्, अवगुर् (c. 6. -गुरते -रितुं) व्याघर् (c. 10. -घारयति -यितुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवमन् (c. 4. -मन्यते -मन्तुं), भर्त्स् (c. 10. भर्त्सयते -यितुं), तिरस्कृ, मुखरीकृ विकत्थ् (c. 1. -कत्थते -त्थितुं), परिभू, अवज्ञां कृ, तुच्छीकृ.—(Mimic) उपहासबुद्ध्या परचेष्टितानुकरणं कृ or विडम्बनं कृ.—(Deceive) वञ्च् (c. 10. वञ्चयते -यितुं), प्रतॄ (c 10. -तारयति -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), प्रलुभ् (c. 10. -लोभयति -यितुं), मुह् (c. 10. मोहयति -यितुं)

MOCK, *s.* उपहासः, अवहासः, परिहासः, हास्यं, अवक्षेपः, अवज्ञा.

MOCKED, *p. p.* (Mimicked in derision) उपहासबुद्ध्यानुकृतः -ता -तं —(Derided) उपहसितः -ता -तं, अवहसितः &c., अवक्षिप्तः -प्ता -प्तं गर्हितः -ता -तं, विगर्हितः &c., तिरस्कृतः -ता -तं, अवज्ञातः &c., मुखरीकृतः &c., कृतोपहासः -सा -सं.—(Deceived) वञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, मोहितः &c.

MOCKER, *s* उपहासकः, अवहासकः, परिहासकर्त्ता *m.* (र्त्तृ), गर्हक अवक्षेपकः, अवज्ञाकारी *m* (न्), अपमानी *m.*, वञ्चकः.

MOCKERY, MOCKING, *s.* (Derision) उपहासः, अवहासः, अपहासः परिहासः, परीहासः, हास्यं, तिरस्कारः, अवज्ञा, अवक्षेपः, अवमानं अपमानं, अवहेला -लनं, अवलेपः, परिभवः, मुखरीकरणं, गौरव्यं अपमानसूचको हासः.—(Subject of derision) उपहासास्पदं, उपहासभूमिः *f*, अवहासस्थानं, उपहासविषयः, तिरस्कारविषयः, हास्यस्थानं परिभवास्पदं, परिभवपदं, तिरस्कारपदं.—(Counterfeit appearance deception, imitation) छल *n.* (न्), व्याजः, कपटः -टं, कूटं, वञ्चनं -ना, विडम्बनं.—(Vain effort) वृथायत्नः, वृथाप्रयत्नः, वृथोद्यमः वृथोद्योगः, अनर्थकचेष्टा, निष्फलचेष्टा.

MOCKINGLY, *adv.* उपहासेन, सोपहासं, सावहासं, सतिरस्कारं, सावक्षेपं

MODAL, *a.* रूपसम्बन्धी -न्धिनी -न्धि (न्), रूपविषयः -या -यं.

MODE, *s.* (Method, manner) रीतिः *f.*, मार्गः, विधिः *m.*, विधानं प्रकारः, नियमः, वृत्तिः *f.*, स्थितिः *f.*, क्रमः, संविधानं, पर्यायः, मर्यादा धारा, विधः in comp.; 'mode of living,' वृत्तिः *f.*; 'in this mode,' अनेन विधानेन, एवंविधं -धेन, अनेन प्रकारेण; 'mode of speaking,' वाग्व्यापारः, वाग्वृत्तिः *f.*—(Form) रूपं, आकारः, आकृतिः *f*

संस्कारः.—(Custom) आचारः, व्यवहारः, प्रचारः, रीतिः *f.*, नियमः, अभ्यासः, स्थितिः *f.*, प्रवृत्तिः *f.*, सम्प्रदायः.—(Fashionable custom) सभ्यलोकव्यवहारः, सभ्यरीतिः *f.*, शिष्टव्यवहारः, शिष्टमार्गः, सभ्यसम्प्रदायः, लोकाचारः.—(In metaphysics) विशेषवस्तुरूपं, विशेषद्रव्यरूपं, विशेषद्रव्यप्रकारः.—(In grammar) वाच्यं.—(In music) रागः *m.*, रागिणी *f.*, षडौः. The musical modes are personified as either male or female. The *male* are called Rágas; the female are Rágińís, and are considered to be the wives of the Rágas. The following are some of the names for the *male*: भैरवः, मालवः, सारङ्गः, हिन्दोलः, वसन्तः, वसन्तदूतः, पञ्चमः, दीपकः, मेघः, नटः, नटनारायणः, कल्याणः, कामोदः, गौरवः, विभासः. The following are *some* of the Rágińís, or female personifications: दीपिका, नटी, केदारी, देशकारी, गौडी, मल्लारी, धनेश्वरी, भैरवी, रामकरी or रामकेली or रामकली, सैन्धवी, पूर्वी, भूपाली, मधुमाधवी.

Model, *s.* (Pattern, *representation*) प्रतिमा -मानं, प्रतिरूपं, प्रतिकृतिः, आदर्शः, उपमा -मानं, प्रतिमूर्त्तिः *f.*, संस्कारः.—(Pattern, exemplar) आदर्शः, प्रतिमा, उपमा.—(Pattern for *imitation*) प्रमाणं, प्रमा, प्रमाता *m.* (तृ); 'model of propriety,' न्यायाचारः.—(Mould) संस्कारः, आकारः, संस्थानं, संधानः.

To model, *v. a.* or *n.* संस्कारं कृ, संस्कृ, प्रतिमां कृ, प्रतिरूपं कृ, आदर्शं कृ.—(Shape, form) रूप् (c. 10. रूपयति -यितुं), सरूपं -पां -पं कृ.

Modeler, *s.* उपमाता *m.* (तृ), उपमानकृत् *m.*, प्रतिमानकर्त्ता *m.* (र्तृ).

Moderate, *a.* (Observing reasonable bounds, applied to persons) परिमिताचारी -रिणी -रि (न्), समवृत्तिः -त्तिः -त्ति, नियतवृत्तिः &c., मर्य्यादानतिक्रमी -मिणी &c., अनतिक्रान्तमर्य्यादः -दा -दं.—(Moderate in desires) अल्पाकांक्षी -क्षिणी &c., अल्पाभिलाषी &c., अलुब्धः -ब्धा -ब्धं, अलोभी &c., अल्पसन्तोषी &c., अल्पसन्तुष्टः -ष्टा -ष्टं, भोगाप्रसक्तः -क्ता -क्तं, अप्रसक्तः &c., अल्पभोगी &c., स्वल्पभोगी &c.—(Not extreme, not excessive) परिमितः -ता -तं, मितः -ता -तं, सपरिमाणः -णा -णं, समः -मा -मं, समर्य्यादः -दा -दं, नियतः -ता -तं, संयतः -ता -तं, सावधिकः -का -कं, अल्पः -ल्पा -ल्पं, स्वल्पः &c.—(In eating) मिताशनः -ना -नं, परिमिताहारः -रा -रं, स्वल्पाहारः -रा -रं.—(Middling in size) मध्यमः -मा -मं, मध्यः -ध्या -ध्यं, मध्यमपरिमाणः -णा -णं, न स्थूलो न सूक्ष्मः &c.

To moderate, *v. a.* (Temper) शम् (c. 10. शमयति -यितुं), उपशम्, प्रशम्.—(Lessen) न्यूनीकृ, अल्पीकृ, लघ् (c. 10. लघयति -यितुं), लघूकृ.—(Restrain from excess) नियम् (c. 1. -यच्छति -यन्तुं), विनियम्, संयम्, यम्, निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), संहृ (c. 1. -हरति -हर्त्तुं), प्रत्याहृ.

To moderate, *v. n.* (Abate, become less severe) शम् (c. 4. शाम्यति, शमितुं), प्रशम्, उपशम्, विगम् (c. 1. -गच्छति -गन्तुं), विरम् (c. 1. -रमति -रन्तुं), उपरम्, न्यूनीभू, अल्पीभू, लघूभू.

Moderated, *p. p.* (Tempered) शमितः -ता -तं, प्रशमितः -ता -तं.—(Lessened) न्यूनीकृतः -ता -तं, न्यूनीभूतः -ता -तं.—(Restrained) यतः -ता -तं, नियतः -ता -तं, निगृहीतः -ता -तं.—(Allayed) शान्तः -न्ता -न्तं, उपशान्तः &c.

Moderately, *adv.* परिमितं, नियतं, समर्य्यादं, समं, सपरिमाणं, अल्पं, स्वल्पं, अभृशं, यावदावत्; 'moderately warm,' ईषदुष्णः -ष्णा -ष्णं, कोष्णः &c., मन्दोष्णः &c.; 'moderately ripe,' आपक्वः -क्वा -क्वं; 'moderately distant,' नातिदूरः -रा -रं.

Moderation, *s.* (Refraining from excess) परिमिताचारत्वं, नियतवृत्तित्वं, समवृत्तिता, समता, परिमितता, मितता, शमः, यमः, संयमः, निग्रहः, दमः, अनतिक्रमः, मर्य्यादानतिक्रमः.—(In desires) अल्पाकांक्षा, अल्पाभिलाषः, अलोभः, अलुब्धता, अल्पसन्तुष्टता, अप्रसक्तिः *f.*, अप्रसक्तता, भोगाप्रसक्तिः *f.*—(Equanimity) क्षमा, शान्तिः *f.*, समचित्तत्वं, समानवृत्तिः *f.*, समभावः.

Moderator, *s.* (Restrainer) नियन्ता *m.* (न्तृ), विनियन्ता *m.*, यन्ता *m.*—(At disputations) वादमध्यस्थः, वादसभाध्यक्षः, मध्यस्थः.

Modern, *a.* इदानीन्तनः -नी -नं, अधुनातनः -नी -नं, आधुनिकः -की -कं, वर्त्तमानकालीनः -ना -नं, नूतनकालीनः &c., नूतनः -ना -नं, नवः -वा -वं, अद्यत्कालीनः -ना -नं, नव्यः -व्या -व्यं, नवीनः -ना -नं, नूत्नः -त्ना -त्नं, अर्वाचीनः -ना -नं, सद्यस्तनः -ना -नं, अपुराणः -णा -णं, अपुरातनः -नी -नं.

Modernness, *s.* नूतनता, नवता, नव्यता, अधुनातनत्वं, अद्यत्कालीनता, वर्त्तमानकालीनता, अर्वाचीनता, अपुराणता.

Moderns, *s. pl.* अद्यत्कालीनलोकाः, नूतनकालीनलोकाः, अधुनातनाः *m. pl.*

Modest, *a.* (Not bold, restrained by a sense of shame or propriety) विनीतः -ता -तं, विनयी -यिनी -यि (न्), लज्जाशीलः -ला -लं, लज्जावान् -वती -वत् (त्), लज्जान्वितः -ता -तं, सलज्जः -ज्जा -ज्जं, व्रीडान्वितः -ता -तं, सव्रीडः -डा -डं, व्रीडितः -ता -तं, ह्रीमान् -मती &c., त्रपावान् &c., त्रपायुक्तः -क्ता -क्तं, त्रपान्वितः &c., त्रपितः -ता -तं, सत्रपः -पा -पं, सविनयः -या -यं, विनयभाक् *m. f. n.* (ज्), अप्रगल्भः -ल्भा -ल्भं, अधृष्टः -ष्टा -ष्टं, शालीनः -ना -नं, ह्रीणः -णा -णं, संह्रीणः &c., ह्रीतः -ता -तं, ह्रीकुः -कुः -कु.—(Unassuming, humble, not proud) निर्गर्वः -र्वा -र्वं, अगर्वः &c., निर्गर्वी &c., अगर्वी &c., गर्वहीनः -ना -नं, निरहङ्कारः -रा -रं, अनहङ्कारी &c., निरभिमानः -ना -नं, अनभिमानी &c., अनुद्धतः -ता -तं, अकत्थनः -ना -नं, अविकत्थनः &c., विनम्रः -म्रा -म्रं, नम्रशीलः -ला -लं, विनतः -ता -तं, निभृतः -ता -तं, प्रसृतः -ता -तं, वश्यात्मा -त्मा -त्म (न्), वशी -शिनी &c.—(Chaste, not loose) अव्यभिचारी -रिणी &c., यतेन्द्रियः -या -यं, अदुष्टः -ष्टा -ष्टं, अलम्पटः; 'a modest wife,' साध्वी, सती, पतिव्रता.—(Moderate) परिमितः -ता -तं, मितः &c.; 'modest speech,' विनयवाक् *f.* (च्).

Modestly, *adv.* सविनयं, विनयेन, विनयपूर्व्वं, विनीतवत्, सलज्जं, सव्रीडं, सत्रपं, लज्जया, लज्जापूर्व्वं, अगर्व्वेण, अनभिमानेन, अनुद्धतं, विनम्रं.

Modesty, *s.* विनयः, विनीतता, लज्जा, ह्रीः *f.*, व्रीडा, त्रपा, ह्रियणा, ह्रीका, लज्जाशीलता, सलज्जत्वं, सत्रपता, शालीनता, अप्रगल्भता, अप्रागल्भ्यं, अधृष्टता, अधार्ष्ट्यं, मर्य्यादा, मन्दाक्षं, मन्दास्यं; 'false modesty,' मिथ्याविनयः.—(Humility) नम्रता, विनम्रता, नम्रशीलता, विनतिः *f.*, अगर्व्वः, गर्वहीनता, अनभिमानं, दर्पहीनता, अनुद्धतिः *f.*, अनौद्धत्यं, वश्यता.—(Chastity) अव्यभिचारः, अदुष्टता; 'in a wife,' साध्वीत्वं, सतीत्वं, पातिव्रत्यं.—(Moderation) परिमितता.

Modicum, *s.* अल्पांशः, अल्पभागः, अल्पमात्रं, स्वल्पांशः, किञ्चित्, किञ्चन, किञ्चिद्भागः, वर्त्तिका, लेशः.

Modifiable, *a.* रूपविकारशक्यः -क्या -क्यं, रूपान्तरशक्यः &c., विकार्य्यः -र्य्या -र्य्यं, परिणामशक्यः &c., परिणामान्तरशक्यः &c., परिवर्त्तनीयः -या -यं, विपर्य्यसनीयः &c.

Modification, *s.* (The act) रूपान्तरकरणं, परिणामान्तरकरणं, रूपपरिवर्त्तनं, विवर्त्तः -र्त्तनं.—(Particular or different form) रूपभेदः, रूपप्रभेदः, रूपविशेषः, रूपान्तरं.—(Diversity, variety) भेदः, प्रभेदः, विभेदः, विशेषः.—(Altered state) विकारः, विकृतिः *f.*, परिणामः, रूपान्तरं, विपरिणामः.

Modified, *p. p.* (Changed in form) विकारितः -ता -तं, विकृतः -ता

OMEN, s. पूर्व्वलक्षणं, पूर्व्वचिह्नं, पूर्व्वलिङ्गं, शुभाशुभलक्षणं, मङ्गलामङ्गललक्षणं, भाविसूचकचिह्नं, भविष्यत्सूचकचिह्नं, शकुनं -नः, चिह्नं, लक्षणं, जन्यं, निमित्तं, उत्पातः, पूर्व्वरूपं, भविष्यद्बोधकचिह्नं; 'good omen,' सुचिह्नं, सुलक्षणं; 'bad omen,' दुर्लक्षणं, दुश्चिह्नं, अपचिह्नं, अपलक्षणं, अपशकुनं -नः, दुःशकुनं -नः, अनिष्टसूचकचिह्नं, अशुभलक्षणं, अशुभचिह्नं, अमङ्गलचिह्नं, उत्पातलिङ्गं; 'interpretation of omens,' शाकुनिकं.

OMENED, a. (Ill-omened) अनिष्टसूचकः &c. See ILL-OMENED.

OMENTUM, s. मेदोधरा, अन्त्रवेष्टनं, अन्त्रावरणी, वसाशयकं.

OMINOUS, a. (Pertaining to omens) शाकुनिकः -की -कं, शाकुनः -नी -नं, शकुनसम्बन्धी -न्धिनी &c., शुभाशुभसूचकः -का -कं, भाविसूचकः &c., भविष्यत्सूचकः &c., भविष्यद्बोधकः &c.—(Foreboding evil) अनिष्टसूचकः &c., अशुभसूचकः &c., अमङ्गलसूचकः &c., अभद्रसूचकः &c., अनिष्टावेदी &c., अनिष्टशंसी &c., अशुभशंसी &c., दुर्लक्षणी &c.—(Foreboding good) शुभशंसी &c., शुभसूचकः &c., मङ्गलसूचकः &c.

OMINOUSLY, adv. अशुभसूचनापूर्व्वं, दुर्लक्षणेन, अशुभलक्षणपूर्व्वं.

OMINOUSNESS, s. अनिष्टसूचकत्वं, अशुभसूचकता, शाकुनिकत्वं.

OMISSION, s. त्यागः, परित्यागः, वर्जनं, अपासनं, लङ्घनं, अकरणं, लोपः, परिलोपः, अपाकरणं, विसर्जनः, उत्सर्गः, विसर्गः, भ्रंशः, भ्रान्तिः f.; 'failure to do something,' अननुष्ठानं, अकरणं, अक्रिया, अप्रवृत्तिः f., अनाचरणं, अविधानं; 'without omission,' निरन्तरं नैरन्तर्येण; 'making omission,' औत्सर्गिकः -की -कं.

To OMIT, v. a. परित्यज् (c. 1. -त्यजति -त्यक्तुं), त्यज्, हा (c. 3. जहाति, हातुं, caus. हापयति -यितुं), अपहा, विहा, अपाहा, वृज् (c. 10. वर्जयति -यितुं), परिवृज्, विवृज्, अपास् (c. 4. -अस्यति -असितुं), व्युदस्, अतिक्रम् (c. 1. -क्रामति -क्रमितुं), व्युत्क्रम्, उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, लङ्घ् (c. 10. लङ्घयति -यितुं).—(Not to perform) न अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), न कृ, न विधा (c. 3. -दधाति -धातुं); 'omitting this, including that,' एतद् वर्जयित्वा तत्सहितः.

OMITTED, p. p. परित्यक्तः -क्ता -क्तं, त्यक्तः -क्ता -क्तं, वर्जितः -ता -तं, अपास्तः -स्ता -स्तं, अपासितः -ता -तं, विवर्जितः -ता -तं, विसृष्टः -ष्टा -ष्टं, अनर्पितः -ता -तं, अननुष्ठितः -ता -तं, अकृतः -ता -तं.

OMNIFARIOUS, a. सर्व्वविधः -धा -धं, सर्व्वप्रकारः -रा -रं, सर्व्वरूपः -पा -पं.

OMNIGENOUS, a. सर्व्वविधः -धा -धं, सर्व्वजातीयः -या -यं.

OMNIPOTENCE, OMNIPOTENCY, s. सर्व्वशक्तित्वं, अनन्तशक्तित्वं, अमितशक्तित्वं, सर्व्वशक्तता, अपारशक्तिः f., अनन्तसामर्थ्यं, सर्व्वकार्य्यशक्तिः f., सर्व्वसामर्थ्यं.

OMNIPOTENT, a. सर्व्वशक्तिमान् -मती -मत् (त्), सर्व्वशक्तिकः -का -कं, अनन्तशक्तिः -क्तिः -क्ति, दुरन्तशक्तिः &c., अमितशक्तिः -क्तिः -क्ति, अपारशक्तिकः &c., सर्व्वसमर्थः -र्था -र्थं.

OMNIPRESENCE, s. व्याप्तिः f., सर्व्वत्र व्याप्तिः f., सर्व्वव्याप्तिः f., विश्वव्याप्तिः f., विश्वव्यापकत्वं, सर्व्वव्यापित्वं, विश्वव्यापिता, अभिव्याप्तिः f., सर्व्वगत्वं, त्रैलोक्यविस्तारः, सर्व्वत्र विस्तारः, सर्व्वत्रविद्यमानता.

OMNIPRESENT, a. सर्व्वव्यापी -पिनी -पि (न्), सर्व्वव्यापकः -का -कं, विश्वव्यापी &c., विश्वव्यापकः -का -कं, सर्व्वगः -गा -गं, सर्व्वगामी &c., सर्व्वगतः -ता -तं, सर्व्वात्मकः -का -कं, त्रैलोक्यविस्तीर्णः -र्णा -र्णं, सर्व्वत्र विस्तीर्णः &c. or विद्यमानः -ना -नं, विश्वरूपः -पा -पं, सर्व्वभूतभूतान्तरः -रा -रं.

OMNISCIENCE, s. सर्व्वज्ञत्वं -ता, सर्व्वज्ञानं, सर्व्वविषयज्ञानं, अनन्तज्ञानं, अपारज्ञानं, सर्व्वज्ञातृत्वं.

OMNISCIENT, a. सर्व्वज्ञः -ज्ञा -ज्ञं, सर्व्वविद् m. f. n., सर्व्ववेदी -दिनी -दि (न्), सर्व्वज्ञाता -त्री -तृ (तृ), कृत्स्नज्ञः &c., कृत्स्नविद् m. f. n., अनन्तज्ञानी &c., सर्व्वदर्शी &c., सर्व्वसाक्षी -क्षिणी -क्षि (न्), त्रिकालज्ञः &c., त्रिकालविद् m. f. n., त्रिकालदर्शी &c.

OMNIVAGANT, OMNIVAGOUS, a. सर्व्वगः -गा -गं, सर्व्वचरः &c., सर्व्वगामी -मिनी &c., सर्व्वचङ्क्रमकः -का -कं, सर्व्वविहारी &c.

OMNIVOROUS, a. सर्व्वभक्षः -क्षा -क्षं, सर्व्वभक्षकः -का -कं, सर्व्वाभक्षकः &c., सर्व्वभोजी -जिनी -जि (न्), सर्व्वाशी &c., सर्व्वखादकः -का -कं, स्वेच्छाहारः -रा -रं, सर्व्वान्नीनः -ना -नं.

OMPHALIC, a. नाभ्यः -भ्या -भ्यं, नाभिसम्बन्धी -न्धिनी -न्धि (न्).

OMPHALOCELE, s. नाभिवर्धनं, नाभिगोलकः, नाभिगुटकः, नाभिकण्टकः.

OMPHALOTOMY, s. नाभिच्छेदः -दनं, नाभिनालच्छेदनं.

ON, prep. अधि, नि prefixed, उपरि affixed.—(Denoting contact with the upper part of a thing) expressed by the loc. c., or by उपरि affixed to the crude form or gen. c.; as, 'on the table,' फलके or फलकोपरि or फलकस्योपरि; 'rain falls on the ground,' भूमौ पतति वृष्टिः; 'having placed the wood on his shoulder,' काष्ठं स्कन्धे कृत्वा, 'placed on the fire,' अग्निस्थः

आ इ T e n egantly u ed or he n m ph a e as, he carr the wood on h s hou d काष्ठं स्कन्धेन वहति to g on foo पादाभ्यां गम्, c ndu.. me home on a horse,' अश्वेन मां वहति नय.—(At, or near) expressed by loc. c., or by निकटे, समीपे, उपान्ते &c. affixed, or by उप prefixed; as, 'on the shore,' तीरे, तीरनिकटे, तीरोपान्ते, उपतीरं; 'on the throat,' उपकण्ठे.—(At the time of) expressed by the loc. c., as, 'on Monday,' सोमवारे; 'on their arrival,' तेषु आगतेषु, 'on the corn being cut,' शस्ये लूने सति, or even by the abl. c., as, 'on seeing him,' तद्दर्शनात्, or by the indecl. part., as, 'on seeing that,' तद् दृष्ट्वा; 'on hearing that,' तच्छ्रुत्वा.—(Toward or for) प्रति affixed, or expressed by gen. or loc c; as, 'have pity on me,' मां प्रति or मम or मयि दयां कुरु.—(Dependence on) expressed by acc. c., after such verbs as अवलम्ब्, आश्रि &c., as, 'he relies on me,' माम् अवलम्बते.—(Concerning, relating to) विषयः -या -यं, विषयकः -का -कं, सम्बन्धी -न्धिनी &c.; as, 'a treatise on mathematics,' गणितविषयकं शास्त्रं.—(Performing on an instrument) expressed by acc. c after वद् in caus., as, 'he plays on a lute,' वीणां वादयति. The affixes तस्, त्र and दा, often express the sense of 'on'; as, 'on both sides,' उभयतस्, उभयत्र, उभयपार्श्वतस्; 'on all sides,' सर्वतस्, समन्ततस्, अभितस्, समन्तात्, सर्वत्र, 'on the one hand,' एकतस्; 'on all occasions,' सर्वदा; 'on one occasion,' एकदा; 'on another occasion,' अन्यदा. The following are other examples of instr., and other cases used adverbially to express this prep; 'on the north-east of the city,' प्रागुत्तरेण नगरात्, 'on this account,' अनेन हेतुना; 'on account of, or in consequence of anger,' कोपात्. See ACCOUNT; 'on the other side,' अन्यपार्श्वेन, अन्येन पार्श्वेन, 'immediately on hearing this,' तच्छ्रवणमात्रात्; 'on a sudden,' अकस्मात्, सहसा; 'on high,' उच्चैस्, उच्चकैस्, उच्चं, ऊर्ध्वं, ऊर्ध्वे; 'set on foot,' आरब्धः -ब्धा -ब्धं, उत्थतः -ता -तं, प्रचलीकृतः &c.

ON, adv. (Forward, in progression) अग्रे, अग्रं, अग्रतस् or expressed by प्र prefixed; as, 'going on,' अग्रे गमनं, प्रगमनं.—(Continuance) expressed by the verb आस् in combination with the pres. or indecl part. of another verb. See KEEP, CONTINUE. (Upon the body, as clothes, &c). See TO PUT ON.

ONCE, adv. (One time) सकृत्, एकवारं -रे, एककृत्वस्, एककाले, एकसमये.—(On a certain time) एकदा, कदाचित्.—(Formerly) पूर्वं, पुरा. See the word. (At once, at the same time) समकाले, एककाले, एकवारे, एकदा.—(All at once) युगपत्, यौगपद्येन, एकपदे -दे.—(All at once in a body) सङ्घशस्.—(All at once, suddenly) अकस्मात्.—(At once, immediately) सद्यस्, तत्काले, तत्क्षणे.—(Once more) पुनरपि.

ON DIT, adv. किंवदन्ती, जनप्रवादः, जनवादः, लोकप्रवादः.

ONE, a. (Single in number) एकः -का -कं; 'one man,' एकपुरुषः.—(Indefinitely) 'some one,' 'any one,' कश्चित् &c., कश्चन &c., कोऽपि &c. See SOME. (Mutuality) 'one another,' परस्परः -रा -रं, इतरेतरः &c., अन्योन्यः -न्या -न्यं, 'things that are equal to the same, are equal to one another,' यावन्तः पदार्थाः प्रत्येकम् एकेन कस्यचित् समास् ते सर्वे मिथः समानाः e aft a he समपदार्थाः समशस् क्रमे क्रमे.—(Sam ke एक' का -कं, समः -मा -मं, तुल्यः -ल्या -ल्यं, 'at one time,' एककाले एकपदे, 'of one color,' एकवर्णः -र्णा -र्णं, समवर्णः &c.; 'having one object,' एकार्थः -र्था -र्थं, एकाग्रः -ग्रा -ग्रं; 'having one occupation,' एकवृत्तिः &c.; 'in one place,' एकस्थाने, एकत्र 'collected in one place,' एकस्थः &c., एकीभूतः -ता -तं.—(One only, but one) अनन्यः -न्या -न्यं; 'having one only refuge,' अनन्यगतिः &c., 'having the mind fixed on one object,' अनन्यमनस्कः &c., अनन्यभावः &c.—(One by one) एकैकं, एकैकशस्, एकशस्, प्रत्येकं, पृथक्, पृथक् पृथक्.—(One day) एकदा, कदाचित्; 'in one way,' एकधा; 'on the one hand,' एकतस्; 'one of many,' एकतमः -मा -मं; 'one of two,' एकतरः -रा -रं, 'one of these,' तेषाम् एकः, एषैकः; 'one year old heifer,' एकाब्दा; 'one year old calf,' एकवत्सरो वत्सः.

ONE, s. (Such a one, such and such a person) अमुकः, अमुकजनः.—(A man, a person) जनः, व्यक्तिः f., मनुष्यः; 'one's self,' आत्मा m. (न्), स्वयं indecl., 'by resemblance to one's self,' आत्मौपम्येन; 'done by one's self,' स्वयंकृतः -ता -तं; 'one's own,' स्व, आत्म in comp., 'like one's own body,' स्वशरीरवत्, आत्मशरीरवत्, 'one's own house, आत्मगृहं, स्वगृहं. See OWN.

ONE-EYED, a. एकाक्षः -क्षा -क्षं, एकदृक् m. f. n. (श्), एकाक्षिविकलः -ला -लं, एकनेत्रः -त्रा -त्रं, एकचक्षुः -क्षुः -क्षुः (स्), काणः -णा -णं, काणेयः -यी -यं, काणेरः -री -रं

ONE-HANDED, a. एककरः -रा -रं, एकहस्तः -स्ता -स्तं, एकपाणिः -णिः -णि.

ONEIROCRITIC, ONEIROCRITICAL, a. स्वप्नविचारी m. (न्), स्वप्नप्रकाशकः, स्वप्नार्थज्ञापकः, स्वप्नार्थबोधकः.

ONEIROMANCY, s. स्वप्नविचारः, स्वप्नप्रकाशनं, स्वप्नार्थज्ञापनं, स्वप्नार्थबोधनं, स्वप्नपरीक्षा, स्वप्नादिलक्षणाद् भविष्यत्सूचनं or शुभाशुभकथनं.

ONENESS, s. एकता -त्वं, ऐक्यं, एकीभावः, ऐकभावः, अद्वैतं, अभेदः.—(Doctrine of oneness in theology) See UNITY.

TO ONERATE, v. a. सभारं -रां कृ, भारवन्तं -वतीं -वत् कृ. See TO LOAD.

ONEROUS, a. दुर्भरः -रा -रं, दुःसहः -हा -हं, दुर्वहः -हा -हं, भारी -रिणी -रि (न्), भारवान् -वती -वत् (त्), सभारः -रा -रं, कष्टकरः रा -रं, पीडाकरः &c., गुरुः -रुः -रु

ONION, s पलाण्डुः m., सुकन्दकः, मुकन्दकः, मुकुन्दकः, दुर्द्रुमः, दुद्रुमः, लताकः, गृञ्जनः, मुखगन्धकः, मुखदूषणः, तीक्ष्णकन्दः, महाकन्दः, नीचभोज्यः.

ONLY, a. (Single, one alone) एकः -का -कं, केवलः -ला -ली -लं, केवली -लिनी -लि (न्), कैवल्यः -ल्या -ल्यं, मात्र in comp. मात्रकः -का -कं, अद्वितीयः -या -यं; 'an only son,' एकपुत्रः, एकसूनुः m.—(Thus and no other) अनन्यः -न्या -न्यं, नान्यः -न्या -न्यत्; 'having one only refuge,' अनन्यगतिः -तिः -ति, 'his only business is reading the Vedas,' वेदाध्ययनाद् अस्य कार्यं नान्यत्.

ONLY, adv. केवलं, मात्रं -त्रेण -त्रात्, कुशारं, एकान्ततस्, एव; 'by calculation only,' गणितमात्रेण, केवलगणितेन, गणितेनैव; 'touch only,' स्पर्शमात्रं; 'from touch only,' स्पर्शमात्रात्.

ONOMANCY, s. नामाक्षरलक्षणाद् भविष्यत्सूचनं or शुभाशुभकथनं.

ONOMATOPŒIA, s. (In rhetoric) अनुकरणं, अनुकरणशब्दः, शब्दानुकरणं.

ONSET, s. आक्रमः -मणं, अभिक्रमः -मणं, अधिक्रमः -मणं, अभियोगः, अभिग्रहः, अवस्कन्दः -न्दनं, अभ्याघातः; 'emulative onset,' सहस्पर्धिका.

ONTOLOGIST, s. सत्त्वविज्ञाता, सत्त्वभावविचारी m. (न्), भूतभावविचारी m.

ONWARD, ONWARDS, *adv.* अग्रे, अग्रतस्, पुरस्, पुरतस्, पुरस्तात्, अभितस्, अभिमुखं -खे, अतिमुखं -खे, अग्रभाग प्रति, उत्तरेण, ऊर्द्ध्वं, or expressed by प्र, as, 'proceeding onwards,' अग्र गमनं, अग्रगमनं प्रगमनं, प्रस्थानं.—(A little further) किञ्चिदन्तरं -रेण, किञ्चिदुपरतम्.

ONWARD, *a.* (Advanced, in advance) अग्रः -ग्रा -ग्रं, अग्रिमः -मा -मं, अग्रगामी -मिनी -मि (न्), अग्रगः -गा -गं, अग्रतःसरः -रा -रं, अग्रसरः -रा -रं, प्रगतः -ता -तं.—(Increased) वर्द्धितः -ता -तं, प्रवृद्धः -द्धा -द्धं, प्ररूढः -ढा -ढं.

ONYX, *s.* (Precious stone) गोमेदकः -कं, शिवधातुः *m.*

To OOZE, *v. n.* शनैः शनैः स्रु (c. 1. स्रवति, स्रोतुं) or स्यन्द् (c. 1. स्यन्दते -न्दितुं) or प्रस्यन्द् or क्षर् (c. 1. क्षरति -रितुं) or री (c. 4. रीयते, रेतुं) or गल् (c. 1. गलति -लितुं), क्रमे क्रमे or बिन्दुक्रमेण क्षरणं कृ.

OOZE, *s.* (Moist mud) सद्रवपङ्कः, चिक्कणपङ्कः, क्षरत्पङ्कः.—(Exudation) स्यन्दनं, स्रवः, बिन्दुस्रावः, स्यन्नरसः, स्वेदः, द्रवः, धारा.

OOZING, *s.* शनैः शनैः स्रवणं or स्यन्दनं or क्षरणं or गलनं.

OOZING, *part.* शनैः शनैः स्यन्दी -न्दिनी -न्दि (न्) or स्यन्दमानः -ना -नं or निस्यन्दमानः -ना -नं or स्यन्नः -न्ना -न्नं or क्षरन् -रन्ती -रत् (त्) or स्रवन् &c. or रीणः -णा -णं.

OOZY, *a.* मृद्वपङ्कमयः -यी -यं, क्षरत्पङ्कमयः &c., सद्रवः -वा -वं.

OPACITY, OPAQUENESS, *s.* (The quality of being impervious to light) प्रकाशाभेद्यता, प्रभाभेद्यता, किरणाभेद्यता, अस्वच्छता, प्रकाशप्रतिबन्धकत्वं, प्रकाशरोधकत्वं, दृष्टिरोधकता.—(Obscurity) निष्प्रभता, अप्रकाशता, कालुष्यं, प्रभाहीनता, सान्धकारता, अप्रसन्नता.—(Disease in the eyes) शुक्रं.

OPAQUE, OPACOUS, *a.* (Impervious to light) प्रकाशाभेद्यः -द्या -द्यं, प्रभाभेद्यः &c., किरणाभेद्यः &c., प्रकाशप्रतिबन्धकः -का -कं, प्रकाशरोधकः -का -कं, किरणरोधकः &c.—(Not shining by its own light) परप्रकाशः -शा -शं.—(Obscure, not transparent) अस्वच्छः -च्छा -च्छं, निष्प्रभः -भा -भं, अप्रकाशः -शा -शं, प्रकाशहीनः -ना -नं, सान्धकारः -रा -रं, कलुषः -षा -षं.

OPAL, *s.* शिवधातुः *m.*, पाण्डुमृत्तिका, पद्माभः, क्षीरस्फटिकः, गोमेदसन्निभः.

To OPEN, *v. a.* (Unclose) विवृ (c. 5. -वृणोति -णुते -वरितुं -रीतुं), अपावृ, अपवृ, उद्घट् (c. 10. -घाटयति -यितुं), व्यादा (c. 3. -ददाति -दातुं), 'he opens the door,' द्वारं विवृणोति or उद्घाटयति.—(Unbar) निरर्गलीकृ.—(Open the mouth) मुखं व्यादा.—(Open the eyes) लोचने or चक्षुषी उन्मील् (c. 10. -मीलयति -यितुं) or प्रोन्मील्, उन्मिष् (c. 6. -मिषति -मेषितुं) or उत्फल् (c. 10. -फालयति -यितुं), नयने विवृ.—(Open a book) पुस्तकं मुच् (c. 6. मुञ्चति, मोक्तुं) or विमुच्, पुस्तकमोचनं कृ.—(Open a letter) उन्मुद्रीकृ, विमुद्रीकृ.—(Expand) विस्तृ (c. 10. -स्तारयति -यितुं), विकाश् (c. 10. -काशयति -यितुं), विकस् (c. 10. -कासयति -यितुं), विवृ, व्यादा.—(Lay open, make manifest) व्यञ्ज् (c. 7. -अनक्ति -अंक्तुं, c. 10. -अञ्जयति -यितुं), विकाश्, प्रकाश्, प्रकटीकृ, व्यक्तीकृ.—(Split, break, cut open) भिद् (c. 7. भिनत्ति, भेत्तुं), विभिद्, निर्भिद्, छिद् (c. 7. छिनत्ति, छेत्तुं), विच्छिद्.—(Expound) व्याख्या (c. 2. -ख्याति -तुं), व्याकृ, प्रकाश्, स्पष्टीकृ, व्यक्तीकृ, विवृ, विवरणं कृ.—(Clear) शुध् (c. 10. शोधयति -यितुं), विशुध्.—(Begin) आरभ् (c. 1. -रभते -रब्धुं), उपक्रम् (c. 1. -क्रमते -मितुं).

To OPEN, *v. n.* (Unclose itself) विवृतः -ता -तं भू, अपावृतः -ता -तं भू.—(Expand) विस्तृ in pass. (-स्तीर्य्यते), विवृ in caus. pass. (-वार्य्यते), विजृम्भ् (c. 1. -जृम्भते -म्भितुं), विततीभू.—(As flowers) विकस् (c. 1. -कसति -सितुं), प्रविकस्, स्फुट् (c. 6. स्फुटति, स्फुटितुं), फुल्ल् (c. 1. फुल्लति -ल्लितुं), विकसितः -ता -तं भू, विमुद्रीभू.—(Crack, open in chinks) स्फुट्, विदल् (c. 1. -दलति -लितुं), विदॄ in pass. (-दीर्य्यते), भिद् in pass. (भिद्यते), विभिद्.—(Begin) आरभ् (c. 1. -रभते -रब्धुं), समारभ्, प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं).

OPEN, *a.* (Unclosed) विवृतः -ता -तं, अनावृतः -ता -तं, अपावृतः -ता -तं, असंवृतः -ता -तं, उद्घाटितः -ता -तं, व्यात्तः -त्ता -त्तं, अपरावृतः &c.—(As the mouth) व्यात्तः -त्ता -त्तं, विवृतः &c.—(As the eyes) उन्मीलितः -ता -तं, उन्मिषितः -ता -तं, विवृतः &c.—(As a book) मुक्तः -क्ता -क्तं.—(Expanded) विततः -ता -तं, विस्तृतः -ता -तं, विस्तीर्णः -र्णा -र्णं, विकाशितः -ता -तं, विजृम्भितः -ता -तं, उज्जृम्भितः -ता -तं, उज्जृम्भः -म्भा -म्भं, जृम्भितः -ता -तं, जृम्भः -म्भा -म्भं, प्रसृतः -ता -तं.—(Unsealed, as a letter, &c.) उन्मुद्रः -द्रा -द्रं, विमुद्रः -द्रा -द्रं, उन्मुद्रीकृतः -ता -तं.—(Not stopped, without obstruction) अनर्गलः -ला -लं, निरर्गलः &c., अप्रबाधः -धा -धं, असंरुद्धः -द्धा -द्धं, अपिहितः -ता -तं, प्रतिबन्धरहितः -ता -तं, अव्यवधानः -ना -नं.—(Free, clear, unimpeded) मुक्तः -क्ता -क्तं, विमुक्तः &c., शोधितः -ता -तं, शुद्धः -द्धा -द्धं, विशुद्धः &c., अबद्धः -द्धा -द्धं, निर्विघ्नः -घ्ना -घ्नं, उच्छृङ्खलः -ला -लं, विशृङ्खलः -ला -लं, निर्विघ्नः -घ्ना -घ्नं, निरवरोधः -धा -धं.—(Plain, evident) व्यक्तः -क्ता -क्तं, प्रव्यक्तः &c., अभिव्यक्तः &c., स्पष्टः -ष्टा -ष्टं, विस्पष्टः &c.—(Public) प्रकाशः -शा -शं, सुप्रकाशः &c., प्रकटः -टा -टं.—(Not close, roomy) विरलः -ला -लं.—(Not covered with trees, as a country) निर्वनः -ना -नं, निर्वृक्षः -क्षा -क्षं, वृक्षशून्यः -न्या -न्यं.—(Ingenuous, candid) निष्कपटः -टा -टं, निर्व्याजः -जा -जं, निर्व्यलीकः -का -कं, विमलः -ला -लं, विमलात्मा -त्मा -त्म (न्), सरलः -ला -लं, शुद्धमतिः -तिः -ति, सरलमति &c., मायाहीनः -ना -नं, अवक्रः -क्रा -क्रं, अगूढभावः -वा -वं, उदारः -रा -रं; 'having an open countenance,' उदारलक्षणः -णा -णं.—(Unsheltered) अनाश्रयः -या -यं, निराश्रयः &c.—(Not hidden) अगूढः -ढा -ढं, अगुप्तः -प्ता -प्तं; 'to lay open,' प्रकाश् (c. 10. -काशयति -यितुं), प्रकाशीकृ. See To OPEN; 'an open space,' विविक्तं; 'open to the weather,' अभ्रावकाशिकः -की -कं; 'open to all comers,' मुक्तद्वारः -रा -रं; 'open at one end,' एकमुखः -खा -खं; 'an open vowel,' उदात्तः; 'open day,' प्रकाशं; 'having gone out into the open air,' प्रकाशं निर्गतः; 'open state of the organs of speech,' विवारः, विवृतता -त्वं.

OPENED, *p. p.* (Unclosed) उद्घाटितः -ता -तं, उद्घट्टितः -ता -तं, अपावृतः -ता -तं. See OPEN.—(Unbarred) निरर्गलीकृतः -ता -तं.—(Unsealed) उन्मुद्रीकृतः -ता -तं, विमुद्रीकृतः &c.—(Uncovered) अनावृतः -ता -तं, अनाच्छादितः -ता -तं, अपवृतः -ता -तं.—(Split) स्फुटितः -ता -तं, दलितः -ता -तं, विदलितः &c., भिन्नः -न्ना -न्नं.—(As flowers) विकसितः -ता -तं, फुल्लः -ल्ला -ल्लं, स्फुटः -टा -टं, विमुद्रः -द्रा -द्रं.—(Made plain) व्यक्तीकृतः -ता -तं, प्रकाशितः -ता -तं, स्पष्टीकृतः &c., व्याख्यातः &c.—(Cleared) शोधितः -ता -तं.

OPENER, *s.* उद्घाटकः, उद्घाटनकृत्, विवरणकृत्, विकाशकः.

OPEN-EYED, *a.* विवृताक्षः -क्षी -क्षं, उत्फुल्लनयनः -ना -नं, सचेतन &c.

OPEN-HANDED, *a.* मुक्तहस्तः -स्ता -स्तं, उदारहस्तः &c., उदारः -रा -रं.

OPEN-HEARTED, *a.* सरलमतिः -तिः -ति, शुद्धमतिः &c., अगूढभावः -वा -वं.

OPEN-HEARTEDNESS, *s.* सरलमतित्वं, शुद्धमतित्वं, उदारता, मायाहीनता.

OPENING, *s.* (Act of opening) उद्घाटनं, उद्घट्टनं, व्यादानं, विवृतिः *f.*, विवरणं.—(Aperture) छिद्रं, रन्ध्रं, द्वारं, मुखं.—(Beginning

n m आरम्भ प्रारम्भ उपक्रम उपोद्घात
p C m n ng fi आरम्भक
का क प्रारम्भक &c. प्रथम: आ म आद्य: आ द्य —(F p...d
... as a flower) विकाशी -शिनी -शि (न्), विकासी &c., विकाशन
-शनी -शन् (न्), विकसन &c., प्रविकसन् &c. स्फुटन् &c.

OPENLY, *adv.* प्रकाशं, प्रकटं, प्रत्यक्षं, व्यक्तं, सुव्यक्तं, स्फुटं.

OPEN-MOUTHED, *a.* विवृतास्य: -स्या -स्यं, व्यात्तवक्त्र: -क्त्रा -क्त्रं, मुक्तमुख: -खा -खं, प्रमुक्तमुख: &c., गृहीतमुख: -खी -खं.

OPENNESS, *s.* (Freedom from covering or obstruction) विवृतत्वं, विवृति: *f.*, अनावृतत्वं, अनावृति: *f.*, व्यक्तता, मुक्तता -त्वं, अरुद्धता निर्विघ्नता.—(Plainness, clearness) व्यक्तत्वं -ता, प्रत्यक्षता, स्पष्टता, शुद्धता, शुद्धि: *f.*, वैमल्यं, निर्मलता.—(Freedom from disguise) निर्व्याजता, अव्याज:, व्याजहीनता, कपटहीनता, निष्कपटत्वं, निष्कापट्यं.—(Frankness) सारल्यं, सरलता, अकापट्यं, अमाया, मायाहीनता, ऋजुता, दाक्षिण्यं, निर्व्यलीकता, भावागूढता, भावशुद्धता, शुद्धमतित्वं, अनिभृतता, उदारता.—(Publicity) प्रकाशता, प्रकाश:, प्राकट्यं, प्रसिद्धि: *f.*, प्रसिद्धता, अगूढता, अगुप्तता.—(Roominess, freedom from closeness) विरलता, वैरल्यं.—(Want of shelter) निराश्रयता, अनाश्रयता, आश्रयहीनत्वं, अभावकाशिकत्वं.—(Of a country) निर्वेशत्वं.

OPERA, *s.* सङ्गीतं, तौर्य्यत्रिकं, नाट्यं, सङ्गीतविशिष्टो नाटक:

To OPERATE, *v. n.* (Act, exert action) कृ, चेष्ट् (c. 1. चेष्टते -ष्टितुं), विचेष्ट्, कर्म्म कृ, चेष्टां कृ, प्रवृत् (c. 10. -वर्त्तयति -यितुं), कर्तृक: -का -कं भू.—(Effect, produce effect) उत्पद् (c. 10. -पादयति -यितुं), समुत्पद्, उपपद्, सम्पद्, फलम् उत्पद्, जन् (c. 10. जनयति -यितुं), सञ्जन्, साध् (c. 10. साधयति -यितुं) कार्य्यं साध्, फलीभू, प्रभू.—(In surgery) शस्त्रक्रियां कृ, शस्त्रोपायं कृ, शस्त्रोपचारं कृ.

OPERATION, *s.* (Agency) कर्तृत्वं, कर्तृकत्वं, कारणत्वं, कारकत्वं, हेतुता, प्रवर्त्तकत्वं, प्रयोजकत्वं.—(Action) क्रिया, कृति: *f.*, कर्म्म *n.* (न्), चेष्टा, व्यापार:, विधानं, प्रवृत्ति: *f.*, प्रवर्त्तनं.—(Act, deed) कर्म्म *n.*, कार्य्यं, कृत्यं, चेष्टितं, विचेष्टितं, 'mental operation,' मनोव्यापार:, 'arithmetical,' परिकर्म्म *n.*, कर्म्म *n.*, 'secret in operation,' निगूढकार्य्य: -र्य्या -र्य्यं; 'speedy in operation' आशुकारी -रिणी -रि (न्); 'slow,' मन्दकारी &c.—(In surgery) शस्त्रोपचार:, शस्त्रोपचार:, शस्त्रक्रिया, शस्त्रकृत्यं, शस्त्रोपाय:, शस्त्रकर्म्म *n.*, उपचार:.

OPERATIVE, *a.* (Exerting agency) कर्म्मकारी -रिणी -रि (न्), कर्म्मकार: -रा -रं, क्रियाकारी &c., कारक: -का -कं, कर्तृक: -का -कं, कारणिक: -की -कं, हेतुक: -का -कं, प्रवर्त्तक: -का -कं, प्रयोजक: -का -कं.—(Producing effect, efficacious) कार्य्यसाधक: -का -कं, कार्य्यसम्पादक: &c., फलोत्पादक: &c., सिद्धिकर: -री -रं, गुणकारी &c., गुणावह: -हा -हं, सफल: -ला -लं, प्रभविष्णु: -ष्णु: -ष्णु.

OPERATIVE, *s.* कर्म्मकार:, शिल्पकार:, कारुक:, कारु: *m.*, शिल्पकर्म्मकारी *m.*

OPERATOR, *s.* कर्त्ता *m.* (र्तृ), कारक:, कर्तृक:, कार्य्यकर्त्ता *m.*, प्रवर्त्तक:.—(In surgery) शस्त्रोपचारकृत् *m.*, उपचारकारी *m.* (न्), उपचारकर्त्ता *m.*

OPEROSE, *a.* श्रमसाध्य: -ध्या -ध्यं, कष्टसाध्य: &c., श्रमी -मिणी &c.

OPHIOLOGY, *s.* सर्पविद्या, भुजङ्गविद्या, सर्पादिविषयका विद्या.

OPHIOMANCY, *s.* सर्पादिलक्षणाद् भविष्यत्सूचना or भविष्यदनुमानं.

OPHIOPHAGOUS, *a.* सर्पभक्षक: -का -कं, सर्पभोजी -जिनी -जि (न्).

OPHTHALMIA, OPHTHALMY, *s.* अभिष्यन्द:, अधिमन्थ:, रक्ताधिमन्थ:, रक्ताभिष्यन्द:, अर्बुद: -दं, पिच्चट:, चक्षूरोग:, नेत्ररोग:, नेत्रामय:, अक्षिरोग:, लोचनामय:.

OPHTHALMIC, *a.* चाक्षुष: -षी -षं, नेत्रसम्बन्धी -न्धिनी &c., नेत्रविषय: &c.

O ... ... o निद्राकारकम् औषधं उपशामक
O ... *a.* स्वप्नकृत् *m. f. n.* निद्राकारी -रिणी -रि (न्), निद्राजनक: -का -कं, शामक: -का -कं, उपशमनकारी &c., उपशायी &c., उपशमकृत्

To OPINE, *v. n.* मन् (c. 4. मन्यते, मन्तुं), तर्क् (c. 10. तर्कयति -यितुं). *See To* THINK.

OPINIATED, OPINIATIVE, *a.* स्वमताभिमानी -निनी -नि (न्), मताभिमानी &c., स्वमताग्रही &c., मताग्रही &c., स्वमतवादी &c., मतवादी &c., दुराग्रही &c.

OPINIATIVENESS, *s.* स्वमताभिमानं -निता, स्वमताग्रह:, मताभिमानं, दुराग्रह: स्वमतकाङ्क्षा.

OPINION, *s.* मतं, मति: *f.*, बुद्धि: *f.*, सम्मतं, तर्क:, विचार:, अनुमानं बोध:, भाव:, छन्द:, 'a different opinion,' विकल्प:, परमतं 'difference of opinion,' मतिभेद:, मतभेद:, विप्रतिपत्ति: *f.*; 'opposed in opinion,' विप्रतिपन्न: -न्ना -न्नं; 'public opinion,' लोकमतं जनमतं; 'regard for it,' लोकलज्जा, जनलज्जा; 'atheistic opinion,' नास्तिकमतं; 'legal opinion,' सूत्रं.—(Estimation) मानं, सम्मानं.

OPINIONATED, OPINIONATIVE. *See* OPINIATED, &c.

OPIUM, *s.* अहिफेनं, अहिफेनं, खस्खसरस:, उग्रविषं.

OPPIDAN, *a.* नागरिक: -की -कं, नागर: -री -रं, पौर: -री -रं.

OPPILATED, *p. p.* सम्बाध: -धा -धं, सङ्कीर्ण: -र्णा -र्णं, सङ्कुल: -ला -लं.

OPPONENT, *a.* विरोधी -धिनी -धि (न्), प्रतिरोधी &c., विरुद्ध: -द्धा -द्धं, वैरी -रिणी &c., प्रतियोगी &c., प्रतिकूल: -ला -लं, विपक्ष: -क्षा -क्षं, प्रतिपक्ष: &c., विपरीत: -ता -तं, विमुख: -खा -खं, पराङ्मुख: &c., विमत: -ता -तं, प्रतीपक: &c.

OPPONENT, *s.* प्रतिरोधी *m.* (न्), विरोधी *m.*, वैरी *m.*, शत्रु: *m.*, अरि: *m.*, प्रतियोगी *m.*, प्रतिरोद्धा *m.* (द्धृ), प्रतिरोधक:, प्रतिबन्धक:, प्रतियोद्धा *m.* (द्धृ), प्रतिपक्ष:, अभियाती *m.* (न्), विजिगीषु: *m.*—(In controversy) विवादी *m.* (न्), पूर्व्ववादी *m.*, पक्षवादी *m.*, प्रतिवादी *m.*, उत्तरवादी *m.*, पूर्व्वपक्षी *m.*, प्रतिपक्षी *m.*, वादी *m.*

OPPORTUNE, *a.* समयोपयुक्त: -क्ता -क्तं, समयोचित: -ता -तं, समयानुकूल: -ला -लं, सामयिक: -की -कं, कालिक: &c., कालसदृश: -शी -शं, कालयोग्य: -ग्या -ग्यं, प्रस्तावसदृश: &c., प्रास्ताविक: -की -कं, प्राप्तावसर: -रा -रं, प्राप्तकाल: -ला -लं, प्राप्तसमय: -या -यं, प्रसङ्गोपयुक्त: &c., आवत्कालीय: -या -यं.

OPPORTUNELY, *adv.* यथावसरं, काले, स्थाने, समयानुसारेण, समयोपयुक्तं, प्रसङ्गानुसारात्, प्रस्तावसदृशं, यथावकाशं, यथासमयं, यथाप्रसङ्गं, कालयोग्यं, यथायोग्यं, वेलायां.

OPPORTUNENESS, *s.* समयोपयुक्तता, कालयोग्यता, समयौचित्यं, प्रसङ्गयोग्यता, प्रसङ्गानुकूल्यं, कालिकत्वं.

OPPORTUNITY, *s.* अवसर:, प्रसङ्ग:, समय:, प्रस्ताव:, अवकाश:, काल:, कार्य्यकाल:, कालयोग:, सन्धि: *m.*, कालसन्धि: *m.*, वेला, योग:, सुयोग:, स्थानं, वार:, प्रक्रम:, 'according to opportunity' यथावसरं यथाप्रसङ्गं, यथावकाशं; 'to lose one's opportunity,' कालं हृ (c. 1. हरति, हर्त्तुं) or हा (c. 3. जहाति, हातुं), 'to await it,' अवसरं प्रतिपाल् (c. 10. -पालयति -यितुं); 'one who has found an opportunity,' लब्धावकाश: -शा -शं.—(Means) साधनं, उपाय:, सन्धानं.

To OPPOSE, *v. a.* and *n.* (Act against, resist) प्रतिकृ, विप्रतिकृ, विप्रकृ, प्रतिरुध् (c. 7. -रुणद्धि -रोद्धुं), विरुध्, संरुध्, विरुद्धीभू, प्रतिकूल (nom. प्रतिकूलयति -यितुं), प्रतिकूलीभू, पर्य्यवस्था (c. 1. -तिष्ठति -स्थातुं),

प्रति ... प्रतीप ... m प्रतीपायन, प्रतिहन (c. 2. -हन्ति -न्तुं), विपरीतः -ता -तं भू or अस्. —(Put in opposition, set *one against the other*) विरुद्धं -द्धां कृ, विरुद्धीकृ, परस्परं विरुध, प्रतिकूलीकृ, विरोधिनं -नीं कृ. —(Hinder) निवृ (c. 10. -वारयति -यितुं), विघ्न (nom. विघ्नयति -यितुं), बाध् (c. 1. बाधते -धितुं), प्रतिबन्ध् (c. 9. -बध्नाति -बन्धुं), विहन्, प्रतिहन्, व्याहन्, रुध्. —(Check) निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).

OPPOSED, *p. p.* विरुद्धः -द्धा -द्धं, प्रतिरुद्धः &c., पर्यवस्थितः -ता -तं, विपरीतः -ता -तं, प्रतिकूलः -ला -लं, प्रातिकूलिकः -की -कं, विरोधी -धिनी -धि (न्), विप्रतिकृतः -ता -तं, विप्रकृतः &c., विप्रतिपन्नः -न्ना -न्नं, प्रतिघातः -ता -तं. —(Hindered, checked) वारितः -ता -तं, निवारितः -ता -तं, बाधितः -ता -तं, विहतः &c., प्रतिहतः &c., रुद्धः &c., विघ्नितः &c.; when 'opposed' signifies 'the opposite of,' इतर may be used; as, 'opposed to movable,' जङ्गमेतरः -रा -रं.

OPPOSER, *s.* विरोधी *m.* (न्), प्रतिरोधी *m.*, पर्यवस्थाता *m.* (तृ), प्रतियोगी *m.* (न्), विरोधकः, प्रातिकूलिकः, प्रतिहन्तकः. *See* OPPONENT.

OPPOSITE, *a.* (Situated *in front, facing*) अभिमुखः -खा -खी -खं, अभिमुखगतः -ता -तं, अभिमुखस्थः -स्था -स्थं, सम्मुखः -खा -खं, सम्मुखस्थः -स्था -स्थं, अभिसम्मुखः -खा -खं, सम्मुखीनः -ना -नं, प्रतिमुखः -खा -खं. —(Adverse, contrary) विपरीतः -ता -तं, प्रतिकूलः -ला -लं, विरुद्धः -द्धा -द्धं, विरोधी -धिनी -धि (न्), प्रतिरोधी &c., विपर्यस्तः -स्ता -स्तं, अपसव्यः -व्या -व्यं, प्रसव्यः &c., अपसव्यकः &c., प्रतिपक्षः -क्षा -क्षं, विपक्षः &c., अवकटः -टा -टं. —(Further, *on the other side*) परः -रा -रं, अपरः -रा -रं; 'the opposite bank,' पारं, परतीरं, तीरान्तरं. —(Reverse of) व्यत्यस्तः -स्ता -स्तं, इतर in comp., as, 'the opposite of *movable*,' जङ्गमेतरः -रा -रं; 'of white,' सितेतरः &c.; 'of left,' वामेतरः &c.; 'of *innate*,' सहजेतरः &c. — (Opposite side of the argument) उत्तरपक्षः, परपक्षः, प्रतिपक्षः.

OPPOSITE, *s.* विपर्ययः, विपर्यासः, व्यत्ययः, व्यत्यासः, विपर्यासः, विपरीतं.

OPPOSITELY, *adv.* (In front) अभिमुखं, सम्मुखं, प्रतिमुखं, सम्मुखीनं. —(Adversely) विपरीतं, वैपरीत्येन, प्रतिकूलं, विरुद्धं, विरोधेन, विपर्ययेण, प्रातिकूल्येन.

OPPOSITION, *s.* विरोधः -धनं, प्रतिरोधः -धनं, प्रतिकारः, विप्रतिकारः, प्रतिक्रिया, प्रत्यवस्थानं, पर्यवस्था -स्थानं, प्रतियोगः -गिता, विप्रतिपत्तिः *f.*, प्रतिबन्धकता, प्रतिबन्धिता, प्रतियत्नः. —(State of being opposed) विरुद्धता, विपरीतता, वैपरीत्यं, प्रतिकूलता, प्रतिपक्षता, प्रातिकूल्यं. —(Contrariety) विपर्ययः, विपर्यासः, पर्ययः, विपर्यासः, वैपरीत्यं, व्यत्ययः, व्यत्यासः, विकारः. —(Impediment) व्याघातः, विघ्नः, बाधः -धा, प्रतिबन्धः, अवरोधः, उपरोधः, निरोधः, रोधः. —(Collective body of opposers) विरोधिजनसमूहः, प्रतियोगिपक्षः, विरोधकपक्षः. —(Hostile feeling) विरुद्धभावः, द्वेषभावः; 'opposition of interests,' विप्रतिपत्तिः *f.*; 'in opposition to what was before said,' पूर्वोक्तप्रतिपक्षे.

To OPPRESS, *v. a.* पीड् (c. 10. पीडयति -यितुं), अभिपीड्, उपपीड्, निपीड्, उपनिपीड्, बाध् (c. 1. बाधते -धितुं), प्रबाध्, परिबाध्, अधिबाध्, द्रुह् (c. 4. द्रुह्यति, द्रोहितुं, द्रोग्धुं), अभिद्रुह्, कृश् (c. 10. कर्शयति -यितुं), अभिद्रोहं कृ, अर्द् (c. 10. अर्दयति -यितुं), विडम्ब् (c. 10. -डम्बयते -यितुं), अपकृ, अपकारं कृ, मर्दनं कृ, उपमर्दनं कृ, प्रधृष् (c. 10. धर्षयति -यितुं), उपद्रव कृ, उपप्लवं कृ, नैष्ठुर्यं कृ, क्रौर्यं कृ, क्रूरवत् कृ, अभिभू, बलात्कारं कृ.

OPPRESSED, *p. p.* पीडितः -ता -तं, बाधितः -ता -तं, अतिदुग्धः -ग्धा -ग्धं, अभिद्रुह्यमाणः -णा -णं, उपद्रुतः -ता -तं, विडम्बितः -ता -तं, अभिभूतः -ता -तं, अपकृतः -ता -तं, आकुलितः -ता -तं.

OPPRESSION, *s.* (The act) पीडनं, प्रजापीडनं, अभिद्रोहः, द्रोहः -हणं, उपद्रवः, उपद्रवकरणं, उपमर्दः -र्दनं, विमर्दः -र्दनं, बाधः -धनं, कर्शनं, परिभवः, उपप्लवः, उपप्लवकरणं, अपकारः, अपकर्म *n.* (न्), अपक्रिया, बलात्कारः, निष्ठुरता, नैष्ठुर्यं, क्रूरता, क्रौर्यं, दौरात्म्यं, उत्पातः, विडम्बनं -ना, हठः, अन्यायकरणं. —(State) पीडा, बाधा, पीडितत्वं. —(Weight) भारः.

OPPRESSIVE, *a.* (Cruelly *severe, or tyrannical*) बाधकः -का -कं, पीडाकरः -रा -रं, पीडकः -का -कं, उपद्रवकारी -रिणी -रि (न्), उपद्रवी &c., उपमर्दकः -का -कं, अपकारकः &c., सबाधः -धा -धं, निष्ठुरः -रा -रं, क्रूरः -रा -रं, निर्दयः -या -यं, दुर्वृत्तः -त्ता -त्तं, क्लेशदायकः -का -कं, क्लेशदः -दा -दं, अन्यायकारी &c. —(Heavy) भारी -रिणी &c.

OPPRESSIVENESS, *s.* बाधकत्वं -ता, सबाधता, क्लेशकता, नैष्ठुर्यं, क्रौर्यं.

OPPRESSOR, *s.* प्रजापीडकः, उपद्रवकर्त्ता *m.* (र्तृ), उपद्रवी *m.* (न्), क्रूरचरितः, निष्ठुरः, निर्दयः, अत्याचारः, दुरात्मा *m.* (न्), दुर्जनः, दुर्वृत्तः, दस्युः *m.*

OPPROBRIOUS, *a.* निन्दकः -का -कं, निन्दार्थकः &c., निन्दारूपः -पा -पं, निन्दात्मकः &c., गर्हात्मकः &c., गर्हार्थकः &c., अपवादकः &c., मुखरः -रा -रं, दुर्मुखः -खा -खं, परुषः -षा -षं, गर्ह्यः -र्ह्या -र्ह्यं.

OPPROBRIOUSLY, *adv.* निन्दापूर्वं, सापवादं, सतिरस्कारं, गर्हणीयं.

OPPROBRIOUSNESS, *s.* निन्दकत्वं, अपवादकता, अभिशापः, पौरुष्यं, मौखर्यं.

OPPROBRIUM, *s.* निन्दा, अपवादः, घृणा, गर्हा -र्हणं, कुत्सा, तिरस्कारः, अवज्ञा -ज्ञानं, परिभवः, अपमानं, वाच्यता, वचनीयता, धिक्क्रिया, कुख्यातिः *f.*

To OPPUGN, *v. a.* प्रतिकृ, विप्रतिकृ, प्रतिरुध्, विरुध् &c. *See* To OPPOSE.

OPPUGNANCY, *s.* विरोधः, प्रतिरोधः, प्रातिकूल्यं, वैपरीत्यं, प्रतियोगिता.

OPPUGNED, OPPUGNER. *See* OPPOSED, OPPOSER, OPPONENT.

OPTATIVE, *a.* इच्छासूचकः -का -कं, इच्छाबोधकः &c., अभिलाषबोधकः &c., अभिलाषज्ञापकः &c. The grammatical symbol is लिङ्.

OPTIC, OPTICAL, *a.* (Pertaining to vision) चाक्षुषः -षी -षं, दृष्टिविषयकः -का -कं, दृष्टिसम्बन्धी -न्धिनी &c. —(Pertaining to optics) दृक्शास्त्रसम्बन्धी &c., दृक्शास्त्रविषयकः &c.

OPTIC, *s.* (Organ of sight) दृष्टीन्द्रियं, चक्षुरिन्द्रियं, दर्शनसाधनं.

OPTICIAN, *s.* (Maker of optic instruments) चाक्षुषयन्त्रकारकः -कर्त्ता *m.* (र्तृ), दृष्टिसाधकयन्त्रकारः, दृष्टियन्त्रविक्रेता *m.* (तृ), चाक्षुषयन्त्रविक्रयी *m.* —(Skilled in optics) दृक्शास्त्रज्ञः, चाक्षुषशास्त्री *m.* (न्).

OPTICS, *s. pl.* दृग्विद्या, चाक्षुषविद्या, दृष्टिविद्या, दृक्शास्त्रं, दृष्टिविषयविद्या, चाक्षुषं ज्ञानं, दर्शनानुशासनं.

OPTIMACY, *s.* कुलीनवर्गः, कुलीनलोकः, कौलीन्यं, कुलीनता -त्वं.

OPTIMISM, *s.* उत्तमता -त्वं, अत्युत्तमता -त्वं, सत्तमता -त्वं.

OPTION, *s.* (Power of choosing) विकल्पः -ल्पकः, अनुकल्पः, कल्पः, विभाषा, इच्छा, वरणाधिकारः. —(Wish) इच्छा, अभिलाषः, कामः, मनस्कामः, रुचिः *f.*, अभिरुचिः, ईप्सितं, अभीप्सितं.

OPTIONAL, *a.* वैकल्पिकः -की -कं, विकल्पकः &c., सविकल्पकः -का -कं, आनुकल्पिकः -की -कं, विकल्पितः -ता -तं, सविकल्पः -ल्पा -ल्पं, ऐच्छिकः -की -कं, काम्यः -म्या -म्यं, अभिकामिकः &c., यथाकामः -मा -मं, विभाषितः -ता -तं; 'an optional matter,' विकल्पविषयः, विभाषाविषयः.

OPTIONALLY, *adv.* सविकल्पं -ल्पकं, सानुकल्पं, विकल्पेन, विकल्पपूर्वं.

OPULENCE, *s.* धनाढ्यता, धनबाहुल्यं, धनसम्पत्तिः *f.*, सम्पत्तिः *f.*, धनैश्वर्यं, ऐश्वर्यं, महाधनत्वं, धनसमृद्धिः *f.*, लक्ष्मीः *f.*, श्रीः *f.*, श्रीमत्त्वं.

श्रीमान् मती मत न धनाढ्य ढ्य ढ्यं महाधन ना
न बहुधन ना न अतिधनी निनी न धनी अतिध
नवान् धनवान् बहु वसुमान् &c. बहुद्रव्यवान् वसुमान्
&c., अर्थवान् &c., सम्पत्तिमान् &c., लक्ष्मीवान् &c., समृद्धः -द्धा -द्धं,
सम्पन्नः -न्ना -न्नं, धनेश्वरः, लक्ष्मीशः, सुरः m. f. (ै), आढ्य, &c.,
वर्धिष्णुः -ष्णुः -ष्णु, ऋद्धः -द्धा -द्धं.

Opulently, *adv.* धनबाहुल्येन, धनाढ्यवत्, महाधनवत्, सम्पत्तिपूर्वं.

Or, *conj.* वा placed after a word, वापि, अथवा, यद्वा, 'friend or foe,' मित्रं वा शत्रुर् वा.—(*Or else*) अथवा, किंवा, अन्यथा, इतरथा, आहोस्वित्.

Oracle, *s.* (Answer of a god to an inquiry made) शकुनं -नः, प्रश्नः, प्रसादः; 'through a voice,' देववाणी, आकाशवाणी.—(The deity who gives the answer) प्रश्नदेवता, प्रसाददेवता, प्रश्नदेवः, शकुनदेवः.—(The place where the answer is given) प्रश्नस्थानं, शकुनस्थानं, प्रसादस्थानं.—(A person whose opinion is of great authority) प्रमाणं, आप्तः.—(A wise or authoritative sentence) आप्तवचनं, आप्तोक्तिः f.

Oracular, oraculous, *a.* शाकुनिकः -की -कं, शाकुन -नी -नं, शकुनदः -दा -दं.—(Like an oracle) देववाणीतुल्यः -ल्या -ल्यं, देववाणीसदृशः -शी -शं.—(Authoritative) प्रामाणिकः -की -कं, आप्त -प्ता -प्तं.—(Obscure) गूढार्थः -र्था -र्थं.

Oracularly, *adv.* देववाणीपूर्वं, देववाणीसादृश्येन, सशकुन.

Oral, *a.* (Spoken by the mouth, not written) मुखनीयः -या -यं, उक्तः -क्ता -क्तं, अलिखितः -ता -तं, मुखकथितः -ता -तं, श्रुतः -ता -तं.

Orally, *adv.* मुखतस्, मुखात्, -खेन, अलिखितं, मुखद्वारा.

Orange, *s.* (Tree) नारङ्गः, नागरङ्गः, नार्यङ्गः, सुरङ्गः, त्वग्गन्धः, दन्तशठः, ऐरावतः, किर्मीरः, योलकी m. (न्), ललाटकः m., नादेयः, भूमिजम्बुका, राजफणिज्झकः.—(The fruit) नारङ्गफलं, नागरङ्गफलं, पिच्छिलः.

Orange-colored, *a.* नारङ्गवर्णः -र्णा -र्णं, कौसुम्भः -म्भी -म्भं, पिच्छिलवर्णः &c.

Orange-peel, *s.* पिच्छिलत्वक् m. (च्), नारङ्गफलत्वक् m. (च्).

Orangery, *s.* नारङ्गवृक्षवाटिका, नारङ्गकवाटिका.

Oration, *s.* वाक्प्रबन्धः, वाक्यप्रबन्धः, वाक्यं, प्रवचनं, सालङ्कारवाक्यं, सालङ्कारभाषणं, सोपपत्तिकवाक्यं, अलङ्कारमयं वाक्यं.

Orator, *s.* (Public declaimer) सभावक्ता m. (क्तृ), सभाप्रवक्ता m., सभावादी m. (न्), सभापण्डितः, वक्ता m., प्रवक्ता m., वादी m., प्रवचनकर्ता m.—(Eloquent speaker) वाक्पटुः m., प्रवचनपटुः m., सुवक्ता m., सद्वक्ता m., वाग्मी m., वागीश्वरः, वाक्पण्डितः, वाग्विद् m., वाग्विदग्धः, सभापण्डितः, वाग्विशारदः, वाक्यद्वारेण विस्मयजनकः.

Oratorical, *a.* वागलङ्कारमयः -यी -यं, वाङ्मयः -यी -यं, वाक्चातुर्यमयः &c., सालङ्कारवाक्यमयः &c., सभावक्तृत्वसम्बन्धी &c., सभापाण्डित्यसम्बन्धी &c., सभापाण्डित्यविषयः -या -यं, प्रवचनसम्बन्धी &c.

Oratorio, *s.* तालबद्धं धर्मकीर्तनं, धर्मकीर्तनविषया सुस्वररचना or सुस्वरसङ्गः.

Oratory, *s.* (Art of public speaking) सभावक्तृत्वं, सभाप्रवचनविद्या, सभाप्रवचनं, सभाप्रवचनपाण्डित्यं, सभापाण्डित्यं.—(Art of speaking eloquently) वाक्पटुता, प्रवचनपटुता, सुवक्तृत्वं, सद्वक्तृता, वक्तृत्वशक्तिः f., वाक्शक्तिः f., वाक्चातुर्यं, शब्दचातुर्यं, वाचाशक्तिः f., वाचोयुक्तिः f., शब्दपाण्डित्यं, सुप्रलापः.—(Place for prayer) प्रार्थनागारं, प्रार्थनस्थानं.

Orb, *s.* मण्डलं, गोलः -लं, गोलकः, वर्तुलं, बिम्बः -म्बं, बिम्बकं, परिमण्डलं, चक्रं, चक्रवालं, वृत्तं, वलयः -यं; 'circular array,' चक्रव्यूहः.

Orbed, orbicular, orbiculate, *a.* मण्डल, मण्डलाकार -रा -रं, मण्डलाकृति -तिः -तिः -ति, गोलाकारः &c., मण्डली -लिनी -लि (न्), बिम्बी &c., वर्तुलः -ला -लं, वर्तुलाकारः &c., चक्राकारः &c., चाक्रिकः -की -कं, चक्री &c., चाक्रेयः -यी -यं.

Orbicularly, *adv.* मण्डलाकारेण, गोलाकारेण, वर्तुलरूपेण, चक्रवत्.

Orbicularness, *s.* मण्डलाकारता, गोलाकारता, मण्डलता, वर्तुलता.

Orbit, *s.* (Of a planet) कक्षा, ग्रहपथः, ग्रहवर्त्म, मण्डलं; 'apex of an orbit,' उच्चः; 'apsis,' मन्दोच्चः.

Orchard, *s.* वृक्षवाटिका, फलवृक्षवाटी, फलवाटिका, वाटिका, वाटः -टी -टं, उपवनं, वृक्षोद्यानं, फलवृक्षोद्यानं.

Orchestra, *s.* (Place for musicians) वादित्रस्थानं, वाद्यभाण्डस्थानं, वादित्रस्थलं, भाण्डवादकस्थानं.—(Body of musicians) भाण्डवादकगणः, वादित्रसमुदायः, वाद्यभाण्डं, वादकसमूहः.

Orchestral, *a.* वाद्यभाण्डसम्बन्धी &c., वादकगणसम्बन्धी &c.

To ordain, *v. a.* (Institute) विधा (c. 3. -दधाति -धातुं), अभिधा, क्लृप् (c. 10. कल्पयति -यितुं), प्रक्लृप्, परिक्लृप्, स्था in caus. (स्थापयति -पितुं), प्रतिष्ठा, संस्था, व्यवस्था, प्रचुद् (c. 10. -चोदयति -यितुं), आदिश् (c. 6. -दिशति -देष्टुं), सन्दिश्, निर्दिश्.—(Appoint) नियुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं), अधिकृ, प्रकृ, समादिश्, व्यादिश्.—(To any office) अधिकारे or पदे नियुज् or अभिषिच् (c. 6. -षिञ्चति -षेक्तुं), नियोजनं कृ, अधिकृतं -तां कृ.—(Invest with sacerdotal functions) धर्माधिकारे or धर्मपदे नियुज्, धर्माधिकारयुक्तं कृ, धर्मपदनियुक्तं कृ, दीक्ष् (c. 1. दीक्षते -क्षितुं), दीक्षां कृ, दीक्षाकर्मपूर्वं धर्माधिकारं प्रविश् (c. 10. -वेशयति -यितुं), धर्मपददीक्षितं कृ.

Ordained, *p. p.* (Instituted, established) विहितः -ता -तं, अभिहितः -ता -तं, प्रकल्पितः &c., स्थापितः &c., प्रतिष्ठापितः, व्यवस्थापितः &c., व्यवस्थितः &c., चोदितः &c., प्रचोदितः &c., निर्दिष्टः -ष्टा -ष्टं, नियमितः &c., नियतः &c.—(Appointed) नियुक्तः -क्ता -क्तं, नियोजितः -ता -तं, अधिकृतः -ता -तं, योजितः -ता -तं.—(To any office) अधिकारे or पदे नियुक्तः &c., अधिकारयुक्तः &c., अभिषिक्तः &c.—(To sacerdotal functions) धर्माधिकारे नियुक्तः &c., धर्मपदनियुक्तः, धर्माधिकारयुक्तः, धर्मपददीक्षितः, दीक्षितः.

Ordainer, *s.* प्रकल्पकः, विधाता m. (तृ), विधायी m. (न्), विधायकः, स्थापकः, प्रचोदकः, नियोजकः, योजकः.

Ordeal, *s.* परीक्षा, धर्माधर्मपरीक्षा, दिव्यं, सत्यं, प्रमाणं, कोषः -षं, कोशः, शपः, शपथः, शपनं, प्रत्ययः, क्रिया; 'fiery ordeal,' अग्निपरीक्षा, तप्तदिव्यं, 'ordeal of the balance,' तुलापरीक्षा, तुलाकोशः; 'purification by ordeal,' कोषशुद्धिः f.; 'the act of undergoing an ordeal,' दिव्यग्रहणं, दिव्यकरणं, कोषग्रहणं; 'that undergoes one,' दिव्यकारी -रिणी -रि (न्), कोषग्राही &c.; 'to undergo one,' कोषं or सत्यं or दिव्यं कृ, 'proved by ordeal,' शापितः -ता -तं.

Order, *s.* (Regular disposition, arrangement) क्रमः, अनुक्रमः, पर्यायः, आनुपूर्व्यं, आनुपूर्वी, परिपाटी -टिः f., पारिपाट्यं, विन्यासः, व्यूहनं, व्यूढिः f., आवृत् f., पारम्पर्यं, परम्परा, व्यवस्था, व्यवस्थापनं, क्रमेण स्थापनं, प्रतिविधानं, संविधानं, विरचनं -ना; 'inverted order,' व्यतिक्रमः, व्युत्क्रमः; 'natural order of words,' अन्वयः.—(Established mode of proceeding) क्रमः, मार्गः, रीतिः f., नियमः, पद्धतिः f.; 'direct order,' आनुलोम्यं; 'in direct order,' अनुलोमः -मा -मं; 'inverse order,' प्रातिलोम्यं; 'in inverse order,' प्रतिलोमः -मा -मं, विलोमः &c.—(Command) आज्ञा

आदेशः, निदेशः, निर्देशः, शासनं, शिष्टिः f., शास्तिः f., नियोगः, प्रेरणा, अववादः, प्रयुक्तिः f.—(Precept, rule) नियमः, चोदनं -ना, विधिः m., विधानं, पन्थाः: 'written order,' आज्ञापत्रं, शासनपत्रं; 'general order,' सामान्यशासनं, साधारणाज्ञा.—(Class, grade) गणः, वर्गः, पङ्क्तिः, जातिः f. 'the lower orders,' अधरवर्णाः m. pl., अधमवर्णाः, प्राकृतवर्गः, अन्त्यवर्णाः, अधमजातीयाः m. pl., अधमजातीयाः m. pl.: 'the middle or common order,' सामान्यवर्गः, सामान्यपक्षः, मध्यमपक्षः.—(Religious order) आश्रमः. There are four *Áśramas*, corresponding to the four stages of the Brahman's life. Every Brahman who has passed through these four stages is supposed to have passed through the four orders in succession. When, in the first, he is called ब्रह्मचारी m.; in the 2d, गृहस्थः; in the 3d, वानप्रस्थः or वैखानसः or यतिः; in the 4th, भिक्षुः m., सन्यासी m. The first order, or that of the religious student, is also called त्रैवर्ण्यं. Other terms, expressive of religious orders, are चरणं, मार्गः, सम्प्रदायः, पन्थाः m. (पथिन्): 'head of a religious order,' आश्रमगुरुः m.—(In good order, in proper state) सुस्थः -स्था -स्थं, सुस्थितः -ता -तं, सुरक्षितः -ता -तं.—(In order, properly arranged) सुविन्यस्तः -स्ता -स्तं, सुरचितः -ता -तं, सुव्यवस्थितः -ता -तं, क्रमेण स्थापितः -ता -तं. 'in regular order,' यथाक्रमं, क्रमेण -शस्, क्रमशस्, आनुपूर्व्येण, अनुक्रमशस्, सुपरिपाट्या.—(In order to, for the purpose) अर्थं or अर्थे affixed; as, 'in order to read,' अध्ययनार्थं, or expressed by the dat. c.; as, 'in order to find a fourth quantity,' चतुर्थराशेर् अवगमाय.—(Out of order) अव्यवस्थितः -ता -तं, अनवस्थितः &c., व्युत्क्रमः -मा -मं, असुस्थः -स्था -स्थं, अस्वस्थः &c.

To ORDER, v. a. (Dispose, arrange) विधा (c. 3. -दधाति -धातुं), व्यवधा, विरच् (c. 10. -रचयति -यितुं), विन्यस् (c. 4. -अस्यति -असितुं), परिकॢप् (c. 10. -कल्पयति -यितुं), व्यूह् (c. 1. -ऊहते -हितुं), क्रमेण स्था in caus. (स्थापयति -यितुं), व्यवस्था.—(Command) आज्ञा in caus. (-ज्ञापयति -यितुं), समाज्ञा, आदिश् (c. 6. -दिशति -देष्टुं), समादिश्, सन्दिश्, व्यादिश्, प्रतिसन्दिश्, प्रक्लृप्, कॢप्, चुद् (c. 10. चोदयति -यितुं), अभिचुद्, प्रेर् (c. 10. -ईरयति -यितुं), शास् (c. 2. शास्ति, शासितुं), आशास्, अनुशास्.—(Manage) विधा, प्रणी (c. 1. -णयति -णेतुं), सम्प्रणी, निर्वह् (c. 10. -वाहयति -यितुं).

ORDERED, p. p. (Disposed, arranged) व्यवस्थापितः -ता -तं, व्यवस्थितः -ता -तं, विरचितः -ता -तं, रचितः -ता -तं, विन्यस्तः -स्ता -स्तं, विहितः -ता -तं, प्रतिविहितः -ता -तं.—(Commanded) आज्ञापितः -ता -तं, आज्ञप्तः -प्ता -प्तं, आदिष्टः -ष्टा -ष्टं, समादिष्टः &c., निर्दिष्टः &c., चोदितः -ता -तं, प्रचोदितः &c., प्रेरितः -ता -तं.—(Managed) प्रणीतः -ता -तं, निर्वाहितः -ता -तं.

ORDERER, s. आज्ञापकः, आज्ञापयिता m. (तृ), आज्ञाकर्त्ता m. (र्त्तृ), आदेष्टा m. (ष्टृ), आदेशी m. (न्), निदेष्टा m., प्रवर्त्तकः.

ORDERLESS, a. क्रमहीनः -ना -नं, क्रमरहितः -ता -तं, क्रमशून्यः -न्या -न्यं, अक्रमः -मा -मं, अव्यवस्थितः -ता -तं, अनवस्थितः &c.

ORDERLINESS, s. सक्रमत्वं, क्रमिकता, यथाक्रमता, यथानुक्रमता, अनुक्रमः -मता, व्यवस्थितिः f., व्यवस्थितत्वं, व्यवस्था. See METHODICALNESS.

ORDERLY, a. क्रमिकः -की -कं, क्रमकः -का -कं, यथाक्रमः -मा -मं, यथानुक्रमः &c., सक्रमः &c., क्रमानुगतः -ता -तं, व्यवस्थितः -ता -तं, यथापर्य्यायः -या -यं, क्रमानुसारी -रिणी -रि (न्), अनुक्रमवान् -वती -वत्, आनुपूर्विकः -की -कं, शास्त्रविधिकः &c. See METHODICAL.

ORDERLY, adv. यथाक्रमं, यथानुक्रमं, अनुक्रमं -मेण, सक्रमं, यथापर्य्यायं.

ORDINAL, a. क्रमसूचकः -का -कं, क्रमवाचकः &c., क्रमिकः -का -कं.

ORDINAL, s. (Number) क्रमिकसंख्या, क्रमवाचकसंख्या.—(Book containing services of the church) पद्धतिः f., नियमसङ्ग्रहः, विधिसङ्ग्रहः.

ORDINANCE, s. (Rule, established law) नियमः, विधिः m., विधानं, व्यवस्था, शासनं, निदर्शनं, चोदना, नियोगः, सूत्रं, अनुशासनं, निदेशः, आदेशः, निरूपणं.—(Of religion) विधिः m., धर्म्मविधिः, विधानं, शास्त्रविधानं, संस्कारः, मर्य्यादा, शास्त्रमर्य्यादा, कर्म्म n. (न्), क्रिया, नित्यकर्म्म n., अनुष्ठानं, दैवकर्म्म n., कल्पः, संविधानं: 'subsidiary ordinance,' प्रतिविधानं, प्रतिविधिः m.

ORDINARILY, adv. प्रायस्, प्रायशस्, प्रायेण, सामान्यतस्, साधारण्येन, बहुशस्, बाहुल्येन, भूयस्, भूयिष्ठं.

ORDINARY, a. (Common, usual) प्रायिकः -की -कं, सामान्यः -न्या -न्यं, साधारणः -णा -णी -णं, प्रसिद्धः -द्धा -द्धं, लोकप्रसिद्धः &c.—(Customary) व्यावहारिकः -की -कं, व्यावहारिकः &c., आचारिकः -की -कं, यथाव्यवहारः -रा -रं, नैयमिकः -की -कं, यथारीतिः -तिः -ति, नित्यः -त्या -त्यं, नैत्यकः -की -कं, नैत्यिकः &c., यथाप्रकृतिः -तिः -ति.—(Vulgar, middling, inferior) प्राकृतः -ता -तं, लौकिकः -की -कं, मध्यमः -मा -मं, अवरः -रा -रं.

ORDINARY, s. (Bishop) धर्म्माध्यक्षः.—(Place for eating in common) साधारणभोजनशाला, सामान्यभोजनस्थानं: 'in ordinary,' नित्यः -त्या -त्यं, प्रायिकः -की -कं, साधारणः -णी -णं.

ORDINATE, a. क्रमिकः -का -कं, यथाक्रमः -मा -मं, यथानुक्रमः &c.

ORDINATION, s. (Institution) विधानं, व्यवस्थापनं, स्थापनं -ना, कल्पनं, प्रकल्पनं, चोदना.—(Appointment) नियोगः, नियोजनं, नियुक्तिः f.—(To sacerdotal functions) धर्म्माधिकारनियोजनं, धर्म्माधिकारदीक्षा, धर्म्मपदनियोगः, दीक्षा.

ORDNANCE, s. आग्नेययन्त्रसमूहः, युद्धयन्त्रसमूहः, युद्धास्त्रसामग्री.

ORDURE, s. पुरीषं, विष्ठा, विट्, विड् f. (ष्), शकृत् n., वर्च्चं, उच्चारः, उच्चरितं, मलं, शरीरमलं, अवस्करः, अपस्करः, कल्कं, गूथः -थं, दूषं, हदं, पूतिकं, शमलं: 'to void it,' पुरीषोत्सर्गं कृ, पुरीषम् उत्सृज् (c. 6. -सृजति -स्रष्टुं) or उच्चर् (c. 1. -चरति -रितुं).

ORE, s. धातुः m., असंस्कृतधातुः m., अशोधितधातुः m., अपरिष्कृतधातुः m., आकरीयधातुः m., खनिजधातुः m.

ORGAN, s. (Instrument of action) साधनं, कर्म्मसाधनं, करणं, उपकरणं, कारणं.—(Organ of action) कर्म्मेन्द्रियं. Of these, five are given: 1. 'the larynx or voice,' वाक् f. (च्), 2. 'the hand,' पाणिः m., 3. 'the foot,' पादः; 4. 'the organ of excretion,' पायुः m.; 5. 'of generation,' उपस्थः.—(Organ of sense or perception) इन्द्रियं, ज्ञानेन्द्रियं, ज्ञानसाधनं, विषयि n. (न्), हृषीकं. Of these, five are reckoned: 1. 'the eye,' चक्षुस्; 2. 'the ear,' श्रोत्रं; 3. 'the nose,' घ्राणं; 4. 'the tongue,' जिह्वा; 5. 'the skin,' त्वक् f. (च्). The word इन्द्रियं may be affixed to any of these; as, 'the organ of sight,' चक्षुरिन्द्रियं &c.; for the corresponding विषय or 'objects of sense,' see OBJECT.—(Internal organ, or organ of the intellect) अन्तरिन्द्रियं, धीन्द्रियं. Of these, four are enumerated 1. 'the mind, or organ of thought,' मनस्; 2. 'apprehension,' बुद्धिः f.; 3. 'individuality, or sense of self,' अहङ्कारः; 4. 'feeling,' चित्तं. In opposition to the organum, the

p n m m d
यहिरिन्द्रियाणि T ०१
इन्द्रियग्राम इन्द्रियवर्ग a m -
द्वार भाषन. —musical instrument) वंशी, सुषिरवंशपूर्णवाद्यं.

ORGANIC, ORGANICAL, a. (Pertaining to the organs) ऐन्द्रियिकः -की -कं, इन्द्रियसम्बन्धी -न्धिनी &c.—(Consisting of, or containing organs) इन्द्रियमयः -यी -यं, कर्म्मसाधनमयः &c.—(Produced by the organs) इन्द्रियोत्पन्नः -न्ना -न्नं, इन्द्रियजनितः -ता -तं.—(Possessing organs) इन्द्रियवान् -वती -वत् (त्), इन्द्रियसम्पन्नः -न्ना -न्नं, इन्द्रियविशिष्टः -ष्टा -ष्टं, जीवित्वसाधनविशिष्टः &c., प्राणित्वसाधनसम्पन्नः &c., करणसम्पन्नः &c., सकरणः -णा -णं.—(Instrumental) कारणिकः -की -कं

ORGANICALLY, adv. इन्द्रियव्यूहेन, इन्द्रियव्यूहपूर्व्वं, इन्द्रियतस्

ORGANIST, s. वंशीवादकः, पूर्वोक्तसुषिरवाद्यवादकः.

ORGANIZATION, s. (Formation with organs) इन्द्रियकरणं, इन्द्रियव्यूहनं, इन्द्रियविन्यासः, इन्द्रियविशिष्टता, सेन्द्रियता.—(Arrangement of the parts or divisions of a body) भागविन्यासः, भागव्यूहनं, भागव्यूहिः f., भागविन्यस्तता, भागकल्पनं, भागप्रतिविधानं, भागयथास्थापनं.—(Structure) व्यूहः -हनं, व्यूहिः f., संव्यूहः -हनं, विधानं, संविधानं, विन्यासः, संस्थापनं, संस्थितिः f., निर्माणं, निर्मितिः f., सृष्टिः f., घटनं.

To ORGANIZE, v. a. (Form with organs or suitable parts) इन्द्रियवन्तं -वतीं -वत् कृ, इन्द्रियसम्पन्नं -न्नां कृ, इन्द्रिययुक्तं -क्तां कृ, सेन्द्रियं -यां कृ, साङ्गं -ङ्गां कृ, सावयवं -वां कृ, अवयवसम्पन्नं -न्नां कृ, साङ्गोपाङ्गं -ङ्गां कृ, अङ्गोपाङ्गसम्पन्नं -न्नां कृ.—(Form, construct) कॢप् (c. 10. कल्पयति -यितुं), रच् (c. 10. रचयति -यितुं), विरच्, विधा (c. 3. -दधाति -धातुं), संस्था in caus. (-स्थापयति -यितुं), निर्मा (c. 2. -माति, c. 3. -मिमीते -मातुं), घट् (c. 10. घटयति -यितुं), पिश् (c. 6. पिंशति, पेशितुं) रचनां कृ, विरचनां कृ.—(Dispose or distribute into suitable parts) व्यूह् (c. 1. -ऊहते -हितुं), विन्यस् (c. 4. -अस्यति -असितुं), विधा, संविधा.

ORGANIZED, p. p. व्यूढः -ढा -ढं, विन्यस्तः -स्ता -स्तं, विहितः -ता -तं, प्रतिविहितः &c., यथास्थापितः &c., संस्थापितः -ता -तं, रचितः -ता -तं, विरचितः -ता -तं, कल्पितः -ता -तं, परिकल्पितः &c., सृष्टः -ष्टा -ष्टं, घटितः -ता -तं, परिपाटीकृतः -ता -तं, संव्यूढः -ढा -ढं.

ORGASM, s. उत्तापः, उत्तेजनं, उत्तेजितत्वं, उन्मदः, उद्धतिः f., आवेशः, आविष्टता, क्षोभः, वेगः, व्याक्षोभः, क्षुब्धता, सन्तापः.

ORGIES, s. pl. नैशोत्सवः, नैशिकोत्सवः, रात्र्युत्सवः, मद्यपानपूर्व्वम् निशि सेवितम् उत्सवादि, समद्यपानं रात्रौ कृतम् उत्सवादि.

ORICHALCH, s. पित्तलं, पीतलोहं, पीतलं -लकं, रीतिः f., कांस्यं.

ORIENT, a. (Rising) उदयी -यिनी -यि (न्), उद्यमानः -ना -नं.—(Eastern). See ORIENTAL.

ORIENT, s. (The east) पूर्व्वदिक् f. (श्), प्राची, सूर्य्योदयदेशः.

ORIENTAL, a. पूर्व्वदेशीयः -या -यं, पूर्व्वदिश्यः -श्या -श्यं, प्राच्यः -च्या -च्यं, प्राचीनः -ना -नं, पूर्व्वः -र्व्वा -र्व्वं, पूर्व्वीयः -या -यं, पूर्व्वेत्यः -त्या -त्यं, पूर्व्वदेशस्थः -स्था -स्थं

ORIENTAL, s. पूर्व्वदेशवासी m. (न्), पूर्व्वदेशस्थः, प्राचीनदेशवासी.

ORIENTALIST, s. पूर्व्वदेशीयभाषाज्ञः, प्राग्देशीयभाषापण्डितः

ORIFICE, s. मुखं, छिद्रं, द्वारं, सुषिरं, शुषिरं, रन्ध्रं, विवरं, विलं, 'of a pipe,' दर्दुरपुटः, 'of the ear,' कर्णपुटः.

ORIGIN, s. (First existence, beginning) मूलं, आरम्भः, मूलारम्भः, प्रारम्भः, उद्भवः, उत्पत्तिः f., प्रथमोद्भवः, प्रथमोत्पत्तिः f., उद्गमः, सम्भवः, प्रभवः, जन्म n., जननं, जातिः f., आगमः, उपक्रमः.—(Source, fountain, cause) आकरः, प्रभवः, मूलं, बीजं, हेतुः m., कारणं, आदिकारणं, गर्भः, निबन्धनं, निदानं, उत्पत्तिस्थानं, उद्गमस्थानं.—(Original instigator) प्रयोजकः, प्रवर्त्तकः; 'of low origin,' दुर्योनिः -निः -नि, हीनयोनिः &c., हीनजातिः -तिः -ति, हीनजन्मा -न्मा -न्म (न्), 'of noble origin,' मौलः -ली -लं, उत्कृष्टजातिः &c., उत्तमवंशजातः -ता -तं; 'prosperity has its origin in the king,' राजमूला सम्पत्ति

ORIGINAL, s. (Origin) See the preceding.—(First copy, archetype) आदर्शः, प्रथमपत्रं, प्रतिमानं, प्रतिमा, मूलं, मूलपत्रं.—(Text) मूलं, मूलग्रन्थः

ORIGINAL, a. (Primitive, first in order) मौलः -ली -लं, मौलिकः -की -कं, मूलिकः -का -कं, प्रथमः -मा -मं, प्राथमिकः -की -कं, आद्यः -द्या -द्यं, आदिमः -मा -मं, आदि in comp., पूर्व्वः -र्व्वा -र्व्वं.—(Not made or done before, or by another) अपूर्व्वः -र्व्वा -र्व्वं, अपूर्व्वकर्तृकः -का -कं, अपूर्व्वसिद्धः -द्धा -द्धं, अपूर्व्वरचितः -ता -तं, अपूर्व्वप्रतिमः -मा -मं, स्वयङ्कृतः &c., स्वयङ्कल्पितः &c., स्वतःकल्पितः &c.—(Having the power to originate new thoughts) अपूर्व्वकल्पकः -का -कं, स्वयङ्कल्पकः &c., स्वतःकल्पकः &c., अपूर्व्वयोजकः &c., अनुयोगी &c.

ORIGINALITY, s. (Power of originating new thoughts) अपूर्व्वकल्पनाशक्तिः f., अपूर्व्वकल्पकत्वं.—(State of being original) अपूर्व्वता, अपूर्व्वसिद्धता, अपूर्व्वरचितत्वं, मौलता.

ORIGINALLY, adv. आदौ, आदितस्, उत्पत्तितस्, मूलतस्, जातितस्, प्रथमं, प्रथमतस्, आरम्भे, प्रारम्भे, आरम्भतस्.

To ORIGINATE, v. a. प्रथमम् उत्पद् (c. 10. -पादयति -यितुं) or जन् (c. 10. जनयति -यितुं) or उद्भू (c. 10. -भावयति -यितुं) or सृज् (c. 6. सृजति, स्रष्टुं) or कॢप् (c. 10. कल्पयति -यितुं), प्रथमोत्पादनं कृ, प्रथमोत्पत्तिं कृ, प्रथमोद्भवं कृ, आरभ् (c. 1. -रभते -रब्धुं), समारभ्, प्रारभ्, आरम्भं कृ, प्रारम्भं कृ, प्रवृत् (c. 10. -वर्त्तयति -यितुं), उपक्रम् (c. 1. -क्रमते -मितुं).

To ORIGINATE, v. n. उत्पद् (c. 4. -पद्यते -पत्तुं), व्युत्पद्, समुत्पद्, जन् (c. 4. जायते, जनितुं), प्रजन्, प्रभू (c. 1. -भवति -वितुं), उद्भू, सम्भू, प्रसृ (c. 1. -सरति -सर्त्तुं), निःसृ, विनिःसृ, उद्गम् (c. 1. -गच्छति -गन्तुं), निर्गम्, प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), उत्था (c. 1. -तिष्ठति -थातुं, rt. स्था), उपस्था

ORIGINATED, p. p. उत्पन्नः -न्ना -न्नं, प्रथमोत्पन्नः &c., उत्पादितः -ता -तं, जातः -ता -तं, प्रवृत्तः -त्ता -त्तं, प्रवर्त्तितः -ता -तं, प्रथमकल्पितः &c., निःसृतः -ता -तं, विनिःसृतः &c.

ORIGINATION, s. प्रथमोत्पादनं, प्रथमोत्पत्तिः f., प्रथमोद्भावनं, प्रथमोद्भवः, आरम्भः, प्रारम्भः, आरब्धिः f.

ORIGINATOR, s. प्रथमोत्पादकः, प्रथमोद्भावकः, मूलोत्पादकः, प्रवर्त्तकः, प्रयोजकः, प्रथमकल्पकः, आरम्भकः.

ORION, s. (Constellation) मृगशिरस् n., मृगशीर्षं, आग्रहायणी.

ORISON, s. प्रार्थना, स्तवः, स्तुतिः f., वाचिकप्रार्थना.

ORISSA, s. (The country) उत्कलः, उत्कलदेशः.

ORNAMENT, s. (Embellishment) अलङ्कारः, अलङ्करणं, अलङ्क्रिया, भूषणं, विभूषणं, भरणं, आभरणं, शोभा -भनं, भूषा, विभूषा, मण्डनं, परिष्कारः, संस्कारः, परिकर्म्म n. (न्), प्रतिकर्म्म, प्रसाधनं, रञ्जनं, कल्पना, सज्जा, रङ्गः, नेपथ्यं.—(That which ornaments, an ornament) अलङ्कारः, भूषणं, आभरणं, भरणं, कङ्कणः -णं, कलापः, अङ्गदं; 'ornament of language,' अलङ्कारः, शब्दालङ्कारः, 'of sense,' अर्थालङ्कारः; 'for the feet or ankles,' नूपुरः -रं, पादाङ्गदं.

To ORNAMENT, v. a. अलङ्कृ, समलङ्कृ, भूष् (c. 10. भूषयति -यितुं) विभूष्

शुभ् शोभयति यितु उपशुभ् मण्ड् (c. 10. मण्डयति यितुं), अलङ्कर्म्म (nom. -कर्म्मयति -यितुं), रञ्ज् (c. 10. रञ्जयति -यितुं).

ORNAMENTAL, *a.* अलङ्कारकः -का -कं, अलङ्कारिष्णुः -ष्णुः -ष्णु, शोभाकरः -रा -रं, शोभाकारकः -का -कं, शोभावहः -हा -हं, शोभकः -का -कं, शोभादायकः -का -कं, शोभाप्रदः -दा -दं, भूषकः -का -कं, विभूषकः -का -कं, भूषाकरः -रा -रं.

ORNAMENTALLY, *adv.* अलङ्करणार्थं, विभूषणार्थं, शोभाकरणार्थं.

ORNAMENTED, *p. p.* अलङ्कृतः -ता -तं, भूषितः -ता -तं, विभूषितः -ता -तं, शोभितः -ता -तं, उपशोभितः -ता -तं, मण्डितः -ता -तं, कृतालङ्कारः -रा -रं, सालङ्कारः &c., प्रसाधितः -ता -तं, विरचितः &c.

ORNATE, *a.* See the last. (As style) पुष्पितः -ता -तं, अलङ्कृतः -ता -तं, सालङ्कारः -रा -रं, अलङ्कारमयः -यी -यं.

ORNATELY, *adv.* सालङ्कारं, अलङ्कारेण, शोभापूर्व्वं.

ORNITHOLOGIST, *s.* पक्षिविद्याज्ञः, पक्षिविषयकविद्याज्ञः.

ORNITHOLOGY, *s.* पक्षिविद्या, पक्षिविषयका विद्या, शाकुनविद्या

SECONDARY, a. (Not primary) अप्रधान: -ना -नं, अनुरूप: -पा -पं, उपरत: -ता -तं, अप्रधान: -ना -नं, अनुषङ्गी -ङ्गिणी &c., आनुषङ्गिक: -की -कं, गौण: -णी -णं, गौणिक: -की -कं, उपसृष्ट: -ष्टा -ष्टं, गुणभूत: -ता -तं; 'secondary rank,' अप्रधानता, अप्रधानपदं, 'any thing secondary,' अप्राधान्यं, उपसर्जनं.—(Not first rate) मध्यम: -मा -मं, मध्यमीय: -या -यं, मध्यमगुणक: -का -कं, विगुण: -णा -णं. The prepositions उप and अनु often give the sense of 'secondary;' as, 'a secondary planet,' उपग्रह:; 'a secondary passion or flavour,' उपरस:, अनुरस:, 'symptom,' अनुबन्ध:

SECONDED, p. p. अनुगृहीत: -ता -तं, उपगृहीत: &c., उपकृत: -ता -तं.

SECONDER, s. अनुग्राही m. (न्), उपकारी m., पक्षपाती m., पक्षोद्ग्राही m.

SECOND-HAND, a. (Not new, used by another) अन्योपभुक्त: -क्ता -क्तं, अन्यभुक्त &c., अन्योपयोजित: -ता -तं, अन्यव्यवहारित: &c., अन्यपूर्व: -र्वा -र्वं, उच्छिष्ट: -ष्टा -ष्टं.—(Not original) अन्यकल्पित: -ता -तं, अन्यसिद्ध: -द्धा -द्धं, अन्यकृत: -ता -तं, अन्योक्त: -क्ता -क्तं.

SECONDLY, adv. द्वितीयतस्, द्वितीयं, द्वितीयपदे, द्वितीयवारे.

SECOND-RATE, a. मध्यम: -मा -मं, मध्यमगुणक: &c., see SECONDARY.

SECOND-SIGHT, s. दिव्यदृष्टि: f., दिव्यचक्षुस् n., अतिमानुषदृष्टि: f.

SECOND-SIGHTED, a. दिव्यदृष्टि: -ष्टि: -ष्टि, दिव्यचक्षु: -क्षु: -क्षु: (स्).

SECRECY, s. (Concealment, state of being hid or unknown) गुप्तता -त्वं, गूढता -त्वं, गुप्ति: f., गोपनं, गोप्यता, गोपनीयता, गूढता, प्रच्छन्नता, रहस्यता -त्वं, संवृति: f., संवृतता -त्वं, अज्ञाततता -त्वं, गुप्तभाव:.—(Keeping a secret, forbearance of disclosure) रहस्यगुप्ति: f., रहस्यगोपनं, गुह्यगोपनं, गुह्यरक्षा: f., गुप्ति: f., संवृति: f., संवृत्ति: f., रहस्यरक्षणं, रहस्याभेद:, रहस्याविक्षेप:, रहस्याकथनं, रहस्याप्रकाश, निह्नव:, निह्नुति: f., अप्रकाशं, मौनं, अन्तर्द्धानं; 'profound secrecy,' सुगुप्ति: f., सुसंवृत्ति: f., सुसंवृति: f., घनसंवृति: f.—(Privacy) विविक्तता -त्वं, विविक्तभाव:, एकान्तता, रहस् n., रहोभाव: रहोवास:, निभृतत्वं, see SECLUSION.

SECRET, a. (Concealed, not known to others) गुप्त: -प्ता -प्तं, गूढ: -ढा -ढं, गुह्य: -ह्या -ह्यं, रहस्य: -स्या -स्यं, प्रच्छन्न: -न्ना -न्नं, छन्न: &c., उपह्वर: &c., संवृत: -ता -तं, निभृत: -ता -तं, निगूढ: &c., अन्तर्हित: -ता -तं, अव्यक्त: -क्ता -क्तं, अप्रकाश: -शा -शं, अप्रकाशित: -ता -तं, अन्याविदित: &c.; 'very secret,' सुगुप्त: -प्ता -प्तं, सुरहस्य: &c., सुरक्षित: &c.; 'secret sin,' गूढपातकं, प्रच्छन्नपातकं; 'secret intelligence,' गूढवार्त्ता गूढभाषितं; 'secret door,' गूढद्वारं, अन्तर्द्वारं; 'secret purpose,' गूढार्थ:, संवृत्ति: f.; 'secret emissary,' गूढचार:, गूढपुरुष:, गूढगति: m.—(To be kept secret) गोप्य: -प्या -प्यं, गोपनीय: -या -यं, गुह्य: -ह्या -ह्यं, गोप्तव्य: &c., संवरणीय: &c.—(Keeping a secret) गुह्याभेदी -दिनी &c., गुह्यावेदक: -का -कं, गुह्यभाषी &c., गुह्याकथक: &c., रहस्याभेदी, रहस्याकथक: &c., रहस्यानिवेदी &c.—(Sequestered, retired) विविक्त: -क्ता -क्तं, निभृत: -ता -तं, विजन: -ना -नं, छन्न: -न्ना -न्नं, see PRIVATE, RETIRED.—(Occult) गूढ: -ढा -ढं, निगूढ: &c., अप्रकट: -टा -टं, अव्यक्त: -क्ता -क्तं; 'secret in operation,' निगूढकार्य्य: -र्य्या -र्य्यं, गूढकार्य्य: &c., अप्रकटकार्य्य: &c.

SECRET, s. (Something concealed or to be kept secret) रहस्यं, गुह्यं, गोप्यं, गोपनीयं, गूढभाषितं, गुह्यभाषितं, गुप्तभाषितं, गुह्यार्थ:, गोपनीयार्थ:, गुह्यविषय:, गोपनीयविषय:, मर्म्म n. (न्), अप्रकाश्यं, गूढं, निगूढं:, निगूढ:, 'secret counsel,' मन्त्र:, गूढमन्त्र:; 'a well kept secret,' सुगुप्तरहस्यं, सुगुप्तमन्त्र:, सुरक्षितमन्त्र:, 'one who can keep a secret,' रहस्यपालक:, रहस्यरक्षक:, रहस्यगोपनचतुर:, गोपनीयार्थरक्षणचतुर:; 'keeping a secret,' रहस्यगोपनं &c., see SECRECY; 'divulging a secret,' रहस्यभेद:, रहस्यविक्षेप:, गुह्यभेद:, रहस्यकथनं, रहस्यप्रकाशनं, मन्त्रभेद:, 'to divulge a secret,' रहस्यं भिद् or प्रकाश् or कथ् or विक्षिप्; 'one who knows secrets,' रहस्यविद्, रहस्यज्ञ:, मर्म्मविद्, मर्म्मज्ञ: मार्म्मिक:, मर्म्मवेदी m. (न्), मन्त्रज्ञ:, मन्त्रविद्, मन्त्रवेदी m.; 'diving into the secrets of others,' मर्म्मभिद्, मर्म्मान्वेषणं, 'one who does so,' मर्म्मभेदी m. (न्), मर्म्मान्वेषी m.—(In secret) रहसि, रहस्, मिथस्, see PRIVATELY.

SECRETARY, s. लेखक:, लिपिकर:, लिपिकार: -रक:, वर्णिक:, कायस्थ:; 'chief secretary,' लेखाधिकारी m. (न्).—(Minister), see the word.

To SECRETE, v. a. (Hide) गुप् (c. 1. गोपायति, गोप्तुं, c. 10. गोपयति -यितुं), गुह् (c. 1. गूहति -हितुं), संवृ (c. 5. -वृणोति -वरितुं, c. 10. -वारयति -यितुं), अपवृ, निह्नु, गोपनं कृ, अपहारं कृ.—(As saliva, bile, &c.) उत्पद् (c. 10. -पादयति -यितुं), जन् in caus., उद्रिच्.

SECRETED, p. p. गुप्त: -प्ता -प्तं, संवृत: -ता -तं, अपवारित: &c., उत्पादित: &c.

SECRETION, s. (Act of producing) उत्पादनं.—(Matter secreted) मलं, धातु: m., उत्पादितमलं, शरीरमलं, शरीरोत्पादितमलं, शरीररस:, 'of the nose,' नासोत्पादितमलं, नासामलं, 'of the throat,' कण्ठादिमलं, श्लेष्मादिमलं, कफ:, श्लेष्मा m. (न्); 'of the bowels,' मलं, अन्त्रमलं, उदरमलं, पुरीषं; 'promoting the animal secretions,' धातुकृत्, धातुवर्धक: -का -कं.

Secretly, *adv.* रहसि, रहस्, रहस्यं, गुप्तं, सुगुप्तं, निभृतं -ते, सुनिभृतं -ते, प्रच्छन्नं -न्ने, उपांशु, गूढं गुप्त or गूढ in comp., as, 'going secretly,' गुप्तगतिः -तिः -ति, गूढचारी &c., *see* Privately.

Secretness, *s.* गुप्तता -त्वं, गूढता, प्रच्छन्नता, रहस्यता, *see* Secrecy.

Secretory, *a.* उत्पादकः -का -कं, मलोत्पादकः &c., मलजनकः &c.

Sect, *s.* शाखा, मार्गः, भिन्नमार्गः, पन्थाः *m.* (पथिन्), पथः, सम्प्रदायः, मतं, पक्षः, गणः, श्रेणिः ; 'difference of sect,' शाखाभेदः, मतभेदः, मार्गभेदः ; 'mark of a sect,' तिलकः -कं.

Sectarian, *a.* शाखासम्बन्धी -न्धिनी -न्धि (न्), शाखी &c., शाखिकः -की -कं.

Sectarian, sectary, *s.* शाखी *m.* (न्), शाखानुयायी &c., शाखावलम्बी *m.*, शाखाश्रयी *m.*, शाखाश्रितः, शाखासेवी, शाखामार्गानुयायी *m.*, भिन्नमार्गानुयायी *m.*

Sectarianism, *s.* शाखासेवनं, शाखानुगमनं, शाखाश्रयणं, भिन्नमार्गगमनं.

Section, *s.* (Division) परिच्छेदः, छेदः विच्छेदः, भेदः -दनं, खिलांशः —(Of a book) अध्यायः, अध्ययः, सर्गः, पर्व *n.* (न्), काण्डः -ण्डं, खण्डः -ण्डं, परिच्छेदः, विच्छेदः, स्कन्धः, प्रकरणं, प्रस्तावः, अङ्कः, वर्गः, शाखा, उल्लासः, उच्छ्वासः, आश्वासः, उद्घातः, स्तबकः ; 'story divided into sections,' खण्डकथा.—(In geometry) मार्गः

Sector, *s.* विकेन्द्रकः.—(Of a circle) कर्केन्द्रमध्यगतो वृत्तभागः

Secular, *a.* (Pertaining to this present world, or to things not spiritual) लौकिकः -की -कं, ऐहलौकिकः &c., ऐहिकः -की -कं, इहलोकविषयकः -का -कं, इहलोकसम्बन्धी -न्धिनी &c., प्रापञ्चिकः -की -कं, सांसारिकः &c., संसारविषयकः &c., संसारसम्बन्धी &c., संसारी &c., व्यावहारिकः &c., लोकव्यवहारसम्बन्धी &c., विषयसम्बन्धी &c., प्रपञ्ची &c., इहलोकसापेक्षः -क्षा -क्षं, इहलोकापेक्षकः &c., दृष्टार्थः -र्था -र्थं ; 'secular learning,' विज्ञानं, अर्थशास्त्रं.—(Not subject to monastic rules) व्यवहारी &c., व्यावहारिकः &c.

Secularity, secularness, *s.* लौकिकता -त्वं, ऐहिकत्वं -ता, ऐहलौकिकत्वं, ऐहिकबुद्धित्वं, ऐहिकविषयासक्तिः, संसारासक्तिः *f.*, लोकासक्तिः *f.*, इहलोकासक्तिः *f.*, प्रपञ्चासक्तिः *f.*

Secundines, *s.* गर्भवेष्टनं, गर्भकोशः, गर्भकोषः, गर्भाशयः, जरायुः *m.*, गर्भावरणं चर्म *n.* (न्), गर्भावेष्टनचर्म *n.*

Secure, *a.* (Free from danger) निर्भयः -या -यं, भयातीतः -ता -तं, अतीतभयः -या -यं, वीतभयः &c., गतभयः &c., अकुतोभयः &c., अप्रत्यवायभयः &c., अप्रत्यवायकारः -रा -रं, भयप्रत्यवायातीतः &c., अहार्यः -र्या -र्यं, अनाश्रयः -श्या -श्यं, निरुपद्रवः -वा -वं, *see* Safe.—(Free from fear of danger) निर्भयः -या -यं, अभयः &c., भयहीनः -ना -नं, निःशङ्कः -ङ्का -ङ्कं, अशङ्कः &c., विशङ्कः &c., निरातङ्कः &c., निरपेक्षः -क्षा -क्षं, 'rendering secure,' विश्वासकः -का -कं.

To secure, *v. a.* (Guard from danger) निर्भयं -यां कृ, निर्भयीकृ, भयं निवृ (c. 10. -वारयति -यितुं) or निरस् or निवृत् in caus., भयनिवारणं कृ, भयनिवृत्तिं कृ, भयनिरासं कृ, भयनिरसनं कृ, रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, सुरक्षितं -तां कृ, रक्षणं कृ.—(Make certain or sure) स्थिरीकृ, दृढीकृ, सत्याकृ, सुनिश्चितं -तां कृ, सुनिश्चितं -तां कृ, अहार्यत्वं गम्, अनाश्यत्वं गम्.—(Make fast or firm) दृढं बन्ध् (c. 9. बध्नाति, बन्द्धुं), दृढीकृ, संस्तम्भ् ; 'with a bar,' अर्गलेन बन्ध्.

Secured, *p. p.* (Guarded from danger) रक्षितः -ता -तं, सुरक्षितः &c., निवृत्तभयः -या -यं, निवारितभयः &c.—(Made sure) स्थिरीकृतः -ता -तं, दृढीकृतः &c.—(Made fast) दृढबद्धः -द्धा -द्धं, सुबन्धः -न्धा -न्धं, अर्गलबद्धः &c., सलग्नः -ग्ना -ग्नं.

Securely, *adv.* निर्भयं, भयं विना, अभयेन, क्षेमेण, *see* Safely.

Security, *s.* (Protection) रक्षा, रक्षणं, संरक्षणं, अभिरक्षणं, गुप्तिः *f.*, गोपनं, त्राणं, परित्राणं, भयनिवारणं, भयनिरासः, भयनिरसनं.—(That which protects) रक्षणं, रक्षकः, त्राणं, आश्रयः, शरणं.—(Freedom from fear or danger) अभयं, निर्भयता -त्वं, भयाभावः, भयहीनता, निःशङ्कता, शङ्काभावः, अहार्यता -त्वं, अनाश्यता -त्वं, निर्विघ्नता, निरुपद्रवत्वं, निर्वृतिः *f.*, *see* Safety.—(Assurance of safety) अभयवाक् *f.* (च्), *see* Safety.—(Securing, rendering firm) दृढीकरणं, स्थिरीकरणं, संस्तम्भनं, क्षेमकरणं, विश्वासकत्वं.—(Certainty) निश्चयः, निःसंशयत्वं, संशयाभावः, सन्देहाभावः.—(Anything given or deposited as a security) लग्नकः, बन्धकः, प्रातिभाव्यं, पारिभाव्यं, आधिः *m.*, न्यासः, निक्षेपः, *see* Pledge ; 'for the payment of a debt,' दानप्रातिभाव्यं, ऋणमार्गणः, 'for appearance,' दर्शनप्रातिभाव्यं, दर्शनपारिभाव्यं, दर्शनप्रतिभूः *m.*—(A person who stands security) प्रतिभूः *m.*, प्रतिनिधिः *m.*

Sedan, *s.* स्कन्धवाह्यपीठः, स्कन्धवहनयोग्यो पीठः, शिबिका.

Sedate, *a.* धीरः -रा -रं, गम्भीरः -रा -रं, गम्भीरवृत्तिः -त्तिः -त्ति, गभीरवृत्तिः &c., गुरुवृत्तिः &c., गौरववृत्तिः &c., शान्तः -न्ता -न्तं, चापल्यहीनः -ना -नं, निरुद्विग्नः -ग्ना -ग्नं, निराकुलः -ला -लं, अव्याकुलः &c., अचपलः -ला -लं.

Sedately, *adv.* गम्भीरं, सगाम्भीर्यं, धीरवत्, सधैर्यं, अव्याकुलं, निराकुलं, सगौरवं, गौरवेण, अचपलं.

Sedateness, *s.* धीरता, गम्भीरता -त्वं, गाम्भीर्यं, गम्भीरवृत्तित्वं, गभीरता गभीरवृत्तित्वं, धैर्यं, गौरवं, शान्तता, निराकुलता, अव्याकुलता, स्थिरता स्थैर्यं, अचपलता, अचापल्यं.

Sedative, *a.* शान्तिकः -की -कं, शान्तिदः -दा -दं, शान्तिकरः -रा -रं, शान्तिकर्त्ता -र्त्री -र्तृ (र्तृ), शमकः -का -कं, उपशमकः -का -कं, उपशामी -मिनी -मि (न्).

Sedative, *s.* (Medicine) शमनं, उपशमनं, ग्राही *m.* (न्)

Sedentariness, *s.* अनुद्योगशीलता, अव्यायामशीलता, गतिहीनता, चलनाभावः.

Sedentary, *a.* अनुद्योगशीलः -ला -लं, अव्यायामशीलः &c., अव्यायामी -मिनी -मि (न्), निरुद्योगी &c., गतिहीनः -ना -नं, गतिरहितः -ता -तं, चलनरहितः &c.

Sediment, *s.* मलं, किट्टं, उच्छिष्टं, कल्कं, खलं, शेषं, निर्यासः, *see* Dregs ; 'having sediment,' मली -लिनी -लि (न्), कल्की &c.

Sedition, *s.* प्रकृतिकलहः, प्रजाकलहः, कलहः, भेदः, प्रकृतिक्षोभः, प्रजाक्षोभः, राजयुद्धं, राजद्रोहः, राज्यभेदः ; 'fomenting sedition उपजापः ; 'one who does so,' उपजापकः ; 'to do so,' उपजप् (c. 1. -जपति -पितुं).

Seditious, *a.* कलहकारी -रिणी -रि (न्), प्रजाक्षोभकरः -री -रं, प्रकृतिक्षोभकरः &c., राज्यभेदकरः &c., भेदकरः &c., राजद्रोही &c., राजविरुद्धकारी &c., उपजापकः -का -कं.

Seditiously, *adv.* उपजापेन, क्षोभार्थं, यथा प्रजाकलहो जायते तथा

To seduce, *v. a.* (Entice from the path of rectitude) प्रलुभ् (c. 10. -लोभयति -यितुं), विलुभ्, परिलुभ्, लुभ्, सत्पथात् or सन्मार्गात् भ्रंश् (c. 10. भ्रंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं) or आकृष् (c. 1. -कर्षति -क्रष्टुं), मुह् (c. 10. मोहयति -यितुं), विमुह्, प्रलभ् (c. 1. -लभते -लब्धुं), लल् (c. 10. लालयति -यितुं), कुकर्मणि प्रवृत् in caus. विलप् (c. 10. -लापयति -यितुं), सन्मार्गभ्रष्टं -ष्टां कृ, सन्मार्गच्युतं -तां कृ.—(A woman) छलेन कन्यां दुष् (c. 10. दूषयति -यितुं), सतीत्वात् भ्रंश् in caus., सतीत्वनाशं कृ, छलेन कन्याम् अभिगम्.

SEDUCED, *p. p.* Enticed, प्रलोभितः -ता -तं, विलोभितः &c., सन्मार्गभ्रंशितः &c., सन्मार्गभ्रष्टः -ष्टा -ष्टं, आकृष्टः -ष्टा -ष्टं, मोहितः -ता -तं, विमोहितः &c., लालितः &c., प्रोत्साहितः -ता -तं, प्रवञ्चितः &c.—(As a woman) सतीत्वभ्रंशिता, सतीत्वभ्रष्टा, भ्रष्टा, छलेन नष्टसतीत्वा.

SEDUCER, *s.* प्रलोभकः, विलोभकः, आकर्षकः, मोहकः, विमोहकः, विमोही *m.* (न्), लाली *m.*, लालनकारी *m.*, प्रतारकः.—(Of a woman) छलेन कन्यादूषकः or कन्याभिगन्ता *m.* (न्तृ), कापट्येन सतीत्वनाशकः

SEDUCIBLE, *a.* प्रलोभनीयः -या -यं, आकर्षणीयः &c., प्रतारणीयः &c., विलोभनीयः &c., हार्य्यः -र्य्या -र्य्यं, भेद्यः -द्या -द्यं.

SEDUCTION, *s.* प्रलोभनं, विलोभनं, आकर्षणं, आकृष्टिः *f.*, सन्मार्गभ्रंशनं, सन्मार्गात्प्रभ्रंशनं, भ्रंशनं, विमोहनं, लालनं, लोभदर्शनं, प्रतारणं, वञ्चनं, प्रलम्भः.—(Of a woman) कन्याछलं, कन्यकाछलं, छलेन कन्यादूषणं or कन्याभिगमनं or स्त्रीसंग्रहणं, कपटपूर्व्वः सतीत्वनाशः.

SEDUCTIVE, *a.* प्रलोभकः -का -कं, विलोभकः &c., आकर्षकः &c., आकर्षी -र्षिणी -र्षि (न्), मोही &c., विमोहनः -ना -नी -नं, लाली &c., भ्रंशकः &c.

SEDULITY, SEDULOUSNESS, *s.* आसक्तिः *f.*, प्रसक्तिः *f.*, प्रसङ्गः, उद्योगासक्तिः *f.*, व्यवसायः, उद्योगशीलता. *See* DILIGENCE, INDUSTRY.

SEDULOUS, *a.* उद्योगासक्तः -क्ता -क्तं, कर्म्मासक्तः &c., यत्नासक्तः &c., उद्योगशीलः -ला -लं, आसङ्गी -ङ्गिनी &c., आसक्तः &c., तत्परः &c. *See* INDUSTRIOUS.

SEDULOUSLY, *adv.* आसक्तिपूर्व्वं, यत्नतस्, अभिनिवेशात्. *See* INDUSTRIOUSLY.

SEE, *s.* धर्म्माध्यक्षाधिकारः, धर्म्माध्यक्षाधीनमण्डलं, धर्म्माध्यक्षाधिनिदेशः, धर्म्माध्यक्षाधीनः प्रदेशः, धर्म्माध्यक्षाधिपत्यं.

To SEE, *v. a.* or *n.* (Perceive by the eye) दृश् (c. 1. पश्यति, द्रष्टुं), अभिदृश्, प्रतिदृश्, परिदृश्, अनुदृश्, प्रदृश्, सन्दृश्, विदृश्, ईक्ष् (c. 1. ईक्षते -क्षितुं), समीक्ष्, वीक्ष्, प्रेक्ष्, निरीक्ष्, अभिवीक्ष्, अभिप्रेक्ष्, सम्प्रेक्ष्, अवेक्ष्, प्रत्यवेक्ष्, आलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं), समालोक्, अवलोक्, विलोक्, लक्ष् (c. 10. लक्षयति -यितुं), आलक्ष्, समालक्ष्, उपलक्ष्, समुपलक्ष्, संलक्ष्, आलोच् (c. 10. -लोचयति -यितुं, c. 1. -लोचते -चितुं), निवर्ण् (c. 10. -वर्णयति -यितुं), सभाज् (c. 10. सभाजयति -यितुं), दृष्टिं कृ, दर्शनं कृ, अवलोकनं कृ, विलोकनं कृ.—(Perceive, understand) ज्ञा (c. 9. जानाति -नीते, ज्ञातुं), परिज्ञा, अवगम् (c. 1. -गच्छति -गन्तुं), अवे (c. 2. अवैति -तुं, *rt.* इ), बुध्, अवबुध्, उपलभ्, निशम्.—(Experience) अनुभू, भुज्, दृश्.—(Beware) सावधानः -ना -नं भू, अवहितः -ता -तं भू, अवधा.—(See into, examine) निरूप् (c. 10. -रूपयति -यितुं), निरीक्ष्, *see To* EXAMINE, INQUIRE.—(See after) पाल्, रक्ष्, अवेक्ष्. 'see! see!' पश्य, पश्यत.

SEED, *s.* (Of plants, &c) बीजं -जकं, रोहिः *m.*, इरः *m.*; 'good seed,' सुबीजं, बीजोत्कृष्टं; '*sowing seed,*' बीजारोपः -पणं, वपः वपनं, वापः, उप्तिः *f.*: 'to sow seed,' बीजारोपणं कृ, बीजानि आरुह् in caus.; 'full of seed,' बीजपूर्णः -र्णा -र्णं; 'having it,' बीजवान् -वती &c., बीजी -जिनी &c., 'growing from it,' बीजप्ररोहः -हा -हं, बीजप्ररोही -हिणी &c., बीजरुहः -हा -हं, बीज्यः -ज्या -ज्यं; 'sown with seed,' बीजितः -ता -तं; 'yielding seed,' बीजप्रदः -दा -दं, बीजसूः -सूः -सु; '*from seed,*' बीजतस्.—(Of stone fruits) अष्ठिः *f.*, अष्ठीला -लिका.—(Of animals, seminal fluid) शुक्रं, रेतस् *n.*, धातुः *m.*, तेजस् *n.*, बीजं, वीर्य्यं, इन्द्रियं, धातुरात्मकः, आनन्दप्रभवः.—(Origin, source) बीजं, योनिः *m.*, मूलं, आदिः *m.* प्रभवः, उद्भवः.—(Offspring) सन्तानं, अपत्यं, प्रजा, कुलं, वंशः, बीजं.

To SEED, *v. n.* (Produce seed) बीजं दा or प्रदा or उत्पद्, बीज (nom. बीजायते).

To SEED, *v. a.* (Sow seed) बीजारोपं कृ, बीज (nom. बीजयति -यितुं)

SEEDED, *p. p.* बीजितः -ता -तं, बीजवान् -वती -वत् (त्), बीजी -जिनी -जि (न्).

SEEDLESS, *a.* निर्बीजः -जा -जं, बीजहीनः -ना -नं, बीजरहितः -ता -तं

SEEDLING, *s.* बीजप्ररोहः, बीजप्ररोही *m.* (न्), बीजरुहः, बीजरोही *m.*

SEEDSMAN, *s.* बीजविक्रयी *m.* (न्), बीजविक्रेता *m.* (तृ), बीजव्यापारी *m.*

SEED-TIME, *s.* बीजकालः, बीजारोपणकालः, वपनकालः, वापकालः.

SEED-VESSEL, *s.* बीजकोशः, बीजकोषः -षी, बीजगुप्तिः *f.*; 'of the lotus,' बीजमातृका, कर्णिका, कर्णिकारः.

SEEDY, *a.* बीजी -जिनी -जि (न्), बीजिकः -का -कं, बीजवान् -वती -वत् (त्), बीजपूर्णः -र्णा -र्णं, सबीजः -जा -जं, बहुबीजः -जा -जं, बीजमयः -यी -यं.

SEEING, SEEING THAT, *s.* यस्मात्, येन, यत्. *See* SINCE.

SEEING, *part.* पश्यन् -श्यन्ती -श्यत् (त्), ईक्षमाणः -णा -णं, प्रेक्षमाणः &c.

SEEING, *s.* दृष्टिः *f.*, दर्शनं, ईक्षणं, प्रेक्षणं, सन्दर्शनं. *See* SIGHT.

To SEEK, *v. a.* (Look for, search for, inquire for) अन्विष् (c. 4. -इष्यति, c. 6. -इच्छति -एषितुं -एष्टुं), अन्वेष् (c. 1. -एषते -षितुं), मृग् (c. 10. मृगयते -ति -यितुं), मार्ग् (c. 1. मार्गति, c. 10. मार्गयति -यितुं) परिमार्ग्, निरूप् (c. 10. -रूपयति -यितुं), अनुसन्धा (c. 3. -दधाति -धातुं), ज्ञा in des. (जिज्ञासते -सितुं), विचि (c. 5. -चिनोति -चेतुं), गवेष् (c. 10. गवेषयति -यितुं), अनुयुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं), इष् (c. 6. इच्छति, एषितुं), आकाङ्क्ष् (c. 1. -काङ्क्षति -क्षितुं), भज् (c. 1. भजते, भक्तुं), चेष्ट् (c. 1. चेष्टते -ष्टितुं), चर्च् (c. 1. चर्चति -र्चितुं), अन्वेषणं कृ, जिज्ञासां कृ, अनुयोगं कृ, इतस्ततो गत्वा or इतस्ततः परिक्रम्य अन्वेषणं कृ.—(Solicit, beg for) प्रार्थ् (c. 10. -अर्थयते -ति -यितुं), अर्थ्, अभ्यर्थ्, समभ्यर्थ्, याच् (c. 1. याचति -चितुं), अभियाच्, प्रयाच्, सम्प्रयाच्, भिक्ष् (c. 1. भिक्षते -क्षितुं).

To SEEK, *v. n.* (Make search) अन्वेषणं कृ, जिज्ञासां कृ, अनुसन्धानं कृ.

SEEKER, *s.* अन्वेष्टा *m.* (ष्टृ), अन्वेषी *m.* (न्), अन्वेषणकृत् *m.*, जिज्ञासाकृत्, अनुसन्धाता *m.* (तृ), अनुवर्त्ती *m.*, प्रार्थकः, अर्थी *m.*

SEEKING, *s.* अन्वेषणं -णा, जिज्ञासा, मार्गः -र्गणं. *See* SEARCH.

SEEKING, *part.* अन्विष्यन् -ष्यन्ती -ष्यत् (त्), अन्वेषी -षिणी -षि (न्), अन्वेषमाणः -णा -णं, इच्छन् &c.

To SEEM, *v. n.* दृश् in pass. (दृश्यते), लक्ष् in pass. (लक्ष्यते), प्रतिभा (c. 2. -भाति -तुं), सम्प्रभा, विभा, आभा, आभास् (c. 1. -भासते -सितुं); 'you seem astonished,' विस्मित इव प्रतिभासि.

SEEMING, *s.* आभासः, आभा, छाया, बाह्यरूपं, आकारः, आकृतिः *f.*

SEEMINGLY, *adv.* आभासेन, आकारेण, प्रत्यक्षतस्, प्रायशो, बाह्यतस्.

SEEMLINESS, *s.* (Comeliness) सुदृश्यता, सुरूपता.—(Propriety) योग्यता -त्वं, युक्तता, उपयुक्तता, औचित्यं. *See* FITNESS.

SEEMLY, *a.* युक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, उपयुक्तः &c., उचितः -ता -तं, यथोचितः &c., उपपन्नः -न्ना -न्नं, समञ्जसः -सा -सं, संगतः -ता -तं.

SEEN, *p. p.* दृष्टः -ष्टा -ष्टं, ईक्षितः -ता -तं, प्रेक्षितः &c., आलोकितः &c., अवलोकितः &c., आलोचितः &c., लोकितः &c., आलक्षितः -ता -तं, लक्षितः &c.; 'seen and unseen,' दृष्टादृष्टः -ष्टा -ष्टं; 'not seen or heard before,' अदृष्टाश्रुतपूर्व्वः -र्व्वा -र्व्वं; 'is seen,' दृश्यते, लक्ष्यते; 'to be seen, visible,' दृश्यः -श्या -श्यं, दर्शनीयः -या -यं, प्रेक्षणीयः &c., प्रेक्ष्यः &c., वीक्ष्यः &c., लक्ष्यः &c.; 'having seen,' दृष्ट्वा, प्रेक्ष्य, वीक्ष्य.

SEER, s. (One who sees) द्रष्टा m. (ष्टृ), दर्शी m. (न्), चक्षुष्मान् m. (त्); 'far-seer,' दूरदर्शी m.—(Prophet) भाविदर्शी m., भाविदर्शकः, भविष्यद्दर्शी m., सिद्धः, सिद्धपुरुषः, सर्ववेत्ता; see SAGE.

SEE-SAW, s. उन्नतानत, निम्नोन्नतं, उच्चावचं, पातोत्पातं, आन्दोलनं, इतस्ततो निश्चलनं or चलनं, गमागमं, प्रतिगमागमं.

To SEETHE, v. a. क्वथ् (c. 1. क्वथति -थितुं), स्थालीपाके or स्थाल्यां पच्.

SEETHED, p. p. क्वथितः -ता -तं, स्थालीपक्वः -क्वा -क्वं, स्थालीपाकः &c.

SEETHER, s. चुल्लिका, चुल्ली, पिठरकं, स्थाली, पिठरः -रं, उखा.

SEGMENT, s. छेदः, परिच्छेदः, विच्छेदः, खण्डः.—(Of a circle) वृत्तखण्डः -ण्डं, वर्तुलखण्डः, खण्डमण्डलं, धनुषं.

SEGREGATIOUS, a. एकचरः -रा -रं, एकचारी -रिणी -रि (न्), विविक्तचारी &c.

To SEGREGATE, v. a. वियुज्, विश्लिष् in caus. See To SEPARATE, v. a.

SEGREGATION, s. वियोगः, विश्लेषः, पृथक्करणं. See SEPARATION.

SEIGNIOR, s. स्वामी m. (न्), प्रभुः m., पतिः m. See LORD.

SEIZABLE, a. हार्यः -र्या -र्यं, हरणीयः -या -यं, अपहार्यः &c., ग्राह्यः -ह्या -ह्यं, ग्रहणीयः &c., ग्राह्यः &c., धरणीयः &c.

To SEIZE, v. a. (Take by force) हृ (c. 1. हरति, हर्तुं), अपहृ, बलेन हृ, बलात्कारेण ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or अभिग्रह् or परिग्रह् or प्रतिग्रह् or धृ (c. 1. धरति, धर्तुं) or कल् (c. 10. कालयति -यितुं), समाकल्, हरणं कृ.—(Grasp, clutch) ग्रह्, संग्रह्, परिग्रह्, उपसंग्रह्, धृ, धर् (c. 1. धारते -रितुं), परामृश् (c. 6. -मृशति -म्रष्टुं), संधृ, आकल् (कलयति -यितुं), संग्राहं कृ.—(Attack suddenly, take hold of, as a fever, &c.) आक्रम् (c. 1. -क्रामति -क्रमितुं), आविश् (c. 6. विशति -वेष्टुं), आक्रमणं कृ, ग्रस्, ग्रस्तः -स्ता -स्तं भू.—(Try to seize) ग्रह् in des. (जिघृक्षति -ते -क्षितुं), हृ in des. (जिहीर्षति -र्षितुं).

SEIZED, p. p. (Taken by force) हृतः -ता -तं, अपहृतः &c., बलेन हृतः &c., बलात्कारेण हृतः &c. or ग्रहृतः &c. or गृहीतः -ता -तं or धृतः &c. or आत्तः -त्ता -त्तं, समात्तः &c.—(Grasped, clutched) गृहीतः -ता -तं, संगृहीतः &c., धृतः &c., ग्रस्तः -स्ता -स्तं, आकलितः &c.—(Attacked suddenly) आक्रान्तः -न्ता -न्तं, आविष्टः -ष्टा -ष्टं, ग्रस्तः &c., 'by fever,' ज्वरग्रस्तः &c.

SEIZER, s. हर्ता m. (र्तृ), हारी m. (न्), हारकः, हरः, धर्ता m., ग्राही m., ग्राहकः, ग्रहीता m. (तृ), अपहर्ता m.

SEIZURE, s. (Taking by force) हरणं, अपहरणं, हारः, अपहारः, बलात्कारेण हरणं or ग्रहणं or ग्रहः or अभिग्रहः -हणं or प्रतिग्रहः -हणं or धरणं.—(Laying hold) ग्रहणं, ग्रहः, संग्राहः, संग्रहणं, परिग्रहणं, धरणं, धृतिः f., ग्रसनं, आकलनं.—(Sudden attack, as of a disease) आक्रमणं, आवेशः, अवपातः, अवपतनं, लंघनं; 'first seizure,' पूर्वावपातः.

SELDOM, adv. विरलं, वैरल्येन, क्वचित्, कदाचित्, कर्हिचित्, दुर् in comp.; 'seldom to be found,' दुर्लभः -भा -भं, दुष्प्रापः &c.; 'seldom to be seen,' दुर्दर्शः -र्शा -र्शं, दुर्लक्ष्यः -क्ष्या -क्ष्यं.

To SELECT, v. a. उद्धृ (c. 1. उद्धरति, उद्धर्तुं, rt. हृ), उद्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), वृ (c. 5. वृणोति -णुते, c. 10. वरयति -यितुं, c. 1. वरति -रितुं -रीतुं), आवृ, प्रवृ, आवृत् (c. 4. आवृत्यते), वृत्, परिगण् (c. 10. -गणयति -यितुं), परिगणनं कृ, उद्धरणं कृ, उद्धारं कृ. See To CHOOSE.

SELECT, a. उत्कृष्टः -ष्टा -ष्टं, उत्तमः -मा -मं, विशिष्टः &c., see CHOICE.

SELECTED, p. p. उद्धृतः -ता -तं, वृतः -ता -तं, वृष्टः -ष्टा -ष्टं, आवृतः &c., परिगणितः -ता -तं, गृहीतः &c., उद्गृहीतः &c., अवधारितः &c.

SELECTION, s. (Act of choosing) उद्धरणं, उद्धारः, उद्धृतिः, ग्रहणं, वरणं, वृतिः f., वर [illegible] (Of things selected) संग्रहः, संहिता, सारः [illegible] passages,' वृत्तिः m.

SELF, a. or pron. (As united to a pronoun, &c. reciprocally, or in composition with an adverb or noun) आत्मा m. (न्), आत्म in comp.; 'I will kill myself,' आत्मानं हनिष्यामि; 'blame thyself,' आत्मानं निन्द; 'he shows himself,' आत्मानं दर्शयति; 'for one's self,' आत्मार्थं; 'like one's self,' आत्मवत्; 'comparison with one's self,' आत्मौपम्यं.—(As united to a pronoun, &c. emphatically) स्वयं, स्वतस्; 'I myself will decide,' स्वयं निष्पत्तिं करिष्यामि. The pronoun सः is sometimes joined with the personal pronouns emphatically, as 'I myself,' सो ऽहं.—(As the first member of a compound word) आत्म or स्व or स्वयं or स्वतः prefixed, 'self done,' आत्मकृतः -ता -तं, स्वयंकृतः &c.; 'self-given,' स्वयंदत्तः -त्ता -त्तं, आत्मदत्तः &c.; 'self-sufficient,' स्वस्थः -स्था -स्थं; 'self-actuating,' स्ववशः -शा -शं.—(Of one's self, of one's own accord) स्वयं, स्वतस्; 'decayed of itself,' स्वयंशीर्णः -र्णा -र्णं.

SELF-ABASEMENT, s. आत्मापकर्षः, अहङ्कारत्यागः, स्वाभिमानत्यागः.

SELF-ABHORRENCE, s. आत्मद्वेषः, आत्मगर्हा -र्हणं, आत्मघृणा.

SELF-ABUSE, s. आत्मनिन्दा, आत्मगर्हा, आत्मापकारः, आत्मघातः.

SELF-ACCOMPLISHED, a. आत्मसिद्धः -द्धा -द्धं, स्वतःसिद्धः &c., स्वयंसिद्धः &c.

SELF-ACQUIRED, a. आत्मोपार्जितः -ता -तं, स्वोपार्जितः &c., आत्मार्जितः &c.

SELF-ADVANTAGE, s. आत्महितं, स्वहितं, आत्मोदयः, आत्मलाभः, स्वलाभः, आत्मसिद्धिः f., आत्मवृद्धिः f., आत्माभिवृद्धिः, स्वार्थः.

SELF-AFFAIRS, s. pl. आत्मकार्यं, स्वकार्यं, आत्मकर्म n. (न्), स्वकर्म n.

SELF-AGGRANDIZEMENT, s. आत्माभिवृद्धिः f., आत्मवृद्धिः f., स्ववृद्धिः f., स्वमहत्त्ववृद्धिः f., आत्मपदवृद्धिः f., स्वपदवृद्धिः f., आत्मोदयः.

SELF-APPLAUSE, s. आत्मप्रशंसा, आत्मश्लाघा, आत्मस्तुतिः f.

SELF-BEGUILED, a. आत्मवञ्चितः -ता -तं, आत्ममोहितः &c., स्वमोहितः &c.

SELF-BORN, SELF-BEGOTTEN, a. आत्मभूः -भूः -भु, स्वजः -जा -जं, आत्मजः &c., आत्मजातः -ता -तं, स्वजातः &c., आत्मसम्भवः &c., आत्मोत्पन्नः &c., स्वोत्पन्नः &c.

SELF-COMMAND, s. आत्मसंयमः, आत्मदमनं, आत्मनियमनं, प्रतिसंख्यानं, दान्तिः f., दमः, दमथः. See SELF-CONTROL.

SELF-CONCEIT, s. अहङ्कारः, अहम्मतिः f., अहम्मानं, आत्माभिमानं, स्वाभिमानं, ममता, अहम्मन्यता, अभिमानं, आत्मश्लाघा.

SELF-CONCEITED, a. अहङ्कारी -रिणी -रि (न्), अहम्मानी -निनी &c., आत्माभिमानी &c., स्वाभिमानी &c., साहङ्कारः -रा -रं, साभिमानः -ना -नं, स्वाभिमानः &c., अभिमानी &c., ममतायुक्तः -क्ता -क्तं. See CONCEITED.

SELF-CONFIDENCE, s. आत्मनिष्ठा, आत्मविश्वासः, स्वमतनिष्ठा, स्वबुद्धिनिष्ठा.

SELF-CONFIDENT, a. आत्मनिष्ठः -ष्ठा -ष्ठं, स्वमतनिष्ठः &c., स्वबुद्धिनिष्ठः &c.

SELF-CONTROL, s. आत्मसंयमः, आत्मनिग्रहः, आत्मनियमः, आत्मदमनं, आत्मवशः, आत्मवशता, आत्मसंयमः, अन्तःसंयमः, संयमः.

SELF-CONVICTED, a. स्वनिर्णीतापराधः -धा -धं, स्वनिश्चितदोषः -षा -षं.

SELF-CREATED, a. स्वयंकृतः -ता -तं, आत्मकृतः &c., स्वनिर्मितः -ता -तं.

SELF-DECEIT, SELF-DECEPTION, s. आत्मवञ्चना, आत्मछलं, आत्मप्रतारणा.

SELF-DECEIVED, a. आत्मवञ्चितः -ता -तं, स्ववञ्चितः &c., स्वप्रतारितः -ता -तं.

SELF-DECEIVING, a. आत्मवञ्चकः -का -कं, आत्मप्रतारकः &c., स्वप्रतारकः &c.

SELF-DEDICATION, s. [illegible] निवेदनं, आत्मसमर्पणं, स्वदेहविनियोगः.

SELF-DEFENCE, s. आत्मरक्षणं, आत्मरक्षा, आत्मत्राणं, स्वरक्षणं, स्वत्राणं आत्मपरित्राणं, परित्राणं; 'in self-defence,' आत्मरक्षार्थं.

SELF-DELUSION, s. आत्मवञ्चनं -ना, आत्ममोहः -हनं, आत्मप्रतारणा.

SELF-DENIAL, s. आत्मपरित्यागः, आत्मसंयमः, आत्मनिरोधः, संयमः.

SELF-DENYING, a. आत्मपरित्यागी -गिनी -गि (न्), आत्मनियामकः -का -कं, आत्मसंयमी &c., आत्मनिरोधी &c., आत्मत्यागी &c.

SELF-DEPENDENCE, s. आत्मनिष्ठा, आत्माश्रयः, स्वतन्त्रता, स्वातन्त्र्यं आत्मतन्त्रता, आत्मसंश्रयः, आत्माधीनता, आत्माधारः.

SELF-DEPENDENT, a. आत्मनिष्ठः -ष्ठा -ष्ठं, आत्माश्रयी -यिणी -यि (न्), आत्माश्रयः -या -यं, आत्माश्रितः -ता -तं, आत्मसंश्रितः &c., स्वतन्त्रः -न्त्रा -न्त्रं, आत्मतन्त्रः &c.

SELF-DESTRUCTION, s. आत्मनाशः, आत्मघातः, आत्महननं, आत्महत्या, आत्मव्यापादनं, स्वनाशः, स्वघातः.

SELF-DEVISED, a. आत्मकल्पितः -ता -तं, आत्मघटितः &c., स्वयोजितः -ता -तं,

SELF-DEVOTION, s. आत्मसमर्पणं, आत्मार्पणं, स्वदेहविनियोगः.

SELF-DISPARAGEMENT, s. निर्वेदः, निर्वेदता, आत्मावमानं, आत्मावज्ञा -ज्ञानं.

SELF-EDUCATED, a. आत्मशिक्षितः -ता -तं, स्वशिक्षितः &c., आत्माध्यापितः &c.

SELF-ENJOYMENT, s. आत्मसुखं, आत्मसौख्यं, आत्मसन्तोषः, अन्तःसुखं.

SELF-ESTEEM, s. अहम्मानं, अहम्मतिः f., आत्ममानं, आत्मसम्मान, अहङ्कारः.

SELF-EVIDENT, a. स्वतःप्रमाणः -णा -णं, स्वतःस्पष्टः -ष्टा -ष्टं, स्वतःसिद्धः -द्धा -द्धं, स्वतःप्रकाशः -शा -शं, स्वतःप्रत्यक्षः -क्षा -क्षं, प्रत्यक्षः &c.

SELF-EXAMINATION, s. आत्मपरीक्षा -क्षणं, आत्मविचारः -रणं -णा, आत्मपृच्छा -च्छनं, आत्मजिज्ञासा, आत्मविभावनं.

SELF-EXISTENCE, s. स्वयम्भवः, स्वयम्भावः, स्वयंभूतिः f., स्वत्वं.

SELF-EXISTENT, a. स्वयम्भूः -म्भूः -म्भु, आत्मभूः -भूः -भु, आत्महेतुः -तुः -तु, आत्ममूलः -ला -लं, स्वतःसिद्धः -द्धा -द्धं, अकृत्रिमः -मा -मं.

SELF-GAINED, SELF-GOTTEN, a. आत्मोपार्जितः -ता -तं, स्वोपार्जितः &c., आत्मार्जितः &c., स्वहस्तार्जितः &c., स्वभुजोपार्जितः &c., स्वसम्पादितः &c.

SELF-GOVERNMENT, s. आत्मशासनं, आत्मशासितः f., स्वशासनं, आत्मनियमनं.

SELF-IGNORANCE, s. आत्माज्ञानं, आत्माबोधः, आत्माज्ञता, स्वाज्ञानं.

SELF-IMMOLATION, s. आत्मघातः, आत्महननं, आत्मोत्सर्गः; 'of a widow after her husband,' सहगमनं, अग्निप्रवेशः.

SELF-INTEREST, s. आत्महितं, स्वहितं, स्वार्थः, see SELF-ADVANTAGE.

SELF-INTERESTED, a. स्वार्थबुद्धिः -द्धिः -द्धि, स्वार्थी -र्थिनी -र्थि (न्), स्वार्थार्थी &c., स्वार्थनिष्ठः -ष्ठा -ष्ठं, स्वार्थपरः -रा -रं. See under INTERESTED.

SELF-INVITED, a. आत्माहूतः -ता -तं, आत्मनिमन्त्रितः &c., स्वाहूतः &c.

SELF-KNOWING, a. आत्मज्ञः -ज्ञा -ज्ञं, आत्मज्ञानी -निनी -नि (न्), आत्मवेत्ता &c.

SELF-KNOWLEDGE, s. आत्मज्ञानं, आत्मविद्या, आत्मबोधः, आत्मबुद्धिः f., आत्मवेदनं, आत्मदर्शनं, आत्मसाक्षात्कारं, आत्मानुभवः.

SELF-LOVE, s. आत्मानुरागः, आत्मासक्तता, आत्मकामः, आत्मस्नेहः, ममता, अहम्मानं, अहम्मतिः f, आत्ममानं, आत्मसम्मानं.

SELF-MOVED, a. स्वयंचलितः -ता -तं, आत्मचलितः &c., स्वयंवहः -हा -हं, स्वप्रेरितः -ता -तं, आत्मप्रेरितः &c., अनन्यप्रेरितः &c., स्वैरी -रिणी -रि (न्).

SELF-MURDER, s. आत्मघातः, आत्महत्या, आत्मवधः. See SUICIDE.

SELF-MURDERER, s. आत्मघातकः, आत्मघाती m., आत्महा m. See SUICIDE.

SELF-OPINIONATED, a. स्वमताग्रही &c., स्वमताभिमानी &c. See OPINIATED

SELF-POSSESSED, a. आत्मवान् -वती -वत् (त्), धृतात्मा -त्मा -त्म (न्), स्थिरात्मा &c., स्वस्थः -स्था -स्थं, स्वस्थचित्तः -त्ता -त्तं, आत्मस्थः &c., आत्मनिष्ठः -ष्ठा -ष्ठं, अव्यग्रचेता -ता -तः (स्) अव्यग्रः -ग्रा -ग्रं, अव्यग्रचित्तः -त्ता -त्तं. See COLLECTED

SELF-POSSESSION, s. आत्मनिष्ठा, स्वस्थता, स्वनिष्ठा, स्वास्थ्यं, चित्तस्वास्थ्यं धृतिः f., धृतात्मता, स्थिरात्मता, सत्त्वं, चित्तसत्त्वं, अव्यग्रता. See PRESENCE OF MIND.

SELF-PRAISE, s. आत्मप्रशंसा, आत्मस्तुतिः f., आत्मश्लाघा

SELF-PRESERVATION, s आत्मरक्षा -क्षणं, आत्मत्राणं, आत्मपरित्राणं, स्वत्राणं

SELF-PRESERVING, a. आत्मरक्षकः -का -कं, स्वरक्षः -क्षा -क्षं, आत्मरक्षः -क्षा -क्षं

SELF-PRODUCED, a. आत्मोद्भवः -वा -वं, आत्मसम्भवः &c., आत्मभूतः -ता -तं

SELF-RELIANCE, s. आत्मनिष्ठा, आत्माश्रयः, आत्मविश्वासः, स्वमतनिष्ठा

SELF-RESPECT, s. आत्ममानं -निता, आत्मसम्मानं, अहम्मानं

SELF-RESTRAINED, a. आत्मसंयतः -ता -तं, आत्मनियमितः &c., आत्मनियमितः &c.

SELF-RESTRAINT, s. आत्मसंयमः, आत्मनिग्रहः, आत्मयमनं, आत्मनियमनं, आत्मनिरोधः, अन्तर्यमनं, आत्मवशः, यमः, संयमः, यतिः f., नियतिः f, दमः, शान्तिः f.

SELF-RIGHTEOUS, a. साधुम्मन्यः -न्या -न्यं, धर्माभिमानी -निनी -नि (न्)

SELF-RIGHTEOUSNESS, s. साधुम्मन्यता, धर्माभिमानं, मिथ्याधार्मिकत्वं.

SELF-SAME, a. समसमानः -ना -नं, अनन्यः &c. See SAME, IDENTICAL.

SELF-SATISFIED, a. आत्मसन्तुष्टः -ष्टा -ष्टं, आत्मतुष्टः &c., स्वसन्तुष्टः &c. स्वलाभपूर्णः -र्णा -र्णं, निजलाभपूर्णः &c., कृतकृत्यः -त्या -त्यं, कृतार्थः -र्था -र्थं

SELF-SUFFICIENCY, s. स्वस्थता, स्वास्थ्यं, आत्मनिष्ठा, स्वाभिमानं, स्वनिष्ठता

SELF-SUFFICIENT, a. स्वस्थः -स्था -स्थं. स्वनिष्ठः -ष्ठा -ष्ठं, स्वाभिमानी -निनी &c.

SELF-TORMENT, s. आत्मद्रोहः, आत्मविडम्बना, आत्मसन्तापः, आत्मक्लेशः

SELF-TORMENTING, SELF-TORMENTOR, a. or s. आत्मद्रोही -हिणी -हि (न्), आत्मविडम्बनाकारी -रिणी &c., आत्मविडम्बनाकर्त्ता -र्त्री -र्तृ (र्तृ) आत्मसन्तापकः -का -कं

SELF-WILL, s. स्वेच्छा, स्वैरिता, स्वैरता, स्वाच्छन्द्यं, स्वच्छन्दता, स्वातन्त्र्यं

SELF-WILLED, a. स्वैरी -रिणी -रि (न्), स्वैरः -रा -रं, स्वच्छन्दः -न्दा -न्दं स्वेच्छाचारी -रिणी &c., कामचारी &c., कामचारः -रा -रं, स्वैरगामी -मिनी -मि, स्वरुचिः -चिः -चि, स्वतन्त्रः -न्त्रा -न्त्रं, यथेष्टचारी &c.

SELFISH, a. स्वार्थपरः -रा -रं, स्वार्थदृष्टिः -ष्टिः -ष्टि, स्वार्थबुद्धिः -द्धिः -द्धि स्वार्थनिष्ठः -ष्ठा -ष्ठं, स्वार्थपरायणः -णा -णं, स्वार्थलिप्सुः -प्सुः -प्सु, स्वार्थी -र्थिनी -र्थि (न्), स्वार्थार्थी &c., स्वहितैषी -षिणी &c., स्वहितपरः -रा -रं, स्वहितपरायणः -णा -णं, स्वहितदृष्टिः -ष्टिः -ष्टि, स्वार्थलोभी &c स्वलाभपरः -रा -रं, स्वलाभपरायणः -णा -णं, स्वलाभनिष्ठः -ष्ठा -ष्ठं स्वलाभदृष्टिः &c., स्वार्थबुद्धिः &c., आत्मबुद्धिः &c., ममतायुक्तः -क्ता -क्तं ममकः -का -कं, आत्मग्राही -हिणी &c., आत्मम्भरिः -रिः -रि, अहंकृतिमान् -मती -मत् (त्), केवलः -ला -लं.

SELFISHLY, adv. स्वार्थबुद्ध्या, स्वार्थलिप्सया, स्वहितैषया, स्वार्थपरत्वात् स्वहितपरत्वात्, स्वार्थतस्, स्वार्थेन.

SELFISHNESS, s. स्वार्थदृष्टिः f., स्वार्थपरता, स्वार्थनिष्ठा, स्वार्थलिप्सा, स्वलाभनिष्ठा, स्वार्थबुद्धिः f., स्वहितनिष्ठा, स्वहितपरता, ममता -त्वं, अहंकार

To SELL, v. a. विक्री (c. 9 -क्रीणाति -णीते -क्रेतुं), विक्रयं कृ, विक्रयं कृ, विक्रीतं कृ, पण् (c. 1. पणते -णितुं, पणायति, c. 10. पणयति -यितुं

To SELL, v. n. (Be sold) विक्री in pass. (-क्रीयते); 'it sells at low price,' अल्पमूल्येन विक्रीयते.

SELLER, s. विक्रेता m. (तृ), विक्रयी m. (न्), विक्रयिकः, विक्रयकारी m. (न्), विक्रयकर्त्ता m. (र्तृ), पणयिता m.; 'buyer and seller,' क्रयविक्रयिकः.

Selling, *s.* विक्रयः, विक्रयणं, विक्रीयणं, पणनं.

Selvage, selvedge, *s* पटप्रान्तः, वस्त्राञ्चलः, वर्त्तिः *m.*, तरी, दशा.

Semblance, *s.* (Likeness) आभासः -सता -सत्वं, सादृश्यं, सदृशता, औपम्यं, उपमा, प्रतिमा, प्रतिमानं, आभा.—(Form, appearance) आकारः, रूपं, मूर्त्तिः *f.*, विग्रहः.

Semen, *s.* शुक्रं, रेतस् *n.*, धातुः *m.*, तेजस् *n.*, बीजं, वीर्य्यं, इन्द्रियं, रेतनं, रसं, धातुराजकः, हीलं, आनन्दप्रभवः.

Semi This prefix may usually be expressed by अर्द्ध, *see* Half.

Semi-breve, *s.* (In music) दीर्घस्वरः.

Semicircle, *s* अर्द्धमण्डलं, अर्द्धवृत्तं, वृत्तार्द्धं, मण्डलार्द्धं, अर्द्धचन्द्रः, चन्द्रार्द्धं; used as an hieroglyphick,' नादः.

Semicircular, *a.* अर्द्धमण्डलाकारः -रा -रं, अर्द्धवृत्ताकारः &c., अर्द्धवृत्ताकृतिः -तिः -ति. अर्द्धचन्द्राकारः -रा -रं, अर्द्धचन्द्राकृतिः -तिः -ति.

Semi-diameter, *s.* अर्द्धव्यासः, व्यासार्द्धं, अर्द्धविष्कम्भः.

Semi-lunar, *a.* अर्द्धचन्द्राकारः -रा -रं, अर्द्धचन्द्राकृतिः -तिः -ति.

Semi-metal, *s.* उपधातुः *m.*, अर्द्धधातुः *m.*

Seminal, *a.* वैजिकः -की -कं, बीज्यः -ज्या -ज्यं, बीजसम्बन्धी -न्धिनी -न्धि (न्), बीजविषयकः -का -कं; 'seminal fluid,' रेतस् *n.*, शुक्रं, *see* Semen, 'seminal effusion,' रेतःपातः, सेकः.

Seminary, *s.* (Ground where seed is sown) बीजारोपस्थलं -ली, बीजारोहस्थलं.—(Place of education) शिक्षास्थानं, शिक्षालयः, विद्याभ्यासस्थानं.

Semitone, *s.* (In music) स्वरांशः, मूर्च्छनं -ना.

Semivowel, *s.* अन्तस्थः, अर्द्धस्वरः, अर्द्धव्यञ्जनं.

Sempiternal, *a.* नित्यः -त्या -त्यं, नित्यस्थायी -यिनी -यि (न्). *See* Eternal.

Sempstress, *s.* सूचिका, सूचीशिल्पोपजीविनी, सूचिकर्म्मोपजीविनी.

Senate, *s.* वृद्धसभा, राजमन्त्रिसभा, वृद्धसंघः, वृद्धसदस् *n.*, राजामात्यसभा, श्रेष्ठसभा, शिष्टसभा, महासभा, प्रधानसभा, महासमाजः.

Senate-house, *s.* महासभास्थानं, प्रधानसभास्थानं, वृद्धसभास्थानं.

Senator, *s.* वृद्धसभासद् *m.*, प्रधानसभासद्, महासभास्तारः.

Senatorial, *a* वृद्धसभासम्बन्धी -न्धिनी -न्धि (न्), महासभासम्बन्धी &c.

To **send**, *v. a.* प्रेर् (c. 10. प्रेरयति -यितुं, rt ईर्), प्रेष् (c. 10. प्रेषयति -यितुं, rt. इष्), सम्प्रेष्, अनुप्रेष्, परिप्रेष्, प्रहि (c. 5. -हिणोति -हेतुं), प्राप् in caus. (प्रापयति -यितुं, rt. आप्) संचर् (c. 10. -चारयति -यितुं), नुद् (c. 6. नुदति, नोत्तुं), प्रतिपद् (c. 10. -पादयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं) all with 2. acc., as, 'he sent them to the city,' तान् नगरीं प्रेरयामास; 'I will send a letter to the king,' लेखं राज्ञो हस्तं प्रापयिष्यामि; or with acc and dat., as, 'he sent a weapon to the king,' अस्त्रं राज्ञे प्राहिणोत्.—(Send away, despatch) प्रस्था in caus. (-स्थापयति -यितुं), अपसृ in caus. (-सारयति -यितुं), प्रया in caus. (-यापयति -यितुं), विसृज्, प्रणुद्, अपास्, सम्प्रेष्, *see* Dismiss.—(Send before or in advance) अग्रे प्रस्था in caus or प्रया in caus., पुरस्कृ.—(Send for, summon, request or cause to be brought) आह्वे (c. 1. -ह्वयति -ह्वातुं), आनी in caus. (-नाययति -यितुं), उपानी in caus., आगम् in caus., आहु in caus.; 'he sent for them from the village,' तान् ग्रामाद् आनाययामास or आहूतवान्.—(Send forth, emit, produce) विसृज्, निःसृ in caus., उदीर्, समुदीर्, निरस्, उत्क्षिप्, उत्पद् in caus.—(Cause to fall, as a missile, &c.) पत् in caus., क्षिप्, प्रक्षिप्

Sender, *s.* प्रेरकः, प्रेरयिता *m.* (तृ), प्रेषकः, सम्प्रेषकः, प्रेषयिता *m.* प्रेरणकृत्, प्रेरणकर्त्ता *m.*, प्रयोजकः.

Sending, *s.* प्रेरणं -णा, प्रेषणं, प्रेषः, प्रस्थापनं, प्रयापणं, क्षेपणं

Senile, *a.* वृद्धतासम्बन्धी -न्धिनी -न्धि (न्), वार्धक्यसम्बन्धी &c.

Senility, *s.* वृद्धता -त्वं, वार्धक्यं, वृद्धावस्था, वृद्धभावः *See* Old age.

Senior, *a* ज्येष्ठः -ष्ठा -ष्ठं, वयोज्येष्ठः &c., कालज्येष्ठः &c., ज्यायान् यसी -यः (स्), अग्रजः -जा -जं, वरीयान् &c., वरिष्ठः &c., श्रेष्ठ &c. *see* Elder, 'senior in office,' अधिकारज्येष्ठः -ष्ठा -ष्ठं.

Senior, *s.* (One who is older) ज्येष्ठः, वयोज्येष्ठः, *see* the last—(Elderly person) गुरुजनः, वृद्धजनः, आर्य्यजनः.

Seniority, *s.* ज्येष्ठता -त्वं, ज्यैष्ठ्यं, वयोज्येष्ठता, वयोज्यैष्ठ्यं, कालज्येष्ठता कालज्यैष्ठ्यं, अधिकवयस्कता; 'in office,' अधिकारज्येष्ठता, अधिकारज्यैष्ठ्यं; 'according to seniority,' अनुज्येष्ठं.

Sennight, *s* (Week) सप्ताहः, सप्तरात्रं, *see* Week.

Sensation, *s.* (Feeling) वेदनं -ना, संवेदः, चेतना, चैतन्यं, चित् *f* इन्द्रियज्ञानं, इन्द्रियबोधः, इन्द्रियग्रहः -हणं.—(State of excited interest) लोकानुरागः, जनानुरागः.

Sense, *s.* (Organ of perception or sense) इन्द्रियं, ज्ञानेन्द्रियं ज्ञानसाधनं, इन्द्रियबुद्धिः *f.*, इन्द्रियज्ञानं, करणं, हृषीकं, अक्षं, अध्यात्म *n* (न्), विषयि *n.* (न्); 'the five senses or organs collectively पञ्चेन्द्रियं, इन्द्रियग्रामः, इन्द्रियवर्गः, इन्द्रियगणः, श्रोत्रादि *n.* These are the eye चक्षुस्, the ear श्रोत्रं, the nose घ्राणं, the tongue जिह्वा, the skin त्वक्, and are called ज्ञानेन्द्रियाणि to distinguish them from the five कर्म्मेन्द्रियाणि or organs of action, *see* Organ. To these ten an eleventh, the mind मनस्, is sometimes added. 'Subjugation or restraint of the senses,' इन्द्रियजयः, इन्द्रियदमनं, इन्द्रियनिग्रहः, इन्द्रिययमनं इन्द्रियनियमनं; 'one who has subdued his senses,' जितेन्द्रियः -या -यं, यतेन्द्रियः &c., यती *m.* (न्); 'perceptible by the senses,' इन्द्रियग्राह्यः -ह्या -ह्यं, इन्द्रियगोचरः -रा -रं, 'by two senses,' द्वीन्द्रियग्राह्यः &c.; 'evident to the senses,' प्रत्यक्षः -क्षा -क्षं, प्रत्यक्षसिद्धः -द्धा -द्धं; 'deadness of the senses,' इन्द्रियस्वापः; 'pleasure of sense,' इन्द्रियसुखं, विषयसुखं, 'perversion of the senses,' इन्द्रियविप्रतिपत्तिः *f.*; 'disorder of them इन्द्रियवैकल्यं: 'acuteness of them,' इन्द्रियपाटवं; 'wanting a sense,' विकलेन्द्रियः -या -यं, निरिन्द्रियः &c.—(Object of sense) विषयः, इन्द्रियविषयः, इन्द्रियार्थः, अर्थः, गोचरः. These are five corresponding to the five senses or organs of perception viz 'form' रूपं, 'sound' शब्दः, 'odour' गन्धः, 'flavour रसः, 'touch' स्पर्शः.—(Perception by the senses, sensation) वेदनं -ना, संवेदः -दनं, बोधः -धनं, इन्द्रियज्ञानं, इन्द्रियबोधः धनं इन्द्रियग्रहः -हणं, ग्रहणं, चेतना.—(Perception by the mind &c.) बोधः, वेदनं, ज्ञानं, अनुबोधः, उपलब्धिः *f.*, ग्रहः -हणं, *see* Perception.—(Understanding) बुद्धिः *f.*, मतिः *f.*, धीः *f.*, मेधा, चित्—(Consciousness) चैतन्यं, चेतना, वेदनं, ज्ञानं, संज्ञा; 'internal sense,' अन्तश्चैतन्यं, अन्तःसंज्ञा; 'sense of pleasure,' सुखवेदनं सुखानुभवः, सुखबोधः; 'to recover one's senses,' संज्ञां or चैतन्यं लभ्; 'one who has done so,' लब्धसंज्ञः -ज्ञा -ज्ञं, लब्धचैतन्यः न्या -न्यं, लब्धचेताः -ताः -तः (स्); 'to lose one's senses, be out of one's senses,' बुद्धिभ्रष्टः -ष्टा -ष्टं भू- नष्टबुद्धिः -द्धिः -द्धि भू- हतबुद्धिः -द्धिः द्धि भू. [illegible] -न्या -न्यं भू, [illegible] -ना -नं भू, [illegible]

[illegible] Op[illegible] मत मतिः f., बुद्धिः f.—(Meaning) अर्थः, अभिप्रायः, आकांक्षा, आशयः, उद्देशः, विवक्षितं, विवक्षा, विषयः, छन्दस्; 'sense of words,' शब्दानुशासनं, पदार्थः, शब्दार्थः, शक्तिः f., विग्रहः; 'second sense,' अर्थान्तरं; 'tenor of the sense,' अर्थानुसन्धानं; 'according to the sense,' अर्थतस्; 'apprehension of the literal sense,' शाब्दबोधः.—(Common sense) सामान्यबुद्धिः f., साधारणबुद्धिः f., साधारणधीः f.—(Good sense) सद्बुद्धिः f., सुबुद्धं, सुमनस्कत्वं, सुबुद्धिः f., सुधीः f., see INTELLIGENCE.

SENSELESS, a. (Wanting the faculty of perception) अचेतनः -ना -नं, चैतन्यहीनः -ना -नं, विषयग्रहणाशक्तः -क्ता -क्तं, विषयग्रहणाक्षमः -मा -मं, इन्द्रियविषयाग्राही -हिणी -हि (न्), इन्द्रियार्थाग्राही &c.—(Without feeling or consciousness) अचेतनः -ना -नं, विचेतनः &c., चैतन्यहीनः -ना -नं, विसंज्ञः -ज्ञा -ज्ञं, निःसंज्ञः &c., संज्ञाहीनः -ना -नं, नष्टचेतनः -ना -नं, गतचेतनः &c., गतचेताः -ताः -तः (स्), नष्टचेताः &c., नष्टचेष्टः -ष्टा -ष्टं, मूढः -ढा -ढं, लुप्तबुद्धिः -द्धिः -द्धि.—(Foolish, said of persons) निर्बुद्धिः -द्धिः -द्धि, निर्बोधः -धा -धं, अबुद्धिमान् -मती -मत् (त्), मतिहीनः -ना -नं, अबुधः -धा -धं, अविज्ञः -ज्ञा -ज्ञं, मूढः -ढा -ढं, मुग्धः -ग्धा -ग्धं, प्रमुग्धः &c.—(Unreasonable, said of things) अयुक्तः -क्ता -क्तं, अयुक्तिकः -का -कं, असमञ्जसः -सा -सं, अनुपपन्नः -न्ना -न्नं.—(Unmeaning) अनर्थकः -का -कं, निरर्थकः &c., असम्बद्धः -द्धा -द्धं, अबद्धः &c.

SENSELESSLY, adv. अयुक्तं, अविज्ञवत्, मूर्खवत्, अल्पबुद्ध्या, असम्बद्धं.

SENSELESSNESS, s. निर्बुद्धित्वं, अज्ञता, अविज्ञता, बुद्धिहीनता, अयुक्तता.

SENSIBILITY, s. (Capability of receiving impressions) विषयग्रहणशक्तिः f., विषयग्रहणक्षमता, इन्द्रियविषयग्रहणं, इन्द्रियार्थग्रहणं.—(Acuteness of sensation) शीघ्रग्राहकत्वं, सूक्ष्मग्राहकता, शीघ्रचैतन्यं, शीघ्रचेतनत्वं, सूक्ष्मचैतन्यं, चैतन्यसूक्ष्मता, चलेन्द्रियत्वं, सूक्ष्मेन्द्रियत्वं, see SENSITIVENESS.—(Sensation, feeling) चेतना, चैतन्यं, वेदनं -ना, संवेदः, बोधः, ज्ञानं, चित् f., चित्तवृत्तिः f.—(Consciousness) चैतन्यं, संज्ञा, सचेतनता.

SENSIBLE, a. (Capable of receiving impressions) विषयग्रहणशक्तः -क्ता -क्तं, विषयग्रहणक्षमः -मा -मं, विषयग्राही -हिणी -हि (न्), इन्द्रियार्थग्राही &c.—(Perceptible by the senses) इन्द्रियग्राह्यः -ह्या -ह्यं, इन्द्रियगोचरः -रा -रं, इन्द्रियवेद्यः -द्या -द्यं, इन्द्रियगम्यः -म्या -म्यं, ऐन्द्रियकः -की -कं, प्रत्यक्षः -क्षा -क्षं, see PERCEPTIBLE.—(Having perception of, conscious of) ग्राहकः -का -कं, ग्राही -हिणी &c., वेदनक्षमः -मा -मं, ग्रहणक्षमः -मा -मं, ग्रहणशक्तः -क्ता -क्तं, चेतनः -ना -नं, सचेतनः &c., चेतनावान् -वती -वत् (त्), प्रजानन् -नती -नत् (त्), चेतयमानः -ना -नं.—(Possessing consciousness) सचेतनः -ना -नं, सचैतन्यः -न्या -न्यं, चैतन्यवान् &c., संज्ञावान् &c., ससंज्ञः -ज्ञा -ज्ञं, लब्धसंज्ञः &c., प्राप्तसंज्ञः &c., प्राप्तचैतन्यः &c., लब्धचैतन्यः &c., आपन्नचेतनः -ना -नं, प्रतिपन्नचेतनः &c., प्राप्तबोधः -धा -धं, लब्धबोधः &c., सज्ञानः -ना -नं, लब्धज्ञानः &c.—(Having acute feeling) शीघ्रग्राहकः -का -कं, शीघ्रचेतनः -ना -नं, सहृदयः -या -यं, अभिज्ञ or ज्ञ in comp.; as, 'sensible of kindness,' उपकाराभिज्ञः -ज्ञा -ज्ञं, उपकारज्ञः &c., see SENSITIVE.—(Intelligent, having good sense, said of persons) बुद्धिमान् -मती -मत्, मतिमान् &c., धीमान् &c., मनस्वी -स्विनी &c., विचक्षणः -णा -णं, प्राज्ञः -ज्ञा -ज्ञं, प्रज्ञः &c., ज्ञानी &c., ज्ञानशाली &c., सुधीः -धीः -धि, सुमेधाः -धाः -धः (स्), प्रजानन् &c., 'a sensible man,' सुधीः m., बुद्धिमान्, बुधजनः; 'a sensible woman,' मनस्विनी, प्रजानती.—(Reasonable, said of things) युक्तः -क्ता -क्तं, सुयुक्तः &c., सयुक्तिकः -का -कं, उपपन्नः -न्ना -न्नं, सङ्गतः -ता -तं, समञ्जसः -सा -सं.

SENSIBLY, adv. (Perceptibly) प्रत्यक्षतस्.—(With good sense) बुद्ध्या, विचक्षणवत्, प्राज्ञवत्, बुद्धिपूर्वं, विज्ञवत्.

SENSITIVE, a. (Capable of perceiving, having sense) चेतनः -ना -नं, चेतकः -का -की -कं, सचेतनः -ना -नं, चेतनावान् -वती -वत् (त्), इन्द्रियविशिष्टः -ष्टा -ष्टं, ज्ञानेन्द्रियविशिष्टः &c., इन्द्रिययुक्तः -क्ता -क्तं, विषयग्रहणशक्तः -क्ता -क्तं, विषयग्रहणक्षमः -मा -मं, विषयग्राही -हिणी &c.—(Having quick or acute sensibility) शीघ्रग्राहकः -का -कं, शीघ्रचेतनः -ना -नं, शीघ्रचैतन्यवान् &c., सूक्ष्मचेतनः &c., सूक्ष्मग्राहकः -का -कं, सूक्ष्मचैतन्यवान् &c., चलेन्द्रियः -या -यं, सूक्ष्मेन्द्रियः &c., खेन्द्रियः &c., सहृदयः -या -यं, हृदयवान् -वती -वत् (त्), कोमलहृदयः &c., करुणार्द्रः -र्द्रा -र्द्रं, स्पर्शः -र्शा -र्शं.—(Of shame) लज्जावान् &c., लज्जालुः -लुः -लु, see MODEST.—(Having taste) रसास्वादी &c.—(Pertaining to the senses) इन्द्रियसम्बन्धी &c., इन्द्रियविषयकः -का -कं.

SENSITIVELY, adv. शीघ्रचेतनत्वेन, सूक्ष्मचैतन्येन, सूक्ष्मेन्द्रियत्वात्, चलेन्द्रियत्वात्.

SENSITIVENESS, s. इन्द्रियसूक्ष्मता, सूक्ष्मेन्द्रियत्वं, चैतन्यसूक्ष्मता, सूक्ष्मचैतन्यं, शीघ्रचेतनत्वं, शीघ्रचैतन्यं, शीघ्रग्राहकता, करुणार्द्रता. See SENSIBILITY.

SENSITIVE-PLANT, s. स्पर्शलज्जा, लज्जालुः m., लज्जाकारिका, लज्जकारिका, महाभीता, गण्डकारी, गण्डमाली, नमस्कारी, समङ्गा, खदिरी, रक्तपादी, सुवहा, कुक्कटी, नम्रा.

SENSORIUM, s. चेतनाशयः, चेतनास्पदं, चैतन्यास्पदं, ज्ञानाशयः.

SENSUAL, a. (Devoted to the gratification of the senses) विषयासक्तः -क्ता -क्तं, विषयपरः -रा -रं, विषयपरायणः -णा -णं, विषयप्रवणः -णा -णं, विषयी -यिणी -यि (न्), वैषयिकः -की -कं, विषयसेवी -विनी &c., विषयोपसेवी &c., विषयरतः -ता -तं, विषयाधीनः -ना -नं, विषयवशः -शा -शं, विषयाभिमुखः -खा -खं, विषयतत्परः -रा -रं, विषयलुब्धः -ब्धा -ब्धं, विषयसुखसेवी &c., विषयसुखासक्तः &c., विषयोपभोगव्यग्रः -ग्रा -ग्रं, शिश्नोदरपरायणः -णा -णं, वनितोपभोगतत्परः &c., सम्भोगी &c., भोगासक्तः &c., कामासक्तः &c., इन्द्रियसुखासक्तः &c., इन्द्रियसुखसेवी &c., इन्द्रियाधीनः -ना -नं, इन्द्रियवशः -शा -शं, देहपरः -रा -रं, दुःस्वभावः -वा -वं, विषयस्वभावः &c.—(Pertaining to the senses) वैषयिकः -की -कं, विषयसम्बन्धी &c., ऐन्द्रियकः -की -कं.

SENSUALIST, s. विषयी m. (न्), विषयासक्तः, विषयसेवी m., विषयवादी m. (न्), भोगासक्तः, इन्द्रियाधीनः, केलिनागरः. See the last.

SENSUALITY, SENSUALNESS, s. विषयासक्तिः f., विषयासक्तता, विषयसेवा, विषयोपसेवा, विषयसुखासक्तिः f., इन्द्रियसुखासक्तिः f., इन्द्रियाधीनता, विषयाधीनता, विषयवशता, विषयसङ्गः, विषयव्यासङ्गः, विषयपरता, शारीरिकसुखासक्तिः f., शारीरिकसुखसेवा, शारीरिकविषयानुरागः, भोगासक्तिः f., कामासक्तिः f., वनितोपभोगः.

SENT, p. p. प्रेरितः -ता -तं, प्रेषितः -ता -तं, सम्प्रेषितः &c., अनुप्रेषितः &c., प्रहितः -ता -तं, ईरितः &c., गमितः &c., मुक्तः -क्ता -क्तं, मुक्तः -क्ता -क्तं.—(Sent away, despatched) प्रस्थापितः -ता -तं, प्रवासितः &c., सम्प्रेषितः &c., दूतः -ता -तं, प्रयुक्तः -क्ता -क्तं.—(Sent for) आहूतः -ता -तं; 'having sent for,' आनाय्य.

SENTENCE, s. (Judgment pronounced, judicial decision) निर्णयपादः, निर्णयः, दण्डनिर्णयः, दण्डकथनं, दण्डाज्ञा, दण्डाभिधानं, दण्डनियोगः, दण्डकल्पनं, दण्डनिवेदनं, दण्डस्थापनं, आधर्षणं, विचारः, मीरिक्तं; 'of death,' प्राणदण्डाज्ञा, प्राणदण्डनिर्णयः, वधदण्डाज्ञा.—(Determination, decision) निश्चयः निर्णयः विवेकः, विचारः [illegible] नि-

व्यक्ति: f, निर्धारणं.—(Opinion) मतं, मति: f., बुद्धि: f, बोध:, संकल्प:, निवदनं.—(Paragraph, period) वाक्यं, वचनं, उक्तं, फक्किका, पदं, वाक्यखण्ड:, वाक्यपरिच्छेद:, महावाक्यं; 'a complete sentence,' निरूह:; construction of sentences,' वाक्यरचना, वाक्ययोजना; 'rule of constructing sentences,' वाक्यपद्धति: f.—(Maxim) सूत्रं.

To SENTENCE, *v. a.* निर्णयं कृ, दण्डनिर्णयं कृ, दण्डाज्ञां कृ, दण्डकथनं कृ, दण्डनिवेदनं कृ, दण्डाभिधानं कृ, अपराधकथनपूर्व्वं दण्डाभिधानं कृ, दण्डं निर्णी (c. 1. -णयति -णेतुं) or प्रणी; 'to death,' वधदण्डाज्ञां कृ.

SENTENCED, *p. p.* निर्णीत: -ता -तं, निर्णीतदण्ड: -ण्डा -ण्डं, प्रणीत: -ता -तं, प्रणीतदण्ड: &c., निश्चित: -ता -तं, तोरित: &c., साधित: &c.

SENTENTIOUS, *a.* (Abounding with sentences or maxims) सूत्रमय: -यी -यं, सूत्रप्राय: -या -यं, वाक्यमय: -यी -यं.—(Using short sentences) सूत्रभाषी -षिणी -षि (न्), सूत्रप्रायभाषी &c.

SENTENTIOUSLY, *adv.* सूत्रसादृश्येन, सूत्रतस्, सूत्रवत्.

SENTENTIOUSNESS, *s.* सूत्रभाषणं, सूत्रप्रायभाषणं, सूत्रसादृश्यं.

SENTIENT, *a.* चेतन: -ना -नं, सचेतन: -ना -नं, चेतनावान् -वती -वत् (त्), चैतन्यवान् &c., चैतन्ययुक्त: -क्ता -क्तं, चैतन्यविशिष्ट: -ष्टा -ष्टं, चेतक: -का -कं, चेतयमान: -ना -नं, चेतय: -या -यं, विषयग्रहणशक्तिक: -का -कं, विषयग्रहणक्षम: -मा -मं, इन्द्रिययुक्त: -क्ता -क्तं, इन्द्रियवान् &c., इन्द्रियविशिष्ट: -ष्टा -ष्टं, इन्द्रियज्ञानविशिष्ट: &c., सचेष्ट: -ष्टा -ष्टं; 'a sentient being,' प्राणी *m.* (न्), चेतन:, प्राणभृत् *m.*, शरीरी *m.*, देही *m.*, *see* LIVING, *part.*

SENTIMENT, *s.* (Thought, opinion, notion) मतं, मति: *f.*, बुद्धि: *f*, कल्पना, मन:कल्पना, बोध:, सङ्कल्प:.—(Sense contained in words) अर्थ:, अभिप्राय:, *see* SENSE.—(Feeling, passion) भाव:, रस:, राग:, भावना:, रुचि: *f*, *see* PASSION. Eight sentiments or rasas are usually enumerated: 1. Love, शृङ्गार:. 2. Mirth, हास्य: -स्यं. 3. Tenderness, करुणा or कारुण्यं. 4. Anger or rage, रौद्र: -द्रं or क्रोध:. 5. Heroism, वीर: -रं. 6. Terror, भयानक: -कं or भयं. 7. Disgust, बीभत्स: -त्सं. 8. Surprise, अद्भुत: -तं or विस्मय:. Sometimes a ninth is added, 'tranquillity,' शान्त:; or even a tenth, 'paternal tenderness,' वात्सल्यं.

SENTIMENTAL, *a.* (Abounding with sentiment or feeling) रसिक: -का -की -कं, रसमय: -यी -यं, सरस: -सा -सं, रसी -सिनी &c., रसवान् -वती &c., रसरूप: -पा -पं, रसात्मक: -का -कं, भाविक: -का -कं, सराग: -गा -गं, रागवान् &c., रागान्वित: -ता -तं, शृङ्गारी -रिणी &c., सरस्वान् &c.—(Affected) रसानुकारी &c., भावानुकारी &c., विलक्ष: -क्षा -क्षं, सवैलक्ष्य: -क्ष्या -क्ष्यं.

SENTIMENTALITY, *s.* रसानुकारिता, भावानुकारिता, वैलक्ष्यं, रसिकत्वं.

SENTINEL, SENTRY, *s.* सेनारक्ष: -रक्षक:, सैनिक:, रक्षक:, रक्षी *m.* (न्), उपरक्षक:, रक्षिता *m.* (तृ), सैन्य:, उपरक्ष्या, परिधिस्थ:, अनीकस्थ:, अजनं.

SENTRY-BOX, *s.* रक्षकगृहं, सैनिकगृहं, सैनिकाधार:.

SEPARABLE, *a.* भेद्य: -द्या -द्यं, विभेद्य: -द्या -द्यं, वियोजनीय: -या -यं.

To SEPARATE, *v. a.* वियुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं), विसंयुज्, विप्रयुज्, विभिद् (c. 7. -भिनत्ति -भेत्तुं), भिद्, विश्लिष् (c. 10. -श्लेषयति -यितुं), विच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विगम् in caus. (-गमयति -यितुं), पृथक्कृ, विभज्, विविच्.

To SEPARATE, *v. n.* वियुज् in pass. (-युज्यते), वियुक्त: -क्ता -क्तं भू, विभिद् in pass. (-भिद्यते), भिद्, विभिन्न: -न्ना -न्नं भू, विश्लिष् (c. 4. -श्लिष्यति -श्लेष्टुं), विच्छिद् in pass., विगम् (c. 1. -गच्छति -गन्तुं), विभक्त: -क्ता -क्तं भू.

SEPARATE, *a.* (Distinct, disconnected) विभिन्न: -न्ना -न्नं, भिन्न: &c. व्यतिरिक्त: -क्ता -क्तं, पृथक्स्थित: -ता -तं, पृथक् indec., विविक्त: -क्ता -क्तं, विसंयुक्त: &c., असम्बद्ध: -द्धा -द्धं, असंसृष्ट: -ष्टा -ष्टं, असंलग्न: -ग्ना -ग्नं, व्यस्त: -स्ता -स्तं, अव्यतिकीर्ण: -र्णा -र्णं, विगत: -ता -तं, विरल: -ला -लं, प्रविरल: &c., असाधारण: -णा -णी -णं, प्रगत: &c.

SEPARATED, *p. p.* वियुक्त: -क्ता -क्तं, वियोजित: -ता -तं, विसंयुक्त: -क्ता -क्तं, विप्रयुक्त: &c., पृथक्कृत: -ता -तं, विश्लिष्ट: -ष्टा -ष्टं, विश्लेषित: -ता -तं, परिछिन्न: -न्ना -न्नं, विच्छिन्न: &c., विभिन्न: &c., भिन्न: &c., विगत: -ता -तं, विभक्त: -क्ता -क्तं, विविक्त: &c., द्वैधीकृत: &c., व्यासक्त: &c., असंसक्त: &c., असंलग्न: -ग्ना -ग्नं, विसंलग्न: &c., विप्रभ्रष्ट: -ष्टा -ष्टं, आलवाल: -ला -लं, व्यापृत: &c., 'from a lover,' विधुर: -रा -रं, विरही -हिणी &c.

SEPARATELY, *adv.* पृथक्, विरलं, विभिन्नं, विभेदेन, विभागशस्.

SEPARATENESS, *s.* पृथक्त्वं, पार्थक्यं, भिन्नता, विभिन्नता, पृथग्भाव:.

SEPARATER, *s.* विभेदक:, विच्छेदक:, विभेदकारी *m.* (न्), पृथक्कारी *m.*

SEPARATION, *s.* (The act) वियोग:, विप्रयोग:, वियोजनं, विभेद: -दनं, विश्लेष: -षणं, प्रविश्लेष:, विच्छेद: -दनं, पृथक्करणं, द्वैधीकरणं, परिच्छेद:, भेद: -दनं, अवच्छेद:, विभाग:, प्रविभाग:, विगम:, विसंयोग:, व्यासङ्ग:, असम्बन्धं, असंयोग:, सङ्गविच्युति: *f.*—(The state) भिन्नता, विभिन्नता, विभेद:, भेद:, वियोग:, विप्रयोग:, पृथक्त्वं, पार्थक्यं, पृथग्भाव:, विच्छेद, विश्लिष्टता, विभक्तता, विभक्तभाव:, विरह:, व्यतिरेक:, व्यावृत्ति: *f.*—(Of the sexes) स्त्रीपुंभेद:, द्वन्द्वभिन्नं, स्त्रीपुरुषभेद:.—(Especially of lovers) विरह:, विश्लेष:, प्रविश्लेष:, विप्रयोग:, वियोग:, विप्रलम्भ:, वैधुर्यं, विधुरता, विगम:; 'anguish of separation,' विरहज्वर:, विरहानल: 'a woman who suffers separation from her lover,' विरहिणी विरहोत्कण्ठिता, उत्कण्ठिता.

SEPOY, *s.* सैन्य:, सैनिक:. *See* SOLDIER.

SEPTANGULAR, *a.* सप्तकोण: -णा -णं, सप्ताङ्ग: -ङ्गा -ङ्गी -ङ्गं.

SEPTEMBER, *s.* भाद्रोत्तरार्द्धं, आश्विनपूर्व्वार्द्धं, भाद्र:, भाद्रपद:, प्रौष्ठपद:, नभस्य आश्विन:, आश्वयुज:, इष:.

SEPTENARY, *a.* सप्तसंख्यक: -का -कं, सप्तरूप: -पा -पं.

SEPTENARY, *s.* (Aggregate of seven) सप्तकं.

SEPTENNIAL, *a.* सप्तवर्षिक: -की -कं, साप्तवर्षिक: &c., साप्ताब्दिक &c.

SEPTIC, SEPTICAL, *a.* गलनकारी -रिणी -रि (न्), विगलनकारी &c. विलयनकारी &c., विगलनकृत् *m. f. n.*, विलयनकृत् *m. f. n.*

SEPTILATERAL, *a.* सप्तपार्श्व: -र्श्वा -र्श्वं, सप्तभुज: -जा -जं, सप्तबाहु: -हु: -हु.

SEPTUAGENARIAN, *s.* साप्ततिक: -का, सप्ततिवयस्क: -स्का -स्कं.

SEPTUM, *s.* (Of the scrotum) अण्डपीठं, सीवनी, *see* SCROTUM.

SEPTUPLE, *a.* सप्तगुण: -णा -णं, सप्तविध: -धा -धं, सप्तक: -का -कं.

SEPULCHRE, SEPULCHER, *s.* समाधि: *m.*, श्मशानं, चित्य: *m.*, शवस्थानं शवमन्दिरं, प्रेतमन्दिरं, प्रेतस्थानं, प्रेतवास:, शववास:, मृतशरीरस्थानं शवगर्त्त:, अवट:, एडूकं.

SEPULCHRAL, *a.* श्मशानसम्बन्धी -न्धिनी -न्धि (न्), श्माशानिक: -की -कं श्मशान in comp., श्मशानविषयक: -का -कं; 'sepulchral blossom,' पितृवनकुसुम *n.*

SINCERE, *a.* (Said of things or persons) सरलः -ला -लं, सात्त्विकः -की -कं, तात्त्विकः &c., सत्यः -त्या -त्यं, दक्षिणः -णा -णं, निर्व्याजः -जा -जं, निर्व्यलीकः -का -कं, अमायिकः -की -कं, अमायी -यिनी -यि (न्), अमायः -या -यं, मायाहीनः -ना -नं, निष्कपटः -टा -टं, अकपटः -टा -टं, अकृत्रिमः -मा -मं, अकल्पितः -ता -तं, दम्भरहितः -ता -तं, ऋजुः -जुः -जु, अजिह्मः -ह्मा -ह्मं, अवक्रः -क्रा -क्रं, शुद्धः -द्धा -द्धं, पूतः -ता -तं, वास्तविकः -की -कं, वास्तवः -वी -वं, यथार्थः -र्था -र्थं, निष्प्रपञ्चः -ञ्चा -ञ्चं.—(Said of persons only) सत्यवादी -दिनी -दि (न्), सत्यवाक् *m. f. n.* (च्), सत्यशीलः -ला -लं, शुद्धमतिः -तिः -ति, शुद्धभावः -वा -वं, विमलात्मा -त्मा -त्म (न्), अशठधीः -धीः -धि, उदारः -रा -रं, सत्यव्रतः -ता -तं, शुचिः -चिः -चि, निःशठः -ठा -ठं.

SINCERELY, *adv.* सरलं, सारल्येन, दाक्षिण्येन, निर्व्यलीकं, निर्व्याजं, अमायया, सत्यं, मनःपूर्वं, हृदयपूर्वं.

SINCERITY, SINCERENESS, *s.* सरलता, सारल्यं, दाक्षिण्यं, सत्यता, निर्व्यलीकता, अमाया, अमायिकत्वं, मायाहीनता, अकृत्रिमता, अकल्पितत्वं, निष्कपटत्वं, अकापट्यं, निष्कापट्यं, ऋजुता, आर्जवं, शुद्धता, वास्तविकता, यथार्थता, सत्यवादित्वं, सत्यशीलता, मतिशुद्धता, उदारता, विमलता, शुचिता, अनन्यभावः.

SINCIPUT, *s.* (Front of the head) मस्तकाग्रभागः, शिरोग्रभागः.

SIN-DESTROYING, *a.* पापनाशी -शिनी -शि (न्), पापनाशकः -का -कं, पापघ्नः -घ्नी -घ्नं, अघघ्नः &c., अघमलापहः -हा -हं, अघमर्षणः -णा -णं, पापप्रशमनः &c.

SINE, *s.* (Of an arc in geometry) ज्या, जीवा; 'versed sine,' इषुः *m. f.*, शरः.

SINECURE, *s.* वेतनयुक्तो निष्कर्मकाधिकारः or कर्मशून्याधिकारः.

SINEW, *s.* स्नायुः *m. f.*, स्नसा, स्नावः, सिरा, शिरा, सन्धिबन्धनं, ग्रन्थिबन्धनं, स्नायुबन्धनं, वहीरुः *m.*, रसाल्हसा.—(Sinews, strength) बलं, शक्तिः *f.*, मुख्यसाधनं.

SINEWY, *a.* स्नायुमयः -यी -यं, शिरालः -ला -लं. *See* NERVOUS.

SINFUL, *a.* (Said of persons) पापी -पिनी -पि (न्), पापकर्मा -र्मा -र्म (न्), कुकर्मा &c., दुष्कर्मा &c., दुष्कृती &c., पापकारी -रिणी &c., पापकर्मी -र्मी -र्मि (र्मिन्), पापिकरः -री -रं, पापकृत् *m. f. n.*, कुकर्मकृत्, कुकर्मकारी &c., दुष्कृतकर्मा &c., पापकर्मी -र्मिणी &c., अपराधी &c., एनस्वी &c., किल्बिषी &c., पातकी &c., कल्मषी &c., कृष्णकर्मा &c., पापाशयः -या -यं, पापपरायणः -णा -णं, पापनिरतः -ता -तं, पापात्मकः -का -कं, पापात्मा -त्मा -त्म (न्), पापबुद्धिः -द्धिः -द्धि, पापमतिः -तिः -ति, मन्दकारी &c., दुष्टकारी &c., व्यसनी -निनी &c., अधर्मचारी &c., दुरितः -ता -तं, *see* WICKED, 'very sinful,' पापिष्ठः -ष्ठा -ष्ठं, पापीयान् -यसी -यः (स्), अतिपापी &c.—(Containing sin, said of things) पाप in comp., पापी &c., पापवान् -वती -वत् (त्), दुष्टः -ष्टा -ष्टं, धर्मविरुद्धः -द्धा -द्धं, अघवान् &c., अघमयः -यी -यं, कलुषः -षा -षं, कल्की &c., कल्कः -ल्का -ल्कं, अघभागी &c. sinful *n. pl.*

Sinful, *a.* पापवान् -वती -वत् (त्), दुर्वृत्तः &c., सपापकः

Sinfulness, *s.* पापं, पापिष्ठता, पापबुद्धिः *f.*, सपापता, पापाभिरतिः *f.*, पापवत्त्वं, दुष्टता, शठता, शाठ्यं, धर्म्मविरुद्धता, अत्यायः. *See* Wickedness.

To sing, *v. n.* गै (c. 1. गायति, गातुं), अनुगै, अभिगै, प्रगै, निगै, संगै, उद्गै, गायनं कृ, गानं कृ.—(As birds, &c.) रु (c. 2. रौति, रवितुं), कल् (c. 10. कलयति -यितुं), कलं रु, वाश् (c. 4. वाश्यते -शितुं), वाशितं कृ.—(Make a humming sound) रणरणशब्दं कृ.

To sing, *v. a.* गै (c. 1. गायति, गातुं); 'to sing an air,' कलं गै, 'a song,' गीतं गै; 'a poem,' काव्यं गै.—(Celebrate in song) उपगै, परिगै, अभिप्रगै, गानेन कृत्, *see* Celebrate, Celebrated.

To singe, *v. a.* बाह्यतो दह् (c. 1. दहति, दग्धुं), वह्निभोगे दह्, ईषद् दह्, अग्निना स्पृश्, अग्निस्पृष्टं -ष्टां कृ. *See* *To* scorch.

Singed, *p. p.* बाह्यतो दग्धः -ग्धा -ग्धं, वह्निदग्धः &c., अग्निस्पृष्टः -ष्टा -ष्टं.

Singer, *s.* गायकः, गाता *m.* (तृ), गायनः, गाथकः *m.*, गाथिकः, गाथकः, गाथाकारः, गेष्णुः *m.*, गेष्णः, उद्गाता *m.*; 'female singer,' गायी, गायकी, गायनी, उद्गाती.

Singing, *s.* गायनं, गानं, गीतिः *f.*, गीतं, स्वरयुक्तवाक्योच्चारणं.—(Of birds, &c.) रुतं, पक्षिरुतं, रावः, पक्षिरावः, वाशितं, वाशनं, मधुरुतं, कलः, कलकलः, कलरवः, कलनं. *See* Murmur.

Singing, *part.* गायन् -यन्ती -यत् (त्), प्रगायन् &c.

Singing-master, *s.* गानशिक्षकः, गानविद्याशिक्षकः, गीतोपदेशकः.

Single, *a.* (One, consisting of one only) एकः -का -कं, अद्वितीयः -या -यं, केवलः -ला -ली -लं, एककः -का -कं; 'a single inflection,' एकपदः.—(Sole, alone) एकाकी -किनी -कि (न्), केवलः -ला -ली -लं, केवली &c., एकः -का -कं, अद्वितीयः -या -यं, असहायः -या -यं.—(Not double) अद्वैधः -धी -धं, अद्विकः -का -कं, अद्विगुणः -णा -णं, अद्वितीयः -या -यं.—(Distinct, individual) भिन्नः -न्ना -न्नं, व्यक्तः -क्ता -क्तं, अव्यापकः -का -कं, अविभक्तः &c., *see* Particular.—(Pure, simple) शुद्धः -द्धा -द्धं, *see* Simple.—(Unmarried) अविवाहितः -ता, अनूढः -ढा, निःसङ्गः -ङ्गा.

To single, *v. a.* उद्धृ (c. 1. -हरति -हर्त्तुं, rt. हृ), उद्धृ, उद्धृह्, *see* *To* select.

Single-bodied, *a.* एकदेहः -हा -हं, एकशरीरः -रा -रं, एकाङ्गः &c.

Single-combat, *s.* द्वन्द्वयुद्धं, द्वयोर्युद्धं, द्वन्द्वं, नियुद्धं.

Single-eyed, *a.* एकाक्षः -क्षी -क्षं, एकलोचनः -ना -नं, एकलक्षी -क्षिणी &c.

Single-handed, *a.* असहायः -या -यं, स्वबाहुसहायः &c., एकाकी &c.

Single-hearted, *a.* एकचित्तः -त्ता -त्तं, अनन्यवृत्तिः -त्तिः -त्ति.

Single-hoofed, *a.* एकशफः -फा -फं, एकखुरः -रा -रं, एकखुरी -रिणी &c.

Single-minded, *a.* शुद्धमतिः -तिः -ति. *See* Simple, Simple-minded.

Singleness, *s.* (State of being one, or distinct from all others) एकता, ऐक्यं, केवलत्वं, कैवल्यं, अद्वितीयता, अद्वैधता, भिन्नता.—(Simplicity, sincerity) शुद्धता, अनन्यता, अनन्यभावः; 'of heart,' मतिशुद्धता.

Single-stick, *s.* (Cudgel) यष्टिः *m.*, दण्डः, वेत्रं, द्विदण्डि indec.; 'fighting with single-stick,' द्विदण्डिप्रहरणं, द्विमुषलिप्रहरणं.

Singly, *adv.* (Individually, one by one) प्रत्येकं, एकशस्, एकैकशस्, एकतस्, एकैकं, पृथक्, पृथक् पृथक्.—(Alone, without companions) असहायतस्, अद्वितीयतस्, एकतस्.

Singular, *a.* (Single) एकः -का -कं, *see* Single.—(Existing by itself, [illegible]) [illegible] -ना -नं, अनुपमः -मा -मं, अद्वितीयः -या -यं, अपूर्वः -र्वा -र्वं, असदृशः -शी -शं, [illegible] -णा -णं, अनन्यसामान्यः -न्या -न्यं, अपूर्वप्रतिमः -मा -मं, अपूर्वप्रकारः -रा -रं, एकमात्रः -त्रा -त्रं.—(Not common, odd) असाधारणः -णा -णी -णं, असामान्यः -न्या -न्यं, असङ्गतः -ता -तं, विलक्षणः -णा -णं, अप्रसिद्धः -द्धा -द्धं, अपरूपः -पा -पं, अद्भुतः -ता -तं, लोकबाह्यः -ह्या -ह्यं, अलौकिकः -की -कं, लोकोत्तरः -रा -रं.—(The singular number) एकवचनं.

Singularity, *s.* असाधारणता, अद्वितीयता, अप्रतिमता, अनुपमता, असदृशता, असादृश्यं, अपूर्वता, असामान्यता, अनन्यसाधारणता, विलक्षणता, वैलक्षण्यं, असङ्गतत्वं, असङ्गतिः *f.*, अपरूपता, अद्भुतता, एकता.

Singularly, *adv.* अपूर्ववत्, अपूर्वं, असङ्गतं, विलक्षणं, सवैलक्षण्यं, असाधारण्येन, असामान्येन, अद्भुतं, विशेषतस्.

Sinister, *a.* (Not honest, crooked) असरलः -ला -लं, वक्रः -क्रा -क्रं, अनृजुः -जुः -जु, कुटिलः -ला -लं, वामः -मा -मं, वृजिनः -ना -नं.—(Inauspicious) अमङ्गलः -ला -लं, अकल्याणः -णा -णं, अमङ्गलसूचकः -का -कं.—(Left), *see* the word.

Sinistrally, *adv.* वामत्वेन, सव्यत्वेन, वामदिशि, वामदिशं प्रति.

Sinistrous, *a.* वामस्थः -स्था -स्थं, सव्यस्थः &c., वामवर्त्ती -र्त्तिनी &c.

To sink, *v. n.* सद् (c. 6. सीदति, सत्तुं), अवसद्, विषद्, व्यवसद्, उत्सद्, संसद्, अधोगम् (c. 1. -गच्छति -गन्तुं), अधो या (c. 2. याति -तुं), अध पत् (c. 1. पतति -तितुं), अवपत्, पत्.—(In water) मस्ज् (c. 6. मज्जति मंक्तुं), निमस्ज्, जलमग्नः -ग्ना -ग्नं भू.—(In the mud) पङ्के सद् or पत्.—(In difficulties) कृच्छ्रे सद्, आपदि सद्.—(With fear) भयात् सद् or विषद्.—(Decline) अस्तं गम्, क्षि in pass. (क्षीयते), ध्वंस्, *see* *To* fail.

To sink, *v. a.* (Cause to sink) अवसद् (c. 10. -सादयति -यितुं), अवसद्, सद्, मस्ज् (c. 10. मज्जयति -यितुं), अधोगम् in caus (-गमयति -यितुं).

Sink, *s.* (Drain) जलनिर्गमः, जलसारणी, गुप्तनाली, गुप्तिः *f.*

Sinking, *part.* सीदन् -दन्ती -दत् (त्), अवसीदन् &c., मज्जन् -ज्जन्ती -ज्जती -ज्जत् (त्), निमज्जन् &c., निमग्नः -ग्ना -ग्नं.

Sinless, *a.* निष्पापः -पा -पं, अपापः -पा -पं, पापहीनः -ना -नं, पापरहितः -ता -तं, अकल्मषः -षा -षं, निष्कल्मषः &c., अनघः -घा -घं, अकिल्बिषः -षा -षं, वीतकल्मषः &c., अनेनाः -नाः -नः (स्), निरागाः &c., अकलङ्कः -ङ्का -ङ्कं, निर्दोषः -षा -षं, निरपराधः -धा -धं, निष्कलङ्कः -ङ्का -ङ्कं, अनपराधः -धा -धं.

Sinlessness, *s.* निष्पापता, अपापता, पापहीनता, पापाभावः.

Sinner, *s.* पापी *m.* (न्), पापजनः, पापकारी, पापकृत् *m.*, पापात्मा *m.* (न्), पापकर्म्मा *m.* (न्), एनस्वी *m.* (न्), व्यसनी *m.*, अपुण्यकर्त्ता *m.* (र्तृ), अपुण्यकृत् *m.*, अधर्म्मः, *see* Sinful; 'an atrocious sinner,' महापातकी *m.* (न्), अतिपातकी *m.*, महापापी *m.*, अतिपापी *m.*, पापमूर्त्तिः *m.*, पापनिधिः *m.*, पापस्वरूपः, पापराशिः *m.*, पापपुरुषः.

Sin-offering, *s.* पापशमनं, पापनाशकप्रायश्चित्तं, पापशमकबलिः *m.*

Sinuosity, *s.* वक्रता, वक्रिमा *m.* (न्), कुटिलता, जिह्मता, कौटिल्यं.

Sinuous, *a.* वक्रः -क्रा -क्रं, कुटिलः -ला -लं. *See* Winding, *a.*

Sinus, *s.* (In surgery) नाडिः -डी *f.*, नाडीव्रणः -णः, नालिः -ली नालीव्रणः -णः, नालीक्षतं, गतिः *f.*, अवटः -टिः *m.*

To sip, *v. a.* (Drink in small quantities) अल्पाल्पशस् or अल्पाल्पं पा (c. 1. पिबति, पातुं) or आपा, अल्पशो निपा or चम् (c. 1. चमति -मितुं), ईषत्पानं कृ, आचम् (c. 1. -चामति -मितुं), उपस्पृश् (c. 6.

-स्पृशति -स्प्रष्टुं). The last two words are used especially with reference to sipping water before meals and religious ceremonies from the palm of the hand, and ejecting it again.

SIP, SIPPING, s. ईषत्पानं, अल्पाशः पानं, अल्पशो निपानं, ईषल्लिपानं, आचमनं, उपस्पर्शः, शुचिक्रिया: f., ओष्ठनिपानं, ओष्ठपानं.

SIPHON, s. कुक्कुटनाडीयन्त्रं, नाडीयन्त्रं, नालीयन्त्रं, वक्रनाडी.

SIPPED, p. p. अल्पाल्पशः पीतः -ता -तं, अल्पशो निपीतः -ता -तं.

SIR s. आर्य्यः, महाशयः, महानुभावः, महेच्छः, महामनाः, सुमनाः, श्री prefixed; 'O sir,' आर्य्य. As an address of respect, 'Sir' may often be expressed in Sanskrit by भवान् with the 3d pers. of the verb; as, 'enter, Sir,' प्रविशतु भवान्

SIRE, s (Word of address to a king) देव voc. c., श्रीमद्देव, महाराज, राजन्, आयुष्मन्.—(Father) जनकः, जननः, जनिता m. (तृ).

SIREN, s. मोहिनी, मोहकारिणी, मायिनी, मायाकारिणी, विमोहिनी.

SIRIUS, s. (Dog-star) लुब्धकः.

SIRLOIN, s. (Of beef) गोपार्श्वमांसं, गोपार्श्वः.

SIRNAME, s. उपनाम n. (न्), पद्धतिः -ती f. See SURNAME.

SIRRAH, s. (Reproachful address) अरे, अरेरे, रे, रे, अये.

SIRUP, s. इक्षुरसः,स्वादुरसः, मधुरसः, मधुररसः, मधुरं, लेह्यं.

SIRUPY, a. इक्षुरसमयः -यी -यं, स्वादुरसमयः &c., मधुरः -रा -रं.

SISTER, s. स्वसा f. (सृ nom. pl. स्वसारः), भगिनी, भगिनीका, भग्नी, सयोनिः f., जामिः -मी, यामिः -मी; 'elder sister,' अग्रजा, 'younger sister,' अवरजा; 'sister's husband,' भगिनीपतिः m., स्वसृपतिः; 'sister's son,' भागिनेयः, स्वस्रीयः, स्वस्त्रियः, स्वस्रेयः; 'sister's daughter,' भागिनेयी, स्वस्रीया, स्वस्त्रिया, स्वस्रेयी.—(Woman of the same faith) धर्म्मभगिनी.

SISTER-IN-LAW, s. (Husband's sister) ननान्दा f. (न्दृ), ननन्दा f. (न्दृ), नन्दा, पतिस्वसा f. (सृ), पत्युः स्वसा f.—(Wife's sister) श्याली, श्यालकी, श्यालिका, जायाभगिनी, पत्नीस्वसा f.—(Brother's wife) भ्रातृजाया, भ्रातृपत्नी, भ्रातृभार्य्या, प्रजावती.

SISTERHOOD, s. (State of a sister) भगिनीत्वं, स्वसृत्वं.—(Community of sisters or women) स्वसृगणः, भगिनीगणः, स्वसृमण्डली, स्वसृसमूहः, स्त्रीगणः.

SISTERLY, a. स्वसृयोग्यः -ग्या -ग्यं, भगिनीयोग्यः &c., स्वस्रीयः -या -यं.

To SIT, v. n. उपविश् (c. 6. -विशति -वेष्टुं), समुपविश्, उपोपविश्, उपवेशं कृ, उपवेशनं कृ, आस् (c. 2 आस्ते -सितुं), अध्यास्, समास्, सद् (c. 1. सीदति, सत्तुं), निषद् with loc. or acc. c.; as, 'he sits down on a chair,' पीठे or पीठम् उपविशति; 'on a seat offered,' दत्तासनम् उपविशति.—(Sit by the side of) उपास्, अन्वास्.—(Sit idle) उदास्.—(Incubate) नीडे निली (c. 4. -लीयते -लेतुं), नीडनिलायं कृ, अण्डोपरि उपविश्.—(Press on, bear on) उपस्था, समुपस्था, आक्रम्, पीड्.—(As an assembly) कार्य्यनिर्वाहं कृ.

SITÁ, s (The wife of Rámachandra, and daughter of Janaka, the king of Mithilá. She is called 'earth-born,' as having been turned up from the soil by a plough, as Janaka was ploughing a spot to prepare for a sacrifice) सीता, धरणीसुता, भूमिसम्भवा, भूमिजा, भूसुता, जनकात्मजा, जनकसुता, जनकतनया.

SITE, s. स्थानं, स्थलं, पदं, आस्पदं, स्थितिः f., भूमिः f., पदविः -वी f., भवितव्यवस्तुप्रदेशः.—(Of a house) वास्तु m., गृहभूमिः f., वेश्मभूः f., गृहपोतकः, गृहपोतः, पोटः, पोतः -तक कुट्टिमं, वाटिका; 'ceremony of purification, &c., of a site' स्थलशुद्धिः f., वास्तुसंशमनं, वास्तुसंशमनीयं.

SITTING, s. (The act) उपवेशः -शनं, आसना -नं, अध्यासः -सनं -ना आस्या.—(A seat) आसनं.

SITTING, part. आसीनः -ना -नं, अध्यासीनः &c., उपविष्टः -ष्टा -ष्टं निषीदन् -दन्ती -दत् (त्); 'on a seat,' आसनोपविष्टः &c.

SITUATED, SITUATE, a. (Placed or standing with regard to any other object) स्थः स्था स्थं, स्थितः -ता -तं, अवस्थितः &c., भवस्थः -स्था -स्थं, संस्थितः -ता -तं, दिक्स्थः -स्था -स्थं; 'situated near' समीपस्थः &c., समीपस्थितः &c.; 'situated to the south,' दक्षिणस्थः -स्था -स्थं, दक्षिणदिक्स्थः &c.; 'towards the east,' पूर्वस्थ &c., पूर्वदिक्स्थः &c., 'well situated,' सुस्थितः -ता -तं, सुसंस्थित &c.; 'pleasantly situated,' सौवास्तवः -वी -वं.—(With regard to men or things) स्थः स्था -स्थं, स्थितः -ता -तं, अवस्थ in comp. अवस्थापन्नः -न्ना -न्नं, अवस्थापन्नः -न्ना -न्नं; 'well situated,' सुस्थ &c., सुस्थितः &c., 'so situated,' तदवस्थः -स्था -स्थं; 'how situated?' किमवस्थः -स्था -स्थं, 'badly situated,' दुःस्थितः -ता -तं, दुःस्थः &c.

SITUATION, s. (Place, position) स्थानं, स्थितिः f, अवस्थितिः f अवस्थानं, आस्पदं, पदं, पदविः -वी f.—(State, circumstances) अवस्था, दशा, स्थितिः f., संस्थितिः f, भावः, वृत्तिः f., आस्पदं, पदं; 'disgraceful situation,' परिभवास्पदं, परिभवपदं.—(Office, post) पदं पदविः -वी, अधिकारः, स्थानं, स्थलं, नियोगः, व्यापारः.

SIVA, s. A celebrated Hindú God, the Destroyer of Creation and therefore the most formidable of the Hindú Triad He also personifies reproduction, since the Hindú philosophy excludes the idea of total annihilation without subsequent regeneration. Hence he is sometimes confounded with Brahmá, the Creator, or first person of the Triad. He is the particular god of the Tántrikas or followers of the books called Tantras. His worshippers are termed Śaivas, and although not so numerous a the Vaishnavas, exalt their god to the highest place in the heavens, and combine in him many of the attribute which properly belong to the other deities. Accordin to them Śiva is Time, Justice, Fire, Water, the Sun the Destroyer and Creator. As presiding over generation his type is the Linga, or Phallus, the origin probably o the Phallic emblem of Egypt and Greece. As the go of generation and of justice, which latter character h shares with the god Yama, he is represented ridin a white bull. His own colour, as well as that of th bull, is generally white, referring probably to the u sullied purity of Justice His throat is dark blue h hair of a light reddish colour, and thickly matted togethe and gathered above his head like the hair of an ascet He is sometimes seen with two hands, sometimes w four, eight, or ten, and with five faces He has thr eyes, one being in the centre of his forehead, pointi up and down. These are said to denote his view of th

three divisions of time, past, present, and future. He holds a trident in his hand to denote, as some say, his relationship to water, or according to others, to show that the three great attributes of Creator Destroyer, and Regenerator are combined in him. His loins are enveloped in a tiger's skin. In his character of Time, he not only presides over its extinction, but also its astronomical regulation. A crescent or half-moon on his forehead indicates the measure of time by the phases of the moon, a serpent forms one of his necklaces to denote the measure of time by years, and a second necklace of human skulls marks the lapse and revolution of ages, and the extinction and succession of the generations of mankind. He is often represented as entirely covered with serpents, which are the emblems of immortality. They are bound in his hair, round his neck, wrists, waist, arms, and legs; they serve as rings for his fingers, and earrings for his ears, and are his constant companions. Śiva has more than a thousand names, which are detailed at length in the sixty-ninth *chapter of the Śiva Purána. The following* list of the principal of these will give the best idea of his character and attributes. (The Auspicious one) शिवः, शम्भुः *m.*, शङ्करः, सदाशिवः, श्रीमान् *m.* (त्), भद्रः, भगः.—(The great god or lord) महादेवः, ईश्वरः, महेश्वरः, महेशः, ईशः, ईशानः, नाथः, देवः.—(Lord of the universe, as worshipped at Benares) विश्वेश्वरः, विश्वेशः, विश्वनाथः, सर्वेश्वरः.—(Lord of the earth) धरणीश्वरः.—(The seizer) हरः, हरकः, हरिः *m.*—(The Destroyer, a personification of Time that destroys all things) कालः, महाकालः, जगद्धाता *m.* (तृ), जगद्भक्षकः, कालश्वरः.—(The Reproducer, the Conqueror of Death and cause of life and being) भवः, मृत्युञ्जयः, मृत्युवञ्चनः, जगद्योनिः *m.*, भूतात्मा *m.* (न्) भः भरुः *m.*—(Dispersor of the tears of mortals) रुद्रः.—(The terrific or tremendous one) भैरवः, घोरः, भीषणः, भीष्मः, भीमः.—(The fierce one) उग्रः, चण्डः.—(Blue-throat, having a dark blue and beautiful throat, so stained by the acrimony of the poison, which he swallowed on its production at the churning of the ocean; *see* OCEAN) नीलकण्ठः, श्यामकण्ठः, नीलग्रीवः, शितिकण्ठः, कालकण्ठः, श्रीकण्ठः, नीललोहित.—(Tri-ocular, having three eyes) त्रिलोचनः, त्रिनेत्रः, त्रिदृक् *m.* (श्), त्रिनयनः, त्र्यक्षः.—(*Having deformed or unnatural eyes*) विरूपाक्षः.—(Moon-crested, having a crescent on his brow) चन्द्रमौलिः *m.*, चन्द्रशेखरः, शशिशेखरः, इन्दुभृत्, चन्द्रापीडः, शशीशः, चन्द्रिलः, सोमः.—(Borne on, or accompanied by the Bull which personifies Justice) वृषवाहनः, वृषभवाहनः, वृषध्वजः, वृषभध्वजः, धर्मवाहनः, वृषपतिः *m.*, वृषभगतिः *m.*, वृषपर्वा *m.* (न्), वृषाङ्कः, वृषासनः, वृषारूढः.—(Having matted or braided hair) धूर्जटिः *m.*, जटाधरः, जटाधारी *m.* (न्), जटिलः, जटाजूटः, जटाटीरः, कपर्दी *m* (न्), कपर्दः.—(Having sky-coloured *hair*) व्योमकेशी *m* (न्), व्योमकेशः.—(Trident-bearer) शूली *m.* (न्), त्रिशूली *m.*, शूलभृत् पिनाकी *m.*—(Lord of cattle) पशुपतिः *m.*, गोपतिः, गोरक्षः, गोपालकः.—(Lord of spirits) भूतेशः, भूतनाथः, भूतः.—(Bearer of the Ganges, this river having on its descent from heaven alighted on his head and thence descended upon earth, through a chasm in the Himálaya mountains called Gomukha) गङ्गाधरः.—(Clothed with a tiger's skin) कृत्तिवासाः *m* (स्), कृत्तिवासः.—(Bound or covered with snakes) अहिभूषः.—(Having a necklace of human skulls) कपालभृत्, कपाली *m.* (न्), अस्थिमाली *m.* पुरुषास्थिमाली *m.*, अस्थिधन्वा *m.* (न्), भगाली *m.*—(The white one or yellowish white) शुचिः, गौरः, हरितः.—(Conqueror and Destroyer of the district and king of Tripura) त्रिपुरजित्, त्रिपुरसूदनः, त्रिपुरदहनः, त्रिपुरान्तकः.—(Presiding over the three Vedas, or the three letters of the mystical syllable *om*) त्र्यम्बकः.—(*He of whom one form is water*) जलमूर्त्तिः *m.*—(The Steadfast) स्थाणुः *m.*—(The Universal) सर्व—(The Omnipresent) सर्वगः.—(The Omniscient) सर्वज्ञ—(The Imperishable) अक्षरः.—(The Five-faced) पञ्चमुख पञ्चाननः, पञ्चवक्त्रः, सर्वतोमुखः.—(Scorcher of Cupid, *see* KAMA DEVA) स्मरहरः, कामध्वंसी *m.* (न्), अनङ्गासुहृद्, भर्गः.—(Restorer of his body) परशुधरः—(Lord of Kailása, in the Himálayas, the *favourite haunt of both Śiva and Kuvera*) गिरीशः, गिरिश कैलासौकाः *m.* (स्), कैलासनिकेतनः.—(Lord of Benares) काशीनाथः, काशीशः; hence one of the *names of Benares is* रुद्रावासः, शिवपुरी.—(Having three residences) त्रिधामा *m*—(Destroyer of Daksha's sacrifice. That sage having on one occasion made a sacrifice, to which he invited all the gods, excepting his son-in-law Śiva and his daughter Durgá, the latter went unbid, and being received coldly threw herself into the fire, whence emanated a form of Śiva, who decapitated the sage) दक्षाध्वरध्वंसकृत्, दक्षयज्ञविनाशी *m.* (न्), क्रतुध्वंसी *m.*—(He of whom the seed was cast into Fire) वह्निरेताः *m.* (स्), कृशानुरेताः *m.*—(*Teacher of the* gṛihya, or book of domestic rites) गृह्यगुरुः.—(Possessor of the head of Brahmá, having in a dispute cut off one of the heads of that deity) ब्रह्ममूर्द्धभृत्.—(Enemy of the demon Pura) पुरारिः *m.*, पुरासुहृद्.—(Enemy of the demon Andhaka) अन्धकरिपुः *m.*—(He who cuts to pieces with his axe) खण्डपरशुः *m.*, खण्डपर्शुः *m.*—(Armed with the *Khatwánga or Pánśula)* खट्वाङ्गी *m.*, खट्वाङ्गभृत् *m.*, पांशुली *m.*—(Armed with a rope) पाशी *m.*—(Lord of devotion or *devotees)* योगेशः.—(Lord of gold) हेमकेशः.—(Fond of dancing) नाट्यप्रियः.—(The naked one) दिगम्बरः, दिग्वासाः *m.* (स्), नग्नः.—(Covered with sandal powder) पांशुचन्दनः, पांशुल—(Mounted on a dog in his terrific form) श्वाश्वः.—(The perverse) वामः, वामदेवः.—(Husband of Párvatí) पार्वतीनाथ—(Of Durgá) दुर्गापतिः, दक्षजापतिः.—(Of Gaurí) गौरीपतिः.—(Of Umá) उमापतिः—(Of Bhavání) भवानीपतिः.—(Lord of the Pramathas, his attendants) प्रमथाधिपः.—(Lord of Nandi, one of his chief attendants) नन्दीशः, नन्दीश्वरः, नन्दिवर्धन—(*Lord of Bhringi, one of his chamberlains*) भृङ्गीशः.—(Loved of Vishnu) हरिप्रिय.—(Having Vishnu as his dart,

that deity having served him for a shaft which set the city of Tripura on fire) हरिशरः. Some of his other names, the derivation of which is not very apparent, are the following: नकुलीशः, अयुद्धः, शिपिविष्टः, शितिपृष्ठः, श्रीकण्ठः, नाथः, मृडः, कुक्कुटः, वारः, रुः m.—(Under the emblem of the Phallus) लिङ्गं; 'a worshipper of him under that type,' लिङ्गी m.—(A form of Śiva, half male and half female) अर्द्धनारीशः, अर्द्धनारीनटेश्वरः.—(Inferior manifestations of him, called Bhairavas) असिताङ्गः, रुरुः m., चण्डः, क्रोधः, उन्मत्तः, कुपतिः, भीषणः, संहरः, मकुलः.—(His wife) पार्वती, दुर्गा, गौरी, उमा, सती, भवानी, see Pārvatí; as the symbol of created nature his wife is called प्रकृतिः.—(His sons) कार्त्तिकेयः, गणेशः, see Kárttikeya, Ganesha.—(His attendants) प्रमथाः, शिवकीर्त्तनः.—(Some of the names of his attendants are) नन्दी m., नन्दिः m., भृङ्गी m. नाडीदेहः, नाडीविग्रहः, नाडीदेहः, भृङ्गरिटः, शङ्कुः, पशुः.—(His vehicle or bull) वृषः, नन्दी m.—(Temple consecrated to his bull) गोपुटिकः.—(His trident) त्रिशूलं, पिनाकः, अहितं, पाशुपतास्त्रं.—(His bow) पिनाकः, अजगवं.—(One of his weapons, a staff with transverse pieces, representing the breast-bone and ribs, surmounted by a skull) खट्वाङ्गं, पांशुलः.—(His rope for binding incorrigible offenders) पाशः.—(His musical instrument, a kind of rattle, shaped like an hour-glass, and held in one hand) डमरुः m.—(His serpent earrings) नागकुण्डलं.—(His necklace of skulls) अस्थिमाला, मुण्डमाला.—(His matted hair) जटा, जटाजूटः, कपर्दः.—(His superhuman power) विभूतिः f., भूतिः f., see Superhuman, a.—(Daitya flayed by him) रुरुः.—(Worshipper of Śiva) शैवः, ईश्वरः, शिवकः, पाशुपतिकः. Many plants are sacred to Śiva, as the aśoka, vilva, mango, &c.

Six, a. षट् m. f. n. pl. (षष्), षट्संख्यकः -का -कं, षट्कः -ट्का -ट्कं; 'six months,' षण्मासाः m. pl., षण्मासं; 'the six seasons,' षड्ऋतवः m. pl.; 'of six months standing,' षाण्मासिकः -की -कं, षण्मास्यः -स्या -स्यं; 'six-fingered,' षडङ्गुलिः -लिः -लि; 'six-angled,' षट्कोणः -णा -णं; 'six-limbed,' षडङ्गः -ङ्गा -ङ्गं; 'six-armed,' षड्भुजः -जा -जं; 'six-faced,' षण्मुखः -खा -खं; 'a yoke of six oxen,' षड्गवं; 'having six feet,' षट्पदः -दा -दं; 'in six ways,' षड्धा, 'the aggregate of six,' षट्कं.

Six-fold, a. षड्गुणः -णा -णं, षड्विधः -धा -धं, षट्कः -ट्का -ट्कं.

Sixteen, a. षोडश m. f. n. pl. (न्) षोडशकः -का -कं.

Sixteenth, a. षोडशः -शी -शं; 'a sixteenth part,' षोडशांशः.

Sixth, a. षष्ठः -ष्ठी -ष्ठं, षष्ठकः -का -कं; 'a sixth part,' षड्भागः, षडंशः, 'a sixth meal,' षष्ठान्नं, 'being or having a sixth,' षष्ठी -ष्ठिनी -ष्ठि (न्).

Sixthly, adv. षष्ठतस्, षष्ठस्थाने, षष्ठपदे.

Sixtieth, a. षष्टितमः -मी -मं, षष्टः -ष्टी -ष्टं.

Sixty, a. षष्टिः f., षष्टिसंख्यकः -का -कं; 'he reigned sixty years,' षष्टिम् अब्दान् राज्यं चकार; 'sixty-one,' एकषष्टिः; 'sixty-two,' द्वाषष्टिः, 'sixty-three,' त्रयःषष्टिः; 'sixty-four,' चतुःषष्टिः, 'sixty-five,' पञ्चषष्टिः; 'sixty-six,' षट्षष्टिः, 'sixty-seven,' सप्तषष्टिः; 'sixty-eight,' अष्टाषष्टिः; 'sixty-nine,' नवषष्टिः, एकोनसप्ततिः, ऊनसप्ततिः, 'aggregate of sixty,' षष्टिकं, 'bought with sixty,' षष्टिकः -की -कं.

Size, s. (Bulk) परिमाणं, मानं, परिमितिः f., प्रमाणं, मात्रं, आकार आकारमानं, आकृतिः f., आकृतिमानं, महत्त्वमानं, महत्त्वपरिमाण आकारपरिमाणं, आकृतिपरिमाणं; 'of the same size,' समपरिमाण -णा -णं, समानः -ना -नं; 'of the size of an egg,' अण्डपरिमाण -णा -णं, 'of the size of a grain of mustard,' सर्षपपरिमाण -णा -णं, 'of unequal size,' विषमपरिमाणः &c., असमपरिमाण &c.; 'of all sizes,' उच्चावचप्रमाणाः m. pl., 'having ascertained the size and distance of the moon,' चन्द्रस्य मान दूरत्वं च ज्ञात्वा.

Skain, skein, s. अञ्चिका, पिञ्चिका, पञ्चिः -ञ्ची f., पिञ्चिः -ञ्ची f., 'of silk,' कौशिकसूत्रपञ्ची, कौशिकसूत्रग्रन्थिः m.

Skate, s. (For moving on the ice) हिमसंहतजलोपरि निसर्पणयोग्या लोहयुक्तपादुका or स्खलनयोग्यपादुका, स्खलनपादुका.—(The fish) see Scate.

To skate, v. n. पूर्व्वोक्तपादुकाद्वारेण हिमोपरि or हिमसंहतजलोपरि विसृप् (c. 1. -सर्पति -सर्प्तुं) or संसृप् or स्खल् (c. 1. स्खलति -लितुं).

Skater, s. पूर्व्वोक्तपादुकाद्वारा हिमोपरि विसर्पी m. (न्) or संसर्पी m.

Skating, s. लोहयुक्तपादुकाद्वारेण हिमोपरि विसर्पणं or संसर्पणं or स्खलन or रिङ्खणं.

Skein, s. अञ्चिका, पिञ्चिका, पञ्चिः f. See Skain.

Skeleton, s. कङ्कालः, अस्थिपञ्जरः, अस्थिपिञ्जरः, पञ्जरः, कंपः, शरीरास्थिमात्रं, देहास्थिमात्रं, 'reduced to a mere skeleton,' त्वगस्थिमात्रशेषः -षा -षं.—(Frame, compages) संस्थानं, व्यूहः, आकार.—(Of any subject) वस्तुमात्रं, वस्तु n.

Skeptic, skeptical, skepticism. See Sceptic, Infidel, &c.

Sketch, s. (Of a figure, &c.) आलेख्य, पाण्डुलेख्यं, पाण्डुलेख्यमात्र लघ्वालेख्यं, बहिर्लेख्यं, ईषदालेख्यं, किञ्चिदालेख्य, ईषद्दर्शनं, किञ्चिद्दर्शनं ईषद्वर्णनं, स्थूलालेख्यं, 'of a painting,' चित्रारम्भः, पाण्डुचित्र चित्रं.—(Of a subject) वस्तुमात्रं, ईषद्वर्णनं, किञ्चिद्वर्णनं, वस्तु n.

To sketch, v. a. बाह्यरेखामात्रं लिख् (c. 6. लिखति, लेखितुं) or आलिख् or विलिख्, पाण्डुलेख्यम् अङ्क् (c. 10. अङ्कयति -यितुं) पाण्डुलेख्यं कृ, लघ्वालेख्यं कृ, स्थूलालेख्यं कृ, किञ्चिदालेख्यं कृ, किञ्चिद्वर्णनं कृ, ईषद्वर्णनं कृ, ईषद् वर्ण् (c. 10. वर्णयति -यितुं) or अनुवर्ण् or उपवर्ण् or संवर्ण्, चित्रारम्भं कृ, पाण्डुचित्रं कृ.

Sketched, p. p. आलिखितः -ता -तं, किञ्चिदालिखितः &c., चित्रारम्भः -म्भा -म्भं, किञ्चिद्वर्णितः -ता -तं, बहिरङ्कितः &c.

Skewer, s. शलाका, कीलः -लकः, शङ्कुः m., मांसबन्धनशलाका.

To skewer, v. a. शलाकया बन्ध् (c. 9. बध्नाति, बन्द्धुं), शलाकाबद्धं -द्धा कृ.

Skiff, s. (Light boat) लघुनौका, क्षुद्रनौका, सुवहनौका.

Skilful, a. कुशलः -ला -लं, निपुणः -णा -णं, प्रवीणः -णा -णं पटुः -ट्वी -टु, विचक्षणः -णा -णं, विशारदः -दा -दं, चतुरः -रा -रं अभिज्ञः -ज्ञा -ज्ञं, विज्ञः &c., विदग्धः -ग्धा -ग्धं, पेशलः -ला -लं वैज्ञानिकः -की -कं, कृती -तिनी -ति (न्), युक्तिमान् -मती -मत् (त्) निष्णातः -ता -तं, ज्ञ in comp.; 'skilful in arms,' अस्त्रज्ञः -ज्ञा -ज्ञं, शस्त्रकुशलः &c., 'skilful in expedients,' उपायज्ञः -ज्ञा -ज्ञं.

Skilfully, adv. कुशलवत्, कौशल्येन, सकौशल्यं, निपुणवत्, सपाटव विचक्षणवत्, चतुरवत्, सचातुर्यं, विदग्धवत्, सवैदग्ध्यं, युक्त्या, निपुणं.

Skilfulness, s. कुशलता, कौशल्यं, निपुणता, नैपुण्यं, प्रवीणता, प्रावीण्य पटुता, पाटवं, विचक्षणता, वैचक्षण्यं, चतुरता, चातुर्यं, युक्तिः f., युक्तिमत्त्वं विज्ञता, अभिज्ञता, विदग्धता, वैदग्ध्यं, विचित्रता, व्यवसायः, गुण

S s. कुशलता, पाटवं, युक्ति f., पटुता. See SKILFULNESS.

SKILLED, a. कुशलः -ला -लं, शिक्षितः -ता -तं, ज्ञ in comp., अभिज्ञ in comp., विद् in comp., कृतमुखः &c., see SKILFUL; 'skilled in the śāstras,' शास्त्रज्ञः -ज्ञा -ज्ञं, शास्त्राभिज्ञः &c., शास्त्रविद् m. f. n., शास्त्रदक्षः &c., शास्त्रकुशलः -ला -लं; 'in music,' गान्धर्वतत्त्वज्ञः -ज्ञा -ज्ञं.

SKIM, s. (Matter that forms on the surface) मलः, फेनः, कफः, उपरिमलं, see SCUM.—(Of milk) दुग्धफेनः -नं, दुग्धतालीयं, शार्करः, शार्कीरः.

To SKIM, v. a. (Clear off the thick matter from the surface) मलं or फेनम् अपनी (c. 1. -नयति -नेतुं) or हृ (c. 1. हरति, हर्तुं) or अपहृ.—(Skim milk) दुग्धफेनम् अपनी or हृ, दुग्धतालीयम् अपनी or अपहृ.

To SKIM, v. n. (Glide along the surface, brush) विमृश् (c. 1. -मर्शति -मर्ष्टुं -म्रष्टुं), लघुगत्या बहिर्भागं मृष (c. 1. मर्षति -र्षितुं).

SKIMMED, p. p. हृतमलः -ला -लं, हृतफेनः -ना -नं; 'milk,' घनलं.

SKIN, s. त्वक् f. (च्), त्वचा, त्वचं, चर्म्म n. (न्), असृग्धरा, रक्ताधारः, असृग्धारा, तनुः -नूः f., शरीरचर्म्म n., शरीरावरणं, देहावरणं, देहकोषः, रोमभूमिः f., मांसहासा, शिरिः f., शिफिः f., वेदनी, मदपर्दं, सार्वगौलसं.—(Hide) चर्म्म n. (न्), कृत्तिः f., दृतिः f., अजिनं, लोम n. (न्); 'of a tiger,' व्याघ्रचर्म्म n.; 'deer's skin,' मृगचर्म्म n., कृष्णाजिनं; 'hare or rabbit's skin,' शशचर्म्म n., शशलोम n. (न्), शशकाजिनं, शशोर्णं.—(Of a snake) कञ्चुकः, निर्मोकः.—(Bark, rind) त्वक् f. (च्), वल्कलः -लं, शल्कलं, शकलं, छल्ली.—(Reduced to mere skin and bone) त्वगस्थिमात्रशेषः -षा -षं, त्वगस्थिभूतः -ता -तं.

To SKIN, v. a. त्वच (nom. त्वचयति -यितुं), निस्त्वचीकृ, निश्चर्म्म (nom. निश्चर्म्मयति -यितुं), त्वक्परिपुटनं कृ, त्वक्ष्. See To PEEL, FLAY.

SKIN-FLINT, s. अतिकृपणः, दृढमुष्टिः m., गाढमुष्टिः m. See MISER.

SKINNED, p. p. निस्त्वचीकृतः -ता -तं, निस्त्वचः -चा -चं, हृतत्वक् m. f. n. (च्).

SKINNINESS, s. शिरालता, त्वगस्थिमात्रभावः, चर्म्ममात्रभावः, कृशत्वं.

SKINNY, a. शिरालः -ला -लं, त्वगस्थिमात्रमयः -यी -यं, चर्म्ममात्रमयः &c., त्वगस्थिमात्रभूतः -ता -तं, त्वक्स्नायुमयः &c., त्वक्स्नायुः &c. See LEAN.

To SKIP, v. n. प्लु (c. 1. प्लवते, प्लोतुं), वल्ग्, नृत्. See To LEAP.

SKIP, SKIPPING, s. प्लुतं, प्लवः -वनं, वल्गितं, प्लुतिः f., प्लुतगमनं, प्लुतगतिः f., मण्डूकप्लुतं -तिः f., मण्डूकगतिः f. See LEAP.

SKIPPING, part. प्लुतगतिः -तिः -ति, प्लुतगामी -मिनी &c., प्लवकारी &c.

SKIRMISH, SKIRMISHING, s. डिम्बः, डिम्बाहवः, डमरः, डिम्बयुद्धं, सेनामुखयुद्धं, ईषद्युद्धं, लघुयुद्धं, उपयुद्धं.

To SKIRMISH, v. n. डिम्बयुद्धं कृ, डिम्बाहवं कृ, सेनामुखयुद्धं कृ.

SKIRT, s. (Of a garment) वस्त्राञ्चलः -लं, वस्त्रान्तः, वसनान्तः, वस्त्रसीमा, पक्ष्मदशा, वस्त्रदशा, पटान्तः, अञ्चलः, दशा, वस्तिः m., तरी, तरिः f.—(Edge, border) प्रान्तः, प्रान्तभागः, अन्तभागः, अन्तः -न्तं, उपान्तः -न्तं, पर्य्यन्तभागः, पर्य्यन्तः -न्तं, परिसरः, सीमा, धारः -रा; 'of a wood,' वनान्तः -न्तं, वनधारा, उपवनं; 'of a mountain,' पर्य्यन्तभूः f.

To SKIRT, v. a. प्रान्त (nom. प्रान्तयति -यितुं), समन्त, प्रयान्त, पर्य्यन्तं कृ.

SKIRTING, part. प्रान्तः -न्ता -न्तं, पार्य्यन्तिकः -की -कं, प्रान्तकः -का -कं.

SKITTISH, a. खेलाशीलः -ला -लं, खेलापरः -रा -रं, लीलाशीलः -ला -लं, चञ्चलः -ला -लं, चपलः &c., तरलः &c., क्रीडाशीलः &c.

SKITTISHNESS, s. खेलाशीलता, चञ्चलता, चपलता, चापल्यं, तरलता.

To SKULK, v. n. निभृतं स्था or वृत्. See To SCULK, LURK.

SKULL, s. कपालः, कपालं, शिरोऽस्थि n. See SCULL.

SKY, s. आकाशः, व्योम n. (न्), गगनं, अन्तरीक्षं, अन्तरिक्षं, नभस् n., खं, द्यौः f. (दिव्), द्यौ f. (द्यो), अम्बरं, दिग्मानं, दिगन्तरालं, अभ्रपथ-अर्भं, वियत् n., मेघगर्भ n. (न्), मेघवेश्म n. (न्), तारापथः, मरुत्पथ मरुद्वर्त्म n., नाकः, घनपद्वी, विष्णुपदं, पुष्करं, अनन्तं, सुरवर्त्म n.

SKY-COLOURED, a. आकाशवर्णः -र्णा -र्णं, व्योमवर्णः &c., नीलवर्णः &c.

SKY-LARK, s. भारद्वाजः, भरद्वाजः. See LARK.

SKY-LIGHT, s. पटलगवाक्षः, पटलजालिका, पटलकाचः.

SKY-ROCKET, s. आकाशबाणः, आग्नेयबाणः. See ROCKET.

SKY-TOUCHING, a. व्योमस्पृक् m. f. n. (श्), अभ्रंलिहः -हा -हं, नभोलिह् m. f. n. (ह्), गगनस्पर्शी -र्शिनी -र्शि (न्), गगनचुम्बितः -ता -तं.

SLAB, s. शिला, शिलापट्टः, शिलापटः, शिलाफलकः, फलकः.

To SLABBER, v. n. लालां मुखात् स्रु in caus. See To DRIVEL.

SLACK, a. शिथिलः -ला -लं, श्लथः &c. See LOOSE, REMISS.

To SLACKEN, v. a. शिथिलीकृ, शिथिल (nom. शिथिलयति -यितुं), मुच्, see To LOOSE, v. a.; 'to slacken one's speed,' वेगं or गर्वं शम् in caus.

To SLACKEN, v. n. शिथिलीभू, मन्दीभू. See To LOOSE, v. n.

SLACKENED, p. p. शिथिलितः -ता -तं, शिथिलीकृतः &c., शिथिलीभूतः &c., विगलितः &c., मन्दीभूतः &c., शान्तवेगः -गा -गं, शान्तरयः -या -यं.

SLACKLY, adv. शिथिलं, शैथिल्येन. See LOOSELY, REMISSLY.

SLACKNESS, s. शैथिल्यं, शिथिलता, श्लथता, see LOOSENESS, REMISSNESS.

SLAIN, p. p. हतः -ता -तं, निहतः &c., व्यापादितः -ता -तं, घातितः -ता -तं, मारितः &c., सूदितः &c., निषूदितः -ता -तं. See KILLED.

To SLAKE, v. a. (Quench) शम् in caus., उपशम्, प्रशम, छिद्, see To QUENCH.—(Mix with water) जलेन सह मिश्र्, जलसंसृष्टं -ष्टां कृ.

To SLAM, v. a. (A door) यथा आकस्मिकशब्दो जायते तथा तन्द्राघातेन द्वारं पिधा or बलवदाघातेन द्वारं बद्धं कृ.

SLAM, s. आकस्मिकशब्दः, आकस्मिकध्वनिः m., द्वाराघातं.

SLANDER, s. अपवादः, परिवादः, पैशुन्यं, पिशुनवाक्यं, असूया, अभ्यसूया, गुणनिन्दा, गुणापवादः, कलङ्कः. See CALUMNY, DEFAMATION.

To SLANDER, v. a. अपवद् (c. 1. -वदति -दितुं), परिवद्, गुणापवादं कृ, पिशुनवाक्यं वद्, कलङ्क (nom. कलङ्कयति -यितुं), असूय (nom. असूयति -यितुं). See To DEFAME, CALUMNIATE.

SLANDERED, p. p. अपवादितः -ता -तं, अभिशस्तः -स्ता -स्तं, अभिशापितः &c.

SLANDERER, s. अपवादी m. (न्), परिवादी m., अपवादकः. See DEFAMER.

SLANDEROUS, a. अपवादकः -का -कं, पिशुनः -ना -नं, अपवादात्मकः -का -कं, कलङ्कमयः -यी -यं, असूयकः &c. See DEFAMATORY.

SLANDEROUSLY, adv. सापवादं, सपरिवादं, सासूयं, पिशुनवाक्यपूर्वं.

SLANG, s. (Low language) ग्राम्योक्तिः f., अश्लीलं, अश्लीलवाक्यं.

SLANT, SLANTING, a. वक्रः -क्रा -क्रं, कुटिलः -ला -लं, तिर्य्यङ् -रश्ची -र्य्यक् (च्), कुञ्चितः -ता -तं, अनृजुः -जुः -जु, विषमः -मा -मं, प्रवणः -णा -णं.

To SLANT, v. a. आवृज् (c. 10. -वर्जयति -यितुं), वक्रीकृ, तिर्य्यक्कृ, प्रवणीकृ.

To SLANT, v. n. आनम् (c. 10. -नमति -नन्तुं), प्रवणीभू, वक्रीभू, तिर्य्यग्भू.

SLANTINGLY, adv. तिर्य्यक्, तिरस्, वक्रं, प्रवणं, प्रावण्येन, आनत्यं.

SLAP, s. चपेटिका, चपेटाघातः, चपेटप्रहारः, तलप्रहारः, तलाघातः, करघातः, आस्फोटः -टनं, आस्फोटनशब्दः, तलं.

To SLAP, v. a. चपेटेन आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ, चपेटाघातं कृ, आस्फुट् (c. 10. -स्फोटयति -यितुं), आस्फोटनं कृ.

SLAP, adv. आकस्मिकाघातेन, आकस्मिकप्रहारेण, आस्फोटनशब्देन.

SLASH, s. दीर्घच्छेदः -दनं, दीर्घच्छेदः, दीर्घक्षतं -तिः f., छेदविच्छेदः

To SLASH, *v. a.* दीर्घच्छेदं कृ, दीर्घक्षतं कृ, छेदविच्छेदं कृ, अवछिद् (c. 7. -छिनत्ति -छेत्तुं), विनिकृत्, छिन्नभिन्नीकृ, क्षतविक्षतीकृ.

SLASHING, *part.* छेदविच्छेदकारी -रिणी -रि (न्), दीर्घछेदकारी &c.

SLATE, *s.* श्लक्ष्णशिला, तनुशिला, लेखफलकः श्लक्ष्णशिलाफलकः.

To SLATE, *v. a.* श्लक्ष्णशिलाफलकैर् आछद् or आस्तृ or आवृ.

SLATTERN, *s.* वेशप्रमत्ता, वेशप्रमादिनी, अविनीतवेशिनी.

SLAUGHTER, *s.* वधः, घातः -तनं, हननं, निहननं, मारणं, व्यापादनं, निषूदनं, सूदनं, संहारः, विशसनं, वैशसं, प्रतिघातनं, क्षपणं, प्रमयः, आलम्भः, विमर्दनं, निबर्हणं, निर्बर्हणं, प्रमापणं, निकारणं, निशारणं, निशरः, विशारणं, प्रशमनं, निकृन्तनं, परासनं, निर्हिंसनं, निर्वासनं, संज्ञपनं, निर्ग्रन्थनं, निर्गन्थनं, प्रवासनं, निस्तर्हणं, परिवर्जनं, निर्वापणं, उद्वासनं, उद्वासः, प्रक्षपणं, क्षपणं, क्षयनं, उन्माथनं, पिञ्जः, उन्मन्थः, निशुम्भः -म्भनं.

To SLAUGHTER, *v. a.* हन् (c. 2. हन्ति -न्तुं), विशस् (c. 1. -शसति -सितुं), *see To* KILL.

SLAUGHTERED, *p. p.* हतः -ता -तं, विशसितः -ता -तं. *See* KILLED.

SLAUGHTER-HOUSE, *s.* घातस्थानं, आघातस्थानं, आघातः -तनं, शूना, सूना, वधस्थानं, हिंसास्थानं, पशुमारणस्थानं, पशुवधस्थानं, प्राणिवधस्थानं.

SLAVE, *s.* दासः, दाशः, दासेयः, दासेरः, सेवकः, चेटकः, चेटः, किङ्करः, प्रेष्यः, प्रैष्यः, भृत्यः, गोप्यः -प्यकः, नियोज्यः, परजितः, भुजिष्यः, परिचारकः, चेडः -डकः, कर्म्मकरः, कर्म्मकारः, *see* SERVANT; 'female slave,' दासी, दासिका, दाशी, चेटी, चेडी, चेटिका, चेडिका, 'domestic slave,' गृहदासः; 'female slave of a slave,' दासदासी; 'multitude of female slaves,' दासीसभं, 'son of a slave,' दासीपुत्रः; 'dealer in slave-girls,' कन्यापालः; 'born of a slave,' दासेयः -यी, दासेरः; 'to be a slave,' दास (nom. दासायति).

To SLAVE, *v. n.* आयस् (c. 4. -यस्यति -सितुं). *See To* DRUDGE, TOIL.

SLAVERY, *s.* दास्यं, दासत्वं, दासभावः, दासावस्था, दासदशा, प्रेष्यत्वं, परप्रेष्यत्वं, भृत्यत्वं. *See* SERVITUDE, DRUDGERY.

SLAVISH, SLAVISHNESS, SLAVISHLY. *See* SERVILE, SERVILITY, &c.

To SLAY, *v. a.* हन् (c. 2. हन्ति -न्तुं), व्यापद् in caus *See To* KILL.

SLAYER, *s.* हन्ता *m.* (न्तृ), घातकः, घाती *m.* (न्). *See* KILLER.

SLEDGE, *s.* निश्चक्रयानं, निश्चक्रवाहनं, अचक्रयानं, चक्रशून्यवाहनं.

SLEDGE-HAMMER, *s.* घनः, बृहद्घनः, मुद्गरः, बृहन्मुद्गरः.

SLEEK, *a.* सुखस्पर्शः -र्शा -र्शं, श्लक्ष्णः -क्ष्णा -क्ष्णं, स्निग्धः -ग्धा -ग्धं.

SLEEKNESS, *s.* सुखस्पर्शता, श्लक्ष्णता -त्वं, स्निग्धता -त्वं, अपरुषता.

To SLEEP, *v. n.* स्वप् (c. 2. स्वपिति, स्वप्तुं), प्रस्वप्, सम्प्रस्वप्, संस्वप्, अवस्वप्, निद्रा (c. 2. -द्राति -तुं), शी (c. 2. शेते, शयितुं), निद्रां कृ, स्वप्नं कृ, स्वपनं कृ, सुप्तिं कृ, शयनं कृ, निमील् (c. 1. -मीलति -लितुं), अभिविश् (c. 6. -विशति -वेष्टुं). 'he sleeps comfortably,' सुखेन or सुखं स्वपिति; 'to desire to sleep,' स्वप् in des. (सुषुप्सति -प्सितुं), शी in des. (शिशयिषते).

SLEEP, *s.* निद्रा, स्वप्नः, स्वापः, स्वपनं, सुप्तिः *f.*, सुप्तं, शयनं, शयितं, शीः *f.*, शायिका, संवेशः, सर्व्वेन्द्रियाव्यापारः; 'state of sleep,' निद्रावस्था, स्वप्नावस्था; 'a deep or sound sleep,' सुनिद्रा, सुषुप्तिः *f.*, निर्भरनिद्रा, गाढनिद्रा, सुषुप्तावस्था, शायिका, 'very deep or dead sleep,' घोरनिद्रा, अघोरनिद्रा; 'fallen into a deep sleep,' सुनिद्राभिपन्नः -न्ना -न्नं; 'in a sound sleep,' सुषुप्तः -प्ता -प्तं, शोशियानः -ना -नं or शेश्यावान् &c.; 'arousing from sleep,' निद्राभङ्गः; 'aroused from sleep,' भग्ननिद्रः -द्रा -द्रं; to go to sleep, स्वप्, निद्रा, शी, शयनं कृ, निद्रां गम्; 'he went to sleep,' निदद्रौ, सुष्वाप.

SLEEPER, *s.* शायी *m.* (न्), शयनकृत्, निद्रास्थः, स्वप्नावस्थः.

SLEEPINESS, *s.* निद्रालुता, निद्राशीलता, शयालुता, शिशयिषा, सुषुप्सा, निद्रेच्छा, स्वप्नेच्छा, शयनेच्छा, स्वापः, तन्द्रा, तन्द्रिका.

SLEEPING, *s.* स्वपनं, स्वापः, शयनं, शायिका. *See* SLEEP.

SLEEPING, *part.* शयानः -ना -नं, स्वपन् -पन्ती -पत् (त्), निद्रान् -द्राती -द्रात् (त्), निद्रावस्थः -स्था -स्थं, निद्रस्थः -स्था -स्थं, शयितः -ता -तं, शयितवान् -वती -वत् (त्), सुप्तः -प्ता -प्तं, स्वप्नक् *m. f. n.* (ज्) 'soundly,' शोशियतः -ता -तं, शोशियतवान् &c.

SLEEPING-ROOM, *s.* शयनगृहं, स्वप्नगृहं, निद्राशाला *See* BEDROOM.

SLEEPLESS, *a.* निर्निद्रः -द्रा -द्रं, विनिद्रः &c., अनिद्रः &c., उन्निद्र &c., निद्राहीनः -ना -नं, निद्रारहितः -ता -तं, अनागतनिद्रः &c. विगतनिद्रः &c.

SLEEPLESSNESS, *s.* निर्निद्रता, विनिद्रता -त्वं, अनिद्रता -त्वं, उन्निद्रता, निद्राहीनता निद्राराहित्यं, निद्राभावः.

SLEEPY, *a.* (Habitually sleepy) निद्रालुः -लुः -लु, शयालुः &c., तन्द्रालुः &c., निद्राशीलः -ला -लं, स्वप्नशीलः &c., नैद्रः -द्री -द्रं, निद्राणः -णा -णं.—(Desirous of sleeping) शिशयिषुः -षुः -षु, सुषुप्सुः -प्सुः -प्सु.—(Overcome by sleep) निद्राकुलः -ला -लं, निद्राक्रान्तः -न्ता -न्तं, निद्राभिभूतः -ता -तं, निद्रातुरः -रा -रं.

SLEET, *s.* शीकरः, शीकरवर्षः, शीतवर्षः, सीकरः, तुषारवर्षः.

To SLEET, *v. n.* शीक् (c. 1. शीकते -कितुं), शीकर (nom. शीकरायते)

SLEEVE, *s.* पिप्पलः, बाहुवस्त्रं, बाहुवसनं, दोर्वस्त्रं, दोराच्छादनं; 'to laugh in one's sleeve,' अन्तर्हासं कृ, उद्धर्षनं कृ, उपहसनं कृ

SLEIGHT, *s.* (Of hand) हस्तलाघवं, लघुहस्तत्वं, हस्तचापल्यं, कुसृतिः *f.*, माया, कुहकः, इन्द्रजालं, *see* JUGGLERY, LEGERDEMAIN

SLENDER, *a.* (Thin skin) तनुः -नुः -न्वी -नु, प्रतनुः &c., वितनुः &c., क्षीणः -णा -णं, सूक्ष्मः -क्ष्मा -क्ष्मं, क्षामः -मा -मं, कृशः -शा -शं, शीर्णः -र्णा -र्णं, कृशाङ्गः -ङ्गी -ङ्गं, अविपुलः -ला -लं; 'slender in the waist,' क्षीणमध्यः -ध्या -ध्यं, तनुमध्यः &c., तनुमध्यमः -मा -मं, हरिमध्यः &c., सिंहमध्यः &c., सिंहकटिः -टिः -टि, मृगकटिः &c., मृगमध्यः &c., तनुशरीरः -रा -रं, अल्पाङ्गः -ङ्गा -ङ्गं, कृशोदरः -रा -रं; 'a slender-waisted woman,' सुमध्यमा, तनुमध्यमा, मध्यक्षामा; 'having a slender stem,' शीर्णनालः -ला -लं.—(Small, inconsiderable) अल्पः -ल्पा -ल्पं, क्षुद्रः -द्रा -द्रं, क्षीणः -णा -णं, लघुः -घुः -घु, अबहु &c., निर्बलः -ला -लं; 'of slender means,' क्षीणार्थः -र्था -र्थं

SLENDERNESS, *s.* तनुता, क्षीणता, क्षामता, शीर्णता, सूक्ष्मता, कृशता, कार्श्यं, अल्पता; 'of waist,' मध्यक्षीणता.

To SLICE, *v. a.* तक्ष् (c. 1. तक्षति -क्षितुं), छेदं कृ, परिच्छेदं कृ, छिद् (c. 7. छिनत्ति, छेत्तुं), परिछिद्, खण्ड्, खण्डीकृ, पृथुछेदं कृ.

SLICE, *s.* छेदः, परिच्छेदः, खण्डः, शकलं, 'of bread,' पूपखण्डः.

To SLIDE, *v. n.* (Move along the surface of snow, ice, &c.) हिमोपरि स्खल् (c. 1. स्खलति -लितुं) or रिङ्ख् (c. 1. रिङ्खति -ङ्खितुं) or रिङ्ग् (c. 1. रिङ्गति -ङ्गितुं) or विसृप् (c. 1. -सर्पति -सर्प्तुं) or संसृप्.—(Slip) च्यु (c. 1. च्यवते, च्योतुं), स्खल्.

SLIDE, SLIDING, *s.* स्खलनं, रिङ्खणं, रिङ्गणं, रिङ्खः, च्यवनं.

SLIGHT, *a.* (Thin, slim) तनुः -नुः -न्वी -नु, सुतनुः -नुः -नु, क्षीणः -णा -णं; 'a slight woman,' तन्वी, *see* SLENDER.—(Trifling, inconsiderable) अल्पः -ल्पा -ल्पं, स्वल्पः &c., लघुः -घुः -घु, स्तोकः -का -कं, क्षुद्रः -द्रा -द्रं. ईषद् prefixed 'a slight

ईषद्दर्शनं, a slight blow ईषदाघातः अवघातः, a slight obstacle, अल्पविघ्नः; 'in a slight degree,' ईषत्, किञ्चित्, किमपि, स्तोकं; 'not in the slightest,' न मनागपि, न किञ्चिदपि, न किमपि, न किमप्यपि, न सूक्ष्ममपि, न स्तोकमपि, न लेशमपि; 'there is not the slightest movement of the tongue or lips,' जिह्वौष्ठं मनागपि न चलति.

Slight, s. (Neglect) अनादरः, उपेक्षा, अवमानं, अवज्ञा, अवधीरणं, ईषदवज्ञा, ईषदुपेक्षा, ईषदवमानं, ईषदनादरः, अनपेक्षा, प्रणिपातलंघनं, अमाननं, अवगणनं -ना.

To slight, v. a. उपेक्ष् (c. 1. -ईक्षते -क्षितुं), ईषद् अवज्ञा (c. 9. -जानाति -ज्ञातुं) or अवमन् (c. 4. -मन्यते -मन्तुं) or अवधीर् (c. 10. -धीरयति -यितुं), अवगण् (c. 10. -गणयति -यितुं), अनादरं कृ, ईषदवज्ञां कृ.

Slighted, p. p. उपेक्षितः -ता -तं, ईषदवज्ञातः &c., अवगणितः &c., अवधीरितः -ता -तं, ईषदवधीरितः &c., ईषदवमानितः &c.

Slighter, s. उपेक्षकः, उपेक्षाकारी m. (न्), मन्दादरः, अनादरकृत्.

Slightingly, adv. उपेक्षया, अनपेक्षया, अनादरेण, ईषदवज्ञापूर्वं.

Slightly, adv. ईषत्, किमपि, स्तोकं, मनाक्, अल्पमात्रं, अबहु, अभूरि; 'slightly warm,' ईषदुष्णः -ष्णा -ष्णं; 'slightly red,' ईषद्रक्तः -क्ता -क्तं.

Slightness, s. तनुता, सूक्ष्मता, क्षीणता, अल्पता, लघुता, क्षुद्रता.

Slily, adv. छलेन, सव्याजं, सकपटं, सवैदग्ध्यं छद्मना, अव्यक्तं; 'going slily,' अव्यक्तगतिः -तिः -ति, गूढगतिः &c.

Slim, a. तनुः -नुः -न्वी -नु, क्षीणः -णा -णं, क्षामः &c. See Slender.

Slime, a. श्लिष्टजलु n., शैलनिर्यासः, सान्द्रपङ्कः, श्यानपङ्कः, चिक्कणपङ्कः.

Sliminess, s. सान्द्रता, श्यानता, चिक्कणता, पङ्किलता -त्वं.

Slimness, s तनुता -त्वं, तानवं, क्षीणता, क्षामता. See Slenderness

Slimy, a सान्द्रः -न्द्रा -न्द्रं, श्यानः -ना -नं, चिक्कणः -णा -णं, पिच्छिलः &c., पङ्किलः -ला -लं, सान्द्रपङ्कमयः -यी -यं, सान्द्रपङ्कगुणकः &c.

Sling, s. (Instrument for throwing stones) गोफणा, प्रस्तरक्षेपणी, पाषाणक्षेपणी, प्रस्तरप्रक्षेपणी, प्रक्षेपणी, भिन्दिपालः.—(Pole with ropes for carrying burdens) भारयष्टिः m. f., काचः.

To sling, v. a. (Throw with a sling) गोफणया क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or प्रक्षिप्.—(Hang so as to swing) उद्बन्ध्, ऊर्द्ध्वं बन्ध्, आन्दोल (nom. आन्दोलयति -यितुं), काच (nom. काचयति -यितुं).

To slink, v. n. अपसृप् (c. 1. -सर्पति -सर्प्तुं), व्यपसृप्, पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, अपधाव् (c. 1. -धावति -वितुं), अपक्रम्, अपया, निष्क्रम्.

To slip, v. n. (Slide) स्खल् (c. 1. स्खलति -लितुं), चल्, रिङ्ख्, रिङ्ग्.—(Glide) विसृप्, संसृप्.—(Stumble, fall) च्यु (c. 1. च्यवते, च्योतुं), भ्रंश् (c. 4. भ्रश्यति, c. 1. भ्रंशते -शितुं), स्रंस् (c. 1. स्रंसते -सितुं), विस्रंस्, आस्रंस्, पत् (c. 1. पतति -तितुं), गल्, विगल्.—(Err) विच्यु, विचल्, भ्रंश्.—(Slip away), see To slink.—(Slip off) स्रंस्, विस्रंस्, विगल्.—(Slip down) प्रच्यु, प्रभ्रंश्, लम्ब्, अवपत्, अवगल्.—(Slip in) छलेन or निभृतं प्रविश् (c. 6. -विशति -वेष्टुं).

To slip, v. a. (Let slip) शिथिल (nom. शिथिलयति -ते -यितुं) शिथिलीकृ, मुच् (c. 6. मुञ्चति, मोक्तुं), स्रंस् (c. 10. स्रंसयति -यितुं), च्यु (c. 10. च्यावयति -यितुं), हा in caus. (हापयति -यितुं), see To loose, v. a.; 'I will not let slip the occasion,' अवकाशं न शिथिलयिष्ये.—(Neglect, omit), see the words.—(Slip in) छलेन or निभृतं प्रविश् in caus. or निविश् in caus.

Slip, s. (Sliding) स्खलनं, रिङ्खणं, रिङ्गणं, रिङ्खः, च्यवनं.—(Stumble, fall) स्खलनं, स्खलितं, च्युतिः f., भ्रंशः, प्रभ्रंशः, पातः, पतनं, स्रंसनं, विस्रंसः.—(Error) दोषः, भ्रमः, प्रमादः, स्खलनं, अपराधः; 'of the hand,' हस्तदोषः, 'of the tongue,' जिह्वादोषः.—(Twig) शाखिका प्रशाखिका, पल्लवः, काण्डः.—(Long, narrow piece) खण्डः, दीर्घखण्डः -ण्डकः; 'of cloth,' वस्त्रखण्डः.

Slipped, p. p. च्युतः -ता -तं, स्खलितः &c., भ्रष्टः -ष्टा -ष्टं, प्रभ्रष्टः &c. 'from its place,' स्थानच्युतः -ता -तं, पदच्युतः &c.—(Slipped off) स्रस्तः -स्ता -स्तं, विगलितः -ता -तं.

Slipper, s. (Light shoe) लघुपादुका, लघुपादत्रं, लघुपादपा, पादुका, पादपा, उपानत् f. (ह्), चर्मं, 'magical slipper,' योगपादुका, सिद्धिः f.

Slipperiness, s. चिक्कणता -त्वं, स्निग्धता, पैच्छिल्यं, श्लक्ष्णता, अस्थिरता

Slippery, a. चिक्कणः -णा -णं, पिच्छिलः &c., स्निग्धः -ग्धा -ग्धं, मेदुरः -रा -रं, स्नेही -हिनी -हि (न्), श्लक्ष्णः -क्ष्णा -क्ष्णं; 'slippery ground,' लिप्तता.—(Unstable, uncertain) अस्थिरः -रा -रं, अनवस्थितः -ता -तं, चञ्चलः -ला -लं, चपलः &c., तरलः &c., लोलः &c. विचलः -ला -लं.

Slipping, s स्खलनं, च्युतिः f., च्यवनं, रिङ्खणं, रिङ्गणं. See Slip

To slit, v. a. दीर्घछेदं कृ, दीर्घछेदनं कृ, दीर्घछिद्रं कृ, दीर्घभेदनं कृ.

Slit, p. p. छिन्नः -न्ना -न्नं, दीर्घछेदान्वितः -ता -तं, भिन्नः -न्ना -न्नं.

Slit, s. दीर्घछेदः -दनं, दीर्घछिद्रं, छेदः, छिद्रं, दीर्घभेदः.

To slobber, v. n. लालां सृ in caus. See To slabber.

Slop, s (Soiled water, &c.) मलिनजलं, मलिनजलादि n., अमलजलं, अमेध्यजलादि, अमेध्यजलं.—(Water, &c., carelessly thrown about) प्रमादाद् इतस्ततः क्षिप्तं or पातितं जलादि.—(Mess) कर्दमः.

To slop, v. a. प्रमादाद् इतस्ततो जलादि पत् in caus. or क्षिप्.

Slope, s. प्रावण्यं, प्रवणभूमिः f., निम्नभूमिः, निम्नता, क्रमप्रवणभूमिः f., क्रमनिम्नभूभागः, क्रमशो निम्नो भूभागः, स्थानं क्रमशः प्रवणं, स्थानं क्रमशो ऽधोगम्यं; 'of a mountain,' उपत्यका, कटकः, शैलकटकः.

To slope, v. a. आवृज् (c. 10 -वर्जयति -यितुं), प्रवणीकृ, निम्नीकृ.

To slope, v. n. क्रमशः प्रवणः -णा -णं भू, क्रमप्रवणः -णा -णं भू, प्रवणीभू, क्रमशो निम्नः -म्ना -म्नं भू, निम्नीभू.

Sloping, part. or a. प्रवणः -णा -णं, क्रमशः प्रवणः &c., क्रमप्रवणः &c., क्रमशो निम्नः -म्ना -म्नं, क्रमशः पातुकः -का -कं, क्रमशो ऽधोगामी -मिनी -मि (न्).

Sloppy, a. पङ्किलः -ला -लं, जलपङ्कमयः -यी -यं, अनूपः -पा -पं.

Slop-seller, s तुच्छवस्त्रविक्रेता m. (तृ), सिद्धवस्त्रविक्रयी m. (न्).

Slop-shop, s. तुच्छवस्त्रादिविक्रयस्थानं, प्रस्तुतवस्त्रविक्रयगृहं.

Sloth, s. तन्द्रा, तन्द्रिः -न्द्री f., तन्द्रिका, आलस्यं, कुन्दपरिमार्जनं, निद्रा, गुडाका, see Laziness.—(The animal) पर्णमृगः.

Slothful, a. तन्द्रालुः -लुः -लु, अलसः -सा -सं. See Lazy.

Slothfulness, s. तन्द्रालुता, आलस्य, अलसता. See Laziness.

To slouch, v. n. निम्नगात्रो चल्, अलसगात्रो चल्, ग्राम्यवत् चर्.

Slouching, a. निम्नः -म्ना -म्नं, अलसः -सा -सं, निम्नगतिः -तिः -ति.

Slough, s. (Muddy place) पङ्कः, महापङ्कः, कुपङ्कः, पङ्काढ्यस्थानं.—(Of a snake) कञ्चुकः, निर्मोकः, जङ्गः, भुजङ्गनिर्मोकः, भुजङ्गत्वक् f. (च्), अहित्वक् f., अहिचर्म n. (न्), तीक्ष्णा, निर्वयनी.—(From a wound) क्षतगलितमांसं.

Slovenliness, s. अविनीतवेशत्वं, वेशप्रमत्तता, अविनीतता -त्वं, अपरिष्कारः, अव्यवस्था, प्रमत्तता, प्रमादः.

Slovenly, sloven, a. वेशप्रमत्तः -त्ता -त्तं, वेशप्रमादी -दिनी -दि (न्), अविनीतवेशी -शिनी &c., अविनीतपरिच्छदः -दा -दं अपरिष्कृतवेशः

शा -शं, अपरिष्कृतपरिच्छदः -दा -दं, अविनीतः -ता -तं, अपरिष्कृतः &c., ग्रामटिकः -की -कं.

SLOW, *a.* (Not swift, moving slowly) मन्दः -न्दा -न्दं, मन्थरः -रा -रं, मन्दगतिः -तिः -ति, मन्दगमनः -ना -नं, मन्दगामी -मिनी -मि (न्), अद्रुतः -ता -तं, अशीघ्रः -घ्रा -घ्रं, विलम्बितः -ता -तं, विलम्बी -म्बिनी &c.; 'slow fire,' मन्दाग्निः *m.*—(Not ready, not prompt) मन्दः -न्दा -न्दं, मन्थरः &c., अक्षिप्रः -प्रा -प्रं, अत्वरितः -ता -तं, मनाक्करः -रा -रं; 'slow in recognising,' प्रत्यभिज्ञानमन्थरः -रा -रं.—(Behind in time) विलम्बितः -ता -तं, कालातीतः -ता -तं, मन्दः &c., *see* LATE, *a.*—(Slow in intellect) मन्दबुद्धिः -द्धिः -द्धि, मन्दमतिः -तिः -ति, मन्दः -न्दा -न्दं, स्थूलबुद्धिः &c., *see* DULL.—(Tedious) दीर्घकालीनः -ना -नं, दीर्घसूत्रः -त्रा -त्रं, दीर्घसूत्री &c., *see* DILATORY.—(In music) विलम्बितः -ता -तं; 'slow time,' विलम्बितवृत्तिः *f.*, तस्त्रं.—(Slow fever) जीर्णज्वरः.

SLOW-GOING, *adv* मन्दगतिः -तिः -ति, मन्दगामी -मिनी -मि (न्), मन्दगमनः -ना -नं, मन्दगतः -ता -तं, शनैश्चरः -रा -रं, शनैर्गामी &c.

SLOWLY, SLOW, *adv.* मन्दं, शनैस्, मन्दं मन्दं, शनैः शनैः, मन्द in comp., मान्द्येन, सभाल्यं, मनाक्, मन्थरं, अद्रुतं, अशीघ्रं, अक्षिप्रं, अत्वरितं, विलम्बितं, विलम्बेन.

SLOWNESS, *s.* मान्द्यं, मन्दता -त्वं, मन्थरता, विलम्बः -म्बनं, विलम्बितत्वं, अद्रुतत्वं, अशीघ्रता, अक्षिप्रता, दीर्घसूत्रता; 'of intellect,' बुद्धिमान्द्यं, मन्दबुद्धित्वं, मन्दता. *See* DULLNESS

SLUG, *s.* (Kind of snail) शम्बूकहीनः कृमिविशेषः.

SLUGGARD, *s.* अलसः, आलस्यशीलः, तुन्दपरिमार्जः, तुन्दपरिमृजः.

SLUGGISH, *a.* तन्द्रालुः -लुः -लु, अलसः -सा -सं, आलस्यशीलः -ला -लं, निद्रालुः -लुः -लु, मन्दः -न्दा -न्दं, मन्दगतिः -तिः -ति, मनाक्करः -रा -रं, शयालुः &c.

SLUGGISHLY, *adv.* आलस्येन, अलसवत्, मन्दं, सभाल्यं, सतन्द्रं, तन्द्रया.

SLUGGISHNESS, *s.* तन्द्रालुता, तन्द्रा -न्द्री, तन्द्रिका, आलस्यं, अलसता -त्वं, मन्दता, मान्द्यं, जडता, जाड्यं. *See* LAZINESS, INDOLENCE.

SLUICE, *s.* (Flood-gate) जलद्वारं, जलनिर्गमः, जलवर्त्म *n.* (न्), जलबन्धनद्वारं.—(Stream of water) जलप्रवाहः, जलप्रपातः.

To SLUMBER, *v. n.* (Sleep lightly) लघुनिद्रां कृ, अल्पनिद्रां कृ, ईषन्निद्रां कृ.—(Sleep) स्वप् (c. 2. स्वपिति, स्वप्तुं), प्रस्वप्, निद्रा &c., *see* *To* SLEEP.

SLUMBER, *s.* निद्रा, लघुनिद्रा, अल्पनिद्रा, श्वाननिद्रा, स्वप्नः, *see* SLEEP.

To SLUR, *v. a.* (Soil, sully) मलिन (nom. मलिनयति -यितुं), मलिनीकृ, कलङ्क (nom. कलङ्कयति -यितुं), दुष् in caus.—(Do hurriedly) अतिक्षिप्रं कृ, अतिशीघ्रं कृ or अनुष्ठा, सहसा कृ, त्वरितं कृ, अनवधानेन or अनवेक्षया कृ.—(Pass over lightly, overlook) उपेक्ष्, समुपेक्ष्.—(Pronounce imperfectly) लुप्तवर्णपदेन व्याहृ or उदाहृ or उच्चर्.—(Sing in a gliding way) अविलम्बितपदेन or अविच्छिन्नस्वरेण गै or उच्चर्.

SLUR, *s.* (Mark, stigma) कलङ्कः, लाञ्छनं, अपकलङ्कः, अकीर्त्तिचिह्नं, अपमानचिह्नं.—(In music) स्वराविच्छेदचिह्नं.

SLURRED, *p. p.* (Soiled) कलङ्कितः -ता -तं, मलिनीकृतः -ता -तं, दूषितः &c.—(Done hurriedly) सहसा कृतः -ता -तं, त्वरितकृतः &c.—(Pronounced imperfectly) लुप्तवर्णपदः -दा -दं, लुप्तवर्णः -र्णा -र्णं, ग्रस्तः -स्ता -स्तं, ग्रस्तवर्णः -र्णा -र्णं.—(Pronounced glidingly or rapidly) अविच्छिन्नस्वरेणोच्चारितः -ता -तं, त्वरितोदितः -ता -तं, निरस्तः -स्ता -स्तं.

SLUSH, *s.* पङ्कसंघटः, मृद्पङ्कः, सजलपङ्कः, कर्दमः.

SLUT, *s.* अविनीतवेशिनी, अपरिष्कृतवेशिनी, अविनीता, अन्धकी.

SLUTTISH, *a.* अविनीतवेशी -शिनी &c., अविनीतः -ता &c. *See* SLOVENLY.

SLY, *a.* विदग्धः -ग्धा -ग्धं, कापटिकः -की -कं, छाद्मिकः -की -कं, छद्मकुशलः -ला -लं, दाम्भिकः -की -कं, सव्याजः -जा -जं, मायान्वितः -ता -तं, बहुमायः -या -यं, भूरिमायः -या -यं, धूर्त्तः -र्त्ता -र्त्तं, व्याजिकः -की -कं, चतुरः -रा -रं; 'sly laugh,' अन्तर्हासः, उद्घर्षं, उच्चपनं.

SLYNESS, *s.* विदग्धता, वैदग्ध्यं, व्याजः, कपटः, कापट्यं, मायाचारं, धूर्त्तता, छलं, छद्म *n.* (न्), छाद्मिकत्वं, चातुरता, शठः, शाठ्यं.

To SMACK, *v. a.* (Kiss with a noise) सशब्दं चुम्ब्, आस्फोटनशब्देन चुम्ब्, सशब्दचुम्बनं कृ.—(The lips) ओष्ठास्फोटनं कृ, ओष्ठविध्वननं कृ, ओष्ठसंदारणजनकम् आस्फोटनशब्दं कृ.—(The face), *see* *To* SLAP.—(Crack) आस्फोटनं कृ, आस्फोटनशब्दं कृ; 'a whip,' आस्फोटनशब्देन कशाघातं कृ.

To SMACK, *v. n.* (Have a taste) स्वादनं कृ, *see* *To* SAVOR, *v. n.*

Substantialness, s. [illegible] सत्त्वं सारता सत्ता

T[illegible] a. प्र [illegible] caus., साध्, प्रमाणीकृ. See To prove

Substantiated, p. p. भावितः -ता -तं, विभावितः &c. See Proved

Substantiation, s. उपपादनं, साधनं, सिद्धिः f., विभावनं, भावनं.

Substantive, s. (In grammar) विशेष्यं, सत्त्ववाचकः, द्रव्यवाचक शब्दः; 'proper substantive,' नामवाचकः, संज्ञावाचकः, संज्ञा.

Substantive, a. सात्त्विकः -की -कं, सत्त्ववाचकः -का -कं, वास्तविकः &c.

To substitute, v. a. उपकॢप् (c. 10. -कल्पयति -यितुं), उपसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. -सर्जयति -यितुं), उपसर्जनं कृ, उपकल्पनं कृ, कल्पनं कृ, परस्थाने कॢप्, परस्थाने कृ, प्रतिनिधिं कृ.

Substitute, s. प्रतिनिधिः m., उपसर्जनं, अनुकल्पः, प्रतिपुरुषः, प्रतिहस्तकः, प्रतिकृतिः f., प्रतिच्छन्दः, गौणकल्पः, आदेशः.

Substituted, p. p. उपकल्पितः -ता -तं, उपसर्जितः &c., परस्थाने कल्पितः -ता -तं, प्रतिनिधिभूतः &c., अतिदिष्टः -ष्टा -ष्टं, अध्यस्तः -स्ता -स्तं, 'to be substituted,' कल्पनीयः -या -यं, कल्प्यः -ल्प्या -ल्प्यं.

Substitution, s. उपकल्पनं, उपसर्जनं, अध्याहारः, आदेशः, अतिदेशः

Substratum, s. (Layer), see Stratum.—(In metaphysics) अधिकरणं, आधारः, आश्रयः, स्थानं, पात्रं, see Basis

To subtend, v. a. अभिमुखं or प्रतिमुखं or अधो वितन् in pass.

Subterfuge, s. छलं, छद्म n. (न्), अपदेशः, व्यपदेशः, छिद्रं.

Subterranean, subterraneous, a. अन्तर्भौमः -मी -मं, भूम्यन्तर्गतः -ता -तं, गूढः -ढा -ढं, 'a subterranean place,' अन्तर्भूमिः f., 'passage,' गूढमार्गः, सुरङ्गा.

Subtile, subtle, a. (Fine, thin) सूक्ष्मः -क्ष्मा -क्ष्मं, अतिसूक्ष्मः &c. अतिलघुः -घुः -घु, निरवयवः -वा -वं, अणुकः -का -कं.—(In intellect piercing) सूक्ष्मबुद्धिः -द्धिः -द्धि, सूक्ष्मदर्शी -र्शिनी &c., कुशाग्रीयमतिः -तिः -ति, कुशाग्रबुद्धिः &c., कुशाग्रीयः -या -यं, मार्म्मिकः -की -कं मर्म्मज्ञः &c., मर्म्मविद्, मर्म्मवेदी &c.—(Sly), see Sly.

Subtilely, adv. सूक्ष्मं, सौक्ष्म्येण, सूक्ष्मबुद्ध्या, ससौक्ष्म्यं.

Subtility, subtileness, subtlety, s. सूक्ष्मता, सौक्ष्म्यं, निरवयवत्वं अणिमा m. (न्), अतिलाघवं; 'of intellect,' बुद्धिसूक्ष्मता, कुशाग्रीयता, मतिप्रकर्षः.—(Cunning, slyness), see the words.

To subtilize, v. a. सूक्ष्मीकृ, अतिसूक्ष्मीकृ, सूक्ष्मतां कृ or जन्.

To subtract, v. a. उद्धृ (c. 1. -हरति -हर्त्तुं), उद्धरणं कृ.—(In arithmetic) शुध् (c. 10. शोधयति -यितुं), व्यवकल् (c. 10. -कलयति -यितुं) शोधनं कृ, व्यवकलनं कृ, अन्तरं कृ.—(In algebra) ऋणं कृ, अन्तरं कृ

Subtracted, p. p. उद्धृतः -ता -तं.—(In arithmetic, &c.) शोधितः -ता -तं, व्यवकलितः &c.; 'to be subtracted,' शोध्यः -ध्या -ध्यं शोधनीयः -या -यं.

Subtraction, s. उद्धारः, उद्धरणं.—(In arithmetic) शोधनं, शुद्धिः f. व्यवकलनं, व्यवकलितं, अन्तरं, वर्जनं, विवरं, पतनं.

Subtrahend, s. (Sum to be subtracted) शोधकः, ऋणं.

Suburb, suburbs, s. शाखानगरं, शाखापुरं, उपनगरं, उपपुरं, नगरोपान्तं, नगरपरिसरः, नगरप्रान्तः -न्तं, गृहा, अभिष्यन्दिरमणं.

Suburban, a. शाखानगरस्थः -स्था -स्थं, उपनगरस्थः &c., शाखापुरस्थः &c., नगरोपान्तस्थः -स्था -स्थं, नगरोपान्तिकः -की -कं.

Subversion, s. ध्वंसः, विध्वंसः, परिध्वंसः, भङ्गः. See Overthrow

Subversive, a. ध्वंसकरः -रा -रं, ध्वंसकारी -रिणी &c., परिध्वंसी &c. विनाशकः &c., see Destructive; 'of happiness,' सुखान्तकरः &c.

To subvert, v. a. ध्वंस् (c. 10. ध्वंसयति -यितुं), परिध्वंस्, विध्वंस्, नश् (c. 10. नाशयति -यितुं), विनश्, पत् in caus., निर्भिद्. See To overthrow

SUBVERTED, *p. p.* विध्वंसितः -ता -तं, पातितः &c., विनाशितः -ता -तं, निर्भिन्नः -न्ना -न्नं, *see* OVERTHROWN; 'is subverted,' निर्भिद्यते.

SUCCEDANEOUS, *a.* गौणः -णी -णं, गौणभूतः -ता -तं, उपसर्जनः -ना -नं, आनुकल्पिकः -की -कं; 'a succedaneous rule,' अनुकल्पः.

SUCCEDANEUM, *s.* उपसर्जनं, अनुकल्पः, गौणकल्पः. *See* SUBSTITUTE.

To SUCCEED, *v. n.* (Follow, be subsequent to) पश्चाद् या (c. 2. याति -तुं), अनुया, अनुक्रम, पश्चाद् वृत् (c. 1. वर्त्तते -र्त्तितुं), अनुवृत्, परतो वृत्, परस्तात् वृत्, उत्तरतो वृत्, अवरः -रा -रं वृत् or भू, उत्तरः -रा -रं वृत् or भू.—(Be successful) सिध् (c. 4. सिध्यति, सेद्धुं), संसिध्, सिद्धार्थीभू, कृतार्थीभू, सिद्धिं गम् or इ, सम्पद् (c. 4. -पद्यते -पत्तुं), क्रम् (c. 1. क्रमते -मितुं), *see* *To* PROSPER, *v. n.*

SUCCEEDED, *p. p.* अनुगतः -ता -तं, अनुयातः &c.; 'by fear,' भयोत्तरः -रा -रं.

SUCCEEDING, *part.* or *a.* अनुयायी -यिनी -यि (न्), अनुगः -गा -गं, क्रमानुयायी &c., क्रमानुगः -गा -गं, उत्तरः -रा -रं, अवरः &c. *See* SUBSEQUENT, *a.*

SUCCESS, *s.* सिद्धिः *f.*, अर्थसिद्धिः *f.*, फलसिद्धिः *f.*, साध्यसिद्धिः *f.*, सम्पत्तिः *f.*, सम्पद् *f.*, उदयः, सफलता, सिद्धार्थता -त्वं, कृतार्थता, चरितार्थता, कृतकृत्यता, श्रीः *f.*, लक्ष्मीः *f.*—(Result) निर्गमः, निर्गतिः *f.*, परिणामः.

SUCCESSFUL, *a.* (Of persons) कृतार्थः -र्था -र्थं, सिद्धार्थः &c., चरितार्थः &c., प्राप्तार्थः &c., कृतकृत्यः -त्या -त्यं, अव्यर्थः -र्था -र्थं, कृतकामः -मा -मं, प्राप्तकामः &c., प्राप्ताशः -शा -शं, आशाप्राप्तः -प्ता -प्तं, कृतार्थीभूतः -ता -तं, श्रीमान् &c., *see* PROSPEROUS.—(Of things) सिद्धः -द्धा -द्धं, सिद्धिमान् -मती -मत् (त्), सफलः -ला -लं, फलवान् &c., फलितः -ता -तं, सुफलः &c.

SUCCESSFULLY, *adv.* सफलं, सिद्धार्थतस्, कृतार्थतस्, अव्यर्थं, सिद्धा.

SUCCESSION, *s.* (Following of things in order) आनुपूर्व्यं, आनुपूर्वी, अनुक्रमः, पर्यायः, विपर्ययः, परम्परा, पारम्पर्यं, अन्वयः, समन्वयः, सन्ततिः *f.*, श्रेणी, वीप्सा, अनुयायित्वं, अनुयानं, अनुवृत्तिः *f.*, अनुवर्त्तनं, अनुपङ्क्तिः, क्रमः; 'of office,' कर्म्मविपर्ययः; 'in succession,' आनुपूर्व्येण, *see* SUCCESSIVELY.—(Line, series) श्रेणी, आवलिः -ली *f.*, माला; 'of kings,' राजावलिः -ली *f.*, *see* SERIES.—(Right of succeeding to another) उत्तराधिकारः -रिता, अधिकारपर्य्यायः, दायः -यत्वं, दायाधिकारः.

SUCCESSIVE, *a.* आनुपूर्वः -र्वा -र्वं, आनुक्रमिकः -की -कं, यथाक्रमः -मा -मं, यथानुक्रमः &c., पारम्परिकः -की -कं, परम्परः -रा -रं, क्रमानुसारी -रिणी -रि (न्), क्रमानुयायी &c., क्रमकः -का -कं, क्रमागतः -ता -तं, क्रमायातः &c., परम्परागतः -ता -तं, परम्परायातः &c., सन्ततः -ता -तं.

SUCCESSIVELY, *adv.* अनुपूर्वशस्, अनुक्रमशस्, यथापूर्वं, यथाक्रमं, परम्परं, पारम्पर्येण, पर्यायेण, विपर्ययेण, क्रमशस्, क्रमतस्, क्रमेण, क्रमात्, क्रमानुसारेण.

SUCCESSOR, *s.* उत्तराधिकारी *m.* (न्), अवराधिकारी *m.*, क्रमानुयायी *m.*

SUCCINCT, *a.* संक्षिप्तः -प्ता -प्तं, अविस्तीर्णः -र्णा -र्णं. *See* CONCISE.

SUCCINCTLY, SUCCINCTNESS, *see* CONCISELY, CONCISENESS.

SUCCORY, *s.* (Plant, wild endive) कासनी.

SUCCOUR, *To* SUCCOUR, &c. *See* HELP, *To* HELP, &c.

SUCCULENCE, *s.* सरसता, बहुरसत्वं, सद्रवता, सजलता. *See* JUICINESS.

SUCCULENT, *a.* सरसः -सा -सं, बहुरसः &c., सद्रवः -वा -वं, सजलः -ला -लं, रसमयः -यी -यं, जलमयः &c., सार्द्रः -र्द्रा -र्द्रं. *See* JUICY.

To SUCCUMB, *v. n.* वशीभू, वशं गम्, सद् (c. 1. सीदति, सत्तुं), *see* *To* YIELD.

SUCH, *a.* (Of this kind) ईदृशः -शी -शं, ईदृक् *m. f. n.* (श्), ईदृक्षः -क्षा -क्षं, एतादृक् [illegible] &c.; 'such is the law,' ईदृशी मर्य्यादा.—(Of that kind, of such a kind) तादृशः -शी -शं, तादृक् *m. f. n.* (श्), तादृक्षः -क्षा -क्षं, एतादृशः &c., एतादृक् &c., एतादृक्षः &c., एवंविधः -धा -धं, तथाविधः -धा -धं, एवम्भूतः -ता -तं, एवं in comp.; 'such as me,' मादृशः &c., मादृक् &c., मादृक्ष &c., मद्विधः -धा -धं, 'such as thee,' त्वादृशः &c., त्वादृक् &c., भवादृशः &c.; 'what has such power to burn as fire?' किम् अन्यद् अनलात् प्रभवति दग्धुं.—(Such and such an one) अमुकः -का -कं.

To SUCK, *v. a.* (Draw in with the mouth) चूष् (c. 1. चूषति -षितुं), आचूष्, चूषं कृ, चूषणं कृ, चोषं कृ, चोषणं कृ.—(Draw milk from the breast, as a child) स्तनं पा (c. 1. पिबति, पातुं) or धे (c. 1. धयति, धातुं), समभिधे, स्तनात् क्षीरं पा or निपा, स्तनपानं कृ; 'a child that sucks the breast,' स्तनन्धयः -यी -यं.—(The finger or hand) अङ्गुलिं धे or अभिधे or पा, मुष्टिं धे, अङ्गुलिपानं कृ, 'a child that sucks its hand,' मुष्टिन्धयः.—(Imbibe, absorb, suck up) निपा, शुष् in caus., उच्छुष्, रसादानं कृ.

SUCK, *s.* (Act of sucking), *see* SUCTION.—(Milk, &c., sucked) स्तन्यं, दुग्धं, चूष्यं; 'one who gives suck,' स्तन्यदात्री, स्तन्यदायिनी.

SUCKED, *p. p.* चूषितः -ता -तं, चोषितः &c., धीतः -ता -तं, पीतः &c., निपीतः &c.; 'that can be sucked,' चूष्यः -ष्या -ष्यं.

SUCKER, *s.* चोषकः, चूषणकारी *m.* (न्), धाता *m.* (तृ). *See* SUCKLING.

SUCKING, *s.* चूषणं, चूषा, चोषः -षणं, 'the breast,' स्तनपानं, स्तन्यपानं, क्षीरपानं; 'the fingers,' अङ्गुलिपानं.

To SUCKLE, *v. a.* स्तनं धे in caus. (धापयति -यितुं) or उपधे in caus. or पा in caus. (पाययति -यितुं), स्तन्यं दा, स्तनपानं दा, स्तन्यदानेन पुष् (c. 10. पोषयति -यितुं).

SUCKLED, *p. p.* स्तन्यपोषितः -ता -तं, स्तनन्धयः &c.; 'by a bitch,' शुनिन्धयः -या -यं.

SUCKLING, *s.* (The act) स्तन्यदानं, स्तन्यदानेन पोषणं.—(Young child) स्तनन्धयः -या -यी -यं, स्तनपायी -यिनी &c., धाता -त्री (तृ), धय [illegible]

SUCTION, *s.* आचूषणं, चूषणं, चोषः -षणं, रसादानं. *See* SUCKING, *s.*

SUDDEN, *a.* आकस्मिकः -की -कं, साहसिकः -की -कं, सहसः -सा -सं, अकाण्डः -ण्डा -ण्डं, अकस्मादुत्पन्नः -न्ना -न्नं, अकस्माद्भूतः -ता -तं, एकपातः -ता -तं, अलक्षितः -ता -तं, अचिन्तितः &c., अकल्पितः -ता -तं, अकाण्डनिपाती -तिनी -ति (न्), अकस्माज्जातः -ता -तं, अकाण्डजातः &c.; 'sudden death,' अपमृत्युः *m.*, अपामृत्युः *m.*, अलक्षितमृत्युः, अलक्षितमरणं, अवपातः; 'on a sudden,' अकस्मात्.

SUDDENLY, *adv.* अकस्मात्, सद्यस्, सहसा, एकपदे, एकदा, अकाण्डे, हठात्, काकतालीयवत्; 'suddenly born,' अकाण्डजातः -ता -तं, अकस्माज्जातः &c.

SUDDENNESS, *s.* आकस्मिकत्वं -ता, साहसिकत्वं, अकाण्डत्वं, अकल्पितत्वं.

SUDORIFIC, *a.* स्वेदनः -ना -नं, स्वेदकरः -रा -रं, स्वेदोत्पादकः -का -कं, स्वेदजनकः &c., प्रस्वेदितः -ता -तं, प्रस्वेदितवान् -वती &c.

SÚDRA, *s.* (Man of the fourth or servile class) शूद्रः, अवरवर्णः, जघन्यजः, वृषलः.

SUDS, *s.* सर्ज्जिकासंसृष्टजलं, मार्ज्जनतैलसंसृष्टजलं, सर्ज्जिकाक्षारजलं.

To SUE, *v. a.* (In law) अभियुज् (c. 7. -युनक्ति -योक्तुं), अभियोगं कृ, व्यवहाराभियोगं कृ, व्यवहारं कृ, व्यपदिश्, वादं कृ, अभिशंस्. *See* *To* PROSECUTE.

To SUE, *v. a.* प्रार्थ्, याच्, प्रार्थनापूर्वकम् अन्विष्. *See* *To* PETITION.

SUET, *s.* मेदस् *n.*, वसा, मांसस्नेह, वृक्कादिस्थितं मेदस्.

To suffer, *v. a.* (Feel, undergo) अनुभू, उपगम् (c. 1. -गच्छति -गन्तुं), उपागम्, भुज् (c. 7. भुनक्ति, भुङ्क्ते, भोक्तुं), उपभुज्, आप् (c. 5. आप्नोति -आप्तुं), प्राप्, विद्, वेद्, लभ्, दृश्; 'one who suffers pain,' दुःखभागी -गिनी &c.—(Endure, bear) सह् (c. 1. सहते, सोढुं), विषह्, क्षम् (c. 1. क्षमते, क्षन्तुं), संक्षम्, मृष्, तिज् in des., उपास्.—(Permit, allow) अनुज्ञा, अनुमन्, अनुमतिं दा, *see To* permit.

To suffer, *v. n.* (Undergo pain) दुःखम् अनुभू, दुःखभागी -गिनी गि भू, दुःखी &c. भू, तप् in pass. (तप्यते), सन्तप्, व्यथ् (c. 1. व्यथते -थितुं), क्लिश् (c. 4. क्लिश्यते).

Sufferable, *a.* सहनीयः -या -यं, सह्यः -ह्या -ह्यं, सोढव्यः -व्या -व्यं.

Sufferance, *s.* सहनं, क्षमा, सहत्वं, सहता, साहनं. *See* Endurance.

Suffered, *p. p.* (Undergone) अनुभूतः -ता -तं, उपागतः -ता -तं, उपगतः &c., भुक्तः -क्ता -क्तं, उपभुक्तः &c.—(Endured) सोढः -ढा -ढं, विसोढः &c.—(Permitted) अनुज्ञातः -ता -तं, अनिषिद्धः -द्धा -द्धं, अप्रतिषिद्धः &c.

Sufferer, *s.* दुःखभागी *m.* -गिनी *f.* (न्), दुःखानुभवी *m.*, दुःखभोगी *m.*, दुःखभोक्ता *m.* (क्तृ), दुःखी *m.*, दुःखितः, दुःखोपेतः.

Suffering, *s.* (Bearing of pain) दुःखानुभवः, दुःखभोगः, दुःखोपभोगः, दुःखोपगमः, दुःखोपागमः, दुःखयोगः, दुःखवेदनं.—(Pain endured) दुःखं, व्यथा, क्लेशः, तापः, परितापः, वेदना, पीडा, कृच्छ्रं, आर्त्तिः *f.*

Suffering, *a.* दुःखी -खिनी -खि (न्). *See* Sufferer, Afflicted.

To suffice, *v. n.* कॢप् (c. 1. कल्पते -ल्पितुं, कल्प्तुं), उपकॢप्, पर्य्याप्तः -प्ता -प्तं भू, उपयुक्तः -क्ता -क्तं भू, यथेष्टः -ष्टा -ष्टं भू, उचितः -ता -तं भू; 'as much food as will suffice for a year,' संवत्सरनिर्वाहपर्य्याप्तम् अन्नं.

To suffice, *v. a.* तृप् (c. 10. तर्पयति -यितुं), तुष्. *See To* satisfy.

Sufficiency, *s.* पर्य्याप्तिः *f.*, पर्य्याप्तत्वं -ता, उपयुक्तता -त्वं, यथेष्टता -त्वं, सामर्थ्यं, औचित्यं, योग्यता -त्वं, उचितत्वं, निर्वाहः. *See* Competence.

Sufficient, *a.* पर्य्याप्तः -प्ता -प्तं, उपयुक्तः -क्ता -क्तं, यथेष्टः -ष्टा -ष्टं, उचितः -ता -तं, समर्थः -र्था -र्थं, योग्यः -ग्या -ग्यं; 'food sufficient for a month,' मासवृत्त्युचितम् अन्नं, *see* Enough, *a.*; 'to be sufficient for,' कॢप् (c. 1. कल्पते -ल्पितुं).

Sufficiently, *adv.* पर्य्याप्तं, अलं, यथेष्टं, उपयुक्तं. *See* Enough, *adv.*

To suffocate, *v. a.* श्वासरोधं कृ, श्वासावरोधं कृ, श्वासं रुध् (c. 7. रुणद्धि, रोद्धुं) or अवरुध्, प्राणं रुध् or अवरुध्, कण्ठं रुध्. *See To* choke, stifle.

Suffocated, *p. p.* रुद्धश्वासः -सा -सं, रुद्धप्राणः -णा -णं, निरुद्धकण्ठः &c.

Suffocating, *a.* श्वासरोधकः -का -कं, श्वासावरोधकः &c., प्राणरोधकः &c.

Suffocation, *s.* श्वासरोधः -धनं, श्वासावरोधः, श्वासप्रतिरोधः, प्राणरोधः -धनं, प्राणावरोधः, कण्ठरोधः -धनं, श्वासप्रतिबन्धः, उद्बन्धनं.

Suffrage, *s.* सम्मतं, सम्मतिः *f.*, सम्मतिस्थापनं, स्वीकारः. *See* Vote.

To suffuse, *v. a.* समाप्लु (c. 10. -प्लावयति -यितुं), व्याप्, व्याकॄ.

Suffused, *p. p.* समाप्लुतः -ता -तं, व्याप्तः -प्ता -प्तं, परिगतः -ता -तं, *see* Overspread; 'eyes suffused with tears,' नेत्राणि समाप्लुतानि वारिणा, बाष्पोपप्लुताक्षः -क्षी -क्षं, बाष्पाविलेक्षणः -णा -णं; 'face suffused with blushes,' व्रीडापरिगतमुखं.

Suffusion, *s.* व्याप्तिः *f.*, व्यापनं, व्याप्तता, समाप्लावनं, आच्छादनं.

Sugar, *s.* शर्करा, गुडशर्करा, गुडोद्भवा, सिता, मिष्टं, इक्षुसारः, वालुकात्मिका; 'coarse sugar,' गुडः, 'raw sugar,' मत्स्यण्डी, फाणितं; 'sugar-mill,' इक्षुयन्त्रं, इक्षुपत्रं.

To sugar, *v. a.* शर्करान्वितं कृ, शार्करीकृ, सशर्करं -रां कृ, मिष्टीकृ.

Sugar-candy, *s.* खण्डमोदकः, खण्डः, माक्षिकशर्करा, उपला, शुक्लोपला शर्करा, सिताखण्डः, दुग्धपात्रिका.

Sugar-cane, *s.* इक्षुः *m.*, इक्षुरः, इक्षुकाण्डं, इक्षुदण्डः, मधुयष्टिः *f.*, मधुतृण गुडदण्डः, गुडदारुः *m.*, गुडतृणं, रसालः, महाशीरः, विपुलरसः, असिपत्रः, पयोधरः, मृत्युपुष्पः, 'varieties of it,' पुण्ड्रः, पौण्ड्रः, कान्तारक्षकाण्डं; 'root of it,' नेरटं, ऐक्षवमूलं.

Sugared, sugary, *a.* शर्करान्वितः -ता -तं, शर्करायुक्तः -क्ता -क्तं, सशर्करः -रा -रं, शार्करः -री -रं, ऐक्षवः -वी -वं, मिष्टः -ष्टा -ष्टं.

To suggest, *v. a.* उपन्यस् (c. 4. -अस्यति -सितुं), समुपन्यस्, सूच् (c. 10. सूचयति -यितुं), सूचनं कृ, मन्त्र् (c. 10. मन्त्रयते -ति -यितुं), मन्त्रणं कृ, प्रबुध् (c. 10. -बोधयति -यितुं), उद्दिश् (c. 6. -दिशति -देष्टुं), आदिश्, उपदिश्, चित् (c. 10. चेतयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं), समुपस्था in caus.

Suggested, *p. p.* उपन्यस्तः -स्ता -स्तं, सूचितः -ता -तं, मन्त्रितः &c.

Suggestion, *s.* उपन्यासः, सूचना -नं, प्रबोधः, मन्त्रणं, बुद्धिः *f.*

Suggestive, *a.* सूचकः -का -कं, प्रबोधकः &c., चेतकः -का -कं.

Suicidal, *a.* आत्मघातकः -का -कं, आत्मघाती -तिनी -ति (न्).

Suicide, *s.* (Self-murder) आत्मघातः, आत्महत्या, आत्मवधः, आत्महननं आत्मव्यापादनं, प्राणत्यागः, देहत्यागः, जीवितत्यागः, जीवोत्सर्गः, प्राणपरित्यागः, आत्ममरणं, आत्मद्रोहः, स्वप्राणहिंसा.—(Self-murderer) आत्मघाती *m.* (न्), आत्मघातकः, आत्महा *m.* (न्), आत्मत्यागी *m.* आत्मध्रुक् *m.* (-द्रुह्), आत्मद्रोही *m.*, कृतजीवितत्यागः.

Sui-generis, एकप्रकारः -रा -रं, स्वसदृशः -शी -शं, स्वप्रकारः -रा -रं.

Suit, *s.* (Set) गणः, समूहः, *see* Set; 'as of clothes, &c.,' युगं युग्मं, युगलं, युतकं, यमकं, यमलं; 'a suit of clothes,' वस्त्रयुगं वस्त्रयुग्मं, वासोयुगं, आच्छादः.—(Petition) अर्थः, प्रार्थनं -ना, अभ्यर्थना, प्रणयः.—(In law) अर्थः, वादः, अर्थः, व्यवहारः.—(Retinue) *see* Suite.

To suit, *v. n.* युज् in pass. (युज्यते), उपपद् in pass. *See To* fit *v. n.*

To suit, *v. a.* युज् (c. 10. योजयति -यितुं). *See To* fit, adapt *v. a.*

Suitable, *a.* योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं, उपयुक्तः &c., यथायोग्य &c., उपयोगी -गिनी &c., उचितः -ता -तं, सदृशः -शी -शं, प्रयोक्तव्यः -व्या -व्यं, *see* Fit, Fitting, *a.*; 'suitable to the occasion प्रस्तावसदृशः &c., *see* Opportune.

Suitableness, *s.* योग्यता, युक्तता, उपयुक्तता, उपयोगिता -त्वं, उपयोगः, यथायोग्यता, उपपत्तिः *f.*, याथातथ्यं. *See* Fitness.

Suitably, *adv.* युक्तं, योग्यं, यथायोग्यं, यथोचितं, *see* Fitly.—(Agreeably to) अनुसारेण -रतस्, अनुरूपेण.

Suite, *s.* परिवारः, अनुचरवर्गः, पोष्यवर्गः. *See* Retinue.

Suited, *p. p.* उपयुक्तः -क्ता -क्तं, युक्तः &c., पर्य्याप्तः &c. *See* Suitable.

Suitor, *s.* प्रार्थकः, प्रार्थयिता *m.* (तृ), अर्थी *m.* (न्), आवेदकः, *see* Petitioner, Prosecutor.—(Wooer) विवाहार्थी *m.*, पाणिग्रहार्थी *m.*, प्रणयी *m.*

Sulkily, sullenly, *adv.* उदासीनं, उदासीनवत्, अन्तःक्रोधेन, अन्तःकोपेन.

Sulkiness, sullenness, *s.* उदासीनता, अन्तःक्रोधत्वं, अन्तःक्रोधिता, अन्तःकोपिता, अन्तःक्रोधः, मलिनमुखत्वं, मुखमालिन्यं, प्रतीपता. *See* Moroseness.

Sulky, sullen, *a.* उदासीनः -ना -नं, अन्तःक्रोधी -धिनी -धि (न्), अन्तःकोपी &c., उदासवृत्तिः -त्तिः -त्ति, प्रतीपः &c. *See* Morose.

Sullied, *p. p.* दूषितः -ता -तं, मलिनः &c., कलङ्कितः &c., *see* Soiled.

To SULLY, *v. a.* कलङ्क (nom. कलङ्कयति -यितुं), दुष् in caus. *See* To SOIL.

SULLY, *s.* कलङ्कः मालिन्यं, दूषणं, म्लानिः *f.* *See* SOIL, STAIN.

SULPHATE, *s.* (Of copper) ताम्रगर्भं, तुत्थं —(Of iron) कासीसं, का-शीशं, हंसलोमशं, धातुशेखरः, नयनौषधं, '*green sulphate,*' *see* under IRON, *s.*

SULPHUR, *s.* गन्धकः, गन्धिकः, गन्धाश्मा *m.* (न्), सौगन्धिकः, सुगन्धिकः, गन्धमोदनं, अतिगन्धः, क्रूरगन्धः, गन्धपाषाणः, सर्पारिः *m.*, धातुवैरी *m.* (न्), शुल्वारिः *m.*, पामारिः *m.*, पामघ्नः, कीटघ्नः, शुकपुच्छः.

SULPHUREOUS, *a.* गन्धकमयः -यी -यं, गन्धकयुक्तः -क्ता -क्तं, गन्धकगुणकः -का -कं, गन्धकगुणविशिष्टः -ष्टा -ष्टं, गन्धकधर्मकः -का -कं.

SULPHURET, *s.* (Of iron) पांशुकासीसं, ताप्यं, धातुमाक्षिकं.—(Of mercury) कज्जली.

SULTRINESS, *s.* निर्वातत्वं -ता, अत्युष्णता, वातहीनता, वायुहीनता.

SULTRY, *a.* निर्वातः -ता -तं, अत्युष्णः -ष्णा -ष्णं, वातहीनः -ना -नं, वायुहीनः &c., अत्युष्णबाष्पविशिष्टः -ष्टा -ष्टं; 'sultry vapour,' उष्णबाष्पः, मरीचिका, मृगतृष्णा.

SUM, *s.* (Aggregate, total) संख्या, कार्त्स्न्यं, समुदायः, समाहारः, समवायः, गणनं.—(Substance, amount) सारः, अर्थः, सारांशः, गर्भः, तात्पर्यं.—(Compendium), *see* SUMMARY, *s.*—(Sum of money) धनभागः, धनांशः, कियद्धनं, किञ्चिद्धनं; 'small sum of money,' धनलेशः, धनाल्पिका, किञ्चिद्धनं, अल्पधनं; 'large sum,' धनबाहुल्यं, बहुधनं, 'any very large sum,' परार्द्धं.—(In arithmetic, figures set for an arithmetical operation) राशिः *m. f.*, पिण्डः.—(In sum) संक्षेपतस्, *see* SUMMARILY.

To SUM, *v. a.* (Add together) राशीकृ, संख्या, परिसंख्या, परिगण्, संकल् (c. 10. -कलयति -यितुं), सङ्कलनं कृ, समाहृ, समाहरणं कृ, समीकृ. —(Sum up, condense) उक्तोपसंहारं कृ, उक्तसमाहारं कृ, उक्तप्रत्याहारं कृ, उक्तोपसंक्षेपं कृ, उक्तसारं वद्.

SUMMARILY, *adv.* संक्षेपतस्, संक्षेपात् -पेण, समासतस्, *see* CONCISELY; 'to declare *summarily,*' संक्षेपतो वद्, सम्प्रवच्.

SUMMARY, *a.* सांक्षेपिकः -की -कं, सामासिकः -की -कं. *See* CONCISE, *a.*

SUMMARY, *s.* संक्षेपः, संग्रहः, सारः, संक्षिप्तग्रन्थः, ग्रन्थस्थविषयानुक्रमणिका. *See* COMPENDIUM.

SUMMED, *p. p.* राशिगतः -ता -तं —(Summed up) उपसंहृतः -ता -तं.

SUMMER, *s.* ग्रीष्मः, ग्रीष्मकालः, ग्रीष्मसमयः, निदाघकालः, निदाघः, उष्णकालः, उष्णसमयः, उष्णः, उष्णकः, ऊष्मः, ऊष्मा *m.* (न्), उष्णागमः, ऊष्मागमः, उष्णोपगमः, तपः, तपाः *m.* (स्).

SUMMER-HOUSE, *s.* विलासमन्दिरं, केलिगृहं; 'with water-works,' जलमन्दिरं, जलयन्त्रगृहं, जलयन्त्रमन्दिरं, जलयन्त्रनिकेतनं, जलगृहं, धारागृहं, धारायन्त्रगृहं, समुद्रगृहं.

SUMMIT, *s.* अग्रं, शिखा, शिखरं, शेखरं, शृङ्गं, चूडा, कूटः -टं, पृष्ठं, उत्तुङ्गः, उच्छ्रयः. *See* TOP.

To SUMMON, *v. a.* आह्वे (c. 1. -ह्वयति -ह्वातुं), आह्वानं कृ, आह्वान (nom. आह्वानयति -यितुं), आकृ in caus. (-कारयति -यितुं), आकारणं कृ.

SUMMONED, *p. p.* आहूतः -ता -तं, कृताह्वानः -ना -नं, आकारितः &c., आवाहितः &c.; 'one who does not appear when summoned,' आहूतप्रपलायी *m.*

SUMMONER, *s.* आह्वाता *m.* (तृ), आह्वायकः, आह्वानकारी *m.* (न्).

SUMMONS, *s.* आह्वानं, आहूतिः *f.*, हूतिः *f.*, आह्वायः, आकारणं, आवाहनं.

SUMMUM-BONUM, *s.* परमार्थः, परार्थः, उत्तमार्थः.

SUMPTER, SUMPTER-HORSE, *s.* स्थूरी *m.* (न्), स्थौरी. *See* PACK-HORSE.

SUMPTUARY, *a.* व्ययविषयकः -का -कं, व्ययसम्बन्धी -न्धिनी -न्धि (न्).

SUMPTUOUS, *a.* महामूल्यः -ल्या -ल्यं, बहुमूल्यः &c. *See* COSTLY.

SUMPTUOUSLY, *adv.* अतिव्ययपूर्व्वं, महाव्ययपूर्व्वं, अतिव्ययेन.

SUMPTUOUSNESS, *s.* महामूल्यता, बहुमूल्यता, महार्घता, अतिव्ययः.

SUN, *s.* सूर्य्यः, रविः *m.*, भानुः *m.*, अर्कः, आदित्यः, भास्करः, सविता *m.* (तृ), अर्य्यमा *m.* (न्), विवस्वान् *m.* (त्), दिवाकरः, सूरः. The sun has innumerable names in Sanskrit, many of which are more properly epithets than names. Some of them are here collected with their meanings.—(As begetter and nourisher of all things, he is called) सविता *m.* (तृ), सवितृः, पूषा *m.* (न्), विश्वपाः *m.*—(As causing day-light) दिनकरः, दिवसकरः, दिवाकरः, दिनकृत् *m.*, प्रभाकरः, विभाकरः, अहस्करः, भास्करः.—(As lord of the day) अहर्पतिः *m.*, दिनपतिः, द्युपतिः *m.*, दिनप्रणीः *m.*—(As gem of the day) दिनमणिः *m.*, दिवामणिः *m.*—(As *gem of the sky*) नभोमणिः *m.*, खमणिः *m.*, वियन्मणिः *m.*—(Enemy of darkness) तिमिररिपुः *m.*, ध्वान्तारातिः *m.*, तमोनुदः, तमोपहः.—(Receptacle of light) भाकोषः, तेजःपुञ्जः.—(Circle of light) भानेमिः *m.*—(Meteor of the sky) खोल्कः.—(The illuminator of the sky) खद्योतनः, प्रद्योतनः, विरोचनः.—(*Eye of the sky*) नभश्चक्षुः *m.*—(Eye of the world) जगच्चक्षुः *m.* (स्), लोकचक्षुः *m.*—(*Beholder of the deeds of the world*) कर्मसाक्षी *m.* (न्), जगत्साक्षी *m.*—(*Lord of the constellations*) ग्रहराजः, ग्रहपतिः *m.*, तपनाम्पतिः *m.*, त्विषाम्पतिः *m.*—(Having *a thousand rays*) सहस्रकिरणः, सहस्रांशुः *m.*—(*Garlanded with rays*) किरणमाली *m.* (न्), अंशुमाली *m.*, मरीचिमाली *m.*—(Possessed of rays) अंशुमान् *m.* (त्), गभस्तिमान् *m.*, अंशुधरः, किरणी, गभस्तिः *m.*—(Lord of the rays) अंशुभर्त्ता *m.*—(Wielding rays) अंशुहस्तः, गभस्तिहस्तः, अंशुबाणः.—(*Having hot rays*) खरांशुः *m.*, खरकिरणः, घर्म्मांशुः *m.*, तिग्मांशुः *m.*, तीक्ष्णांशुः *m.*, चण्डांशुः *m.*, चण्डरश्मिः *m.*, चण्डमरीचिः *m.*, उष्णरश्मिः *m.*, चण्डदीधितिः *m.*, उष्णमरीचिः *m.*, उष्णकरः —(Having bright rays) शुभ्ररश्मिः *m.*—(Possessed of light) प्रतिभावान् *m.* (त्), भास्वान् *m.*, विभावान् *m.*, ज्योतिष्मान् *m.*, विभावसुः *m.*—(*The inflamer, or warmer*) तपनः, तापनः.—(The Ripener) पचतः, पचेलिमः.—(*The scorcher*) शुष्णः.—(Burner of the forehead) ललाटन्तपः.—(The surprising light) चित्रभानुः *m.*—(Sporting or roaming in the sky) गगनविहारी *m.*, गगनाध्वगः, खगः, खचरः.—(Symbol in the sky) गगनध्वजः —(Friend of the lotuses) पद्मबन्धुः *m.*, पद्मिनीकान्तः, पद्मिनीवल्लभः —(Sprung from the lotus) पद्मगर्भः.—(*Seated on a lotus*) पद्मासनः.—(Holding a lotus in his hand) पद्मपाणिः *m.*, पद्मकरः.—(*Drawn by seven horses*) सप्ताश्वः.—(Drawn by green horses) हरिदश्वः.—(*Ever-moving*) सदागतिः *m.*—(Lord of life) जीवितेशः —(*Possessed of jewels*) मणिमान् *m.*—(*Best of deities*) सुरोत्तमः.—(As son of Kaśyapa) काश्यपेयः, काश्यपिः *m.*—(*As descended from* Mṛtanda) मार्त्तण्डः, मृताण्डः, मृतण्डः.—(*As having been shorn of his beams by* Viśvakarma, the architect of the gods) विकर्त्तनः.—(As identified with the 12 ádityas) द्वादशात्मा *m.* (न्), द्वादशात्मकः. The 12 ádityas are the offspring of Aditi, and are the *emblems* of the *sun in each month of the year.* Hence they are

with the sun itself. Their names are सूर्यः, कहकः, वेदाङ्गः, भानुः m., इन्द्रः, रविः m., गभस्तिः m., यमः, स्वर्णरेताः m., दिवाकरः, मित्रः, विष्णुः m. Other names for the sun, of less obvious derivation, are the following: मतङ्गः, वर्षाः m. (स्), हंसः, इनः, हेलिः m., मिहिरः, भगः, मरीचिः m., मित्रः, गह्वरकः, ब्रध्नः, अहस्करः, विश्वकर्मा m., अर्यमा, विष्णुः, पूषा. The following are the names of some of the sun's wives, छाया, अश्विनी, प्रभा, संज्ञा, विश्वकर्मसुता, त्वाष्ट्री, सवर्णा, सवितृसूः f., तपती, सवर्णः m., वरा, सौरी, सूर्या. His sons are यमः or वैवस्वतः, शनिः m., अश्विनौ m. du. or अश्विनीकुमारौ m. du., कर्णः, सावर्णिः m., सुग्रीवः, रेवन्तः, रैवतः; 'his daughter; or the personified Tapti river,' तपती, तपनतनया, सूर्यतनया; 'his charioteer,' अरुणः, अनूरुः m., काश्यपिः m., गरुडाग्रजः, सूरसूतः, सूर्यसारथिः m.; 'three of his attendants,' माठरः, पिङ्गलः, दण्डः; 'a worshipper of the sun,' सौरः; 'the sun's disk,' सूर्यमण्डलं, see Disk; 'early morning sun,' बालार्कः, बालातपः, बालरविः; 'figure of the sun as drawn for worship,' सूर्यपत्रं; 'half-yearly passage of the sun,' अयनं, see Solstice; 'mansion of the sun,' सूर्यनक्षत्रं, सूर्यनिलयः; 'region of the sun,' सूर्यलोकः.—(Sun and moon) सूर्यचन्द्रमसौ m. du., चन्द्रार्कौ m. du., दिवाकरनिशाकरौ m. du., पुष्पदन्तौ m. du., पुष्पदन्तौ m. du.

Sun-beam, s. सूर्यरश्मिः m., सूर्यकिरणः, सूर्यमयूखः, सूर्यकरः, सूर्यांशुः m., तपनांशुः m., तपनकरः, भानुकरः. See Ray, s.

Sun-burnt, a. सूर्यतप्तः -प्ता -प्तं, रविदग्धः &c., सूर्यश्यामः &c.

Sunday, s. भानुवारः, रविवारः, अर्कवारः, आदित्यवारः, भट्टारकवारः, रविवासरः, भानुवासरः, अर्कदिनं, अर्कः.

To sunder, v. a. वियुज्, विप्रयुज्, पृथक्कृ. See To part, separate.

Sundered, p. p. (Divided in sunder) पृथक्कृतः -ता -तं, द्वैधीभूतः -ता -तं, द्वैधीकृतः -ता -तं, विभिन्नः -न्ना -न्नं, विच्छेदितः -ता -तं, विप्रयुक्तः -क्ता -क्तं.

Sun-dial, s. छायायन्त्रं, छायामण्डलं, शङ्कुः, सूर्यघटी.

Sun-dried, p. p. आतपशुष्कः -ष्का -ष्कं, आतपशोषितः -ता -तं.

Sundry, a. नाना indecl., विविधः -धा -धं, नानाविधः &c., पृथग्विधः &c., see Divers; 'sundries,' नानाद्रव्याणि n. pl., नानाविधवस्तूनि n. pl.

Sun-flower, s. सूर्यकमलः, सूर्यावर्त्तः, वेशवाला, आमकः, दिवाकरः, आमारः m. (न्), विषमायुः m., सवारिका; 'the flower,' सूर्यकमलं.

Sung, p. p. गीतः -ता -तं, परिगीतः &c.; 'by bards,' वन्दगीतः &c.

Sunk, p. p. मग्नः -ग्ना -ग्नं, निमग्नः &c., अवसन्नः -न्ना -न्नं, सन्नः &c., अवगाढः -ढा -ढं, निपातितः -ता -तं; 'in mud,' पङ्कमग्नः &c.

Sunken, a. गलत्कल्पः -ल्पा -ल्पं, खल्लीभूतः -ता -तं.

Sunless, a. असूर्यः -र्या -र्यं, अनादित्यः -त्या -त्यं, सूर्यहीनः &c.

Sunny, a. सूर्यतप्तः -प्ता -प्तं, रवितप्तः &c., सूर्यप्रकाशः &c., सूर्यातपव्याप्तः &c., सातपः -पा -पं, सार्कः -र्का -र्कं.

Sun-rise, s. सूर्योदयः, सूर्योदयकालः, अरुणोदयः, उदयः, उदयकालः, अभ्युत्थानं; 'before sun-rise,' सूर्ये अनुदिते.

Sun-set, s. सूर्यास्तं -स्तः, सूर्यास्तकालः, अस्तः -स्तं, दिनान्तः, दिवावसानं, निम्लुक् m., सन्ध्या; 'at sun-set,' अस्तङ्गते सूर्ये.

Sun-shine, s. सूर्यातपः, आतपः, सूर्यप्रकाशः, प्रकाशः, सूर्यतापः, सूर्यकान्तिः f., सूर्यतेजस् n., सूर्यद्युतिः f., सूर्यालोकः, आलोकः, सूर्यकिरणः, कला.

To sup, v. n. or a. रात्रिभोजनं कृ, नक्तभोजनं कृ.—(Sip), see To sip.

Super. A prefix rendered by अति, अधिक, अतिशय &c., in comp.

To super-abound, v. n. अतिबहुलीभू, अतिविपुलीभू, अतिप्रचुरीभू.

Super-abundance, s. अतिबाहुल्यं, अतिवैपुल्यं, अतिप्राचुर्यं, आधिक्यं, अतिरिक्तता, आतिरेक्यं, अपव्ययः. See Exuberance.

Super-abundant, a. अतिबहुलः -ला -लं, अतिविपुलः &c., अतिप्रचुरः &c., अतिरिक्तः -क्ता -क्तं, अतिशयी -यिनी -यि (न्), अधिकः &c. See Exuberant.

To super-add, v. a. अधिकं समायुज् or संयुज्, अधिकसंयोगं कृ.

Super-annuated, a. अतिवयस्कः -स्का -स्कं, वयोऽधिकः -का -कं, वयोऽतीतः -ता -तं, वार्धक्याक्षमः -मा -मं, वार्धक्यातुरः -रा -रं.

Super-annuation, s. अतिवयस्कता, वयोऽतीतता, वार्धक्याक्षमता.

Superb, a. अतिशोभनः -ना -नं, श्लाघ्यः &c. See Magnificent.

Supercilious, a. उद्धतबुद्धिः -द्धिः -द्धि, दर्पादुपेक्षकः -का -कं. see Lofty.

Superciliousness, s. दर्पादुपेक्षा, दर्पात् परोपेक्षा. See Haughtiness.

Supererogation, s. अत्याचारः, अतिरिक्ताचारः, अत्याचरणं, अतिरिक्ताचरणं, नियमातिरेकः, विध्यतिरेकः, कर्त्तव्याधिक्यं, आम्रमत्वं.

Supererogatory, a. नियमातिरिक्तः -क्ता -क्तं, कर्त्तव्यातिरिक्तः &c., विध्यतिरिक्तः &c., अतिरिक्तः -क्ता -क्तं, आत्मः -त्मा -त्मं.

Superexcellence, s. अत्युत्कृष्टता, अत्युत्तमता, सर्वश्रेष्ठता.

Superexcellent, a. अत्युत्कृष्टः -ष्टा -ष्टं, अत्युत्तमः -मा -मं, सर्वोत्कृष्टः -ष्टा -ष्टं, सर्वश्रेष्ठः &c., सर्वोत्तमः -मा -मं, श्रेष्ठः &c.

Superficial, a. (Pertaining to, or being on the surface) बाह्यः -ह्या -ह्यं, बाहीकः -का -कं, बहिःस्थः -स्था -स्थं, बहिर्भागस्थः &c., बहिर्लग्नः -ग्ना -ग्नं, पृष्ठस्थः &c., बहिस् or पृष्ठ in comp.; 'superficial view,' बाह्यदृष्टिः f.; 'superficial contents,' पृष्ठफलं.—(Shallow, not deep) अगाधः -धा -धं, अल्पः -ल्पा -ल्पं, see Slight; 'superficial scholar,' किञ्चिज्ज्ञः, अल्पज्ञः, क्षुद्रज्ञः, शास्त्रगन्धी, see Smatterer.

Superficially, adv. बाह्यतस्, बहिर्भागे, बहिस्. See Slightly.

Superficies, s. तलं, पृष्ठं, विस्तारः, बहिर्भागः, उपरिस्थभागः.

Superfine, a. अत्युत्तमः -मा -मं, अत्युत्कृष्टः -ष्टा -ष्टं, अतिसूक्ष्मः &c.

Superfluity, s. अतिरेकः, आतिरेक्यं, अतिरिक्तता, आधिक्यं, अतिप्राचुर्यं, प्रयोजनातिरेकः, प्रयोजनातिरिक्तता, वैयर्थ्यं.

Superfluous, a. अतिरिक्तः -क्ता -क्तं, अधिकः -का -कं, प्रयोजनातिरिक्तः &c., आवश्यकातिरिक्तः &c., अनर्थकः -का -कं, निष्फलः -ला -लं.

Superhuman, a. अतिमानुषः -षी -षं, अतिमनुष्यः -ष्या -ष्यं, अतिमर्त्यः -र्त्या -र्त्यं, मानुष्यातिगः -गा -गं, अमानुषः &c., पुरुषातिगः &c., अलौकिकः -की -कं; 'having superhuman intellect,' अतिमनुष्यबुद्धिः -द्धिः -द्धि; 'superhuman power,' विभूतिः f., भूतिः f., प्रभावः; 'possessed of it,' विभूतिमान् -मती -मत् (त्).

Superincumbent, a. उपरिस्थः -स्था -स्थं, उपरिवर्त्ती -र्त्तिनी -र्त्ति (न्).

To superinduce, v. a. अध्यानी (c. 1. -नयति -नेतुं), अनुनी, अध्यारुह् in caus.

To superintend, v. n. अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अध्यक्षः -क्षा -क्षं भू, अध्यक्षतां कृ, अवेक्ष्, उपद्रष्टृ, कार्यावेक्षणं कृ. See To oversee.

Superintendence, s. अध्यक्षता -त्वं, अधिकारः, अधीकारः, अधिष्ठितिः f., अधिष्ठातृत्वं, अधिष्ठानं, अधिकर्म n. (न्), अधीक्षता, अवेक्षा, कार्यावेक्षणं, कार्यदर्शनं, कार्याध्यक्षं, कार्याध्यक्षता.

Superintendent, s. अध्यक्षः, अधीक्षः, अधिकारी m. See Overseer.

Superior, a. (Upper) उपरिस्थः -स्था -स्थं, ऊर्ध्वस्थः &c., ऊर्ध्वः -र्ध्वा -र्ध्वं.—(In rank or excellence) श्रेयान् -यसी -यः (स्), श्रेष्ठः -ष्ठा -ष्ठं, गरीयान् &c., वरीयान् &c., वरिष्ठः -ष्ठा -ष्ठं, ज्यायान् &c., श्रेष्ठ &c.,

विशिष्टः -ष्टा -ष्टं, प्रमुखः -खा -खं, प्रधानः -ना -नं, मुख्यः -ख्या -ख्यं, उत्कृष्टः &c., प्रकृष्टः &c., अधिकः -का -कं, प्रभविष्णुः -ष्णुः -ष्णु, वरः -रा -रं, गुरुः -र्वी -रु, ज्यायान् &c., see PRE-EMINENT; 'of superior worth,' गुणोत्कृष्टः &c., गुणाधिकः -का -कं; 'superior to the best,' परात्परः -रा -रं; 'to be superior,' विशिष् in pass. (-शिष्यते), अतिरिच् in pass. (-रिच्यते), 'action is superior to inaction,' अकर्म्मणः कर्म्म विशिष्यते or अकर्म्मणः कर्म्म ज्यायः, 'intellect is superior to action,' कर्म्मणो बुद्धिर् विशिष्यते or कर्म्मणो बुद्धिर् ज्यायसी.—(Beyond the influence of).

SUPERIOR, s. श्रेष्ठः, ज्येष्ठः, गुरुः.—(Of a convent) आश्रमगुरुः.

SUPERIORITY, s. श्रेष्ठता, श्रैष्ठ्यं, विशिष्टता, वैशिष्ट्यं, वैशेष्यं, प्रधानता, प्राधान्यं, उत्कृष्टता, उत्कर्षः, प्रमुखत्वं, प्रभविष्णुता, प्रागल्भ्यं, आधिक्यं, ऊर्द्ध्वस्थितिः f., प्राबल्यं, ज्येष्ठता, वरिष्ठता, बलीयस्त्वं, परिवृढिमा m. (न्), see PRE-EMINENCE.

SUPERLATIVE, a. परमः -मा -मं, आत्यन्तः -न्ता -न्तं, आत्यन्तिकः -की -कं, अतिशय or अति prefixed, see EXCESSIVE, SUPREME.—(In grammar) अतिशयार्थवाचकः -का -कं, परमावधिवाचकः &c.

SUPERLATIVELY, adv. अत्यन्तं, अतिशयेन, अति prefixed. See EXCESSIVELY.

SUPERNATURAL, a. अलौकिकः -की -कं, अतिमानुषः -षा -षं, मानुषासाध्यः -ध्या -ध्यं, अपौरुषेयः -यी -यं, मानवासाध्यः &c., अद्भुतः &c. See SUPERHUMAN.

SUPERNATURALLY, adv. अलौकिकं, अतिमानुषं, अलौकिकप्रकारेण.

SUPERNUMERARY, a. or s. अतिसंख्यः -ख्या -ख्यं, संख्यातिरिक्तः -क्ता -क्तं, नियतसंख्यातिरिक्तः &c., नियमातिरिक्तः &c., अधिकः -का -कं, अतिरिक्तः &c.

SUPERSCRIPTION, s. उपरिलेखः, उपरिस्थलेखः, बहिर्लेखः.

To SUPERSEDE, v. a. (Render void) लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ, 'this system has superseded all the others,' अयं मार्गः सर्व्वेषाम् अपरेषां लोपस्य कारणं बभूव.—(Set aside, displace) निरस् (c. 4. -अस्यति -सितुं), निराकृ, निःसृ in caus., अपसृ.

SUPERSEDED, p. p. निरस्तः -स्ता -स्तं, निराकृतः -ता -तं; 'a superseded wife,' अध्यूढा, अधिविन्ना, कृतसापत्निका, कृतसापत्नका, कृतसापत्नी, कृतसापत्नीका, कृतसपत्निका.

SUPERSTITION, s. (Over exactness in religion) अतिभक्तिः f., अत्याचारः, अतिरिक्तभक्तिः f., अतिरिक्ताचारः.—(Belief in supernatural agency, &c.) शकुनपिशाचादिविश्वासः, शकुनपिशाचादिभक्तिः f., पिशाचादिनिष्ठा, शकुनादिविश्वासः.—(False religion) अन्यथाधर्म्मः, मिथ्याधर्म्मः, अन्यथाभक्तिः f., अन्यथामार्गः, अशास्त्रीयभक्तिः f., अविधिनिष्ठा, अविधिश्रद्धा, अवैधक्रिया.

SUPERSTITIOUS, a. (Over exact in religion) अत्याचारी -रिणी -रि (न्), अतिरिक्ताचारी &c.—(Credulous regarding supernatural agency, &c.) पिशाचादिविश्वासी &c., शकुनपिशाचादिविश्वासी &c., शकुनादिनिष्ठः -ष्ठा -ष्ठं, पिशाचादिनिष्ठः &c.—(Falsely religious) अन्यथाधर्म्मी -र्म्मिणी &c., अन्यथामार्गी &c., अवैधकर्म्मी &c., असत्यधर्म्मी &c., मिथ्याधर्म्मी &c.—(Proceeding from superstition) मिथ्याधर्म्ममूलकः -का -कं, अत्याचारमूलकः &c., पिशाचादिनिष्ठाप्रयुक्तः -क्ता -क्तं.

SUPERSTRUCTURE, s. वास्तूपरिस्थभवनं, उपरिव्यूहनं. See STRUCTURE.

To SUPERVENE, v. n. अकस्माद् उपस्था (c. 1. -तिष्ठति -स्थातुं) or आगम्.

To SUPERVISE, SUPERVISION, see To SUPERINTEND, INSPECT, &c.

SUPINE, a. (Lying with the face upward) उत्तानशयः -या -यं, उत्तानः -ना -नं, ऊर्द्ध्वमुखः -खा -खी -खं.—(Indolent) अलसः -सा -सं.

SUPINENESS, s. अलसता, आलस्यं, तन्द्रा. See INDOLENCE.

SUPPER, s. नक्तभोजनं, रात्रिभोजनं, सायम्भोजनं, नि[illegible]भोजनं.

To SUPPLANT, v. a. (Trip up), see the word.—(Displace by stratagem) छलेन निरस् (c. 4. -अस्यति -सितुं) or निराकृ or अपसृ (c. 10. -सारयति -यितुं), वञ्च् (c. 10. वञ्चयति -यितुं) see To DISPLACE.

SUPPLE, a. कोमलः -ला -लं, मृदुः -दुः -द्वी -दु, सुनम्यः -म्या -म्यं, सुखनम्यः &c., नमनशीलः -ला -लं. See PLIANT, FLEXIBLE.

SUPPLEMENT, s. परिशिष्टं, परिबृंहणः, उत्तरखण्डः, अतिदेशः, अतिनिर्देशः, न्यूनतापूरणं, न्यूनताभरणं.

SUPPLEMENTAL, SUPPLEMENTARY, a. अतिनिर्दिष्टः -ष्टा -ष्टं, अतिदिष्ट &c., अतिनिर्देशकः -का -कं, न्यूनतापूरकः -का -कं, न्यूनताभरक &c.

SUPPLENESS, s. कोमलता, मृदुता, सुनम्यता, नमनशीलता.

SUPPLIANT, SUPPLICANT, a. or s. अर्थी -र्थिनी -र्थि (न्), प्रार्थकः -का -कं, प्रार्थयिता -त्री -तृ (तृ), आर्त्तकः &c., अभ्यर्थयमानः -ना -नं, कृताञ्जलिः -लिः -लि, बद्धाञ्जलिः &c., शरणार्थी &c., शरणागतः -ता -तं.

SUPPLIANTLY, adv. कृताञ्जलिवत्, बद्धाञ्जलिवत्, अञ्जलिकर्म्मपूर्व्वं.

To SUPPLICATE, v. a. अञ्जलिकर्म्मपूर्व्वं प्रार्थ् (c. 10. -अर्थयते -ति -यितुं) or अभ्यर्थ् or सम्प्रार्थ् or अर्थ्, अञ्जलिं कृत्वा याच्. See To ENTREAT.

SUPPLICATED, p. p. प्रार्थितः -ता -तं, अनुनीतः -ता -तं. See ENTREATED.

SUPPLICATION, s. प्रार्थनं -ना, अर्थः, याञ्चा, अनुनयः. See ENTREATY.

SUPPLIED, p. p. सम्पन्नः -न्ना -न्नं, युक्तः -क्ता -क्तं, सम्भृतः -ता -तं; 'as an ellipsis,' अध्याहृतः -ता -तं; 'is plentifully supplied,' आपूर्य्यते.

To SUPPLY, v. a. उपस्था in caus. (-स्थापयति -यितुं), उपक्लृप्, परिक्लृप्, सम्भृ, पृ (c. 10. पूरयति -यितुं), सम्पृ, see To FURNISH, PROVIDE.—(Serve instead of), see To SERVE.—(Supply an ellipsis) अध्याहृ, अभ्यूह्, ऊह्, अभ्यूहं [illegible] समासाध्याहारं कृ.

SUPPLY, s. सम्भारः, सम्भृतिः f., सामग्री, see STOCK, STORE.—(Supplies) निर्वाहः, पाथेयकं, पाथेयं, see PROVISIONS.

To SUPPORT, v. a. (Uphold, sustain) आलम्ब् (c. 10. -लम्बयति -यितुं, c. 1. -लम्बते -म्बितुं), अवलम्ब्, समवलम्ब्, धृ (c. 10. धारयति -यितुं, c. 1. धरति, धर्त्तुं), संधृ, परिधृ, अभिधृ, संस्तम्भ्, उपस्तम्भ्, अवष्टम्भ्, विष्टम्भ्, संग्रह्, see To MAINTAIN; 'how shall I support life?' कथं जीवितं धारिष्ये; 'to support with the hand,' करालम्बनं कृ, 'this point being supported on the finger,' तस्मिन् बिन्दौ अङ्गुल्या अवलम्बिते.—(Support with food, &c.) भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्त्तुं), सम्भृ, भरणं कृ, भृतिं दा, पुष् (c. 10. पोषयति -यितुं), पोषणं कृ, पुष्टिं कृ, पाल् (c. 10. पालयति -यितुं), आलम्ब्, आलम्बनं कृ, वृध् in caus., संवृध्, भू in caus.; 'to support a family,' कुलभरणं कृ, कुलालम्बनं कृ, तन्त्र् (c. 10. तन्त्रयते -यितुं), 'to support one's self,' निर्वाहं कृ.—(Bear, endure) सह्, विषह्, see To ENDURE, SUFFER.—(Help) उपकृ, उपग्रह्, अनुग्रह्.—(Vindicate, make good), see To MAINTAIN.—(Support the courage, &c.), see To ENCOURAGE, CONSOLE, &c.

SUPPORT, s. (Act of supporting) आलम्बनं, अवलम्बनं, धारणं, उपस्तम्भनं, अवष्टम्भनं, संस्तम्भनं, संग्रहः -हणं; 'support of life,' प्राणधारणं, प्राणोपष्टम्भः, प्राणयात्रा, प्राणस्थितिः f.—(Supporting with food, &c.) भरणं, पोषणं, पुष्टिः f., पालनं, प्रतिपालनं, भृत्या पालनपोषणं, सम्भारः, सम्भृतिः f., संवर्धनं.—(Means of subsistence) उपजीवनं, उपजीविका, see MAINTENANCE, SUBSISTENCE.—(That

which upholds) आधारः, धारणं, आलम्ब, -म्बनं, अवलम्बनं, उपस्तम्भः, अवष्टम्भः, उपघ्नः, आश्रयः, उपष्टम्भः, 'contiguous support,' अन्तिकाश्रयः.—(Help), *see* HELP

SUPPORTABLE, *a.* सह्यः -ह्या -ह्यं, सहनीयः -या -यं. *See* TOLERABLE.

SUPPORTED, *p. p.* (Upheld) आलम्बितः -ता -तं, अवलम्बितः &c., उत्तम्भितः -ता -तं, उपस्तम्भितः &c., अवष्टम्भितः &c., उपष्टब्धः -ब्धा -ब्धं, अवष्टब्धः &c., आधृतः -ता -तं, धारितः &c., आधारितः &c., साधारः -रा -रं; 'with the hand,' करालम्बितः &c., दत्तहस्तः -स्ता -स्तं.—(Maintained) भृतः -ता -तं, सम्भृतः &c., पोषितः &c., *see* MAINTAINED.

SUPPORTER, *s.* (Upholder) आलम्बी *m.* (न्), धारकः, धारी *m.* (न्), धरः, उपस्तम्भकः, अवष्टम्भकः, आलम्बकारी *m.*, उपस्तम्भकारी *m.*, उद्वहः.—(Maintainer) भर्त्ता *m.* (र्तृ), पोषकः, *see* MAINTAINER; 'of a family,' कुलालम्बी *m.* -म्बिनी *f.*, कुलोद्वहः, कुलाधिः *m.*

SUPPOSABLE, *a.* मन्तव्यः -व्या -व्यं, भावनीयः -या -यं, कल्पनीयः &c.

To SUPPOSE, *v. a.* (Conceive to be, assume) क्लृप् (c. 10. कल्पयति -यितुं), मनसा क्लृप्, सम्भू (c. 10. -भावयति -यितुं), विभू, भू, उपन्यस्, अप्रमाणपूर्व्वम् उपन्यस्, आहार्य्यारोपं कृ.—(Imagine, infer) मन् (c. 4. मन्यते, मन्तुं), विभू, तर्क्, अवगम्, अनुमा, आशङ्क्, *see To* THINK, INFER.—(Required to exist, presuppose) पूर्व्वं or अग्रे क्लृप् or भू in caus., अस्तित्वदर्शनं कृ, अस्तित्वप्रदर्शनं कृ.

SUPPOSED, *p. p.* कल्पितः -ता -तं, भावितः &c., मतः &c., अनुमितः &c.; 'for various reasons it is supposed,' अनेकहेतुभिर् अनुमीयते.

SUPPOSITION, SUPPOSAL, *s.* कल्पना, भावना, अनुमानं, अनुमितिः *f.*, तर्कः, वितर्कः, युक्तिः *f.*, उपन्यासः, पक्षः. *See* HYPOTHESIS.

SUPPOSITITIOUS, *a.* कृत्रिमः -मा -मं, कल्पितः -ता -तं, छलेन सद्वस्तुस्थाने स्थापितः -ता -तं, 'child,' पुत्रप्रतिनिधिः *m.*

To SUPPRESS, *v. a.* (Conceal) उपगुह् (c. 1. -गूहति -हितुं), निगुह्, गुह्.—(Restrain, obstruct) नियम् (c. 1. -यच्छति -यन्तुं), विनियम्, निरुध् (c. 7. -रुणद्धि -रोद्धुं), अवरुध्, संरुध्, रुध्, निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), स्तम्भ् (c. 9. स्तभ्नाति, c. 10. स्तम्भयति -यितुं), निवृ (c. 10. -वारयति -यितुं), वृ in caus., विधृ, यन्त्र् (c. 10. यन्त्रयति -यितुं), जि (c. 1. जयति, जेतुं), निबर्ह् (c. 10. -बर्हयति -यितुं); 'to suppress one's passions,' इन्द्रियाणि जि or निग्रह् or दम्; 'one who suppresses his passions,' जितेन्द्रियः; 'to suppress anger,' क्रोधं जि or निग्रह्, or expressed by अन्तर् in comp.; as, 'one who suppresses his anger,' अन्तःक्रोधी *m.* (न्), जितक्रोधः; 'his tears,' अन्तर्बाष्पः; 'to suppress disturbances,' कलहकण्टकमर्दनं कृ, 'the voice,' वाक्स्तम्भं कृ, वाग्रोधं कृ; 'the breath,' श्वासावरोधं कृ.

SUPPRESSED, *p. p.* (Concealed) उपगूढः -ढा -ढं, निगूढः &c.—(Restrained, obstructed) स्तम्भितः -ता -तं, रुद्धः -द्धा -द्धं, निगृहीतः -ता -तं, यतः &c., अनुपोढः &c., *see* RESTRAINED; or expressed by अन्तर् in comp.; as, 'suppressed anger,' अन्तःक्रोधः; 'suppressed fever,' अन्तर्दाहः.

SUPPRESSION, *s.* (Restraint, stoppage) नियमनं, निगृहीतिः *f.*, निग्रहः -हणं, यन्त्रणं, संयमः -मनं, रोधः, अवरोधः, स्तम्भः -म्भनं, अवष्टम्भः, आयामः, निवारः -रणं; 'of the breath,' श्वासरोधः, श्वासावरोधः; 'of the voice,' वाक्स्तम्भः, 'of the urine,' मूत्रावरोधः, मूत्रावष्टम्भः; 'of the passions,' इन्द्रियजयः, इन्द्रियनिग्रहः, कामावसायः; 'of feeling,' प्रतिसन्धानं.—(Concealment) गोपनं, अपवारणं, संवरणं, अप्रकाशनं, अपलापः.

To SUPPURATE, *v. n.* पूय् (c. 1. पूयते -यितुं), पक्वः -क्वा -क्वं भू, पक्कीभू, परिपक्कीभू. *See To* MATURATE, *v. n.*

SUPPURATION, *s.* पाकः, परिपाकः, पूयनं, संस्रावः, *see* MATURATION

SUPPURATIVE, *a.* पाचकः -का -कं, पाचनः &c. *See* MATURATIVE.

SUPREMACY, *s.* आधिपत्यं, प्रभुत्वं -ता, प्रधानता -त्वं, प्राधान्यं, प्रधानाधिकारः, ईशिता -त्वं, प्रभविष्णुता -त्वं, ऐश्वर्य्यं, मुख्यता -त्वं, मुख्याधिकारः, स्वाम्यं, स्वामित्वं, श्रेष्ठत्वं.

SUPREME, *a.* (Highest in authority) प्रधानः -ना -नं, सर्व्वप्रधानः &c., ऐश्वरिकः -की -कं, ऐश्वरः -री -रं, सर्व्वोपरिस्थः &c., प्रभुः -भ्वी -भु, प्रभविष्णुः -ष्णुः -ष्णु, आधिकारिकः -की -कं, *see* PRE-EMINENT.—(Highest) परमः -मा -मं, पारमिकः -की -कं, परः -रा -रं, *see* CHIEF, 'supreme monarch,' परमराजः; 'supreme authority,' परमाधिकारः, प्रधानाधिकारः, ऐकपत्यं; 'supreme Being,' प्रधानं परमब्रह्म *n.* (न्), परब्रह्म *n.*, ब्रह्म *n.*, जगदात्मा *m.* (न्), चिद्रूपं, निर्गुणः, अखिलात्मा *m.*

SUPREMELY, *adv.* परमं, परं, अत्यन्तं, अतिशय or अति prefixed

SURAT, *s.* (Country on the western side of India) सुराष्ट्रः

SURD, *s.* (In algebra) करणीगतराशिः *m.*, करणीगतसंख्या, करणीगत

SURE, *a.* (Fixed, certain) स्थिरः -रा -रं, आवश्यकः -की -कं, आवश्यकः -का -कं, ध्रुवः -वा -वं, निश्चितः -ता -तं, सुनिश्चितः -ता -तं, असन्दिग्धः -ग्धा -ग्धं, निःसंशयः -या -यं, निःसन्देहः -हा -हं, अवश्यम्भावी -विनी &c.—(Having full confidence, certainly knowing) कृतनिश्चयः -या -यं, सनिश्चयः &c., जातनिश्चयः &c., दृढनिश्चयः &c., निश्चितमनस्कः -स्का -स्कं, निश्चितमनाः -नाः -नः (स्), संशयहीनः -ना -नं, सन्देहहीनः &c., निश्चयी &c.—(Secure) निर्भयः -या -यं. 'I am sure,' मम दृढनिश्चयो विद्यते, मम दृढज्ञानं जायते, मम स्थिरज्ञानं जायते, मम दृढप्रत्याशा विद्यते; 'to be sure,' अवश्यं, *see* CERTAINLY.

SURE, SURELY, *adv.* अवश्यं, नूनं, ध्रुवं, निश्चितं. *See* CERTAINLY

SURETY, *s.* प्रतिभूः *m.*, प्रातिभाव्यं, पारिभाव्यं, प्रतिनिधिः *m.*, लग्नकः, प्रात्ययिकः, बन्धकः, न्यासः. *See* SECURITY.

SURF, *s.* भङ्गिः -ङ्गी *f.*, भङ्गः, लहरिः -री *f.*, कल्लोलः, तरङ्गायितं

SURFACE, *s.* पृष्ठं, पृष्ठभागः, तलं -लः, बहिर्भागः, उपरिभागः, उपरिस्थभागः, विस्तारः, तलपर्य्यन्तः, दृश्याङ्गं, दर्शनाङ्गं, मुखं, 'of the earth,' भूतलं, भूपृष्ठं, पृथिवीतलं, क्षितितलं, क्षौणितलं, क्षितिपीठं, भूमुखं, कुतलं, धरोपस्थः; 'of a rock,' शिलातलं.

To SURFEIT, *v. a.* अत्यन्तभोजनदानेन वमनेच्छां जन् (c. 10. जनयति -यितुं), अतृप्तं तृप् in caus., अतिसौहित्यं जन्. *See To* GLUT, *v. a*

To SURFEIT, *v. n.* अतिभोजनेन वमनेच्छुः -च्छुः -च्छु भू.

SURFEIT, *s.* अतितृप्तिः *f.*, अतिसौहित्यं, अतिभोजनप्रयुक्ता वमनेच्छा.

SURFEITED, *p. p.* अतितृप्तः -प्ता -प्तं, अतिभोजनेन वमनेच्छुः -च्छुः -च्छु

SURGE, *s.* कल्लोलः, उल्लोलः, महोर्म्मिः *m. f.*, ऊर्म्मिः *m. f.*, भङ्गः, भङ्गिः -ङ्गी *f.*, तरङ्गः, वर्गेलः. *See* BILLOW.

SURGEON, *s.* शस्त्रवैद्यः, शस्त्रचिकित्सकः, शालाकी *m.* (न्), कायशल्यादिभिषक् *m.* (ज्), शल्यशास्त्रज्ञः; 'veterinary,' अश्ववैद्यः.

SURGERY, *s.* शल्यचिकित्सा, कायचिकित्सा, शस्त्रवैद्यकं, शस्त्रवैद्यकर्म्म *n.* (न्), शल्यशास्त्रं, शल्यं, आसुरी

SURGICAL, *a.* शस्त्रचिकित्सासम्बन्धी &c., शस्त्रवैद्यकर्म्मसम्बन्धी &c.

SURLINESS, *s.* कर्कशता, कार्कश्यं, वक्रशीलता, *see* MOROSENESS

SURLY, *a.* कर्कशः -शा -शं, वक्रशीलः -ला -लं. *See* MOROSE.

To SURMISE, *v. a.* शङ्क्, आशङ्क्, तर्क्, सम्भू in caus. *See To* SUSPECT

SURMISE, *s.* वितर्कः शङ्का आशङ्का संशयः *See* [illegible]

To SURMOUNT, *v. a.* अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अधिक्रम्, अभ्यतिक्रम्, अधिरुह् (c. 1. -रोहति -रोढुं), आरुह्, तीर् (c. 10. तीरयति -यितुं), पार् (c. 10. पारयति -यितुं), तॄ. *See To* OVERCOME.

SURMOUNTABLE, *a.* अतिक्रमणीयः -या -यं, अतिक्रम्यः &c., अधिगम्यः &c.

SURMOUNTED, *p. p.* अतिक्रान्तः -न्ता -न्तं, उत्तीर्णः -र्णा -र्णं, तीर्णः &c.

SURNAME, *s.* पद्धतिः -ती *f.*, कुलनाम *n.* (न्), उपनाम *n.*, उपपदं, उपाधिः *f.* Examples of surnames in Sanskrit are शर्मन् in विष्णुशर्मन्, and दासः in कालिदासः.

To SURNAME, *v. a.* उपनाम दा or कृ, पद्धतिं दा, कुलनाम दा.

SURNAMED, *p. p.* उपनामकः -का -कं, उपनामविशिष्टः -ष्टा -ष्टं.

To SURPASS, *v. a.* अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अतिशी (c. 2. -शेते -शयितुं), अतिचर् (c. 1. -चरति -रितुं), अतिरिच् in pass. (-रिच्यते), विशिष् in pass., श्रेष्ठः -ष्ठा -ष्ठं भू. *See To* EXCEED, EXCEL.

SURPASSABLE, *a.* अतिक्रमणीयः -या -यं, अतिक्रम्यः -म्या -म्यं.

SURPASSED, *p. p.* अतिक्रान्तः -न्ता -न्तं, जितः -ता -तं, निर्जितः &c., आक्रान्तः -न्ता -न्तं, पराजितः &c., अतीतः &c., अधरीकृतः &c. *See* EXCEEDED.

SURPASSING, *part.* or *a.* अधमः -मा -मं, अतिक्रामकः &c., *see* EXCEEDING, *a.*; often expressed by अति; as, 'surpassing the wind,' अत्यनिलः.

SURPLUS, *s.* अवशेषः, अतिरेकः, उच्छिष्टं, अधिकभागः, शेषभागः, समधिकभागः.

SURPLUS, *a.* अधिकः -का -कं, अवशिष्टः -ष्टा -ष्टं, उद्धृतः -ता -तं.

To SURPRISE, *v. a.* (Strike with wonder) विस्मि in caus. (-स्माययति -स्मापयति -ते -यितुं), विस्मयं जन् (c. 10. जनयति -यितुं), विस्मयं कृ, विस्मापनं कृ, आश्चर्य्यं जन्, चमत्कारं जन्, चमत्कृ.—(Come upon unawares) अकस्मात् or अचिन्तितम् आक्रम् or उपक्रम् or उपस्था or आगम् or आसद् or अवस्कन्द्.

SURPRISE, SURPRISAL, *s.* (Wonder) विस्मयः, आश्चर्य्यं, आश्चर्यं, चमत्कारः, चमत्कृतिः *f.*, चमत्क्रिया, चित्रं, अद्भुतरसः, कौतुकं -कं, कौतुकं.—(Coming upon unawares) अकस्मात् आक्रमणं or अवस्कन्दः -न्दनं.

SURPRISED, *p. p.* (Struck with wonder) विस्मितः -ता -तं, विस्मयान्वितः &c., विस्मयापन्नः -न्ना -न्नं, आगतविस्मयः -या -यं, जातविस्मयः &c., सविस्मयः &c., विस्मयाकुलः -ला -लं, चमत्कृतः -ता -तं, जातचमत्कारः -रा -रं; 'to be surprised,' विस्मितः -ता -तं भू or अस्, विस्मि (c. 1. -स्मयते -स्मेतुं), विस्मयं गम्.—(Come upon unawares) अकस्मात् आक्रान्तः -न्ता -न्तं or अवस्कन्दितः -ता -तं.

SURPRISING, *part.* or *a.* विस्मयजनकः -का -कं, विस्मयकारकः &c., विस्मापकः &c., विस्मापनः -ना -नं, आश्चर्य्यः -र्य्या -र्य्यं, आश्चर्य्यकरः -रा -रं, आश्चर्य्यकारकः -का -कं, चमत्कारी -रिणी -रि (न्), चमत्कारिकः &c., अद्भुतः -ता -तं, चित्रः -त्रा -त्रं, विचित्रः &c.; 'a very surprising thing,' महदाश्चर्य्यं.

To SURRENDER, *v. a.* (Resign, give up) त्यज्, परित्यज्, उत्सृज्, विसृज्, अपसृज्, उत्सर्गं कृ, उत्सर्जनं कृ, हा, विहा, मोक्ष्, सन्यस्, प्रत्यादिश्, प्रदा.—(Commit) अर्प् in caus. (-अर्पयति -यितुं), ऋ in caus., न्यस्, निक्षिप्, प्रतिपद् in caus., प्रदा, परिदा, दा, प्रयम् (c. 1. -यच्छति -यन्तुं).

To SURRENDER, *v. n.* वशं गम् or उपगम् or शत्रुवशं प्रविश्.

SURRENDER, *s.* त्यागः, परित्यागः, उत्सर्गः, उत्सर्जनं. *See* SUBMISSION.

SURRENDERED, *p. p.* त्यक्तः -क्ता -क्तं, परित्यक्तः &c., उत्सृष्टः -ष्टा -ष्टं.

SURREPTITIOUS, *a.* (Done by stealth) छलेन कृतः -ता -तं, *see* CLANDESTINE.—(Introduced fraudulently) छलेन निवेशितः, *see* FRAUDULENT.

SURREPTITIOUSLY, *adv.* छलेन, सकपटं. *See* CLANDESTINELY, FRAUDULENTLY.

SURROGATE, *s.* धर्म्माध्यक्षप्रतिनिधिः *m.*, धर्म्माधिपतिप्रतिनिधिः.

To SURROUND, *v. a.* परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं), संवेष्ट्, उपवेष्ट्, प्रवेष्ट्, परिवृ, आवृ, परिधा, उपस्था, परिगम्, परिवृत्, परिचर्, परी, अभिपरी, परिधा, अंसह्, मण्डलीकृ. *See To* ENCOMPASS, INCLOSE.

SURROUNDED, *p. p.* परिवेष्टितः -ता -तं, वेष्टितः &c., परिवृतः -ता -तं, आवृतः &c., वृतः &c., परिगतः -ता -तं, परिवीतः -ता -तं, संवीतः &c., परीतः &c., मण्डलितः &c., परिक्षिप्तः -प्ता -प्तं, पर्य्यवस्थः -स्था -स्थं, अभिवृतः -ता -तं. *See* ENCOMPASSED.

SURROUNDING, *s.* (The act) परिवेष्टनं. *See* ENCOMPASSMENT.

SURROUNDING, *part.* परिवेष्टकः -का -कं, परिवेष्टनकारी -रिणी &c., परिगतः -ता -तं, आवरकः -का -कं, परिचरकः &c.—(Neighbouring), *see* the word; 'surrounding place,' परिसरं.

SURTOUT, *s.* उत्तरीयं, प्रावारः -रकः, निचोलः -ली, कञ्चुकः *m.*

SURVEILLANCE, *s.* अध्यक्षता, निरूपणं, अपेक्षा. *See* INSPECTION.

To SURVEY, *v. a.* आलोक् (c. 10. -लोकयति -यितुं), अवलोक्, अभ्यवलोक्, समालोक्, विलोक्, निरीक्ष् (c. 1. -ईक्षते -क्षितुं), अवेक्ष्, समवेक्ष्, परीक्ष्, निरूप् (c. 10. -रूपयति -यितुं), दृश्, अनुदृश्, सन्दृश्, *see To* INSPECT, EXAMINE, SCRUTINIZE.—(Land) भूमापनं कृ, भूमिमापनं कृ, भूमिं परिमा.

SURVEY, *s.* निरीक्षा -क्षणं, अवलोकनं, निरूपणं, *see* INSPECTION.—(Of land) भूमापनं, भूमिमापनं.

SURVEYED, *p. p.* निरीक्षितः -ता -तं, आलोकितः &c. *See* INSPECTED.

SURVEYOR, *s.* (Of land, &c.) भूमापकः, भूमापनकृत्.

To SURVIVE, *v. a.* (Outlive another) अन्योत्तरं or परोत्तरं जीव् (c. 1. जीवति -वितुं), अन्यमरणोत्तरं जीव्, उत्तरं जीव्, उत्तरजीवी -विनी &c. भू, अधिककालं जीव्, *see To* OUTLIVE.

To SURVIVE, *v. n.* धृ (c. 6. ध्रियते), ध्रियमाणः -णा -णं भू, अवस्था.

SURVIVOR, SURVIVING, *s.* or *part.* ध्रियमाणः -णा -णं, उत्तरजीवी -विनी -वि (न्), परोत्तरजीवी &c., अन्योत्तरजीवी &c., परलोकोत्तरजीवी &c., अवशिष्टः -ष्टा -ष्टं, अनुगतः &c.—(Left alive on the field of battle) हतशेषः -षा -षं, हतशिष्टः -ष्टा -ष्टं.

SUSCEPTIBILITY, *s.* ग्रहणशीलता, ग्रहणक्षमता, ग्रहणशक्तिः *f.*, ग्राहकत्वं, वेदनक्षमता, वेदनग्राहकत्वं, ग्रहणोपयुक्तता, वेदनशीलता, वेदनपात्रता, ग्रहणपात्रता.

SUSCEPTIBLE, *a.* ग्राहकः -का -कं, ग्राही -हिणी -हि (न्), ग्रहणशीलः -ला -लं, ग्रहणक्षमः -मा -मं, ग्रहणशक्तः -क्ता -क्तं, वेदनक्षमः &c., वेदनग्राहकः -का -कं, गमनीयः -या -यं; 'of pain,' सुलभदुःखः -खा -खं, क्षिप्रदुःखी &c.; 'of disease,' सुलभरोगः -गा -गं, क्षिप्ररोगी -गिणी &c.; 'of anger,' सुलभकोपः -पा -पं, शीघ्रकोपी &c.; 'of warm passions,' शीघ्रमनोविकारी &c.

To SUSPECT, *v. a.* (Mistrust, doubt) शङ्क् (c. 1. शङ्कते -ङ्कितुं), आशङ्क्, परिशङ्क्, संशङ्क्, न विश्वस् (c. 2. -श्वसिति -तुं), रेक् (c. 1. रेकते -कितुं), आरेक्, संशयं कृ, संशी, संशयारोपं कृ, भी (c. 3. बिभेति, भेतुं); 'to suspect a fault,' दोषं or अपराधं शङ्क्; 'he suspects me of the crime,' मां दोषिणं परिशङ्कते or मां दोषेण परिशङ्कते; 'why do you suspect me?' किं मां शङ्कसे; 'I suspect the truth of what he says,' तस्य वचनम् सत्यं परिशङ्के; 'I suspect the sincerity of your repentance,' तव पश्चात्तापे शङ्के

[illegible] सन्ति मम [illegible]

SUSPECTED, p. p. शङ्कितः -ता -तं, आशङ्कितः &c., शङ्कितः &c., अविश्वस्तः -स्ता -स्तं ; 'to be suspected' शङ्कनीयः -या -यं, शङ्क्यः -ङ्क्या -ङ्क्यं.

To SUSPEND, v. a. (Hang up) उद्बन्ध् (c. 9. -बध्नाति -बन्द्धुं), बन्ध्, उद्बन्धनं कृ, प्रलम्ब् in caus., see *To* HANG.—(Make to depend) अवलम्ब् in caus. (-लम्बयति -यितुं), समवलम्ब्, समालम्ब्.—(Debar) निषिध्, निवृ in caus., वृ in caus.—(Cause to stop for a time) कियत्कालपर्य्यन्तं निवृत् (c. 10. -वर्त्तयति -यितुं), see *To* STAY, DELAY, &c.

SUSPENDED, p. p. (Hung up, made to hang) उद्बद्धः -द्धा -द्धं, प्रलम्बितः -ता -तं, लम्बितः &c., आलम्बितः &c., आन्दोलितः &c ; 'in a swing or loop,' शिक्यितः -ता -तं, आशिक्यः &c. ; 'suspended round the throat,' कण्ठलग्नः -ग्ना -ग्नं.—(Caused to cease for a time) कियत्कालपर्य्यन्तं निवर्त्तितः -ता -तं.

SUSPENSE, s. अनिश्चयः, अनिर्णयः, सन्देहः, संशयः, विकल्पः, अनिर्धारः -र्णं, मानसिकः m., कृताकृतं ; 'in suspense,' दोलायमानः -ना -नं, आन्दोलितमनाः -नाः -नः (स्), सन्देहदोलास्थः -स्था -स्थं, संशयस्थः &c.

SUSPENSION, s. (Hanging up) उद्बन्धनं.—(Delaying) विलम्बः -म्बनं.—(Suspension of work, cessation) कर्म्मनिवृत्तिः f., कर्म्मविच्छेदः, निवृत्तिः f., अवसानं, अवसानं.—(Interruption or intermission for a time) कियत्कालपर्य्यन्तं विच्छेदः or निवृत्तिः f. or रोधः or निरोधः.—(Causing to depend) अवलम्बनं.

